Taittiriyopanishad

Siksha Valli

With

- An Elaborate Index of Mantras and Topics
- Word-to-Word meaning of Mantras
- English Translation of Mantras (colour used magenta)
- Sankara Bhashya with mantra-pratikas highlighted with yellow colour(colour used red)
- English Translation of Sankara Bhashya (colour used blue)
- Vanamala Tika (in full in the body of the bhashya within bracket. Bhashyapratika in tika marked in blue font.)
- Anandagiri Tika (wherever necessary***** - 80% covered)
- Maniprabha Tika (wherever necessary)
- Sayana Bhashya (wherever necessary) with English Translation (colour used red)
- Sri Swami Satcidanandendra Sarasvati's tippani (in footnotes and in the body of bhashya and tika)
- Kailash Ashram Sri Swami Govindananda tippani(in footnotes and in the body of bhashya and tika)
- Sri Subramania Sastri's tippani (in footnotes)
- A continuous reading of Bhashya a tthe beginning of each anuvaka.
- Copious Notes of Pujya Swamiji's Bhashya Classes (1990-94 course)
- Copious Notes of Sri Swami Paramarthananda's Upanishad Classes
- Grammatical Notes (of dhatus and etymologies)
- Appendix (see below)

* In some places the Vanamala Tika appears to have borrowed sentences of Anandagiri Tika. Hence in those places Anandagiri Tika has been omitted)

Note:

1) The pratikas of the mantra appearing in the Bhashya have been highlighted with yellow colour.
2) The pratikas of the Bhashya appearing in the tika have been bolded and italicised.
3) All the headings in red colour indicate what follows is Bhashya.
4) The tikas have been incorporated within the bhashya text and appear within brackets) . If they are connecting tikas, they have been placed before the respective bhashya sentence. If they are explanatory tikas, they are placed in the middle of the bhashya sentence depending upon which word has been explained. Tippanis are generally given as footnote. In some places they also come along with the bhashya.

Appendix

A continuous reading of Upanishad Mantra*

Summary of the Sikshavalli (given by Sri Swami Paramarthananda)

*(with indications of svaras : Yellow highlight is udattasvara and blue highlight is svarita svara)

INDEX

INTRODUCTION..... 006

Introduction to upanishad study

Introduction to taittiriya

Origin of the name of the taittirya-sakha

The special features of this upanishad:

Commentaries on bhashya

FIRST ANUVAKA: **शान्तिपाठः** (शन्नो मित्रः)..... 014

देवताप्रार्थनम्

अपरब्रह्मस्तुतिः

शान्त्यभिधानत्रयस्य प्रयोजनम्

मङ्गलाचरणम्

भाष्य-अवतरणिका **..... ..... 027**

ग्रन्थसम्बन्धः

कर्ममात्राद् मोक्षः - पूर्वपक्षः

कर्ममात्रान्न मोक्षः - सिद्धान्तः

अशेषकर्मक्षपण-असम्भवः

नित्यकर्मभिः अनारब्धकर्मक्षपण-असम्भवः

विद्यां विना कामक्षय-असम्भवाच्च न सर्वकर्मक्षयः

नित्य-अकरणस्य प्रत्यवायजनकत्वमपि न तर्कसहम्

आरभ्यस्य स्वर्गस्य न मोक्षत्वम्

विद्यासहितकर्मभ्योऽपि न मोक्षः आरभ्यत्वात् तस्य

मोक्षस्य भावरूपत्वाद् अभावदृष्टान्तो न युक्तः

कर्तृनित्यत्वादपि न मोक्षनित्यत्वम्

अविद्यानिवृत्यर्थम् उपनिषदारम्भणीया

उपनिषद्-शब्दनिर्वचनम्

SECOND ANUVAKA: **शीक्षाध्यायः**

Sikshadhyaya (शीक्षां व्याख्यास्यामः)..... 046

सम्बन्ध-भाष्य

शीक्षाध्यायः

THIRD ANUVAKA: संहितोपासना

Samhitopasana (सह नौ यशः)..... 051

उपासनाफल-आशीर्वचनम्

संहितोपासनाप्रकाराः

उपासनाक्रमः

संहितोपासनाफलम्

FOURTH ANUVAKA: **विविध-जप-होम-मन्त्राः**

Japa-homa mantrah (यश्छन्दसां) 066

उत्तरग्रन्थसम्बन्धः

मेधाप्रार्थना

कार्यकरणयोग्यताप्रार्थनम्

ज्ञानार्थं प्रार्थना

श्रीकामस्य होममन्त्राः

शिष्यागमनार्थं मन्त्राः

जीवेश्वरैक्यप्रार्थना

प्रार्थनोपसंहारः

FIFTH ANUVAKA: **व्याहृत्यात्मब्रह्मोपासना**

Vyahrityupasana (भूर्भुवस्सुवरिति)..... 085

अनुवाकसंबन्धः

व्याहृतिपरिगणनम्

मह इति व्याहृतेः प्राधान्यम्

चतसृणां व्याहृतीनां प्रत्येकं चतुष्प्रकारत्वम्

व्याहृत्युपासनं वक्ष्यमाणविशेषणसहितम् एकमेव

अङ्गोपासनाफलम्

SIXTH ANUVAKA: **अन्तर्हृदय-उपासना**

Antarhrdaya-upasana (य एषोऽन्तर्हृदय) 102

महोब्रह्मोपासने स्थानादि

सम्बन्धभाष्य

व्याहृत्यात्मनो ब्रह्मण- उपलब्धिस्थानम् विशेषणानि च

उपासकस्य ब्रह्मप्राप्तये नाडीमार्गः

उपासनाफलम्

मनोमयात्मनो विशेषणान्तराणि

उपासनोपदेशविधिः उपसंहारश्च

SEVENTH ANUVAKA: **पाङ्क्तब्रह्म-उपासना**

Pankta-upasana (पृथिव्यन्तरिक्षम्) 116

अनुवाकविषयः

बाह्यपाङ्क्तत्रयम्

आध्यात्मिकपाङ्क्तत्रयम्

पाङ्क्तोपासनफलम्

EIGHTH ANUVAKA: **ओङ्कार-उपासनम्**

Omkara-upasana (ओमिति ब्रह्म) 123

संबन्ध-भाष्य - अनुवाकविषयः

ओङ्कारोपासनाविधिः

ओङ्कारस्तुतिः

NINETH ANUVAKA: कर्मणां पुरुषार्थसाधनम्

Duties of upasaka (ऋतं च स्वाध्याय)..... 134

कर्मणां पुरुषार्थसाधनम्

अनुवाकविषयः

मुमुक्षुणा अवश्यानुष्ठेयानि कर्माणि

स्वाध्यायप्रवचनयोः प्राधान्यम्

TENTH ANUVAKA: त्रिशङ्कोः आत्मदर्शनम्

Japa-mantra for knowledge (अहं वृक्षस्य)..... 142

मन्त्राम्नायः जपार्थः

त्रिशङ्कोः आत्मदर्शनम्

कर्मणः (परम्परया) ज्ञानहेतुत्वम्

ELEVENTH ANUVAKA: विद्योत्पत्त्यर्थमनुष्ठेयानि कर्माणि

Karmas as means for knowledge (वेदमनूच्य)..... 151

सत्यादिकर्त्तव्य-उपदेशप्रयोजनम्

द्विःकर्मोपदेशप्रयोजनम्

सत्यादीनि अनुष्ठेयानि

गुरुजनेषु कर्त्तव्यम्

दानस्य अवश्यकर्त्तव्यता

अनुष्ठानविषयकसंशये शिष्टाचारः प्रमामम्

उपसमहारः

विचारभाष्य..... **174**

केवलकर्मभ्यः न विःश्रेयसम्

विद्यासव्यपेक्ष-कर्मभ्यः अपि न मोक्षः

विद्याकर्मणोः समप्राधान्येन समुच्चितयोरपि न मोक्षहेतुता

ज्ञानकर्मसमुच्चय एव अनुपपन्नः

निरस्तकारकब्रह्मोपदेशे न श्रुतिविरोधः

कर्मणः काममूलत्वादपि विद्याकर्मणोः विरोधः

कर्मोपसर्जनपक्षस्य निरासः

स्वोत्पत्तौ तु अपेक्षते कर्माणि विद्या

विद्याया: गार्हस्थ्यकर्माणि एव अपेक्षितानि उत्पत्तौ इति न नियम:

कर्मणि श्रुते: यत्नाधिक्ये कारणम्

श्रवणादीनां साक्षाद् विद्यासाधनत्वम्

TWELFTH ANUVAKA: शान्तिपाठ:

Thanks giving & Peace Invocation (शन्नो मित्र).....206
SUMMARY.....208
TAITTIRIYA UPANISHAD MANTRAS.....211

तैत्तिरीयोपनिषत्

INTRODUCTION TO UPANISHAD STUDY

Veda divided into two *kanda*, section. *Purva* and *Uttara*. The division is made because the subject matter is different i.e., *anubandha catushtaya*. *Karma kanda* is solution to our relative problem. For example to eliminate poverty, *avahanti homam*. To eliminate unhealthiness, *navagrahahomam*. These are relative. Why? Subject to recurrence. It is *pravritti* and *nivritti*. Not problem centred on I. For that absolute solution is *jnanam* of oneself. Which is better? Firstly it is endless process Each relative problem has to be dealt with individually. You cannot solve them to your satisfaction at any time. You think everything is set now. Suddenly you find somebody changes against your expectation. Situations change. Suddenly some health problem crops up. So impracticable to solve relatively. The second defect is relative solution being relative it has other side of it. To avoid cold you go down. But it is hot there. It is only rearrangement of the problem. You come across another problem in a different set up. Side effects are in any relative solution. Shifting load from one shoulder to another shoulder. The pain also shifts. It gives a temporary relief. (*bhagavatam*). You are cheerful for the time being. You shift the problem from one to another and so too the solution. Finally there is no guarantee that the solved problem will not come back. Which doctor will say I have cured you. You need not come to me ever again. You will never fall sick. These relative solutions are given in karma *kanda*. It will appeal because it gives immediate relief. That is why Yoga does not appeal. *Ayurveda* does not appeal. *Kangshantah karmanam siddhim+ khipram hi manushe loke+* I want some money, some pleasure, not *moksha* now.

The solution given in *jnana kanda* is absolute. I get the knowledge of myself in such a manner, that the relative problem becomes insignificant in front of the knowledge. They are not removed. For example, a small candle will be a very powerful light in the midnight. Same how it will be in May at noon in Delhi? It is non-existent practically. You won't notice it. Theoretically it is there. But as far as you are concerned, it is not there. It is like mosquito biting the elephant. It is like making a line small be drawing a big line by the side rather infinite line. Vedantin knows these problems are bound to be there as body is subject to *prarabdha*. You cannot stop disease, old age, death, other people's criticism, cold and hot, nothing you can stop. You allow them to continue. But face them squarely. *Duhkheshu anudvighnamana+* I am *purnah, satyah, adhishthanah asmi*. In front of this knowledge they pale away. Others may think *jnani* also have problem. But in his own vision he does not see anything. *Ya nisha+ Guruna duhkhena na vicalyate+* Like *Anjaneya* for whom *goshpadikritavarasim*. If one wants only relative solutions then *karmakanda* is there. Both are available. You can choose. *Sreyasca preyasca+* If one is *viveki*, he will not vote for relative solutions. *Parikshya+* Now he turns towards *jnana*.

For knowledge, we need a *pramana*. That is *sabda pramana* of *sastra* at the end. Upanishadic portion alone is the *pramanam*. *Pramana* is in the form of words and sentences and sine they can mean different things, we have to have thorough analysis of them or *mimamsa* thorough *sadlinga* which we do in *sravana*.

Sravana defined as establishing the essence of teaching through *sadlinga*. *Upakramdi sadlingaih vedantanam tatparyaniscayah*. It is technical term. Dictionary meaning will

be hearing. That *tatparya* is *advaita, brhama satyam+* if we do systematic *vicara* because begins and ends with it, praises *advaita* and condemns *dvaita* etc. In this itself are there are many opinions. So it becomes important. As in *Gita* they say karma is primary or *bhakti* is *pradhana*. *Pramana-asambhavana nivrittih* takes i.e., freedom from doubt as to what the *pramana* wants to convey. I have received the message. Whether I accept it or not is different.

Manana There can be still problem. How can I be Brahman. How can Vedanta say I am Brahman. I am nondual. There are other *pramanas* like *indriya pratyaksha* which reveal *dvaita*, world is separate from me and my own experience about myself is I am *samsari*, finite etc. . So *pramanantara virodha* seems to be there. We have faith in what? *Pratyakasha* alone which we have used since childhood. I saw with my own eyes, we say. It is final. So when contradiction is there, we will vote for *pratyaksha* and doubt the validity of the *tatparya*. This is *prameya-asambhavana.* I may not express it outwardly out of respect or sympathy for teacher. They are great and so accept. In *puranas* etc. which talk about God, we have no problem because we have not formed any opinion about *Isvara*. So no contradiction. If God is said as all knowledgeable or all powerful, no obstacle to that statement. Nobody has ever experienced that God. But here it is not so. I am known to me very closely. This has to be negated. Other *sravana* knowledge is not solid. It is *sapratibandhaka jnanam*. We should have total conviction to proceed with our life depending on this knowledge. The solution the doubt should be removed by *mananam*, logical thinking. *Yuktitah citanam*. Doubt cannot go by puja and all. Reasoning is the only remedy. If the train leaves at 5.00 p.m. or 6.00 p.m. this doubt cannot go by chanting *adityakrdayam*. Lord Sun will not give the knowledge of time. The problem pertains to intellect and the solution also has to be at the level of intellect. That is why our literature is in the form of *samvada*, question and answer between teacher and student. How doubts are removed?

1) By understanding that Vedanta talks about *paramarthika satyam* and our experience deals with *vyavaharika* reality and there is no contradiction. Experience will continue to be *dvaitam*. Sun is millions of times the earth size. But after this knowledge also it will be of what size for seeing? Rajasthan appalam. **2)** The next thing is how I can be Brahman? All our subjective feelings need not be right. In dream we do experience very vividly. But it is false. So too in the wake of knowledge my subjective conclusions can prove to be wrong. All *siddhi granthas* are like that. **3)** Lastly I see the fallacies in the other conclusions because if Vedanta is *pramana* there must be something wrong in other conclusions.

What we receive from Upanishad from *Sravanam* is knowledge alone and it is not to be converted into knowledge. But is has *pratibandha* i.e., doubts. Knowledge is invalid as far as we are concerned. Knowledge per se has no invalidity. So long our mind poses doubts it is invalid. So the problem is with our mind. *Manana* is solution. It is called clear knowledge.

One more obstacle may be there called *viparita bhavana*, the old habitual thinking or orientation i.e., that I am a limited individual. **This is first**. *Dehatmabuddhi* it is called. My parentage, nationality, caste, sex or age or education. These things create a special personality out of me called ego or *ahankara* and differentiates me from everybody else. Our entire life style is based on this idea of our I. Whatever I do is pervaded by this I whether I am conscious of it or not. I buy something means all relative thoughts come into surface who will like

what? It is strongly entrenched in our subconscious mind. After vedantic study also, Vedantic I becomes another I instead of Vedantic I replacing the old I. It is put as a cover for the old I. *Dehatmabuddhi* is the factor for this. *Deha* includes gross and subtle. This creates other complications.

The second complication is we try to find relative solutions from the Vedantic knowledge because seeking relative solutions is very strong in us. They don't disappear. If there is kidney problem it will continue even after the study. But it does not consume me. Relative problems don't worry. If one expects freedom from relative problems, then it is called *viparita bhavana*. Expecting changes in the environment and situations and people because now I am a Vedantin is *viparita bhavana*. We also conclude that because nothing is changing, therefore I don't have knowledge. If this expectation goes away, this conclusion goes away, that is clear knowledge. I am Brahman not because of any condition, in spite of all problems. So I don't resist anything. If there is fear of any situation, then *viparita bhavana* has come in. *Prarabdhaya samarpitam +*

The third is we think we have not experienced the knowledge given by the *sastra*. We look to experience Brahman like any other object. That orientation is there. Any experience is limited by the three factors and what is experienced by experiencer is therefore finite. When there is infinite, there is no experiencer. Sleep is the maximum you can get if you try to experience infinite. You will keep on knocking the finite experiences. Infinite is a matter purely to be known. In any experience there are two factors, one is *caitanyam* and the other is name and form. This name and form makes me an experiencer and once it is resolved, I remain the *caitanyam*. Then even when I experience, I will know the status of experiencer is unreal. Like seeing small star, the experiencer of small star is unreal. This is another *viparita bhavana*. We brand ourselves as *ajnani*. We keep on postponing knowledge. I am an individual, My *moksha* is connected with set up and situations and Upanisdic study has to be converted to experience . They have to be removed by *nididhyasana*.

In *nididhyasana*, you knock off these conclusions and *bhavanas*. Take each one and knock off. I see I am not individual. All relations are temporal and based on impermanent *upadhi*. Any set up and fearful situations I bring to the mind and face and assert that they cannot touch my *purnatvam*. Expectation has to be knocked off the moment it arises in the mind. like when you come to the class, if empty you prefer a particular place. If already full, you sit where place is there. It does not bother you because what is important is the listening. Availability or non-availability of preferences does not bother. I am not worries over set up. I should tell in meditation. There is no such thing as Brahman experience, we have to see. It is *pratibodhaviditam matam*. I am Brahman. I cannot experience. *Nididhayasam* is therefore to remove the idea of experiencing Brahman. *Moksha* is my very nature. It is not going to come. It is not a future event, it is present fact. It is therefore owning up of the vision. Each one removes one *asambhavana*. When all the three are gone that is called knowledge. One cannot be replaced by other for particular problem. If doubt is there *nididhyasanam* will not work. In *nididhyasanam* we don't think and use logic. We only be the *vastu*. *Sastra* gives these three limbs *atma va are +. Apratipatti, mithyapratipatti* and *viparitapratipatti*. All are *ajnana pratyayas* only. All have to go.

Ultimately who has to give the certificate that I know. I myself know whether I know or not. It is not for others to recognise. I am *samsari* is my notion. I am free also is my knowledge.

Saguna dhyanam is not *antaranga sadhana* of *jnanam*. This *pramana* is called Vedanta (positional name), *jnanakanda* and *brahmavidya* (content-based name) and *upanishad* (functional name i.e., what it does). The word *Upanisad* is derived in this *upanishad bhashyam as upa nishannam va asyam parah sreyah iti*. *Sad* to reside, abide, be present. *Upa ni* added, it means to be closely present. Here *sreyas* is present closely in this *sastra*. By unlocking this Vedanta *sastra*, we can get *sreyas*.

How many Vedantas are there. Four. We have *upanisahds* from all Vedas. *Taittiriya* is one of them. Generally they occur at the end. There are four divisions. *Mantrabhaga*, (*stuti*-glorification of *devatas* etc), *Brahmanabhaga* (details of rituals), *Aranyaka bhaga* (*upasanas* on various deities and principles), and Upanishad (knowledge of Brahman). This is general classification. Exceptions are there. *Isa* in *Mantrabhaga*. (called *mantra-upanishad* or *samhitopanishad*). (*Isa* gains importance therefore since it is found in *Karmakanda* and said first in the verse *isa-kena+*) So too *Mundaka* is said to be? *Prasna* is said to be *brahmanopanishad*. *Taittiriya* is *aranyaka Upanishad*

INTRODUCTION TO TAITTIRIYA

Located in Krishna *Yajurveda* is *Taittiriya sakha* (Other is *Kathasakha* having *Katha-upanishad*. *Svetasvatara* also is in *Krishna yajur Veda*) which includes *Taittiriya samhita, Taittiriya Brahmana* etc. *Taittiriya Aranyaka* 7th 8th and 9th *Prapathaka*. The 10th and the last is called *Mahanarayana Upnishad*. 7th is called *Samhita Upanishad* because it talks of many *upasanas* based on *samhita* or *sandhi*. 8th and 9th are Brahma or *Anandavalli* and *Bhrugu Valli* together called *Varuni Upnishad* (where *vidya* is unfolded), the teacher being *Varuna* (even for the 2nd *Valli*) and the 10th is called *Yajniki Upanishad (Yajna-upayuktah mantrah* are revealed. *Yo devanam prathamam* etc is there. *Gayatri* is there. *sandhyavananda mantras* are there). The three *vallis* constituting the *Taittiriya Upanisad* have *Anuvakas*, subdivisions totalling 31. (12+9+10). *Valli* means creeper. Named after the first word. *Siksham vyakhyasyamah+* Second is *Brahmavida+ Ananda* is analysed. So *Anandavalli* also it is called. Or *Brahmanada-valli*. *Bhrugur Vai +* is third. So *Bhruguvalli*. The middle one only is dealing with *Brahmavidya*. The first and third are *upasanas* and some other *sadhanas* like karma.

ORIGIN OF THE NAME OF THE TAITTIRIYA-SAKHA

This name is probably derived because it was presented by a *rishi* named *Tittiri*. In fact the tradition presents the link as *Vaisampayana-Yaska-Tittiri-Atreya*. *Panini* writes "*Tittirina proktam Adhiyate Taittiriyah* (4.3.102 - *Tittiri-varatantu-Khandika-Ukhat Chan [tena proktam ityasmin vishaye*] आयनेयीनीयियः - आयन्-एय्-ईन्-ईय्-इय् - फढखछघां प्रत्ययादीनाम् ७.१.२)". *Puranas* (*Mahabharata* 12.319 and *Vishnu Purana* 3.5) present in the form of a story to teach some values also.

Vishnupurana

श्रीपराशरोवाच

यजुर्वेदतरोः शाखाः सप्तविंशन्महामुनिः ।

वैशम्पाययननामासौ व्यासशिष्यश्चकार वै ।। १

शिष्येभ्यः प्रददौ ताश्च जगृहुस्तेऽप्यनुक्रमात् ।। २

याज्ञवल्क्यस्तु तत्राभूद्ब्रह्मरातसुतो द्विज ।

शिष्यः परमधर्मज्ञः गुरुवृत्तिपरस्सदा ।। ३

ऋषिर्योऽद्य महामेरोः समाजे नागमिष्यति ।
तस्य वै सप्तरात्रात्तु ब्रह्महत्या भविष्यति ।।४
पूर्वमेवं मुनिगणैस्समयो यः कृतो द्विज ।
वैशम्पायन एकस्तु तं व्यतिक्रान्तवांस्तदा ।। ५
स्वस्रीयं बालकं सोऽथ पदा स्पृष्टमघादयत् ।। ६
शिष्यानाह स भो शिष्याः ब्रह्महत्यापहं व्रतम् ।
चरध्वं मत्कृते सर्वे न विचार्यमिदं तथा ।। ७
अथाह याज्ञवल्क्यस्तु किमेभिर्भगवान्द्विजैः ।
क्लेशितैरल्पतेजोभिश्चरिष्येऽहमिदं व्रतम् ।। ८
ततः क्रुद्धो गुरुः प्राह याज्ञवल्क्यं महामुनिम् ।
मुच्यतां यत्त्वयाधीतं मत्तो विप्रावमानक ।। ९
निस्तेजसो वदस्येनान् यत्त्वं ब्राह्मणपुङ्गवान् ।
तेन शिष्येण नार्थोस्ति ममाज्ञाभङ्गकारिणा । १०
याज्ञवल्क्यस्ततः प्राह भक्त्या एतत् ते मयोदितम् ।
ममाप्यलं त्वयाधीतं यन्मया तदिदं द्विज ।। ११
इत्युक्तो रुधीराक्तानि सरूपाणि यजूंषि सः ।
छर्दयित्वा ददौ तस्मै ययौ स स्वेच्छया मुनिः ।। १२
यजूंष्यथ विसृष्टानि याज्ञवल्क्येन वै द्विज ।
जगृहुस्तित्तिरा भूत्वा तैत्तिरीयोस्तु ते ततः ।। १३
ब्रह्महत्याव्रतम् चीर्णं गुरुणा चोदितैस्तु यैः ।
चरकाध्वर्यवस्ते तु चरणान् मुनिसत्तम ।। १४
याज्ञवल्क्योपि मैत्रेय प्राणायामपरायणः ।
तुष्टाव प्रयतस्सूर्यं यजूंष्यभिलषंस्ततः ।। १५
....
इत्येवमादिभिस्तेन स्तूयमानस्य वै रविः ।
वाजिरूपधरः प्राह व्रियतामिति वाञ्छितम् ।। २६
याज्ञवल्क्यस्तदा प्राह प्रणिपत्य दिवाकरम् ।
यजूंषि तानि मे देहि यानि सन्ति न मे गुरौ ।। २७
एवमुक्तो ददौ तस्मै यजूंषि भगवान् रविः ।
अयातयामसंज्ञानि यानि वेत्ति न तद्गुरुः ।। २८
यजूंषि यैरधीतानि तानि विप्रैर्द्विजोत्तम ।
वाजिनस्ते समाख्याताः सूर्योप्यश्वोऽभवद्यतः ।। २९
शाखाभेदास्तु तेषां वै दश पञ्च च वाजिनाम् ।
काण्वाद्यास्तु महाभाग याज्ञवल्क्याः प्रकीर्त्तिताः ।।३०

Vyasa gave four vedas to four disciples. *Paila-Rgveda; Vaisampayana-Yajurveda; Jaimini-Samaveda* and *Sumantu-Atharvaveda.* Once *Vaisampayana* was invited to

attend an assembly of sages and he accepted. But he could not make it and incurred the sin. To do absolve himself of the sin, he asked his 27 disciples to do *prayascitta-tapas* for his sake. His nephew brilliant *Yajnavalkya*, one of the disciples, volunteered to do the *prayascitta* himself, pointing out the incompetence of other disciples. *Vaisampayana* could not tolerate the insult meted out to his co-disciples and decided to disown *Yajnavalkya* who violated his commands. He asked him to give back the mantras taught to him. Because knowledge has not blessed and it has given him more arrogance. It seems *Yajnavalkya*, who is obedient, vomited the mantras with food, stained with blood and other disciples eager to know Veda, and prompted by *Vaisampayana*, absorbed those mantras by eating that food by taking the form of *Tittiri* birds (partridge bird) themselves. Hence the *sakha* got the name of *Taittiriya. Tittirribhih proktam*. (Here we have to understand that it is in the form of some subtle *sankalpa* by *Yajnavalkya* of uttering back the *mantras* which the other disciples picked up. It is resembled the birds eating vomited food and hence the *rishis* were said as *tittiri* birds. Or the symbolic idea is *Vaisampayana* might have asked *Yajnavalkya* to teach his co-students who were not upto the mark and *Yajnavalkya* did so and gave in assimilated form. Since digested by him, figuratively said as vomited. *Acaryat padamadatte, padas-sishyas-svamedhaya, padam sabrahmacaribhyas padam kala-kramena ca.*)

Yanjavalkya prayed to Sun God and got the same Veda in different form from him. It was named *Vajasaneyi* because: *Vajasani* means *surya*. The student of *surya* is called *vajasaneya* (ढक् - For इ endings अपत्यार्थे - *vamsa -pratyaya*). That which belongs to *Vajasaneya* is *Vajasaneyi* (*vajasaneyin*). *Isa* and *Brhadarnyaka* belongs to this *Sukla Yajur Veda*.

THE SPECIAL FEATURES OF THIS UPANISHAD:

1) One of the 10 Upanisads on which *Sankaracarya* wrote elaborate *Bhashya*. *Isa* k*ena*+
2) It is systematic in presenting the *upasanas* first and then the *vidya* is beautifully unfolded through *kosaviveka* which is very elaborately presented in this Upanishad the like of which is not seen elsewhere. All topics are covered in it. The two fold *lakshana* of Brahman you find in this Upanishad, *yato va imani*+ and *satyam jnanam* + in clear words without need to do *arthapatti*. *Phalam* also said very clear. It contains all values or duties in simple form in 1st and 3rd.
3) It is the only Upanishad chanted in traditional manner very commonly with *svara* mostly in the south of India. Other *upanishads* - chanting method is nor prevalent. Only chanted as prose. (*Brahdaranyaka* and *Isa* also available with *svaras* but rare in common chanting). It is chanted in many rituals.
4) *Sankaracarya* has quoted 147 times in *Brahmaustra Bhashya*. There is one *Anandamayadhikaranam* in *Brahmasutram*.
5) It has *parayana mantras* like *aham vrkshasya*+ *yaschandasam*+ etc. As well as we have mantras for *homam* like *Avahanti homam*.
6) In this *upanishad*, in the second *valli*, we have the *aikya* between *jiva* and Brahman taught at the level of *ananda* (*sa yascayam purushe*+).

COMMENTARIES ON THE BHASHYA

1) The *bhashya* of *Sayanacarya*, the commentator of Vedic *mantras*.
2) *Suresvaracarya's Varttikam I Valli* - 183; 259+21+26+9+39+63+65+115+156+ = 753 (*II Valli*); 21+8+1+10+49 = 89 (*III Valli*) Total = 1025
3) *Acyutakrishnananda's Vanamala tika*.

4) *Anadagiri's tika*
5) *Amaradas's Maniprabha*

Taittiriya is the first *Bhashya Sankara* wrote. The story is that, every one has to do his *(sva) sakha. (svadhyayodhyetavyah). Sankara's svasakha* is *Yajur Veda*. He asked for a palm leaf copy for this Upanishad. Every time he got *Vishnu Sahasranama*. He thought it is *Isvara's Sankalpa* and did it. Then he did *Taittiriya*.

मङ्गलाचरणम्

Sankara begins his *bhashya* with some prayers. The first verse is a prayer to the Lord.

यस्माज्जातं जगत्सर्वं यस्मिन्नेव प्रलीयते।
येनेदं धार्यते चैव तस्मै ज्ञानात्मने[१] नमः।। १

My salutation to that Self which is Consciousness - from whom the entire universe has come out, in whom it is resolved and by whom alone it is supported.

तैत्तिरीयकोपनिषदं व्याचिख्यासुः भगवान् भाष्यकारः तत्प्रतिपाद्यं ब्रह्म जगज्जन्मादिकारणत्वेन तटस्थलक्षणेन[२] सामान्येनोपलक्षितं सत्यज्ञानादिना स्वरूपलक्षणेन विशेषतो निश्चितं नमस्करोति - यस्मादिति। [**आ.गिरि** - निमित्त-उपादानत्वयोः पञ्चम्याः साधारण्यात् उभयविधमपि हेतुत्वमिह विक्षितम्। कार्यविलयस्य प्रकृतौ एव नियतत्व-अविशेषतः प्रकृतित्वमाह - यस्मिन्निति।] ज्ञानात्मने इति स्वरूपलक्षणं सूचितम्।

This verse brings in both lakshanas of Brahman. From whom this entire world is born, in whom alone they resolve back giving up the name and form and by which it is sustained to that Brahman which is of the nature of caitanyam my salutation. Both lakshanas are necessary. Atma is satcidananda is not enough. World has to be accounted because you are part of the world as an individual. So you have to resolve the duality - knower-known duality - and relate to that vastu. Sastra presents it as karya and vastu as karana. So the vastu is presented as jagatkaranam. Then alone advaitasiddhi. What is its svarupa then? It is satyam, karanatvat. Karanatvat it is idam sarvam. So it is anantam. Is it jadam? It is jnanatmakam. Jnanam eva svarupam. The source of knowledge is saluted here. Next the tradition of teachers is saluted.

यैरिमे गुरुभिः पूर्वं पदवाक्यप्रमाणतः।
व्याख्याताः[३] सर्ववेदान्तास्तान्नित्यं प्रणतोस्म्यहम्।। २

I remain ever saluting those gurus by whom all these Upanishads have been commented upon earlier keeping in mind the disciplines of grammar, analysis and logic.

गुरुभक्तेः विद्याप्राप्तौ अन्तरङ्गसाधनत्वं ख्यापयितुं गुरून् प्रणमति - यैरिति। इमे व्याख्येयत्वेन बुद्धिस्थाः। पदानि[४] च वाक्यानि[५] च प्रमाणानि पदवाक्यप्रमाणानि। सोऽकामयत इत्यादौ ब्रह्मसत्वसाधकतया विवक्षितान्यनुमानानि प्रमाणानि तेषां पदवाक्यप्रमाणानां विवेचनपूर्वकं व्याख्याताः इत्यर्थः। यद्वा पदं व्याकरणं तत्साधुत्वविचाररूपत्वात् वाक्यं मीमांसा वेदवाक्यविचाररूपत्वात्, प्रमाणं न्यायशास्त्रं प्राधान्येन प्रत्यक्षादिप्रमाणविचारात्मकत्वात् ततश्च पदवाक्यप्रमाणैः साधनभूतैः व्याख्याताः इत्यर्थः। २

By those teachers by whom all upanishads have been very well unfolded and explained before, to that tradition of teachers, who form the sampradaya, my salutation. Bhashyakara's bhashya reveals about the existence of earlier extensive commentaries. That is why his bhashya also is elaborate because he has to take them in to account at every stage. But we do not have the manuscripts. Mayat in Anandamaya is taken as pracuryartha by vrittikara.

---

[१] ज्ञानात्मने इति पदस्य आशयः स्वीयज्ञानस्वरूप-अपरित्यागेनैव जग्ज्जनि-स्तिथि-प्रलयरूपेण परमात्मा आभासते इति

[२] यावल्लक्ष्यकालमनवस्थितं व्यावर्त्तकं च (वे.प) यद्वा स्वरूपभिन्नत्वे सति व्यावर्त्तकत्वं तटस्थलक्षणस्य लक्षणम् । (शास्त्रि)

[३] आचार्यतः प्रागेव परिशुद्ध-अद्वैतसंप्रदायानुसारेण पूर्वैः कैश्चिदुपनिषदः व्याख्याताः इति अनुमीयते (दृश्यते इति भवितव्यम्) (सच्चिदानन्द)

[४] तत्वमादीनि इत्यर्थः बहुवचनादवगम्यते । (गोविन्दानन्द)

[५] अवान्तराणि महान्ति च इत्यर्थः (गोविन्दानन्द)

Sankara presents the vrittikara-mata and then gives his version demolishing the earlier views. Brahman is the adhishthana of the anandamaya and not part of the anandamaya. Thus Sankara here salutes that tradition.

How explained by earlier acaryas? Pada is grammar. How a word is formed/evolved is given by grammar and what does the word means. pada-sadhutvam. Vakya is mimamsa. How you look at a sentence and arrive at the meaning. It is analysis. Bhashya study, whether it gives brahmatma or not, it helps you to know how to think properly. That will take to Brahman. Pramana is nyaya. Reasoning is to eliminate doubts. Following these various disciplines of sastras, they have explained.

तैत्तिरीयकसारस्य मयाचार्यप्रसादतः।
विस्पष्टार्थरुचीनां हि व्याख्येयं संप्रणीयते।। ३[६]

For the sake of those who wish to have a clear understanding of the essence of Taittiriyaka Upanishad, this commentary is written by me with the grace of the teacher.

चिकीर्षितं निर्दिशति - तैत्तिरीयकेति। [आ.गिरि - स्वकीयग्रन्थस्य सम्प्रदायपूर्वकत्वम दर्शयति - आचार्येति] ननु व्युत्पन्नस्य पदेभ्यः एव पदार्थस्मृतिसंभवात् पदस्मारितपदार्थानां यथायोग्यं संबन्धस्यैव वाक्यार्थस्य अवगन्तुं शक्यत्वात् सूत्रकारेण वेदान्ततात्पर्यस्य निरूपितत्वाच्च व्यर्थः पृथग्व्याख्यारम्भः इत्याशङ्क्य आह - विस्पष्टेति। (विशेषेण ये स्पष्टमर्थं रोचयन्ते तेषामर्थम्) मन्दमतीनां स्वतः एव निःशेष-पदार्थ-स्मराणासम्भवात् उपनिषद्गत-निःशेष-पदार्थानां निःसंशयज्ञानं येभ्यो रोचते तेषामुपकाराय इत्यर्थः। (संप्रणीयते इति - संशय-विपर्यास-व्यतिरेकेण अबाधितन्यायवती क्रियते।)। ३

This explanation is undertaken by me. For whose sake? For the sake of those who have interest in knowing clear meaning or gaining clear understanding of the Taittiriya sara. Those manda-madhyama adhikaris who find it difficult to grasp the tatparya of Vedanta. The essence of Taittiriya Aranyaka, which is this upanishad. How I do. With the grace of my acaryas, gurus. So it is part of sampradaya.

[६] This verse appears in the Taittiriya Varttikam. It seems to be Sursvaracarya's sloka as he uses the word 'taittiriyakasarasya' at the end of his varttika also. Further the word sara indicates it is not sankaracarya's as he does not give essence but elaborately explains.

अथ भष्यावतरणिका

ग्रन्थ-सम्बन्धः

१) नित्यान्यधिगतानि कर्माणि उपात्त-दुरित-क्षयार्थानि, काम्यानि च फलार्थिनां पूर्वस्मिन्ग्रन्थे। इदानीं कर्मोपादान-हेतु-परिहाराय ब्रह्मविद्या प्रस्तूयते। कर्महेतुः कामः स्यात्, प्रवर्त्तकत्वात्। आप्तकामानां हि कामाभावे स्वात्मन्यवस्थानात् प्रवृत्यनुपपत्तिः। आत्मकामत्वे चाऽऽप्त-कामता। आत्मा हि[७] ब्रह्म। तद्विदो हि परप्राप्तिं वक्ष्यति। अतोऽविद्यानिवृत्तौ स्वात्मन्यवस्थानं पर-प्राप्तिः। "अभयं प्रतिष्ठां विन्दते (तै.उप २.७)" "एतमानन्दमयमात्मानमुपसङ्क्रामति (तै.उप २.८)" इत्यादि-श्रुतेः।

पूर्व-मीमांसक-पूर्वपक्षः - कर्ममात्राद् मोक्षः

पूर्वपक्षः - १

२) काम्य-प्रतिषिद्धयोः अनारम्भात्, आरब्धस्य[८] च उपभोगेन क्षयात्, नित्यानुष्ठानेन[९] प्रत्यवायाभावात्, अयत्नत एव स्वात्मन्यवस्थानं मोक्षः।

पूर्वपक्षः - २

३) अथवा, निरतिशयायाः प्रीतेः स्वर्ग-शब्द-वाच्यायाः कर्महेतुत्वात् कर्मभ्य एव मोक्षः इति चेत्।।

सिद्धान्तः - कर्ममात्रात् न मोक्षः

अशेषकर्मक्षयासम्भवः

प्रथम-पूर्वपक्षस्य उत्तरः

४) न, कर्मानेकत्वात्। अनेकानि हि आरब्ध-फलानि अनारब्ध-फलानि च, अनेक-जन्मान्तर-कृतानि, विरुद्ध-फलानि कर्माणि संभवन्ति। अतः तेषु अनारब्धफलानाम् एकस्मिन् जन्मन्युपभोग-क्षयासंभवात्[१०] शेष-कर्म-निमित्त-शरीरारम्भोपपत्तिः, कर्म-शेष-सद्भाव-सिद्धिश्च। "तद्य इह रमणीयचरणाः (छा. ५-१०-७)" "ततः शेषेण (गौ.घर्म. २.२९, आ.धर्म २.२.२.३)" इत्यादि-श्रुति-स्मृति-शतेभ्यः।।

नित्यकर्मभिः अनारब्धकर्मक्षयासम्भवः

५) इष्टानिष्ट-फलानाम् अनारब्धानां क्षयार्थानि नित्यानीति चेत्। न, अकरणे प्रत्यवाय-श्रवणात्[११]। प्रत्यवाय-शब्दो हि अनिष्ट-विषयः। नित्याकरण-निमित्तस्य प्रत्यवायस्य दुःख-रूपस्य[१२] आगामिनः परिहारार्थानि नित्यानीति अभ्युपगमात्, न अनारब्ध-फल-कर्म-

---

7 पा.भेद - च इति ।

8 पा.भेद - आरब्धफलयोष्ट्र इति ।

9 पा.भेद - च इति अधिकः।

10 पा.भेद - उपभोगेन क्षयासंभवादिति ।

11 पा.भदे - प्रत्यवाय-शब्दो ह्यनिष्टविषयः इति क्वचिद् न।

12 पा.भदे - असुखरूपस्य इति।

क्षयार्थानि। यदि नाम अनारब्ध[13]-कर्म-क्षयार्थानि नित्यानि कर्माणि, तथापि अशुद्धमेव क्षपयेयुः, न शुद्धम्, विरोधाभावात्। न हि इष्ट-फलस्य कर्मणः शुद्ध-रूपत्वात् नित्यैर्विरोधः उपपद्यते। शुद्धाशुद्धयोर्हि विरोधो युक्तः।।

अज्ञान-निमित्त-कामसत्वे न सर्वकर्मक्षयसंभवः

६) न च कर्म-हेतूनां कामानां ज्ञानाभावे निवृत्यसम्भवात् अशेष-कर्म-क्षय-उपपत्तिः। अनात्मविदो हि कामः, अनात्म-फल-विषयत्वात्। स्वात्मनि च कामानुपपत्तिः, नित्यप्राप्तत्वात्। स्वयं च आत्मा परं ब्रह्म इत्युक्तम्।।

नित्याकरणस्य प्रत्यवायजनकत्वमपि न युक्तम्

७) नित्यानां च अकरणम् अभावः। ततः प्रत्यवायानुपपत्तिः इत्यतः पूर्वोपचित-दुरितेभ्यः प्राप्यमाणायाः प्रत्यवाय-क्रियाया नित्याकरणं लक्षणमिति "अकुर्वन् विहितं कर्म (मनु. ११.४४)" इति हि शतुर्नानुपपत्तिः। अन्यथा अभावात् भावोत्पत्तिरिति सर्व-प्रमाण-व्याकोपः इति। अतोऽयत्नतः स्वात्मन्यवस्थानम् इत्यनुपपन्नम्।।

स्वर्गप्राप्तिरपि न मोक्षः, आरब्धत्वात्

ÊuùiÉÒªÉ-{ÉÚ´ÉÇ{ÉIÉºªÉ =kÉ®ú&

८) यच्चोक्तं निरतिशय-प्रीतेः स्वर्ग-शब्द-वाच्यायाः कर्म-निमित्तत्वात् कर्मारब्ध(ः)[14] एव मोक्षः इति। तन्न। नित्यत्वान्मोक्षस्य। न हि नित्यं किंचिदारभ्यते। लोके यदारब्धं तदनित्यमिति। अतो न कर्मारब्धो मोक्षः।।

विद्यासहितकर्मभ्योऽपि न मोक्षः

नित्यस्य अनारभ्यत्वात्

९) विद्या-सहितानां कर्मणां नित्य-आरम्भ-सामर्थ्यमिति चेत्। न, विरोधात्। नित्यं च आरभ्यते इति विरुद्धम्।।

अनारभ्य-प्रध्वंसाभावः विषमदृष्टान्तः, मोक्षस्य भावरूपत्वाद्

१०) यद्विनष्टं[15] तदेव नोत्पद्यते इति प्रध्वंसाभाववत् नित्योऽपि मोक्षः आरभ्य(ः) एव इति चेत्। न। मोक्षस्य भावरूपत्वात्। प्रध्वंसाभावोऽप्यारभ्यत इति न सम्भवति[16]। अभावस्य विशेषाभावात्, विकल्पमात्रमेतत्। भाव-प्रतियोगी ह्यभावः। यथा हि अभिन्नोऽपि, भावो घटपटादिभिर्विशेष्यते भिन्न इव[17] 'घट-भावः', 'पट-भावः' इति, एवं निर्विशेषोप्यभावः[18] क्रिया-गुण-योगाद् द्रव्यादिवत् विकल्प्यते। न हि अभावः उत्पलादिवद् विशेषण-सह-भावी विशेषणवत्वे भाव(ः) एव स्यात्।।

---

13 पा.भे - अनारब्ध-फल-कर्म-क्षयार्थानि इति।

14 पा.भे - कर्मभ्य एव इति। अथवा कर्मारभ्य इति।

15 पा.भे - यद्धि नष्टमिति।

16 पा.भे - न संभवति इति क्वचिद् न।

17 पा.भे - अभिन्न एव इति।

18 पा.भे - एवं निर्विशेषो भावाभावः इति।

कर्त्तृनित्यत्वादपि न मोक्षनित्यत्वम्

११) विद्या-कर्म-कर्त्तुः नित्यत्वात् विद्या-कर्म-संतान-जनित-मोक्षस्य नित्यत्वमिति चेत्, गङ्गा-श्रोतोवत्[19]। न। कर्त्तृत्वस्य दुःख-रूपत्वात्। कर्त्तृत्वोपरमे च मोक्ष-विच्छेदात्।।

ग्रन्थारम्भ-समर्थनम्

१२) तस्मात्, अविद्यादि-कर्मोपादान-हेतु-निवृत्तौ[20] स्वात्मन्यवस्थानं मोक्षः इति। स्वयं चाऽऽत्मा ब्रह्म। तद्विज्ञानात् अविद्या-निवृत्तिः मोक्षः इति। अतः ब्रह्मविद्यार्था उपनिषदारभ्यते।।

उपनिषत्-शब्द-निर्वचनम्

१३) उपनिषदिति विद्या उच्यते। तच्छीलिनां गर्भ-जन्म-जरादि-निशातनात्, तदवसादनाद्वा। ब्रह्मणो वा उप-नि-गमयितृत्वात्। उप निषण्णं वा अस्यां परं श्रेयः इति। तदर्थत्वात् ग्रन्थोऽपि उपनिषत्।।

---

[19] पा.भे - चेन्न। गङ्गा-श्रोतोवत् इति (आनन्दाश्रमः)।

[20] पा.भे - अविद्या-काम-कर्मोपादान-हेतु-निवृत्तौ इति आनन्दाश्रमः।

INTRODUCTORY BHASHYA

ग्रन्थ-सम्बन्धः

(उपनिषदः कर्मकाण्डेन नियतपौर्वापर्यसूचितं संबन्धं विशिष्य ख्यापयितुं [आ.गिरि - कर्मविचारेणैव उपनिषदः गतार्थत्वात् उपनिषत्प्रयोजनस्य निश्रेयसस्य कर्मभ्यः एव सम्भवात् पृथग्व्याख्यारम्भः न युक्तः इत्याशङ्कामपनेतुम्] कर्मकाण्डार्थं कीर्त्तयति - नित्येति। पूर्वस्मिन् ग्रन्थे[२१] नित्यानि कर्माणि संचितदुरितक्षयार्थत्वेन अधिगतानि; तैश्च नित्यैरिह जन्मनि जन्मान्तरेषु वानुष्ठितैः क्षीणपापस्य शुद्धान्तःकरणस्य कर्मानुष्ठानप्रयोजक-अविद्याकामपरिहारद्वारा मुक्तिसिद्धये इदानीमुपनिषदि ब्रह्मविद्या प्रस्तूयते निरूप्यते इत्यर्थः। तथा च कर्मणां ब्रह्मविद्यां प्रति चित्तशुद्धिद्वारा साधनत्वात् तत्प्रतिपादकयोरपि कर्मकाण्ड-उपनिषदोः साध्य-साधन-भावः संबन्धः इत्यर्थः। [आ.गिरि - "अथातो धर्मजिज्ञासा" इति जैमिनिना धर्मग्रहणेन सिद्धवस्तुविचारस्य परियुदस्तत्वान्न उपनिषदो गतार्थत्वम् इत्यर्थः। कर्मणामनुष्ठाने यो हेतुः तन्निवृत्त्यर्थं ब्रह्मविद्या अस्मिन् ग्रन्थे आरभ्यते। अतः सनिदानकर्मोन्मूलनार्थत्वात् उपनिषदः कर्मकाण्डविरुद्धत्वात् न गतार्थत्वम् इत्यर्थः।] नित्यानि [आ.गिरि - जीवतोऽवश्यकर्तव्यानि] अधिगतानि कर्माणि उपात्त-दुरित-क्षयार्थानि[२२] (आ.गिरि - "धर्मेण पापमपनुदति" इति श्रुतेः न निश्रेयसार्थानि), (ननु कर्मकाण्डस्य चेत्पापक्षयद्वारा विद्यायां विनियोगः तर्हि पशुस्वर्गादिसाधनभूतानां काम्यकर्मणां तत्रोक्तिरसंगता, तेषां विद्यासाधनत्व-अयोगात् इत्याशङ्क्य आह - काम्यानीति। अयं भावः काम्यानां फलार्थत्वेऽपि फलाभिसन्धिं विना कृतानां तेषां विद्यासाधनत्वमप्यस्त्येव, विविदिषावाक्येन नित्यकाम्यसाधारण्येन कर्मणां विद्यायां विनियुक्तत्वात् "अनाश्रितः कर्मफलं" इत्यादिस्मृतिष्वपि तथोक्ततत्वाच्च। कर्मकाण्डे फलार्थिनां काम्यकर्मविधानमपि विद्योपयोग्येव इति।) काम्यानि च फलार्थिना[२३] [आ.गिरि - न तान्यपि निश्रेयसार्थानि, "स्वर्गकामः" "पशुकामः" इत्यादिवन्मोक्षकामोऽदः कुर्याद् इति अश्रवणात् । अतः संसारः एव कर्मणां फलम् इत्यर्थः] पूर्वस्मिन्ग्रन्थे। {अन्वय - पूर्वस्मिन् ग्रन्थे उपात्त-दुरितक्षयार्थानि नित्यानि कर्माणि अधिगतानि, फलार्थिनां काम्यानि च}। [आ.गिरि - कर्मकाण्डार्थमुक्त्वा तत्राविचारितमुपनिषदर्थमाह - इदानीमिति] इदानीं कर्मोपादान-हेतु-परिहाराय ब्रह्मविद्या प्रस्तूयते। (आ.गिरि - कर्मानुष्ठाने हेतुः नियोगः तस्य प्रमाणसिद्धत्वात् न विद्यया विरोधः इत्याशङ्कायामाह - कर्महेतुरिति । अस्येदं साधनमित्येतावच्छास्त्रेण बोध्यते । यस्य यत्राभिलाषः स तत्र प्रवर्त्तते कामतः एव। अतो न नियोगस्य प्रनर्त्तकत्व-सम्भावना अपि इत्यभिप्रायः) ("कर्मोपादानहेतुपरिहाराय" इत्यत्र निर्दिष्टः कर्मप्रवृत्तिहेतुः कः इति जिज्ञासायामाह - कर्महेतुरिति। अत्र यद्यपि अविद्यापि कर्मोपादानहेतुः, तथा च वक्ष्यति - "तस्मादविद्यादि-कर्मोपादानहेतु-निवृत्तौ" इति तथापि अविद्यायाः कामद्वारा कर्म-हेतुत्वात् कामो हेतुरित्युक्तम्। कामस्यैव प्राधान्येन कर्महेतुत्वं भगवता व्योसेनापि उक्तम् "यद्यद्धि कुरुते जन्तुः तत्तत्कामस्य चेष्टितम्" इति । कामस्य कर्महेतुत्वे अन्वयव्यतिरेकौ [आ.गिरि - सति कामे प्रवृत्ति इति अन्वयः उक्तः, कामाभावे न प्रवृत्तिः इति व्यतिरेकम्] प्रमाणयति - प्रवर्त्तकत्वात् इति)। कर्महेतुः कामः स्यात्, {कामस्य} प्रवर्त्तकत्वात् (कामे सति प्राणिनां प्रवृत्तिदर्शनात् इत्यर्थः)। आप्तकामानां (बृ.भा ४.४.६ - यस्य आत्मैव नान्यः कामयितव्यः वस्त्वन्तरभूतः पदार्थो भवति स आत्मकामः। आत्मकामत्वेन कामाः आप्यन्ते। आप्ताः कामाः येन

---

[२१] ब्रह्मसन्धत्तं तन्मे जिन्वतम् इत्यादि-काण्डत्रयात्मके तैत्तिरीयब्राह्मणे इत्यर्थः । हे ग्रहौ युवां ब्राह्मणजातिं स्वोचितधर्मराहित्यं यथा न भवति तथा संपादयतम् इति निर्दिष्टवाक्यार्थः । (गोविन्दानन्द)

[२२] नित्यानां कर्मणां फलाभावं ये प्राहुः तन्मतनिरासार्थमाह - उपात्तेति (सच्चिदानन्द) (गी.भा - १८.६ नित्यानामपि कर्मणां फलवत्वस्य उपपादितत्वात् । "यज्ञो दानं तपश्चैव पावनानि" इत्यादि वचनेन)

[२३] सामान्यतः इष्टानिष्ट-प्राप्तिपरिहारेच्छूनां विहितानि नित्यानि, विशेषतः स्वर्गादिफलार्थिनां कामिनां विहितानि काम्यानि इति विवेकः । रागादिदोषवतां विहितत्वं तु अविशिष्टमुभयत्र । (सच्चिदानन्द) (बृ.भा - यथा स्वर्गकामादिदोषवतः दर्शपूर्णमासादीनि काम्यानि कर्माणि विहितानि तथा सर्वानर्थबीजाविद्यादि-दोषवतः तज्जनित-इष्टानिष्ट-प्राप्तिपरिहार-रागद्वेषादिदोषवतः च तत्प्रेरित-अविशेषप्रवृत्तेः इष्टानिष्ट-प्राप्तिपरिहारार्थिनो नित्यानि कर्माणि विधीयन्ते)

स आप्तकामः) हि कामाभावे स्वात्मन्यवस्थानात्[२४] प्रवृत्यनुपपत्तिः (अनुपपत्तिपदम् अभावपरम्)। (ततश्च आप्तकामानां प्राप्त-स्वरूपानन्दानां स्वात्मनि स्वरूपानन्दे अवस्थानाद् हेतोः कामाभावे प्रवृत्यभावदर्शनादित्यर्थः। तेषां प्रवृत्यभावः प्रसिद्धः इति हि शब्दार्थः)। (ननु आप्तकामत्वे को हेतुः? तत्राह - आत्मकामत्वे चेति।) [आ.गिरि - अभिलषितविषयप्राप्तिः कामनिवृत्तौ हेतुः। न विद्या। अतः कथं कर्महेतुपरिहाराय विद्यारम्भः इत्याशङ्क्याह - आत्मकामत्वे चेति। कामितविषयप्राप्त्या कामस्य तात्कालिकोपशममात्रं न तु उच्छेदः पुनर्विषय-आकाङ्क्षादर्शनात् आप्तकामतापि निरङ्कुश-आत्मा एव वस्तु नान्यत् ततः अस्ति इत्येवं रूपा आत्मकामत्वे सति भवति। कामयितव्य-अभावादेव आत्मानं ह्यद्वयानन्दरूपमजानन् एव व्यतिरिक्तं विषयं पश्यन् कामयते] आत्मकामत्वे च आप्त-कामता[२५] (आत्मैव कामः आनन्दो यस्य साक्षात्कृतः स आत्मकामः, तस्य भावः आत्मकामत्वम् तस्मिन् सत्याप्तकामता भवतीत्यर्थः)। (ननु ब्रह्मविद्या एव आप्तकामताहेतुः न तु आत्मानन्द-साक्षात्कारवत्वम्, तत्राह - आत्मा चेति) [आ.गिरि - भवतु आत्मविद्या कामविरोधिनी कर्महेतुपरिहाराय, ब्रह्मविद्या प्रस्तूयते इति कथमुक्तम् तत्राह - आत्मा चेति] आत्मा हि[२६] ब्रह्म ("अयमात्मा ब्रह्म" इति श्रुतेः इति भावः) {"तस्माद् वा एतस्माद् आत्मनः" - तै २.१ - इति श्रुतेः}। (ब्रह्मविदः आत्मानन्दप्राप्तौ मानमाह - तद्विदो हि इति) तद्विदो हि परप्राप्तिं वक्ष्यति (हि यस्मात् परस्य स्वरूपानन्दस्य प्राप्तिं ब्रह्मविदः "ब्रह्मविदाप्नोति परम्" इति श्रुतिर्वक्ष्यति, तस्माद् ब्रह्मविदाप्तकामः इत्यर्थः)। (ननु आत्मानन्दस्य नित्यप्राप्तत्वात् विद्यया तत्प्राप्तिश्रुतिरनुपपन्ना; न इत्याह अतः इति)। अतः (आत्म-स्वरूपत्वेऽप्यविद्यावृतत्वात् विद्यया तदावरणनिवृत्तौ स्वात्मानन्दे यदभेदेन अवस्थानं तदत्र परप्राप्तिः विवक्षिता। अतो न विद्या-वैयर्थ्यशङ्केति भावः)। अविद्यानिवृत्तौ[२७] स्वात्मन्यवस्थानं[२८] पर-प्राप्तिः। (ब्रह्मविदः परप्राप्तौ एव अन्यदपि वाक्यद्वयं पठति - अभयमिति) "अभयं प्रतिष्ठा[२९] विन्दते" - (तै.उप २.७) (ब्रह्मण्यभयं यथा भवति तथा प्रतिष्ठां स्वात्मभावेन अवस्थानं यदा विन्दते तदैवाभयं गतो भवति इत्यर्थः) "एतमानन्दमयमात्मानमुपसङ्क्रामति[३०]" - (तै.उप २.८) (आनन्दमयं

---

[२४] स्वेन परमार्थरूपेण आत्मना अवस्थानमेव परः पुरुषार्थः इत्यभिप्रायः (सच्चिदानन्द) मु.भा १.२.१, का.भा २.१.२ के.भा २.४

[२५] "स यथा कामो भवति" (बृ ४.४.५) इति श्रुतिमाश्रित्य कामस्य प्रवर्त्तकत्वमुक्तम् । अथ इदानीं "योऽकामो निष्कामः आप्तकामः आत्मकामः" (बृ ४.४.६) इति श्रुतिमाश्रित्य आत्मकामानां कामाभावे प्रवृत्यनुपपत्तिमाह "आप्तकामानां हि" इत्यादिना "आप्तकामता" इत्यन्तेन ।

[२६] "तस्माद् वा एतस्माद् आत्मनः" - तै २.१ - इति श्रुतेः आत्मनः एव ब्रह्मत्वात् , आत्मविदः एव ब्रह्मवित्त्वात् ब्रह्मविदः च "आप्नोति परम् " -तै २.१ - इति परप्राप्तेः वक्ष्यमाणत्वात् परप्राप्तौ च कामात्यन्ताभावात् , सुष्ठूक्तं कर्मोपादानहेतुपरिहाराय ब्रह्मविद्या प्रस्तूयते इति, इति भावः । (सच्चिदानन्द)

[२७] यद्यपि काम एव प्रवर्त्तकः तथाप्यद्वये ब्रह्मात्मनि शुभाशुभविभक्त-विषय-तत्कामित्वरूप-द्वयकल्पनायाः आत्मस्वरूप-अनभिज्ञता-निमित्त-अविद्याहेतुकत्वम् । सा च अविद्या ब्रह्मात्मविद्यया हातव्या सर्वथा प्रवृत्तिनिरोधार्थमिति भावः । (सच्चिदानन्द)

[२८] एतदेव च स्वात्मप्रतिष्ठा -मु.भा १.२.१, प्रत्यगात्मस्वरूपावस्थानम् - का.२.१.२, स्वरूपावस्थानम् - गी.भा १८.६६, सू.भा४.३.१४, स्वस्तथा - मा.भा.अव इत्यादिशब्दैः व्यपदेश्यम् । (सच्चिदानन्द)

[२९] स्वात्मन्यवस्थानं प्रतिष्ठाशब्देन उक्तमिति भावः । (सच्चिदानन्द)

[३०] आनन्दमयो जीव इति भगवत्पादैः आनन्दमयाधिकरणे, इह च श्रुतियुक्तिभिः समर्थितं तथापि आनन्दमयप्राप्तेः तदभिमानत्यागरूपत्वात् तत्त्यागे पञ्चकोशातिरिक्त-ब्रह्मप्रकाशनात् आनन्दमयो ब्रह्मेति व्यवहृतम् । यद्वा वृत्तिकारमत-अभिप्रायेण इदम् । (शास्त्रि)

परमात्मानमुपसंक्रामति प्राप्नोति इत्यर्थः। इदं च वृत्तिकारमत-अभिप्रायेण उदाहृतम्, स्वमते आनन्दमयस्य जीवत्वादिति बोध्यम्) इत्यादि-श्रुतेः[३१]।

In the preceding section, the obligatory (daily) rituals which are meant to eliminate the negative results already accrued, were studied as well as rituals to secure desired ends for those who seek results. Now the Sruti commences the knowledge of Brahman which is meant to eliminate the cause which prompts one to take up rituals. The cause of karma is desire, because it prompts one to do actions. There is no engagement in action with respect to those who have attained all desires because they do not have any desires in view of their abiding in their self. And one attains all desires by seeking the self. Self indeed is Brahman. The Sruti is going to say that the knower of that (Brahman) gains the limitless. Hence, abiding in one's self when the ignorance is eliminated, is known as gaining the limitless, as the Sruti declares in such passages as the following: "He attains the fearless abode" (Tai2.7.1.) and "He gains the self that is full of happiness" (Tai2.8.1).

BRAHMAVIDYA IS THE THEME OF THIS SECTION

There is connection between what has gone by and what is going to come. The necessity to show the connection between the two arises in view of the stand of mimamsakas who say that the sentences of upanishads, having no vidhi and nishedha in them, are arthavada vakyas to boost the image of the yajamana. So upanishads are appendix to karmakanda.

In the previous section nitya karma is studied. What for it is there? To neutralise papas. Papa is of dukhasvarupa. Which is earned in the previous births. Not only that, in this life also. For their kshaya, I perform nitya karma. There is no phala-apeksha in it. (No desire for heaven but desire to neutralise papas.). In fact nityakarmas are meant to express my gratitude to the Lord and various other forces because of which I survive and function. I am just a link in the wheel of creation and every link helps every other link in the movement of the wheel of the bulldozer. I do not do any favour by doing nityakarmas. I am returning what I have received like returning the loan. My old debts ar cleared by repayment. It does not add anything new. Nityakarma helps me to recognise a factor other than me and my family, i.e., the whole universe. It trains me to do actions without any narrow ends, actions of sacrifice of my time and energy for the sake of Lord. My vision enlarges. Then jijnasa arises. "Jnanam utpadyate pumsam kshayat papasya karmanah." (M.Bharata, Santiparva)

Kamya karma also there in karmakanda. They are for those who want karmaphalas. hitartham. For purusha's hita. Sruti being mother cares for all beings. Even these actions when done without phala-apeksha becomes a means for purity of mind. Now Brahmavidya is presented. What for? The hetu for karna-anushthana, pursuit of karma is kama. Kama is prompted by avidya. For the removal of that kama, this vidya is started.

Why should we remove karma-karana when purvabhaga has elaborately dealt with karma? Karma is laid keeping in mind the svabhavaprapta kartrtva. Accepting the fellow as he is, who has desires and who desires various things and has istam and anistam, various karmas are laid. One is for durita kshayartham. Another is phalasiddhyartham (kamyakarma). These karmas are countless. More Sruti can say. But it is tired. Kama is like fire never says no as kama hetu, avidya is there. The fellow should realise it is endless at one time or other since he is following nitya, naimittika karma. He follows dharma and avoids nishiddha karma. There is

[३१] "आनन्दं ब्रह्मणो विद्वान् , न बिभेति कुतश्चनेति " - इत्यादिसंग्रहः । (सच्चिदानन्द)

certain tyaga, viveka on his part. Dharma-adharma viveka is the basic viveka for nitya-anitya viveka. Dharma-adharma viveka is therefore given in the first part of Veda.

I do karma for my sake and phala does not change me completely. So what I want, that problem is recognised here. For that person, the karma hetu has to be eliminated. It is kama. It is for sukha. Kama points out that sukha. That desire for sukha is karmahetu. Why it is cause. It is not like fire being hetu for boiling of water. It is not producing karma. It is pravarttaka of karma. It is a different way. It initiates into karma. Why brahmavidya here? It is meant to eliminate kama. How? It is another kama for vidya. I am adding one more. How fulfilling this desire, I can eliminate all desires. Yes. it is a different ball game. Other desires are fulfilled by karma. here it is knowledge that is opposed to karma/kama hetu, i.e., ignorance. You remove the very desire itself instead of fulfilling it. You go for the kill. Putting all the desires in one basket and making one heap. How to do it. I don't know how many are there. When I see only, I see there is a desire for it. Kama is unmanifest many times. So go for kama hetu.

Those who have gained the atmasukha, All kamas are prapta by them. Gita says Apooryamanamacala+ No kamas in them. We should know that there is no kama for ananda By doing this I will become happy, free, this is not there. It is not kama in the sense I desire for my well being and think later I will become sukhi by this karma. That kind of kama is not there in him. Therefore there is no pravritti in him for getting sukha. Pravritti for sukha is not there. He knows sukha is the svarupa of him and he is called aptakama. Aptakamatvam is gained by desiring the self. Atma itself is sukha. Then there is no need for gaining ananda from any other source. So brahmavidya started for elimination of cause of karma. Why start brahmavidya. Start atmavidya. No. Atma and Brahman are same. Sruti says knower of Brahman will gain moksha. Svatmani avasthanam is elimination of avidya only. Abhayam is freedom from fear. Duality is cause of fear. Atma is nondual. He gains anandamaya atma.

पूर्व-मीमांसक-पूर्वपक्षः - कर्ममात्राद् मोक्षः

पूर्वपक्षः - १

(ननु जीवस्य शरीरे अवस्थानं बन्धहेतुः न ह वै सशरीरस्य सतः प्रियाप्रिययोः अपहतिरस्ति - छा. ८.१२.१ - इति श्रुतेः, आत्यन्तिकेन शरीरसंबन्धाभावेन युक्ते स्वस्वरूपे अवस्थानं मोक्षः, "अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः" - छा. ८.१२.१ - इति श्रुतेः। स च आत्यन्तिकः शरीरसंबन्धाभावः ब्रह्मात्मैकत्वविद्यां विना कर्मभिरेव सिद्ध्यति, किं विद्यया इति मीमांसकः शङ्कते - काम्येति।) [आ.गिरि - किं ज्ञानार्थ-उपनिषदारम्भेण इति] काम्य-प्रतिषिद्धयोः अनारम्भात्, आरब्धस्य च उपभोगेन क्षयात्, नित्यानुष्ठानेन प्रत्यवायाभावात्, अयत्नतः[३२] एव स्वात्मन्यवस्थानं मोक्षः। (काम्यं कर्म देवादिशरीरहेतुः प्रतिषिद्धं कर्म तिर्यगादिशरीरहेतुः नित्य-नैमित्तिक-अननुष्ठानं प्रत्यवायोत्पादनद्वारा नारक्यादिजन्महेतुः। तथा च मुमुक्षुणा सर्वात्मना काम्यप्रतिषिद्धयोः अनारम्भात् सम्यङ् नित्यनैमित्तिक-अनुष्ठानेन प्रत्यवाय-अनुत्पादाच्च न भाविजन्मप्राप्तिः, आरब्धफलयोश्च पुणयपापयोः उपभोगेनैव नाशान्न ततोऽपि भाविजन्मप्राप्तिशङ्का, तथा च विद्यासंपादनयत्नं विना मुमुक्षोरेवं वर्त्तमानस्य आत्यन्तिक-शरीरसंबन्धाभावशब्दितः स्वात्मन्येव अवस्थानलक्षणः मोक्षः सिद्ध्यति इत्यर्थः। अत्र च शरीरसंबन्धस्य कर्म-

[३२] अयत्नतः इति । ब्रह्मविद्यारम्भे यत्नं विनैव इत्यर्थः । आत्मन्यवस्थानं साधनविशेषसाध्यमिति पूर्वपक्षिणोऽभिप्रायः । एवं प्रकारेण कर्मानुष्ठाननैव मोक्षः इति वदतां मतं गीताभाष्ये (१८-६६) सूत्रभाष्ये (४.३.१४) निराकृतमस्ति । (सच्चिदानन्द)

निमित्तकत्वात् निमित्तापाये नैमित्तिकापायः इति न्यायेन शरीरसंबन्धाभावरूप-मोक्षस्य कर्मसाध्यत्व-उक्तिः[३३] इति मन्तव्यम् ।)

(Mimamsaka's objection): Avoiding the desire-prompted and prohibited actions, exhausting the karma that has begun to give rise to its fruits in the present birth by experiencing, and by performance of obligatory rituals warding off negative results that would otherwise arise, one can without any effort, attain moksha, which consists of dwelling in one's own self.

MOKSHA BY ACTION ALONE

Here a pruvapaksha, karmatha's (mimamsaka's) objection presented about what is svatma-avasthanam. As long as you have body, you cannot become free from likes and dislikes or pleasant and unpleasant. (Not body really, but abhimana in it). So for him moksha is freedom from body. Death will not give freedom from body, it may give freedom from this body. Sastra says there is one distinct from the body which departs from this body and assumes another body which is preta sarira. Without that, it cannot move. There is always a sishtaprarabdha which no one knows. No one knows what one should eat and what not, what one should do and what not, where to live and where not, etc. There is always some abuse of the body and body comes to an end before the end of the prarabdha. So you have balance prarabdha. So your attachment, abhimana for this body continues to exist. Because of that, this fellow will hover around, like dream body. Where there is suicide, definitely, the jive exists there in the form of preta-sarira. So punya-papa being there, jiva surviving death being there, lokantara being there, there is no giving up of physical body once and for all by death. But there is a way according to purvamimasaka:

In this scheme, there is an assumption that all past karmas combine together and give rise to one birth, and that the fruits of the whole of the past karma can be exhausted in that one birth alone without any residual karma. Do nityakarma (daily-actions, like agnihotradi, no nimitta), naimittika karma (like sraddha done on occasions or karma done based on occasions like eclipse). Do according to varnasramadi dharma. Because if you don't do, there is sin, pratyavaya that takes you to hell, means gives you pain. Like taking bath. There is no phala for it. But if you don't do, it becomes problems to others who live with you, thereby the problem comes back to you because you have to deal with them. (Akarane pratyavaya, we don't accept). By doing nitya karma etc, no pratyavaya. (Nitya stands for naimittika. It is upalakshana, you have to take all belonging to same jati.). Papa being not there, you don't have to take another body to experience papa-phala arising from non-performance of nitya etc. You don't do kamya like somayaga and pratishiddha like himsam na kuryat. For the anubhava of kamya-karmaphala, you don't have to take another body. Karma that has started fructifying, when it runs its course, body will fall at the end, cause being not there (prarabdhakarma having been exhausted). Automatically then there is avasthana in atma, moksha, body being not there. Thus, destroy the contact of punya and papa.

पूर्वपक्षः - २

(सच्चिदानन्द - स्वर्गातिरिक्तः मोक्षः एव नास्ति इत्यभिनिविष्टानां वीरमीमांसकानां मतमिदम्।) अथवा, निरतिशयायाः प्रीतेः स्वर्गशब्दवाच्यायाः कर्महेतुत्वात् कर्मभ्य एव मोक्षः इति चेत्।। (यानि कर्माणि सवर्गसाधनत्वेन श्रुतानि तान्येव मोक्षसाधनम्, सवर्गशब्दवाच्यस्य निरतिशयसुखस्य स्वरूपानन्दलक्षणाद्

[३३] भाष्ये स्वात्मन्यवस्थानं मोक्षः इत्युक्तं तच्च कर्माभावात् शरीराभावेन सिद्ध्यति, स च नित्यानुष्ठानाद् इत्यर्थः ।

मोक्षादन्यत्व-असम्भवात्, "यत्र दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्, अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम्" इत्यर्थवादेन निरतिशयप्रीतेः स्वर्गशब्दवाच्यत्व-अवगमात् त्रिविष्टपादिजनितसुखे {विश् + कप अथवा कपन् - उणादि ३.१४५ प्रत्ययस्य तुडागमः विशन्ति यत्रेति, भुवनम्, तृतीयं विष्टपं त्रिविष्टपम् स्वर्गः,। कपप्रत्ययान्ताः निपाताः।} दुःख-असंभिन्नत्वादि-विशेषणानाम् असम्भवात्। तथा च निरतिशयप्रीतिरूपस्य मोक्षस्य कर्महेतुकत्व-अवगमात् कर्मभ्यः एव मोक्षः सिध्यति, किं विद्ययासंपादनयत्नेन इत्यर्थः।) [आ.गिरि यदेव स्वर्गसाधनं ज्योतिष्टोमानि तदेवमोक्षसाधनं निरतिशयप्रीतेः स्वर्गपदार्थस्य मोक्षादन्यत्र, असम्भवात्, सति शरीरे क्लेश-अवश्यंभावाद् इत्यर्थः ।]

Or, the unsurpassed happiness which is the meaning of the word heaven, is (gained) on account of karma and hence by karma alone moksha is gained.

There is another mimasaka who says differently. He understands the problem in the above. He says, by karmas alone you will get moksha, because it is niratisaya punya. Between moksha and karma the connection is apurva. What is that moksha? It is heaven. Joy which is the real meaning of heaven. Katha says svarge loka+ Heaven is that extreme happiness. It is paroksha jnanam, not experienced. Like it is amrtam we say. That alone is moksha. You want sukha. It is assured there. So do karma. All religions talk of heaven. So they are all Vedic. They took only purva-bhaga. Karma means options are possible, available for vikalpa, va. So they have different karmas, prayers. Substitution is possible. You do in puja, like akshatan samarpayami for jewels. Except for dakshina. If he knows that, he will say pujartham akshatan samarpayami. So svarga is ananda. kam is sukham. akam is pain. na akam is agian sukham. Why round about way? It indicates there is no duhkha at all. So niratisaya sukham. That you gain by karma prescribed for that purpose.

सिद्धान्तः - कर्ममात्रान्न मोक्षः

अशेषकर्मक्षयासम्भवः

प्रथम-पूर्वपक्षस्य उत्तरः

(तत्र आद्यं मतं निराकरोति - न इति । कर्मणामनेकत्वसंभवात् न विद्यां विना मोक्षसिद्धिः इत्यर्थः ।) [आ.गिरि - ऐकभविकपक्षम् {एकः भवः प्रयोजनम् अस्य इति विग्रहः} आद्यं मतं प्रत्याख्याति - न इत्यादिना । यद्यपि वर्त्तमाने देहे काम्यं प्रतिषिद्धं च नारभेत मुमुक्षुः तथापि संचितस्य अनेकस्य सम्भवाद् हेत्वभावः असिद्धः इत्यर्थः।] न; कर्मानेकत्वात्। (संग्रहं विवृणोति - अनेकानि इति। कर्म-अनेकत्वप्रसिद्धि-द्योतनार्थः हि शब्दः। तेषु कर्मसु यानि अनारब्धफलानि तेषामुपभोगेन क्षय-असम्भवात् तानि शेषकर्माणि, तन्निमित्तशरीराम्भः एवंवृत्तस्यापि उपपद्यते इत्यर्थः) अनेकानि हि आरब्ध-फलानि अनारब्ध-फलानि च[३४], अनेक-जन्मान्तर-कृतानि, (ननु {प्रायेण[३५]} अनेकजन्मान्तरकृतानां सर्वेषामेव कर्मणां संभूय वर्त्तमानजन्मारम्भकत्वसंभवादनारब्धफलानि कर्माणि न सन्त्येवच नेत्याह - विरुद्धेति। स्वर्ग-नरकादिरूप-विरुद्धफलवतां ज्योतिष्टोम-ब्रह्महत्यादीनां संभूयैकजन्म-आरम्भकत्व-असम्भवेन {एकस्मिन् देहे भोग-असंभवेन} एकस्मिन् जन्मनि उपभोगेन तेषां {अनेकजन्मकृतानां नैकजन्म-उपभोगेनैव क्षपणीयानाम्} क्षयासम्भवात् सन्त्येव शेषकर्माणि इत्यर्थः) विरुद्ध-फलानि कर्माणि संभवन्ति। अतः तेषु अनारब्धफलानाम् एकस्मिन् जन्मन्युपभोग-क्षयासंभवात्[३६] शेष-कर्म-निमित्त-शरीरारम्भ-

[३४] चोदनादृष्ट्या नित्य-नैमित्तिक-काम्य-निषिद्ध-भेदेन चतुर्धा विभक्तानि कर्माणि । भोग्यफलदृष्ट्या तु सञ्चित-आरब्ध-आगामि-भेदेन त्रेधा । (सच्चिदानन्द)

[३५] प्रायेण इति आ.गिरि । जातमृते मृतजाते वा व्यभिचारं पश्यन्नाह प्रायेण इति । नासौ मुक्तः शक्यम् अभ्युपगन्तुम्, संसारमोचकमतानुपेक्षाप्रसङ्गाद् इत्यवधेयम् । If in one birth all previous karmas present themselves for exprience, then what about stillborn child and child dying immediately after birth. They cannot be said as released from bondage, wihtout any valid ground of sadhana for moksha.

[36] पा.भेद - उपभोगेन क्षयासंभवादिति ।

उपपत्तिः, (संचितकर्मसद्भावे मानमाह - कर्मशेषेति) कर्मशेष-सद्भाव-सिद्धिश्च[३७] "तद्य इह रमणीय-चरणाः"[३८] (छा. ५-१०-७) (तत् तत्र स्वर्गाद् अवरोहतां मध्ये ये इह अस्मिन् लोके रमणीयचरणाः पुण्य-कर्माणः ते रमणीयां ब्राह्मणादियोनिं प्रतिपद्यन्ते इति श्रुत्यर्थः) "ततः शेषेण" (गौ.घर्म. २.२९, आ.धर्म २.२.२.३) (वर्णाः आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य स्वकर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुःश्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्ते इति पूर्णसूत्रम्) (प्रेत्य स्वकर्मफलमनुभूय ततः शेषेण जन्म प्रतिपद्यन्ते इति स्मृतिरपि स्वर्गाद् अवरोहतां शेषकर्मसद्भावं दर्शयति इत्यर्थः) इत्यादि-श्रुति-स्मृति-शतेभ्यः।

No. Karmas being many. Karmas happen to many such as those which have started fructifying and those that have not started fructifying, which karmas have been done in many previous births and which produce opposite results. Therefore, with reference to them, it being not possible to exhaust all the karmas that have not yet begun fructifying, by experiencing in this one birth, there is bound to be assumption of another body on account of the residual karmas. The existence of such residual karma is declared in hundreds of passages in the Sruti and Smriti such as: "Among them, those of right conduct, here ...." (Chandogya 5.10.7), "...by the residual karmas.." (Apastamba Dharmasutra 2.2.3)

MOKSHA NOT BY ACTION

It is not true what you say. There are a lot of problems. Karma is not simple one type. Prarabdhakshaya only enables this body's not coming back. Even if you want to come back, people make sure that you cannot come. They burn. What about sancita karma which anarabdhaphala. Arabdhani phalani yesham is arabdhaphala karma. Not arabdha is anarabdha. It has yet to fructify. They are also different. Asvamedha and brahmahatya require two different bodies, one sattvic and another tamasic. Dharma sastras say the effect of even one karma done here runs through at least seven births. (Suresvara Varttika Anuvaka 1.14). One requires birth in USA, another in China and so on. So in one birth all karma cannot be exhausted. Balance here is like what is the balance when you buy one banana and give a billion dollar note. That sesha. Sruti and smriti say there is seshakarma. Tell me how do you say there is prarabdhakarma etc. janmantarakarma etc. nitya karma etc. It is sastra. Then for us also same sastra.

नित्यकर्मभिः अनारब्धकर्मक्षयासम्भवः

आक्षेपः

(ननु संचितकर्मणां सत्त्वेऽपि तेषां नित्यानुष्ठानेन क्षयान्न तैर्भाविजन्मप्राप्तिः इति शङ्कते - इष्टेति) इष्टानिष्ट-फलानाम् अनारब्धानां क्षयार्थानि नित्यानि इति चेत्,

समाधानम्

(नित्यानां संचितकर्मक्षयफलकत्वं मीमांसकस्य प्भाट्टानाम्फ स्वाभ्युपगमविरुद्धमिति दूषयति - नेति।) न, अकरणे प्रत्यवायश्रवणात्[३९] {"अकुर्वन् विहितं कर्म," "एवं त्वयि नान्यथेतोऽस्ति" इत्यादौ}। प्रत्यवाय-शब्दो ह्यनिष्टविषयः। नित्याकरण-निमित्तस्य प्रत्यवायस्य दुःखरूपस्य (दुःखसाधनस्य इति यावत्)

[३७] न केवलं संभावनायुक्तिगम्यः कर्मशेषसद्भावः, किन्तु शास्त्रगम्यः अपि इत्याह - कर्मशेषेति (सच्चिदानन्द)

[३८] एतद्वाक्यार्थनिर्णयः कृतात्यय-अधिकरणे (ब्रह्म.सू ३.१.८..) द्रष्टव्यः । (सच्चिदानन्द)

[३९] "प्रत्यवाय-अभ्युपगमात् " इति भाव्यम् , विवरणे "इति-अभ्युपगमात्" इत्यस्य अनुरोधेन । (सच्चिदानन्द)

आगामिनः (नित्याकरणानन्तरमेव प्रसक्तस्य इत्यर्थः) परिहारार्थानि नित्यानि इति अभ्युपगमात्[४०], न अनारब्ध-फल-कर्म-क्षयार्थानि। (नित्यानां तदभ्युपगमे अपि परस्य नाभिमतसिद्धिः इत्याह - यदि नामेति) (आ.गिरि - मुमुक्षुणा[४१] अनुष्ठितस्य नित्यादेः संचितकर्मक्षयार्थत्व-अभ्युपगमे अपि नाभिमतसिद्धिः {कर्मसामान्य-अभाव-सिद्धिः} इत्याह - यदि इति) यदि नाम[४२] अनारब्ध-कर्म-क्षयार्थानि नित्यानि (नित्यानि अनारब्धफल-कर्मक्षयार्थानि सन्तु नाम इत्यर्थः), तथापि अशुद्धमेव क्षपयेयुः, न शुद्धम्, {पुण्यं कर्म} विरोधाभावात्। (विरोधाभावमेव साधयति - न हि इति)। न हि इष्ट-फलस्य कर्मणः शुद्धरूपत्वात् नित्यैर्विरोधः उपपद्यते। शुद्धाशुद्धयोर्हि विरोधो युक्तः[४३]। ("धर्मेण पापमपनुदति" इति शास्त्रात् शुद्ध्यशुद्धि-रूपयोः सुकृत-दुष्कृतयोः एव विरोधाच्च नित्यानि पापमेव नाशयेयुः, न संचितपुण्यमपि। अतः तत्पुण्यनिमित्तं भाविजन्म मुमुक्षोरवश्यंभावि इत्यर्थः।)

(Mimamsaka): Obligatory karmas are intended to destroy positive and negative results which have not started fructifying.
(Siddhanti): No, because the non-performance (of them) is said to cause negative results. The word "pratyavaya" indicates something undesirable. And it has been admitted that obligatory duties are meant to ward off pratyavaya that arises due to non-performance of obligatory duties, which is in the form of future unhappiness. So they cannot be for exhausting the karmas that have not yet begun fructifying.
Even if we accept that the obligatory duties are meant to ward off karmas that have not started giving results, still they can eliminate only papa karmas and not punya karmas, there being no contradiction. Indeed, it is not justified to say there is opposition for obligatory duties with karmas that give rise to desirable results. Opposition is possible only between pure and impure karmas.

Now the mimamsakas argue admitting the existence of sancita-karma. There are sancita which are not started, which is both good and bad, punya and papa, and they will completely be wiped out by nitya karma. They are duritakhayaratham. No. According to you nitya karma has no phala. How can it neutralise. How can a result not produced, "0" result, is going to destroy the sancitas which are infinite results. To destroy an enemy you are sending vandhyaputra with weapon. He explains the brief sentence. To avoid futuristic pratyavaya, you do nitya karmas. Such nitya karma cannot eliminate anarabdhaphala.

Even if we accept the purvapakshi's stand, that nitya karma eliminates such anarabdhaphala, still, it can only eliminate papa results, and not punya. It will join the company of punya. There is no opposition between. One more light when one light is there, will not eliminate the light. Light only eliminates darkness. Nityakarma phala is punya and it is not opposed to another desirable result. Pure result can overcome impure result. Not pure.

अज्ञान-निमित्त-कामसत्वे न सर्वकर्मक्षयसंभवः

---

[४०] पूर्वपक्षिणोऽभ्युपगमः अयम् । स्वाभ्युपगमविरोधः प्रसज्यते यदि नित्यानां अनारब्धक्षयहेतुत्वमपि स्वीक्रियते इत्यभिप्रायः । (सच्चिदानन्द)

[४१] भाट्टपक्षस्य निरसिष्यमाणत्वादाह - मुमुक्षुणा इति । कथमन्यथा स्वर्गफलकमपि कर्म निष्कामेण अनुष्ठीयमानं शुद्ध्यर्थमुपगम्येत । दृष्टं च मारकमपि केवलविषादि अनुपानादिना पुष्टिकरमिति भावः (गोविन्दानन्द)

[४२] उक्तविरोधमविगणय्य यदि नित्यकर्मणाम् अनारब्धकर्मक्षयहेतुत्वम् अङ्गीक्रियते , तदा दोषान्तरमपि प्रसज्जति इति भावः । (सच्चिदानन्द)

[४३] अशुद्धक्षपणार्थमेव शुद्धात्मकप्रायश्चित्तस्य विधानात् । न हि शुद्धक्षपणार्थमपि शुद्धं विहितं दृष्टम् इति भावः । (गोविन्दानन्द)

(यदुक्तं काम्यप्रतिषिद्धयोः अनारम्भात् इति, तत्र जन्मारभ्य प्रायणपर्यन्तं सर्वात्मना प्रतिषिद्धवर्जनं पुरुषेण कर्त्तुमशक्यम् अतिनिपुणानामपि सूक्ष्म-अपराध-दर्शनात्, काम्यवर्जनमपि सर्वात्मना {मुमुक्षुणा} कर्त्तुमशक्यम् इत्याह - न च इति। आत्मज्ञानं हि कामानामशेषतो निवर्त्तकम्, "रसोप्यस्य परं दृष्ट्वा निवर्त्तते" इति स्मरणात्. ज्ञानाभावे च सति कामावश्यंभावात् काम्यानुष्ठानमपि कदाचिन्मुमुक्षोः प्रसज्जते, तद्वशाच्च जन्मापि स्यादित्यर्थः।) न च कर्म-हेतूनां कामानां ज्ञानाभावे निवृत्यसम्भवात्[४४] अशेष-कर्म-क्षय-उपपत्तिः (अशेषकर्मक्षय-उपपत्तिः न च इत्यन्वयः)।

Moreover, in the absence of knowledge, there being no possibility of removing the desires, which are the cause of karmas. there cannot be exhaustion of all karmas.

How are you going to avoid desires. If you know atma, there is no kama for you,. Then there is moksha. As you are now, you cannot avoid because cause is there. So long as the sense of doership, I am doer, is there you cannot avoid karma. It is nice to say you have to give up kama. It is like modern Vedanta. God plus desire is man. man minus desire is god. Now you have a complex for having desires. Because you have sraddha in Gita. Kama is upalakshana for pratishiddha also because you will cut corners when kama is there. So aseshakarma cannot be exhausted.

(ननु आत्मज्ञानं न कामानां निवर्त्तकम् {or आ.गिरि - कामो नाज्ञानमूलः} आत्मविदोऽपि कामदर्शनादिति, नेत्याह - अनात्मविदः इति) अनात्मविदो हि कामः {आ.गिरि - अवश्यंभावी इति शेषः। तत्र हेतुः - अनात्मेति}, न आत्मविदः, अनात्म-फल-विषयत्वात्[४५]। (आत्मव्यतिरिक्तं किञ्चिदपि वस्तुतो नास्तीति मन्यमानस्य {or आ.गिरि - सर्वमात्मेति पश्यतां} आत्मविदः स्वव्यतिरिक्तफलाभावात् {or आ.गिरि - तत्वतो विषयाभावादेव} इति भावः) (आ.गिरि - अशनादिप्रवृत्तिनिमित्तं तु कामाभास एव। वास्तव-अभिनिवेश-अभावादित्यर्थः, आग्रह-अभावादित्यर्थः) । (तर्हि स्वात्मनि एव आनन्दरूपे तस्य कामोऽस्तु । नेत्याह - स्वात्मनि इति) स्वात्मनि च कामानुपपत्तिः, नित्यप्राप्तत्वात् । (ननु आत्मविदः प्राप्तस्वरूपानन्दस्यापि परब्रह्मप्राप्तौ कामोऽस्ति। नेत्याह - स्वयमिति) स्वयं च आत्मा परं ब्रह्म इत्युक्तम्।

In fact, desires are for those who do not know the self, inasmuch as desires have things external to the self as their results. There cannot be desire for one self as the self is ever attained. And it has been said that one's self is Brahman.

Kama is phalavishaya, having vishaya in results. One who wants results will have kama. Wise person has no need for results. What about atma-kama? Is there no expectation of results for him also. No. Desire for something you don't have or avoid what you have. Atma is object of your desire, you cannot say. It is already gained. Desire for atma is desire for knowing atma. There is no karma here. What about his desire for Brahman? No atma is Brahman.

नित्याकरणस्य प्रत्यवायजनकत्वमपि न युक्तम्

---

[४४] उक्तमेवेदं ब्रह्मात्मज्ञानादेव कामानां निवृत्तिरिति । तदेव हेतूकृत्य कर्मशेषसद्भाव इह साध्यते । (सच्चिदानन्द)

[४५] तद्विषयस्य अनात्मफलस्य सत्वात् इत्यर्थः । सति विषये च अविवेकिनः काम-अवश्यंभावादित्यर्थः । अनात्मफलं कामयमानः कुतो मुमुक्षुरिति चेन्मुमुक्षुतारतम्यात् तदेतत्सूचयतोक्तमसति विवेकबले इति टीकायां मुमुक्षुमात्रं चात्र लक्ष्यं इति भावः । (गोविन्दानन्द)

(नित्यानुष्ठानेन च प्रत्यवाय-अभावात् इति वदता त्वया यदि प्रत्यवायस्य नित्याकरणजन्यत्वं विवक्षितम्, तदा तदपि न संभवति इत्याह - नित्यानाम् इति)। नित्यानां च अकरणम् अभावः। ततः प्रत्यवाय-अनुपपत्तिः[४६] (प्रत्यवाय-उत्पत्तिः न संभवति इत्यर्थः) (ननु "अकुर्वन् विहितं कर्म निन्दितं च समाचरन् प्रसज्जंश्चेन्द्रियार्थेषु {प्रसज्जन् = विषयासक्तिं कुर्वन् } नरः पतनमृच्छति" (पा.भे - प्रायश्चित्तीयते नरः) - मनु ११.४४ - (or म.भारत, राजधर्म ३४.२) - इति वचनगतशतृप्रत्ययात् अकरणस्य प्रत्यवायहेतुत्वमवगम्यते, अकरणात् प्रत्यवायोत्पत्ति-अनुपगमे च शतृप्रत्यय-अनुपपत्तिः इति, नेत्याह - इत्यतः इति)। इति अतः (वक्ष्यमाणरीत्या अकरणस्य प्रत्यवाय-अहेतुत्वात् इत्यर्थः) पूर्वोपचित-दुरितेभ्यः {तेभ्यः हेतुभ्यः} {जनिष्यमाणायाः} प्राप्यमाणायाः प्रत्यवाय-क्रियायाः {दुःखस्य} नित्याकरणं लक्षणमिति[४७] "अकुर्वन् विहितं कर्म (मनु. ११.४४) " इति हि शतुर्नानुपपत्तिः। ("लक्षणहेत्वोः क्रियायाः" लटः शतृशानचौ - पा.सू ३-२-१२६[४८] इति सूत्रेण हेताविव लक्षणेपि शतुर्विधानादत्र लक्षणार्थः एव स इत्यर्थः। ननु अकरणेन प्रत्यवायक्रिया कथं लक्ष्यते? उच्यते - यदि यथावन्नित्य-अनुष्ठानमभविष्यत् तदा संचितदुरितक्षयोऽभविष्यत्, न चायं नित्यमकार्षीत्, ततः प्रत्यवायी भविष्यति {दुरितक्षयः न अभवत्, तस्मात् नूनं प्रत्यवैति, दुःखं प्राप्नोति} इत्येवं नित्याकरणेन पूर्वजन्मसु संचितेभ्यः दुरितेभ्यः प्राप्यमाणा दुःखरूपा प्रत्यवायक्रिया शिष्टैः लक्ष्यते {ज्ञाप्यते} इति)। (आ.गिरि - यथा अविचिकित्सन् श्रोत्रियः इति)। (गोविन्दानन्द - विचिकित्सा श्रोत्रिय-लक्षणमित्यर्थः। भोजनादिव्यवहारेषु युक्तायुक्तत्वादि संशयस्य श्रोत्रियमूलकत्वादिति भावः)। (ननु लक्षणे हेतौ च साधारणात्, शतृप्रत्ययाद् अकरणस्य प्रतीतं हेतुत्वमेव कस्मान्नोपेयते? तत्राह - अन्यथा इति) (सच्चिदानन्द - हेतौ अपि शतृप्रत्ययः विहित एव, तत्किमिति हेतुत्वं त्यज्यते इत्याशङ्क्याह - अन्यथा इति)। अन्यथा हि अभावाद् भावोद्पत्तिः इति (अकरणस्य हेतुत्वे स्वीकृते सति अभावात् भावः उत्पद्यते इति प्रसज्जेत अकरणस्य अभावरूपतायाः उक्तत्वात् इत्यर्थः) (तत्र इष्टापत्तिं वारयति - सर्वेति) सर्व-प्रमाण-व्याकोपः[४९] इति (मीमांसकस्य आद्य-प्रकार-निराकरणमुपसंहरति - इत्यतः इति। उक्तप्रकारेण ब्रह्मज्ञानं विना यथावर्णित-चरितस्यापि मुमुक्षोः मोक्ष-असम्भवात् इत्यर्थः)। अतः अयत्नतः {without any effort towards gaining knowledge} स्वात्मन्यवस्थानम् इति अनुपपन्नम् (अभावस्य भावधर्माश्रयत्व-अयोग्यत्वं प्रत्यक्षादि-प्रमाणसिद्धम्, अभावस्य कारणत्वरूप-भावधर्माश्रयत्व-स्वीकारे तु प्रत्यक्षादिप्रमाणविरोधः स्यादित्यर्थः।) न च एवमकरणस्य कथं ज्ञापकत्वं, कथं वा अनुपलब्धेः अभावज्ञापकत्वम् इति वाच्यम्। अकरण-अनुपलब्ध्योः ज्ञातयोरेव ज्ञापकत्व-अभ्युपगमेन स्वरूपतस्तयोर्ज्ञानहेतुत्व-अभावात् इति अन्यत्र विस्तरः।)। (आ.गिरि - भावरूपस्य कार्यस्य भावरूपमेव कारणमिति प्रत्यक्षादिभिः अवगतम्। शतृप्रत्ययात् अभावस्य हेतुत्व-अभिधाने सर्वप्रमाणविरोधः स्यादित्यर्थः।)

Further, the non-performance of nitya karma is purely an absence. From an absence, there cannot be arisal of something positive. The usage of present participle suffix in the passage "Omitting the obligatory duties..." is not untenable as it is used in the sense

---

[४६] द्रष्टव्यम् - गीयभा ३.० (अवतरणिका) सू.भा ३-४-२०. ४-३-१४ यत्र नित्यानामकरणे प्रत्यवायोत्पत्तिः निराकृता । (सच्चिदानन्द)

[४७] लक्षणं ज्ञापनं नित्याकरणं भावि-अनिष्टं सूचयति , तत्कारणं तु नित्यकर्म-काले अनुष्ठितं कर्मान्तरमिति "स्वकाले यदकुर्वस्तत् करोत्यन्यदचेतनः प्रत्यवायोऽपि तेन स्यात् " इति प्राचीनैः उक्तम् ।

[४८] The affix satru and sanac are the substitutes of lat and come after a verb in exprssing an attendant circumstance or characteristic, and the cause of an action. यवनः शयानाः भुञ्जते । हरिं पश्यन् मुच्यते । तथा विहितमकुर्वन् पुरुषः पतनमृच्छति ।

[४९] असतः सत्वापत्तौ सतश्च असत्वापत्तौ सर्वत्र प्रमाण-प्रमेय-व्यवहारे अव्श्वासः स्यादिति भावः । See असत्कार्यवाद-खण्डनम् - सूत्रभाष्य २.२.२६,२७

of a mere sign for non-performance of obligatory duties, indicative of the existence of pratyavaya resulting from the sins accumulated in the past. Otherwise, it would lead to a situation of something positive arising from a mere absence, which is against all means of knowledge. Hence, the stand that there will be abidance in self without any effort (towards knowledge) is untenable.

For you akarane prtyavaya. Non-doing causes a result of pratyavaya. This is because there is no mention of phala for nitya karma like agnihotra. But you yourself say, where there is no mention of result specially, the general result is svargaloka. Non-performance of daily karmas cannot give any result. Abhava cannot produce anything. Present participle pratyaya is used in hetu for purvapakshi. Worshipping Hari, he is released. Similarly, not doing nityakarma, he goes to hell. Past sins fructifying now indicates the non-performance of nitya-karma. So it is only indicator. We say it is not hetu, but lakshana. Weeping he eats. Here weeping is not hetu. Here we take lakhsana. Not doing vihita karma, you will be doing wrong karma which will cause pratyavaya. It is lakshana for pratyavaya because you cannot remain without performing action. Ninditam samacaran is hetu in fact. tatah = abhavat. What is the difference between abhava of kamya karma-doing and abhava of nitya karma-doing. So lakshana means, the present experience of duhkha indicates non-performance of nitya in the past. The existing pratyavaya it is. (When you see a person who is not disposed to do nityakarma, it indicates a mental disposition of him which comes from past sins because of which he is not inclined to do nitya-akarnam. So nitya akrana is indicator of pratyavaya).

If you say pratyavaya which is bhava, from abhava, then it is against all pramanas. Vandhayputra can not give birth to a son. So it is mere talk only that without effort you can gain moksha.

स्वर्गप्राप्तिरपि न मोक्षः, आरब्धत्वात्

द्वितीय-पूर्वपक्षस्य उत्तरः

(अथवा इत्यादि उक्तमप्यनूद्य निराकरोति - यच्चोक्तं इत्यादिना)। यच्चोक्तं निरतिशयप्रीतेः स्वर्गशब्द-वाच्यायाः कर्मनिमित्तत्वात् कर्मारब्धः एव मोक्षः इति, (किं केवलकर्मणां मोक्षारम्भकत्वम् विद्यासहितानां वा नाद्यः इत्याह - तन्नेति)। तन्न। नित्यत्वाद् मोक्षस्य। (ननु नित्यत्वेऽपि कर्मसाध्यत्वं तस्य किं न स्यादिति, न इत्याह - नेति)। न हि नित्यं किंचिदारभ्यते। लोके यदारब्धं तदनित्यमिति (लोके यन्नित्यम् आत्मादि तत्किंचिदपि नारभ्यते, यद्धि घटादि आरब्धं तदनित्यमिति व्याप्तिदर्शनात् इत्यर्थः)। अतो न कर्मारब्धः मोक्षः।

With reference to what has been said on moksha being started by karma due to karma being the cause of unsurpassed happiness which is the meaning of the word “heaven”, it is not right. Moksha is ever existent. What ever that is ever existent cannot be said to begin. In the worldly experience, whatever is begin is seen as impermanent. Hence moksha is not one that is started by karma.

MOKSHA NOT ALSO BY COMBINATION OF KARMA AND UPASANA

The second purvapaksha is negated now. Svarga is meaning incomparable sukha. It is moksha and that is thorough means. You are talking about moksha through karma. Moksha is phala of karma. So svarga is created for karma. If it is created, it is impermanent. It was not there before. Later on it will not be there. Moksha should be free from production and destruction. We don’t produce moksha. They why do you study sastra. We study sastra to remove the notion that I am not mukta now. Bhashyakara has fun here. we don’t see people starting

eternal. Arambha means it proves itself as anityam. Begun in time means has an end in time. Sastra also make sit clear that it is anitya. karmabhyah is svarga is okay, but not moksha. You can go to svarga by other means also not necessarily by jyotishtoma. Even warriors go dying in dharmic war. All types may be there. Then our subramaniya Iyer will also be there.

विद्यासहितकर्मभ्योऽपि न मोक्षः

नित्यस्य अनारभ्यत्वात्

(द्वितीयकल्पमनूद्य निराकरोति - विद्यासहितानाम् इति। विद्यारूप-सहकारिमहिम्ना कर्मारभ्यस्यापि मोक्षस्य नित्यत्वं भविष्यति इति शङ्कक-अभिमानः।) विद्या-सहितानां कर्मणां नित्य-आरम्भ-सामर्थ्यमिति चेत्, न[५०] विरोधात्। नित्यं च आरभ्यते इति विरुद्धम्। (विद्यारूप-सहकारिमहिम्ना तावत् कर्मसाध्ये मोक्षे कश्चिदतिशयो भविष्यति, यदेव विद्यया करोति तदेव वीर्यवत्तरं भवति इति श्रुतेः। स च अतिशयो न नित्यस्वरूपः, यत्कृतकं तदनित्यम् इति व्याप्तिविरोधात्, तद्यथा इह कर्मचितो लोकः क्षीयते एवमेव अमुत्र पुण्यचितो लोकः इत्यादि श्रुतिविरोधाच्च, किं तु तदतिरिक्त उत्कर्षरूप एव वक्तव्यः इति भावः। किं च निरतिशयप्रीतेः आत्मस्वरूपत्वेन आरभ्यत्व-अयोगाच्च, न विद्यासहितानां केवलानां वा कर्मणां मोक्षः फलम्। न च स्वर्गकामश्रुतिविरोधः. तत्र निरतिशय-प्रीतिवाचकस्य स्वर्ग-शब्दस्य कर्मयोग्यतानुसारेण विषयजनित-सुखविशेषे लाक्षणिकत्व-उपपत्तेः।)

(Objection): Karma associated with upasana has the capacity to produce the eternal.
(Siddhanti): No. Because of a contradiction. It is a contradiction in terms to say that what is eternal is produced.

Now he gives up that argument. All I want to say was don't give up karma. You study brahmavidya along with karma. One fellow said, you bring beaten rice. I will bring husk. We will mix both and then phu phu EòEæò we will eat. When brahmavidya itself can give me moskha why this karma. Karma is not possible in fact because there is no kartrutva and also karmahetu, kamasya abhavat. This synthesis will not work. Integral yoga is problem. Yoga is not complete. Vedanta is not complete. Too much of knowledge is dangerous. Thus they say.

A nitya moksha can start because that power is there for karma with knowledge of Brahman. Here vidya means upasana we can take. (See tika)

अनारभ्य-प्रध्वंसाभावः विषमदृष्टान्तः, मोक्षस्य भावरूपत्वाद्

(शङ्कते - यदिति। यद्घटादि विनष्टं तत्पुनर् नोत्पद्यते इति दर्शनात् घटादिविनाशरूपस्य प्रध्वंसाभावस्य नित्यत्वं निश्चीयते. तस्य अनित्यत्वे तु विनष्टस्य घटादेः पुनरुत्पत्तिप्रसङ्गः स्यात् ध्वंस-प्रागभाव-अनधिकरणकालस्य प्रतियोगि-कालत्व-नियमाद् इत्यर्थः।) यद्विनष्टं तदेव नोत्पद्यते इति (ततः किं? तत्राह - प्रध्वंसाभावेति। प्रध्वंसाभाववत् नित्योऽपि मोक्षः आरभ्य(ः) एव इति चेत्, न। (प्रध्वंसाभावस्य कार्यत्वमुपेत्य यद्भाव- {रूप} कार्यं तदनित्यमिति व्याप्तिः {सर्वैः} विवक्षिता । निरतिशयप्रीतिरूपा च मुक्तिः भावरूपा एव तव अपि सम्मता। {यद्भावकार्यं तदनित्यमिति व्याप्तिना प्रध्वंसातिरिक्तकार्यस्य अनित्यत्वं सिद्धं तथापि मुक्तेः भावरूपत्वात्} अतो न मुक्तेर्नित्यत्वं न सिध्यति इति दूषयति - नेति) मोक्षस्य भावरूपत्वात्। (परमार्थतस्तु प्रध्वंसस्य कार्यत्वं नास्ति इत्याह - प्रध्वंसेति। प्रध्वंसाभावोपि आरभ्यते इति न सम्भवति, नैरुक्तैर्जनेः (जनी - प्रदुर्भावे) भावपदार्थ-धर्मत्व-प्रतिपादन-विरोधेन, अभावस्य भावरूप-जन्म-आश्रयत्व-अयोगेन च प्रध्वंसाभावे जन्मरूप-विशेष-अभाव-अभ्युपगमात् इत्यर्थः)। प्रध्वंसाभावोऽप्यारभ्यत इति न सम्भवति। अभावस्य विशेषाभावात्, (कथं तर्हि वादिनां प्रध्वंसाभावे जन्माश्रयत्वज्ञानम् इत्याशङ्क्य भ्रान्तिमात्रमेतदित्याह - विकल्पेति) विकल्पमात्रमेतत्। (ननु

[५०] विशिष्ट-कर्म-आरभ्योऽपि मोक्षो न नित्यः कार्यत्वाद् घटवदिति अभिप्रेत्याह - नोति । (गोविन्दानन्द)

प्रध्वंसाभावस्य प्रतियोगि-जन्यत्व-अभावे तत्प्रतियोगिकत्वं न स्यादिति आशङ्क्य, प्रागभाव-अत्यन्ताभावयोरिव तस्य तत्प्रतियोगिकत्वं सम्भवति इत्याशयेन आह - भावेति)। (आ.गिरि - किं च अभावस्य भावनिषेधमात्रस्वभावत्वाद् भावविरोधित्वाच्च न भावरूपो धर्मः सम्भवति इत्याह - भावेति) भावप्रतियोगी ह्यभावः। (अभावस्य भाव-प्रतियोगिकत्वं घटाभावः पटाभावः इति व्यवहारसिद्धमिति हि-शब्दार्थः) (ननु अभावे भावप्रतियोगिकत्व-विशेष-अभ्युपगमे तत्र जनिरूप-विशेषः अपि परमार्थः अस्तु इति न शङ्कनीयम्, भावप्रतियोगिकत्वस्यापि तत्र परमार्थत्व-असिद्धेः इत्येतत् सदृष्टान्तमाह - यथा हि इति । भावः सत्वं, तच्च सर्वानुगतम्, सद्रूपं वस्तुतो निर्विशेषं ब्रह्मैव नान्यत्, तद्यथा एकमपि घटसत्वं पटसत्वमिति रीत्या भिन्नमिव घटादिभिः विशेष्यते, घटादि-प्रतियोगिकत्वेन कल्प्यते, तथा घटो नास्ति, पटो नास्ति इति प्रतीयमान-अभावः अपि एकः एव, समवाय-सत्ता-जात्यादिवद् लाघवात्, स च अभावः सर्वविशेषरहितोऽपि, भावेषु घटादिषु मुद्गर-अभिघातादि-जनित-क्रिया-योगाद् घटादिप्रतियोगिकत्वेन जातत्वेन च वादिभिः भ्रान्त्या परिकल्प्यते, द्वावभावावित्यादि-व्यवहारात् संख्यागुणयोगमभावस्य मत्वा द्रव्यत्वेन अभावः केनचित् परिकल्प्यते। एतदुक्तं भवति - यथा ह्यभावस्य द्रव्यान्तर्भावम् आशङ्कमानस्य अभावे गुणाश्रयत्व-द्रव्यत्व-भ्रान्तिः तथा वादिनामपि तत्र वस्तुतो भावप्रतियोगिकत्व-जन्म-आश्रयत्वादिरस्तीति भ्रान्तिरिति।) (आ.गिरि - अभावस्चतुर्विधः तत्र अनित्यः प्रागभावः। प्रध्वंसादयस्तु नित्याः। ततः कथं निर्विशेषत्वम् इत्याशङ्क्य आह - यथा इति। भावप्रत्ययस्य एकाकारत्वाद् एकः एव भावः {-सत्ता-}यथा अवच्छेदकभेदाद् भिन्न इव प्रकाशते। तथा निषेधप्रत्ययस्य एकाकारत्वाद् एकः एव अभावः अवच्छेदकभेदाद् भिन्न इव प्रकाशते। जायते नश्यति च इति क्रियायोगात् संख्यागुणयोगात्[५१] द्रव्यवद् अभावः विकल्प्यते। न तु तत्वतः सविशेषः इत्यर्थः।) यथा हि अभिन्नोऽपि, भावो घटपटादिभिर्विशेष्यते भिन्न इव 'घट-भावः', 'पट-भावः' इति, एवं निर्विशेषोप्यभावः क्रिया-गुण-योगाद् द्रव्यादिवत् विकल्प्यते[५२]। (अभावस्य वस्तुतो जन्मादि-रूप-भाव-धर्म-आश्रयत्वे बाधकमाह - न हि इति) (आ.गिरि - इतश्च न तत्वतः सविशेषः इत्याह - न हि इति) विशेषणं हि विशेष्यान्वयि प्रसिद्धम्। प्रतियोगिना च विशेषणेन न अभावस्य सहभावोऽस्ति। घटप्रध्वंसस्य नित्यत्वे घटस्यापि नित्यत्व-प्रसङ्गात्। घटसहभावित्वे च तदभावत्व-व्याघाताद् भावाभावयोः सह अनवस्थानरूप-विरोध-अभ्युपगमात्। ततः प्रतियोगिविशेषाद् अभावः सविशेषः, कार्यत्वादि-धर्मवान् इति विभ्रममात्रम् इत्यर्थः)। न ह्यभावः (भावधर्म-आश्रयस्य भावत्व-नियम-प्रसिद्धि-द्योतनार्थः हि शब्दः) उत्पलादिवद् विशेषण-सह-भावी (विशेषणाश्रयः इत्यर्थः) (ननु एकस्य अभावस्य जन्मादिकल्पनास्पदस्य ब्रह्मतुल्ययोगक्षेमस्य अङ्गीकारे द्वैतापत्तिरिति चेत्, नायं दोषः, भावाद्वैत-अभिप्रायेण अस्य भाष्यस्य प्रवृत्ति-उपपत्तेः। वस्तुतस्तु अयमभावो न ब्रह्म-अतिरिक्तः, ब्रह्मणि कल्पित-घटादि-प्रतियोगिकत्वात् कल्पित-प्रतियोगिक-अभावस्य अधिष्ठान-अनतिरेकादिति मन्तव्यम्।) विशेषणवत्वे भावः एव स्यात्।

(Objection): What has been destroyed that itself is never produced again. Hence, like the absence of a thing after its destruction, moksha is eternal and yet it is produced.
(Siddhanti): No. Because moksha is positive. To say that the absence of a thing after its destruction is begun/produced is not tenable because a non-existence cannot be qualified with any attributes. So pradhvamsabhava is created - is only a verbal quibble. Non-existence is indeed only the opposite of existence. Just as existence, though indivisible, is yet distinguished by the pot, cloth etc. by saying existence of pot, existence of cloth and so on, so too, the non-existence, in itself, is free of any distinctions and yet talked of as varied like substance etc. due to the association with action, quality etc. Non-existence cannot indeed co-exist with attributes like the blue lily co-exists with attributes. If it were possessed of attributes, it would become an existent thing.

---

[५१] एको द्वाविति संख्यात्मक-गुण-आरोपाद् द्रव्यवद् अभावः विकल्प्यते व्यवह्रियते इति भावः । (गोविन्दानन्द)

[५२] घटपटादीनां लौकिकपरमार्थसत्यत्वात् तैर्भावो विशेष्यते इति युक्तम् । अभावः पुनः विशेषरहितः सन् उत्पद्यते, विनश्यति, नित्यः, अनित्यः इत्येवं क्रियाभिः गुणैश्च सहभावी इव यद्विभाव्यते तद्विकल्पमात्रम् , न तु वस्तुवृत्तेनापि विशेषणवानभावः इत्यर्थः । (सच्चिदानन्द)

We mean to say that no positive result of an act, like pot, is found permanent in our experience (unlike the absence resulting from an act of destruction. For naiyayikas, of the four types of abhavas, pragabhava, pradhvamsabhava, anyonyabhava and atyanta-abhava, pragabhava alone is not nitya and others are nitya). If moksha is a positive result of an act, it will also be impermanent.

In fact, there can never be a result of an act that is purely abhava such as pradhvamsa-abhava. In pradhvamsabhava, we have kapala, churna etc. So there is a positive result also along with the absence of pot. They are anitya like pot. So mere abhava can never result from any act. All effects such as pot etc. ever inhere in clay etc. either in manifest form or in potential form as their attributes, but never inhere in abhava. Abhava cannot be related to any act or quality. It is mere verbal quibble to speak of abhava as a thing in itself and speak of distinctions just as speaking of body of a stone image.

* If pradhvamsabhava be eternal in its specific character as such, the concept of pot which enters into that specific concept must also be eternal. If the concept of pot be thus eternal, how can it get connected to its non-existence.

Suppose this pot is destroyed. Then you have an abhava of this pot. It is started/produced. Absence of the destroyed pot began but never ends. It can never come back. If you put them back, it is not the same pot. So nitya and arabhya. So too moksha can be result of karma. No. You talk of abhava and I talk of bhava, vastu.

Another thing. You talk of later non-existence. Even that is not started or begun. Not produced. What is the distinction between any abhava. (What is the difference between akarana of nitya and akarana of pratishiddha). Here are chips. No. Put down the chips. we are talking of abhava. Abhava is not a vastu. It is only upacara to talk of distinctions. Bhava-patidvandvi is bhavapratiyogi. Yasya abhavah sa pratiyogi. Ghata abhava is ghatapratiyogi. Even bhava has no real distinctions in itself. It is superimposed due to association with pot etc. What to talk of abhava. Still it is used with distinctions like bhava is used. Itself is not there, how can it be attributed. How long is the height of the man's horn, he asks.

कर्त्तृनित्यत्वादपि न मोक्षनित्यत्वम्

(साध्यस्य मोक्षस्य स्वरूपेण नित्यत्व-अयोगेऽपि प्रवाह-नित्यत्वं सम्भवति इति शङ्कते - विद्येति। कर्त्तुः आत्मनः नित्यत्वात् आत्मा संततं विद्याकर्मणी कुर्वन् एव आस्ते। तथा च विद्याकर्मलक्षणसाधनसंतानजनितः मोक्षः अपि संततः अवतिष्ठते।) (आ.गिरि - एवं प्रध्वंसदृष्टान्तेन शङ्कितं नित्यत्वं परिहृत्य प्राकारान्तरेण आशङ्क्य निषेधति - विद्येति)। विद्या-कर्म-कर्त्तुः नित्यत्वात् विद्या-कर्म-संतान-जनित-मोक्षस्य नित्यत्वमिति चेत्, गङ्गा-श्रोतोवत् (प्रवाह-नित्यत्वे दृष्टान्तमाह - गङ्गेति), न। कर्त्तृत्वस्य दुःख-रूपत्वात्। (सच्चिदानन्द - अत एव विश्रान्तिमिच्छति सर्वोऽपि, न सातत्येन कर्त्तृत्वम्. सू.भा - २.३.४०) कर्त्तृत्व-उपरमे च (अथ विश्रान्त्यर्थं कर्त्तृत्व-उपरमः अपि इष्यते, ततः) मोक्ष-विच्छेदात् (मुक्तिकालेऽपि साधन-अनुष्ठातृत्वरूपस्य-कर्त्तृत्वस्य अनुवृत्ति-उपगमे मुक्त्युच्छेदः, तस्य दुःखात्मकत्वात्। एतद्दोषपरिहाराय तदा तदुपरम-उपगमे च मोक्षस्यापि विच्छेदात् अनित्यत्वं तदवस्थमेव इत्यर्थः)।।

(Objection): The doer of karma and upasana being eternal, moksha born of continuous flow of karma and upasana also is eternal like the flow of Ganga
(Answer): No. For the doership is fraught with painfulness. On the cessation of doership, on the other hand, moksha ceases.

He says moksha can be eternal even if born of action. The doer of action and upasana, if he is nitya, moksha can be eternal. The result does not end. So moksha will not end. It will be a perennial thing flow like Ganga-flow. No, action is not a happy thing. There is pain involved in doing it. If he gives up karma, moksha is gone. It is not easy to get up in Brahmmuhurta and every morning there will be fight. Doing is painful. You work for one week and enjoy a holiday of weekend. One year you work, one month you enjoy. Whole life you work, you enjoy retirement. That is how it is. When kartrutva is given up, you are giving up karma. Karmaphala also goes away. So moksha ends.

ग्रन्थारम्भ-समर्थनम्

तस्माद् (मोक्षस्य साध्यत्वे नित्यत्व-भङ्गप्रसङ्गाद् इत्यर्थः।) (सच्चिदानन्द - यस्मात् कथञ्चिदपि मोक्षो ब्रह्मज्ञान-व्यतिरिक्तसाधनान्न लभ्यः तस्मादिति उपसंहारः) अविद्यादि-कर्म-उपादान-हेतु-निवृत्तौ[५३] (काम आदि पदार्थः। कर्मोपादानहेतोः अविद्यादेः निवृत्तौ सत्यामित्यर्थः।) स्वात्मन्यवस्थानं मोक्षः इति। (ननु ब्रह्मात्मनि अवस्थानं मोक्षः ब्रह्म वेद ब्रह्मैव भवति इति श्रुतेः न तु आत्मनि अवस्थानमिति शङ्कां निराकरोति - स्वयमिति) स्वयं चाऽऽत्मा ब्रह्म। (ननु अविद्यादिनिवृत्तिरेव कर्मसाध्या अस्तु, तथा च कर्मभिरेव मोक्षः इति, नेत्याह - तद्विज्ञानाद् इति। कर्मणाम् अविद्यानिवर्त्तने सामर्थ्य-अभावादिति भावः इति शब्दः विचार-समाप्ति-अर्थः)। तद्विज्ञानाद् अविद्यानिवृत्तिः मोक्षः इति (एवं कर्मणां मुक्तिहेतुत्वं निरस्य आदौ ब्रह्मविद्या प्रस्तूयते इति यदुक्तं तदेव उपसंहरति - अतः इति। ब्रह्मविद्यायाः मुक्तिसाधनत्वात् इत्यर्थः)। अतः ब्रह्मविद्यार्था उपनिषदारभ्यते।

> Therefore, Moksha consists in dwelling in one's own self on the elimination of the cause of karma, viz., ignorance etc. Self is Brahman; and since the knowledge of Brahman leads to the elimination of ignorance, hence, the upanishad that is meant to impart Brahmavidya is started.

How do you end kartrutva. We see karta as false. So by knowledge we eliminate the cause of karma, i.e., kama or kartrutva and ignorance. Due to absence of kama and kartrutvam being false, there is abidance in one self. So moksha is born of knowledge. It is vastu tantra. Atma happens to be nitya muktah. So knowledge possible. But knowledge of Brahman leads to moksha. How atmani avasthanam is moksha. Atma and Brahman are one and the same. Without recognising Atma as Brahman any avasthanam is in anatma only like sleep or any vishayasukha. Either there is ajnanam or anyatha grahanam. In both anatma avsthanam alone is there.

Why not we say avidya will be eliminated by karma? Any avidya, how will you eliminate by karma. Because karma is not opposed to avidya. Karma is the product of kama/karta/ignorance. Only knowledge is opposed. Any karya is not opposed to its karanam. So upanishad started for brahmavidya. So the subject matter is different for Upanishad and that is why we call it separately as Veda and Vedanta. No body calls book and its last chapter. Moskha is end. So moksharthi alone studies. Why not I study for scholarship. No, it is not useful. Any academic study is for artha, kama only. They will find out when the Vedas were born etc. They will have historic angle. All scholarship is only a tool. it is not an end. Grammar also is only means. But it is only for purushartha. Degree is artha. Vidyasukha is kama. For dharma sake also some may read. That is punya. In mahatmya you read such things

---

[५३] कर्मोपादानहेतुः कामः। तद् हेतोः अविद्यायाः निवृत्तौ तस्यापि आत्यन्तिकनिवृत्तौ सत्यां स्वात्मन्यवस्थानं मोक्षः । (सच्चिदानन्द)

that if you read daily you will go to Vaikuntha etc. Or spiritual punya for anthahkarana suddhi is possible. So mokshaya alone jnanam. Jnanaya upanishad. Upanishad is the only pramana. It will give knowledge. That is moksha. The word Upanishad itself reveals knowledge of Brahman.

उपनिषत्-शब्द-निर्वचनम्

(ब्रह्मविद्यायाम् उपनिषद्-शब्द-प्रसिद्धिरपि विद्यायाः एव निःश्रेयससाधनत्वे प्रमाणम् इत्याशयेन उपनिषद्-शब्दार्थमाह - उपनिषदिति।) उपनिषदिति विद्या[५४] उच्यते, (अत्र सामीप्यवाचिना उपोपसर्गेण प्रतीचः ब्रह्मसामीप्यम् उच्यते। तच्च सामीप्यं तयोरभेदरूपं विवक्षितम्। नि-शब्दः निश्चयार्थः। तथा च उपसर्गद्वयेन तयोरभेदनिश्चयरूपा विद्या उच्यते। विशरण-अवसादन-गतयः धात्वर्थाः - षद्लृ इत्यस्य तौदादिकस्य परस्मैपदिनः। क्विप्-प्रत्ययश्च अत्र कर्तरि विवक्षितः ततश्च प्रत्यग्-ब्रह्म-ऐक्य-गोचरा विद्या विदुषामनर्थं शातयति अवसादयति वा तान् ब्रह्म गमयति इति वा उपनिषत्पदेन सफला ब्रह्मविद्या उच्यते इत्यर्थः। एतदेव विवृणोति - तच्छीलोति) तच्छीलिनां (ब्रह्मविद्या-अभ्यास-शीलवताम् इत्यर्थः) गर्भ-जन्म-जरादि-निशातनात् (शिथिलीकरणात्), तदवसादनाद्वा, (तेषां गर्भादीनामवसादनं नाशनम्) ब्रह्मणो वा उप-नि-गमयितृत्वात् (प्रत्यक्तया प्रापयितृत्वात्)। (एवमुपनिषत्पदस्य षद्लृ विशरण-गत्यवसादनेषु इति वैयाकरणप्रसिद्धिमनुसृत्य अर्थत्रयं दर्शितम्। इदानीं स्वयमर्थान्तरमाह - उप इति। उप सामीप्येन विषयतया अस्यां विद्यायां ब्रह्मस्वरूपं परं श्रेयः नितराम् अबाधिततया स्थितमित्यर्थः।) उप निषण्णं (आत्मतया उपस्थितम्) वा अस्यां (विद्यायां निमित्तभूतायाम्) परं श्रेयः (ब्रह्म, जीवस्य) इति[५५]। (उपनिषत्पदस्य ग्रन्थे प्रसिद्धिं घटयति - तदिति। विद्याप्रयोजनकत्वाद् ग्रन्थोऽप्युपनिषत्पदेन निरूढलक्षणया व्यवह्रियते इत्यर्थः।) तदर्थत्वाद्[५६] ग्रन्थः अपि उपनिषत्[५७]। (अत्र व्याख्येयस्य ग्रन्थस्य ब्रह्मविद्यार्थत्व-उक्त्या तस्य मानान्तर-अनधिगतं ब्रह्म विषयः तद्विद्याद्वारा मुक्तिः प्रयोजनम् तत्कामोऽधिकारी इति सूचितम्।)

> Knowledge (of Brahman) is called Upanishad because it loosens or destroys altogether the (bonds of) conception, birth, oldage etc. of those who are dedicated to it. Or, it leads them very near to Brahman. Or, the highest good is obtained in it. The text also is called Upanishad as it is intended to produce that knowledge.

ETYMOLOGY OF UPANISHAD

The word upanishad reveals knowledge. Upa means closeness, closeness of Brahman that is to be accomplished. Close to what? Seeker. How close? Close to is relative. Here it is no distance at all. Why then near? Because you are seeking. Like the 10th man is near you when said, because you are seeking. Where? As you. About that there is ignorance, there is doubt. Definite knowledge about it, ascertained knowledge. Not idea or information. Ni indicates that. Both upasargas put together refers to definite knowledge of Brahman, that jiva is Brahman.

There is dhatu then indicating the meaning of action. Dhatoh shah sah. Sadlru is the dhatu. Upadese+ Sad is the root. The meaning is given. Visarana etc. Adding kvip pratyaya in the

---

[५४] प्रत्यगात्म-अभिन्न-ब्रह्मविद्या (सच्चिदानन्द)

[५५] एवमुपनिषद् -शब्द-व्युत्पत्यापि ब्रह्मविद्यायाः मोक्ष-साधनत्वं-अवगतम् इति भावः । उपनिषद्-शब्द-निर्वचनं का.भा, मु.भा, बृ.भा अवतरणिकासु द्रष्टव्यम् । (सच्चिदानन्द)

[५६] ननु एवं ब्रह्मविद्यार्था उपनिषदारभ्यते इति व्याहतं, स्वस्य स्वप्रयोजनकत्व-असम्भवात् इत्याशङ्क्याह - तदर्थेति । (गोविन्दानन्द)

[५७] इति गौण्या वृत्या व्यपदिश्यते इति शेषः अत एव ब्रह्मविद्यार्थम् उपनिषदारभ्यते इत्युक्तमिति भावः । (सच्चिदानन्द)

sense of karta of the dhatvartha. Karta is Brahmavidya which is given by upani. Visarati, wears out all anarthas. May be again it will come back. No avasadayati. It puts an end to the root cause, i.e., avidya. Positively speaking, gamayai. Takes you to Brahman. So that vidya is called Upanishad. Saphala Vidya because the root sad gives the result. The moksha is highest sreyas. It is in the form of Brahman. It is in this upanishad. The text is also called upanishad. Because it gives the knowledge. There is sambandha between the two. Pratipadaka and pratipadya sambandha. Pratipadaka is text. Pratipadya is knowledge. Revealer and revealed relationship. Adhikari is mumukshu. When mumukshutvam will bring in all the other qualifications.

शीक्षावल्ली

प्रथमोऽनुवाकः

शान्तिपाठः

देवताप्रार्थनम्

१४) **शं** सुखं प्राणवृत्तेः अह्नश्चाभिमानी देवदात्मा **मित्रः नः** अस्माकं **भवतु**। तथैव अपानवृत्तेः रात्रेश्चाभिमानी देवदात्मा **वरुणः**। चक्षुषि आदित्ये च अभिमानी **अर्यमा**। बले इन्द्रः। वाचि बुद्धौ च **बृहस्पतिः**। **विष्णुः उरुक्रमः** विस्तीर्णक्रमः पादयोरभिमानी। एवमाद्याः अध्यात्मदेवताः **शं नः भवतु** इति सर्वत्रानुषङ्गः। तासु हि सुखकृत्सु विद्या-श्रवण-धारण-विनियोगादयः[58] अप्रतिबन्धेन भविष्यन्ति इति तत्सुखकृत्त्वं[59] प्रार्थ्यते - शन्नो भवतु इति।।

अपरब्रह्मस्तुतिः

१५) ब्रह्म[60]-विविदुषुणा नमस्कार-ब्रह्मवदन[61]-क्रिये वायु-विषये ब्रह्म-विद्योपसर्ग-शान्त्यर्थं क्रियेते। सर्व-क्रिया-फलानां तदधीनत्वात् ब्रह्म वायुः। तस्मै **ब्रह्मणे नमः** प्रह्वीभावं 'करोमि' इति वाक्यशेषः। **नमः ते** तुभ्यं हे **वायो**। नमस्करोमि इति परोक्ष-प्रत्यक्षाभ्यां वायुरेवाभिधीयते। किं च, **त्वमेव** चक्षुराद्यपेक्ष्य बाह्यं संनिकृष्टम् अव्यवहितं **प्रत्यक्षं ब्रह्मासि** यस्मात्, तस्मात् **त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि**। **ऋतं** यथाशास्त्रं यथाकर्त्तव्यं बुद्धौ सुपरिनिश्चितमर्थं तदपि त्वदधीनत्वात् त्वामेव **वदिष्यामि**। **सत्यम्** इति स एव वाक्कायाभ्यां संपाद्यमानः। सोऽपि त्वदधीनः एव संपाद्यः इति त्वामेव सत्यं **वदिष्यामि**। **तत्** सर्वात्मकं वाय्वाख्यं ब्रह्म मया एवं स्तुतं सत् **मां** विद्यार्थिनम् **अवतु** विद्या-संयोजनेन। **तद्** एव ब्रह्म **वक्तारम्** आचार्यं वक्तृत्व-सामर्थ्य-संयोजनेन **अवतु**। '**अवतु माम्**', '**अवतु वक्तारम्**' इति पुनर्वचनम् आदरार्थम्।।

शान्त्यभिधानत्रयस्य प्रयोजनम्

१६) **ॐ** शान्तिः शान्तिः शान्तिः इति त्रिर्वचनम् आध्यात्मिकाधिभौतिकाधिदैविकानां विद्या-प्राप्त्युपसर्गाणां प्रशमार्थम्।।

(इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषत्-शीक्षावल्ली-भाष्ये प्रथमोऽनुवाकः)।।

---

[58] पा.भे - विद्या-श्रवण-धारणोपयोगाः इति आनन्दाश्रमः।

[59] पा.भे - तत्सुखकर्तृत्वम् इति आनन्दाश्रमः।

[60] पा.भे - ब्रह्मविद्या इति।

[61] पा.भे - नमस्कार-वन्दनेति आनन्दाश्रमः।

FIRST ANUVAKA

शान्तिपाठः

शन्नो मित्रः शं वरुणः । शन्नो भवत्वर्यमा । शन्न इन्द्रो बृहस्पतिः । शन्नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ।

ॐ शान्तिः शान्तिः शान्तिः ।।

शम् - be one who blesses; नः - to us; मित्रः - Mitra; शं - be one who blesses; वरुणः - Varuna; शम् भवतु - be one who blesses; नः - to us; अर्यमा - Aryama; शम् - be one who blesses; नः - to us; इन्द्रः - Indra; बृहस्पतिः - Brhaspati; शम् - be one who blesses; नः - to us; विष्णुः - Visnu; उरुक्रमः - one who has long stride; नमः - surrender; ब्रह्मणे - to Brahman (in the form of Hiranyagarbha); नमः - surrender; ते - to you; वायो - Oh Lord Vayu; त्वम् - you; एव - alone; प्रत्यक्षम् - perceptible; ब्रह्म - Brahman; असि - are; त्वम् - you; एव - only; प्रत्यक्षम् - perceptible; ब्रह्म वदिष्यामि - I would call; ऋतम् - truth; वदिष्यामि - I would call (you); सत्यम् - spoken truth; वदिष्यामि - I would call (you); तत् - that (Brahman); माम् - me: अवतु - may protect; तत् - that (Brahman); वक्तारम् - the teacher; अवतु - may protect; अवतु - may protect; माम् - me; अवतु - may protect; वक्तारम् - the teacher; ॐ - Lord; शान्तिः - let there be peace; शान्तिः - let there be peace; शान्तिः - let there be peace.

> "Let Mitra be the one who blesses us. Let Varuna bless us. Let Aryama do good to us. Let Indra bless us. Let Brhaspati do good to us. Let Visnu - one with long strides, bless us. I surrender to Brahman (in the form of Hiranyagarbha). Oh Lord Vayu, I surrender to you. You are the perceptible Brahman. I would call you alone as perceptible Brahman. I would call you truth (which is in keeping with the sastra). I would call you spoken truth. May He (Brahman in the form of prana) protect me (when I am gaining the knowledge). May He protect the teacher. May He protect me (at the time of gaining the result of the knowledge). May He protect the teacher. Let there be peace."

INTRODUCTION

Santyartham pathah is *santipathah*. Here *Santi* means freedom from all obstacles for the study of Vedanta. The *Santi Mantra* for the second and third *valli* is *sahanavavatu* which we will see later. It is seen for *Katha Upanishad* also. The *Santi mantra* for the first *valli* we will see now. Not obstacles to other pursuits. Other pursuits may fail. Let it be okay. By their success I have not achieved anything great. Success is good. Okay. But here it makes a big difference, i.e., success or failure. Obstacles can be from different sources. So Prayer is addressed to many *devatas*. So *Varuvadevata* for rain related. Internal obstacle - then *adhisthana devatas* of the particular organs. A stay order is sought for one hour. Afterwards I am ready to take it. Because *praraddha avasyam anubhoktavyam*.

OM SANNO MITRA

This *santimantra* is not chanted before one begins *karmannushthana*. But chanted before *upanishad* studies. Why? Because *devatas* may create many obstacles. If you do karma, *devatas* are happy because they get their *havis* and *stuti*. But when one enters *jnanmarga*, they don't like it. Like a person who owns many cattle will suffer pain when even a single animal is carried away. As cattle subserve the happiness of human beings, so too human beings subserve *devatas* by offering oblations etc. *Brhadaranyaka* says, *tesham tanna priyam yat etan manushyah vidyuh*. So we have to pray for their blessings.

This mantra begins with the word *sam* which means something auspicious or good. It also means one who does good to you or one who blesses you. From the words *avatu mam avatu vaktaram* of the *mantra* we understand that this is a prayer made by the disciple, who prays "may the Lord bless me, bless my teacher".

देवताप्रार्थनम्

शं (सुखकृत् इत्यर्थः) सुखं प्राणवृत्तेः अह्नश्चाभिमानी देवदात्मा **मित्रः नः** अस्माकं **भवतु**।

May Mitra, the deity presiding over the function of exhaling and of day, become a blessing one for us.

Sanno mitrah - "Let *Mitra* be the one who blesses us the disciples" *Mitra* is the presiding deity of the respiratory system and the day. (*Bhavatu* we have to supply). The entire creation is an order, nonseparate from the *Isvara*. When that order is viewed from a given standpoint or a phenomenon it is called presiding deity who also is an exalted *jiva*. So presiding deity is one who identifies with a particular phenomenon over which it presides. From the standpoint of the people living on this planet there is such a thing as respiratory system, there is such a thing as day. The presiding deity of these is called *Mitra*. The health - life is sustained by the *prana* or exhalation *vritti* (subjective principle) . So 'let *Mitra* bless us with good health'. Let there be no breathing trouble. Again *Mitra* is presiding deity of the day (objective principle) and during the day alone most of the things are accomplished. Therefore let him bless us during the day so that we can meet with the situations properly. *Sam karoti iti Sankarah*. *Sam* means *mangalam* - source of *mangalam*.

तथैव अपानवृत्तेः रात्रेश्चाभिमानी देवदात्मा **वरुणः** (शन्नो भवतु)।

Similarly, may Varuna, the deity of the function of inhaling and of night, be blessing one for us.

Varuna is the presiding deity of *apana* (inhalation *vritti*) and the night, let him bless us, protect us. *Apana*, inhalation, is responsible for clearing the waste from the body. Or the *apana* can be taken as the whole respiratory system. (In *sandhyavandana* also the prayer in the morning is for *mitra* - *mitrasya carshanidhrtah* - let not papa come near me and the evening prayer is for *Varuna* - *Imam me varunas+* - *mrdaya* means *anadaya* and don't take away my *ayuh*. *[ayuh ma pramoshih]*

चक्षुषि आदित्ये च (चक्षुषि आदित्यमण्डले च वर्त्तमानः तयोः अभिमानी इत्यर्थः) अभिमानी **अर्यमा** (शन्नो भवतु)।

Aryama, the deity residing in eyes and the sun, be blessing one for us.

Aryama is the presiding deity of the eyes and the sun. *Aryama* also is the presiding deity of *pitrs*, leader of the *pitru devatas*. (We consider the *anugraha* of *pitrs* very important for our progress. That is why in any ritual like *upanayana* or marriage in the family is started

with *nandi sraddha* or *nandi* and their blessings sought. Whether other rituals are followed or not, *sraddha* is always done by the person.)

बले (बाह्वोः बले अभिमानित्वेन वर्त्तमानः देवः) **इन्द्रः** (शन्नो भवतु)। वाचि बुद्धौ (वागभिमानी गुरुः इत्यर्थः) च **बृहस्पतिः** (शन्नो भवतु)। **विष्णुः उरुक्रमः** विस्तीर्णक्रमः (त्रिविक्रमावतारे विस्तीर्णपादोपेतः इत्यर्थः) पादयोरभिमानी (शन्नो भवतु)। एवमाद्याः अध्यात्मदेवताः[६२] **शं नः भवतु** इति सर्वत्र अनुषङ्गः।

Indra, the presiding deity of strength residing in hands, Brhaspati, the deity of speech and intellect, residing in organ of speech and intellect, and Lord Vishnu, the one who has vast strides, the deity of legs abiding in leg - all these deities in the context of the body - be blessing for us. One has to do the connection of the word "be blessing for us" With all sentences.

The presiding deity for strength in hands is *Indra* (May he give *bala*, *Indro me bale sritah*.) whereas *Brhaspati* is the presiding deity of organ of speech as well as the mind. (*Devaguru* is *Brahspati*. He presides over knowledge. Not Tamil meaning). May they protect us. *Visnu*, the all pervasive is the presiding deity of feet. Let him bless us. Let all these deities do good to us. (Vishnu is glorified as *Urukrama*. *Krama* means step. *Uru* means big. One with long stride or step. *Padayor Vishnuh*. To come for the class you need the blessings of the feet.)

(शरीरस्थ-प्राण-करण-अभिमानिनीनां देवतानां सुखकृत्वं किमिति प्रार्थ्यते? अत्राह - तासु इति) तासु हि सुखकृत्सु विद्या-श्रवण-धारण-विनियोगादयः (विद्यार्थं श्रवणम्। [**आ.गिरि** - गुरु-पाद-उपसर्पणपूर्वकं वेदान्तानां तात्पर्य-अवधारणम्]। श्रुतस्य अविस्मरणं धारणम्, शिष्येभ्यः प्रतिपादनं विनियोगः।) (शमादिकमादिपदार्थः) अप्रतिबन्धेन भविष्यन्ति इति तत्सुखकृत्वं[६३] प्रार्थ्यते - शन्नो भवतु इति।

Only when these gods are benevolent, the understanding, retention and sharing of the knowledge can take place without obstacles. Hence it is prayed that may them be benevolent by the expression "sanno bhavatu".

अपरब्रह्मस्तुतिः

(नमो ब्रह्मणे इत्यादेः तात्पर्यमाह - ब्रह्मविविदुषणा इति) ब्रह्म-विविदुषणा नमस्कार-ब्रह्मवदन-क्रिये (त्वं ब्रह्म इति वदनक्रिया ब्रह्मवदनक्रिया [**आ.गिरि** - ब्रह्मवदनक्रिया प्राणदेवता स्तुत्यर्था। ऋतमित्याद्यपि]) वायु-विषये ब्रह्म-विद्योपसर्ग-शान्त्यर्थं {विद्याप्राप्तिविघ्नपरिहारार्थम्} क्रियेते। {वायुर्ब्रह्म, बृहत्तमम्, तत्केनार्थयोगेन इत्याकाङ्क्षायामाह - सर्वेति} सर्व-क्रिया-फलानां[६४] तदधीनत्वात् ब्रह्म वायुः। तस्मै **ब्रह्मणे नमः** प्रह्वी-भावं 'करोमि' इति वाक्य-शेषः। । **नमः ते** तुभ्यं हे **वायो**[६५] नमस्करोमि इति {नमो

[६२] अधिदैवताभिमानिन्यः एव देवताः चक्षुरादिकरणाधिष्ठात्र्यः अध्यात्मदेवताः इति व्यपदिश्यन्ते । [बृ.उ.भा ४.४.१ ..चक्षुषि भवः चाक्षुषः पुरुषः आदित्यांशः भोक्तुः कर्मणा प्रयुक्तः यावद्देहधारणं तावत् चक्षुषोऽनुग्रहं कुर्वन् वर्त्तते ।] (सच्चिदानन्द)

[६३] तत्तत्करणस्य अवैकल्येन श्रवणादियोग्यता-आपादनमेवात्र देवतानां सुखकृत्वम् विवक्षितम्। (सच्चिदानन्द)

[६४] सर्वक्रियाफलानामिति "तस्मिन्नपो मातरिश्वा ददाति" इति ईशश्रुतिः (शास्त्रि) । वायोः सूत्रात्मनः (३.७.२) ज्ञानक्रियाशक्ति-अधिष्ठितत्वात् सर्वक्रियाफलानां तदधीनत्वम् । एवं च सर्वकर्मकर्तृणां तत्तत्क्रियानिर्वर्तनसामर्थ्य-आधानद्वारेण तत्तत्फलेन संयोजयितृत्वमेव ब्रह्मत्वं वायोः । (सच्चिदानन्द)

[६५] अत्र वायुः हिरण्यगर्भः "वायुर्वै गौतम तत्सूत्रम्" इति श्रुतेः (शास्त्रि)।

ब्रह्मणे। नमस्ते वायो इत्याभ्याम्} परोक्ष-प्रत्यक्षाभ्यां वायुरेव अभिधीयते (नमो ब्रह्मणे इत्यत्र वायोः संबोधनाभावात् परोक्षतया निर्देशः। उत्तर-वाक्ये वायुपदेन संबोधनात् प्रत्यक्षतया निर्देशः। यद्वा ब्रह्म इति पारोक्ष्येण निर्देशः, वायोः ब्रह्मशब्दित-सूत्रात्मतारूपेण परोक्षत्वात्। वायुशब्देन च प्रत्यक्षतया निर्देशः, प्राणवायुरूपेण नमस्कार्यस्य वायोः प्रत्यक्षत्वात् इत्यर्थः। [**आ.गिरि** - अन्यद्ब्रह्म वायुश्चान्यः इति नाशङ्कनीयम् इत्याह - परोक्षेति])।

By the one who is desirous of knowing Brahman, a prayer in the form of salutation and praise of Brahman are offered to Air for the purpose of elimination of obstacles to the knowledge of Brahman. Air here means Brahman as all results of karma are dependent on him. To that Brahman my salutations. I surrender. I salute you O Air. By the above tow sentences, Air alone is addressed both indirectly (in third person) and directly (in second person).

NAMO BRAHMANE NAMASTE VAYO

'Surrender to you Brahman'. Brahman here is *hiranyagarbha* who is the presiding deity of the total subtle body and who keeps the body alive. (*Brahma, Brahmanau, Brahmanah*. He is all *devatas* put together. *Devatas* have one one organ to preside. So he is *samashti devata*, includes all others in him. Aditir *devatamayi* it was said. Individual *devatas* are countless. So the student sums up after naming a few of them.) *Isvara* resides in the form of *hiranyagarbha* in every living organism. That is the reason why traditionally, while eating, first five morsels of food are offered to the five *pranas* residing in the body and the sixth morsel is offered to Brahman or *hiranyagarbha*. Thus the eating itself becomes a kind of *yajna*. Offering six morsels of food also means that six morsels of food is good enough for the stomach.

Here the disciple invokes the grace of all these deities individually because only when they bless you individually, your *sravana-dharana-viniyoga* become free from obstructions. *Sravanam* means listening for the sake of knowledge, *dharanam* is retention of what is already listened without forgetting and *viniyoga* is distribution of knowledge, sharing the knowledge with others, teaching to others. Therefore the prayer is made for gaining the knowledge, retaining it and for capacity to share and teach it to others, without any obstruction. 'May all deities become helpful to us, may they bless us'.

Namo brahmane - One who is desirous of knowledge of Brahman does *namaskara*, salutations for the purpose of removing obstacles. The salutation is of two types, *namaskara* and *vadana kriya*. When you praise someone by words it is known as *vadana kriya* which itself is a kind of salutation. Saying, "*tvameva pratyaksam brahmasi",* "you are the perceptible Brahman" is *vadana kriya*. Similarly when you repeat the names of the Lord in the form of *stotra* without adding *namah* then it is known as *vadana kriya*. While reciting the *stotra* when you add *namah* at the end of each name then there is *vadana kriya* and *namaskara* also. So *arcana*, offering of flowers etc. with *namah*, while reciting the name of the Lord is *vadana kriya* plus *namaskara* whereas mere reciting the *stotra* is *vadana kriya* alone. So mere praise without *namah* also is a prayer. Both of them relate you to the Lord, to invoke his grace. Here you are praising the *pranavayu*. Praising means he is said to be what he is, and saying so there is praise.

The *vayu* in the form of *hiranyagarbha* is invoked here for the removal of all the obstacles. All the actions and results are dependent on the *Isvara* in the form of *hiranyagarbha*. You cannot perform any action without *prana*, much less you can enjoy the result without *prana*. Even if you take sleep as a kind of result of action, still in sleep also *prana* is present. *Isvara*

is the ordainer of actions and giver of the results of actions. To that *Isvara* in the form of *Vayu* I prostrate, I surrender.

Namaste vayo - *Vayu* is the air transformed into life giving *prana*. Here the *vayu* is directly addressed, the disciple says "hey *vayu*! I surrender to you". Earlier the Brahman in the form of *prana* was invoked. What is the difference between the two? *Vayu* in the form of *hiranyagarbha* is *samasti atma* and he is *paroksa*, remote, you do not see him therefore it was said namo *brahmane*. But the *vayu* at the individual level is directly experienced by me in my nostrils, that is why he is addressed as *namaste vayo*. So the same *hiranyagarbha* is invoked indirectly at *samasti* level and directly at individual level. (In subtle body 17 limbs we saw. Of them, the most important is *prana* which is important for the very survival of all other limbs. So death is called *prana apaya*. *Prana* continues therefore in sleep even when all other organs have resolved. In collective level also, the same *vyashti prana* is important in the form of *Vayu*. It is *prana* of *Hiranyagarbha*. *Bhuh padau yasya nabhih+* He is *paroksha* in the form of *samashti sukshma sarira* but as *vayu* he is *pratyaksha*. So the next line also)

किं च, (वायोः प्रत्यक्षब्रह्मत्व-वदने हेतुपरं त्वमेवेति वाक्यं व्याचष्टे - त्वमेव इति) **त्वमेव** चक्षुराद्यपेक्ष्य बाह्यं (अप्रत्यक्षम्) संनिकृष्टम् अव्यवहितं **प्रत्यक्षं ब्रह्मासि** (प्रत्यक्षत्वे हेतुः अव्यवहितत्वम्, तदेव विवृणोति सन्निकृष्टमिति। त्वगिन्द्रियसन्निकृष्टमिति अर्थः) [**आ.गिरि** - बाह्यं चक्षुरादि रूपदर्शनादि-अनुमेयत्वाद् व्यवहितम्, प्राणस्तु अव्यवधानेन[६६] साक्षिवेद्यः[६७] सन्निहितश्च[६८] भोक्तुः इति चक्षुराद्यपेक्षया प्रत्यक्षः इत्यर्थः] यस्मात्, तस्मात् **त्वामेव** (मन्त्रपाठः त्वमेव । अन्त्ये तु त्वामेव इति) **प्रत्यक्षं ब्रह्म वदिष्यामि** (वदामि इत्यर्थः) [**आ.गिरि** - बृंहणाद् ब्रह्म प्राणकृतेन हि अशनादिना शरीरादेः बृंहणं प्रसिद्धम् इत्यर्थः]।

Further, you yourself are the immediate Brahman that is imperceptible with reference to eyes etc. and at the same time closest without any distance and therefore I shall you alone as Immediate Brahman.

Tvameva pratyaksam brahmasi tvameva pratyaksam brahma vadisyami - (We should not correct as *tvaam*) - The word Brahman is derived from the root *brh* which is used in the sense of expansion and also in the sense of sustaining. So Brahman is that which sustains. The *prana* sustains all the sense organs, and is directly experienced by the sense of touch. That is why the *vayu* is addressed as, "you are Brahman which is perceptible". "I call you perceptible Brahman" . By the *sastra* I know that the entire life is sustained by you. I do not see you directly as *prana* but see you directly as *vayu*. That is why I would call you as perceptible Brahman. (Next the student praises the same Brahman by address for seeking favour to gain knowledge. Praise will be in keeping with what we want. If influence, then we will say you know that minister, this minister etc. If you want money, you will praise you are rich and you are *Karna*. If knowledge you want, you will praise you are all knowledgeable etc. We see we are addressing as *dinabandho* or *anatharakshaka*. I need your help. If sick, Oh *Vaidyanatha*.)

---

[६६] मानान्तरं विनैव (गोविन्दानन्द)। (whereas body and senses are known as belonging to oneself through prana only)

[६७] वायोः ज्ञानशक्तिप्राधान्येन अन्तःकरणत्वात् साक्षिप्रत्यक्षवेद्यत्वम् (शास्त्रि)।

[६८] प्राणव्यापारमन्तरेण भोगासम्भवात् (गोविन्दानन्द)

(ऋतसत्यशब्दयोः अपुनरुक्तमर्थं वदन्नेव तौ व्याचष्टे - ऋतमिति) **ऋतं** यथाशास्त्रं यथाकर्त्तव्यं बुद्धौ सुपरिनिश्चितमर्थं[६९] तदपि त्वदधीनत्वात् त्वां **वदिष्यामि**। **सत्यं** इति स एव (शास्त्रानुसारेण कर्तव्यतया निश्चितार्थे एव इत्यर्थः) वाक्कायाभ्यां संपाद्यमानः। सोऽपि त्वदधीनः एव संपाद्य(:) (कर्मसंपादनस्य प्राणवाय्वधीनत्व-दर्शनात् इति भावः) इति त्वामेव सत्यं **वदिष्यामि**।

> Ritam is an understanding very well ascertained in the intellect in keeping with the scriptures and in conformity with convention of duty. Tat ritam also I shall speak of as you only as it is dependent on you. Satyam is that ritam alone which is brought out in practice and that satyam also, being earned with its existence in you, I shall speak of it as you only.

(Tvam) Rtam vadisyami (tvam) satyam vadisyami - "I would call you as *rtam*, I would call you as *satyam*". *Rtam* means truth and *satyam* also means truth, then why these two words? When you say what you know, it is called *satyam*. When what you say is what you know and that knowledge is in keeping with *sastra*, it is called *rtam*. So *rtam* is the truth in keeping with the *sastra* and obtaining in the *buddhi* after ascertaining what is right and what is wrong. Why should I go to *sastra*? (Because *rtam* is relative word. What is right knowledge one time may not be right at another time and keeps changing. With incomplete knowledge we look at the phenomenon and knowledge is subject to indefiniteness. *Apatukaranatam* is another factor. *Vipralabdhi* is cheating. A person may give wrong knowledge for his own ends. These are *purusha-buddhi doshas*. So how can we talk of right knowledge. So for us Sastra is right knowledge. Because it is not product of *purusha buddhi*. None like *Vyasa* and *Sankara* created *sastra* but perpetuated it. One may not see any basis for some of *Sastra's* statements. But science gives same advice like don't see eclipse.) So what you know in the form of ascertained knowledge is *rtam*. If what you know is confusion then it is not *rtam*.

Isvara is one in whom the sense of *sastra* is very well ascertained in terms of *dharma-adharma*, right and wrong and also in terms of truth and untruth. So both the *rtam* and *satyam* are within the mandate of *Isvara*. In fact *Isvara* is in the form of the very mandate. Therefore every *rtam* is in keeping with what is true, what is not true, that is, in keeping with the order. That is why he says "I would call you *rtam* - the very mandate, the order."

Here the *Isvara* is praised by calling him *rtam*. You must understand that the praise is not flattery, it is appreciation of what is. The *Isvara* has infinite virtues. Anything you say about Him, always falls short of what he is. So flattery of *Isvara* is not possible. Whatever you say about *Isvara* is only your understanding of *Isvara*, but he is much bigger than that.

Satyam is speaking what is true. When what is inside the mind, meaning what is known, is spoken, it is called *satyam*. A thing that is to be done as ascertained in keeping with the scriptures also is called *satyam*. When what is to be done by organs of speech and hands etc., is done then it becomes *satyam*. (*Satyam* at the level of speech - *yatarthabhashanam* - speech in keeping with knowledge - while *rtam* is at the understanding level - what I know is in keeping with *sastra*. *Rtam* and *satyam* both should be there) You are in the form of this *satyam* because it is within your mandate. That is why I would call you *satyam*.

---

[६९] शास्त्रार्थ-निर्धारण-अनुष्ठानरूपे ऋतसत्ये अपि ज्ञानक्रियाशक्ति-अधिष्ठित-वाय्वधीने एव इतिवायुं तदभिन्नतया स्तौति (सच्चिदानन्द)

तत् सर्वात्मकं[७०] (समष्टि-व्यष्टि-आत्मकम् इत्यर्थः। वायोः सूत्रात्मरूपेण समष्टिशब्दितं व्यापकत्वं, अस्मदादि-प्राणरूपेण व्यष्टिशब्दितं परिच्छिन्नत्वं च इत्युभयं परोक्षप्रत्यक्षनिर्देशाभ्यां प्रकृतमिति मत्वा तत्सर्वात्मकमिति सर्वनामप्रयोगः) वाय्वाख्यं ब्रह्म मया एवं स्तुतं सद् (उक्तप्रकारेण ब्रह्मवदनक्रियया स्तुतम्, उपलक्षणया, नमस्कृतम् च) विद्यार्थिनं[७१] **माम् अवतु** विद्या-संयोजनेन।

May that all pervasive Brahman, called Air, having been prayed by me, the student, thus, protect me by blessing me with knowledge.

Tat avatu mam - 'May he protect me'. The Brahman which is in the form of *prana* in all living beings and who is praised by me in that form, may protect us. How ? By connecting me to the knowledge. When a student prays for protection, the protection or blessing is for knowledge. If someone wants wealth then he prays for the blessing in the form of wealth. The blessing is always in keeping with the request. Here the request is for the knowledge therefore he says 'may you bless us by connecting to the knowledge' . The knowledge is in the *sastra* and in the mind of the teacher. That has to transfer to the mind of the student. That transfer is the communication by which the *buddhi* of the student gains connection to the knowledge. This transfer has to take place . 'May he bless me with this transfer.' (The prayer for protection can only be to *sagunam* Brahman. So too praise also. The danger here is misunderstanding of *sastra*. So protection is by revelation of *sastrartha*. Indirectly other protection also sought)

तद् एव ब्रह्म **वक्तारम्** आचार्यम् वक्तृत्व-सामर्थ्य-संयोजनेन **अवतु** (वच परिभाषणे अदादि)। **'अवतु माम्'**, **'अवतु वक्तारम्'** इति पुनर्वचनम् आदरार्थम्।।

May that very Brahman protect the teacher by blessing him with the power of communication. The repetition of expressions avatu mam and avatu vaktaram is for showing reverence for knowledge.

Avatu vaktaram - The student says 'may the Brahman in the form of *prana* bless the teacher'. We are invoking *hiranyagarbha* - the one who has all knowledge in himself and who is conscious being and who abides in my mind and every mind as *antaryami*. Now knowledge is purely an activity on the part of *buddhi*. And the senses and the energy for the activity is supplied by the *prana*. So the entire subtle body is involved in the activity of gaining knowledge. That is why *hiranyagarbha*, the presiding deity of subtle body is invoked here.

Vakta here means teacher, When you say, "may He protect me by transfer of knowledge", then the teacher must be there. Without the teacher the disciple is not going to be blessed. So the protection or blessing for the teacher is already sought. Like *Savitri* when she asked *Yama* make me *Sumangali*, she has included *Satyavan's* life also. Unless teacher is there, I cannot be a student. Then why *avatu vaktaram*? Because even though you bless me with the teacher, the teacher should have extra capacity to teach me, ordinary capacity is not enough. To teach me extraordinary capacity is required. Teaching *brahma vidya* is not an

[७०] वायुः सर्वप्राणभृत्क्रियात्मकः (ई.भा४-१७, काठक भा -२-१-६) सर्वदेवतात्मकः (बृ.भा ३-९-९) सर्वविधारकः (बृ.भा ३-७-२)

[७१] अपरब्रह्मविद्यां प्रार्थयमानम् । उपासनास्वरूपज्ञान-तत्फल-काङ्क्षिणम् । (सच्चिदानन्द)

easy thing therefore the teacher also should be blessed with extra capacity to teach. Let him be physically and mentally healthy for teaching. The teacher is not interested in it because he has no *purushartha*. So the student prays for the teacher.

शान्त्यभिधानत्रयस्य प्रयोजनम्

शान्तिः शान्तिः शान्तिः इति त्रिर्वचनम् आध्यात्मिक-आधिभौतिक-आधिदैनिकानां (ज्वरशिरोरोगादयः आध्यात्मिकाः चोर-व्याघ्राद्युपद्रवाः आधिभौतिकाः यक्षराक्षसाद्युपद्रवाः आधिदैविकाः) विद्या-प्राप्त्युपसर्गाणां प्रशमार्थम्।

The repetition of santi three times is for eliminating the obstacles in gaining knowledge in the form of obstacles pertaining to oneself, obstacles pertaining to deities and obstacles pertaining to other beings.

(इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्पादपूज्यपाद-शिष्यश्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषच्छीक्षाध्याय-भाष्ये प्रथमोऽनुवाकः)

The repetition *avatu mam, avatu vaktaram* is for emphasis. It is very important prayer. So repeated twice. Or the repetition can be interpreted as, 'bless me while I am studying and after the study also so that whatever knowledge I have gathered becomes more and more clear till it settles'. This is the general prayer for study of any knowledge and not only the *brahma vidya*.

Om santih santih santih - *Om* is the name of the Lord. The prayer is "Oh Lord let there be peace". Here peace really speaking is freedom from obstacles. *Om santih* means let there be peace, let there be freedom from obstructions. The obstacles may come but as they rise they should resolve and not disturb my pursuit. There are three types of obstacles or obstacles that may arise from three sources viz.; *adhidaivikam*, *adhibhautikam*, and *adhyatmikam*. *Adhidaivika* obstacles are obstacles centred on factors over which you have no control - supernatural forces. They are in the form of the elemental forces like heavy down pour, lightening, earthquakes etc., and can cause problems. The *adhibhautika* obstacles arise from immediate environment. They are local in nature, like disturbance arising from a cricket match, a small bug making noise when you are trying to discover some silence by meditating. Malarial mosquitoes. These forces you can control, but not immediately. These are the external forces over which you have no immediate control. Even parents coming and asking you to return (with a group of people). The third source of obstruction is *adhyatmika*, centred on you, like ill health. Health should be proper so that you can do what you want to do. To maintain good health and also a good mind this is another prayer. *Siroroga* is external and mental problems also. So let there be no obstructions from all the forces over which I have control or no control. The invocation of *santi* three times is for resolving these three types of obstacles. It is not that three types of *santi* is invoked.

The word *santi* also means *nivrtti*, freedom. When someone is suffering because of *prarabdha karma*, to neutralise that *prarabdha* we make effort by way of *prayascitta* karma which neutralises the adverse effect of past *karma*. This is known as *santi karma*. It may be a ritual or a prayer, you have to do it. Prayer also is a *santi* karma, an action meant for freedom from obstacles.

द्वितीयोऽनुवाकः

शीक्षाध्यायः

सम्बन्ध-भाष्यम्

१७) अर्थज्ञानप्रधानत्वात् उपनिषदः, ग्रन्थपाठे यत्नोपरमो मा भूत् इति शीक्षाध्याय(ः) आरभ्यते।।

शीक्षा-व्याख्यान-भाष्यम्

१८) शिक्षा शिक्ष्यते अनयेति वर्णाद्युच्चारण-लक्षणम्। शिक्ष्यन्ते इति वा शिक्षाः वर्णादयः। शिक्षैव शीक्षा। दैर्घ्यं छान्दसम्। तां **शीक्षां व्याख्यास्यामः** विस्पष्टम् आ समन्तात् कथयिष्यामः। चक्षिङो वा ख्याञादिष्टस्य व्याङ्-पूर्वस्य व्यक्त-वाक्कर्मण(ः) एतद्रूपम्। तत्र **वर्णः** अकारादिः। **स्वरः** उदात्तादिः। **मात्रा** ह्रस्वाद्याः। **बलं** प्रयत्नविशेषः। **साम** वर्णानां मध्यमवृत्त्या उच्चारणम्, समता। **संतानः** संततिः। संहितेत्यर्थः। एष(ः)[७२] शिक्षितव्योऽर्थः। शीक्षा यस्मिन्नध्याये सोऽयं **शीक्षाध्यायः इति** एवम् **उक्तः** उदितः। उक्तः इति उपसंहारार्थः[७३]।।

(इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषत्-शीक्षावल्ली-भाष्ये द्वितीयोऽनुवाकः)।।

---

[72] पा.भेद - एषः हि इति।

[73] पा.भेद - उक्तः इति उपसंहारः उत्तरार्थः इति आनन्दाश्रमः।

SECOND ANUVAKA

शीक्षाध्यायः

सम्बन्ध-भाष्यम्

(शीक्षाध्याय-आरभ्यस्य तात्पर्यमाह - अर्थेति)। अर्थ-ज्ञान-प्रधानत्वाद् उपनिषदः, (सच्चिदानन्द- न पुनर् मन्त्रवदुच्चारणप्रधानाः) ग्रन्थपाठे यत्नोपरमः (अध्ययनकाले स्वरादिषु औदासीन्यमित्यर्थः। स्वर-वर्णादिव्यत्यासे च सति अन्यथा अर्थावबोधः प्रसज्जेत। ततश्च अनर्थप्रसङ्गः स्यात्, "मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।। पा.शि ५२" कथा - तै.सं २.४.१२ - इत्यादिशास्त्रादिति भावः। ननु एवं सति कर्मकाण्डेऽप्ययमध्यायो वक्तव्यः इति चेत्, सत्यम्। अत एव उभयसाधारण्याय अयं काण्डयोर्मध्ये पठितः। ननु तर्हि भाष्ये उपनिषद्ग्रहणमनर्थकम्। नानर्थकम्, उपनिषत्पाठे यत्नाधिक्यद्योतनार्थत्व-उपपत्तेः। तथा हि - कर्मकाण्डे क्वचिदन्यथा-अर्थज्ञानपूर्वक-अन्यथा-अनुष्ठानस्य प्रायश्चित्तेन समाधानं संभवति, "अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते हि तु । अग्ने तदस्य कल्पस्य त्वं हि वेत्थ यथाततम् ।। "(O Agni, you know what is right. You rectify that part of this yajna which is wrongly done, known or unknown"). This is the mantra given in Tai.Brahmana 3.7.11 as prayascitta-ahuti-mantra) इत्यादिमन्त्र-लिङ्गात्। ज्ञानकाण्डे तु सगुणनिर्गुणवाक्यानाम् अन्यथा अर्थावबोधे सति सम्यग् उपासनानुष्ठान-तत्वज्ञानयोः अलाभात् पुरुषार्थ-असिद्धिरेव स्यात्, प्रायश्चित्तेन अत्र समाधान-असंभवात्। अतो यथावद् ब्रह्म-बोधाय उपनिषत्पाठे यत्नाधिक्यं कर्त्तव्यमिति द्योतनार्थत्वेन उपनिषद्-ग्रहणमुपपद्यते इति।) मा भूद् इति[७४] शीक्षाध्यायः आरभ्यते।

> "The Upanishad being one in which the meaning is predominant, let there be no lack of effort in the recitation of the text" - with this end in view a lesson on Siksha, phonetics is begun.

***** The story is that Tvashta whose son was slain by Indra decided to perform a soma-yaga with out Indra. Indra expected an invitation but did not get. So he interrupted and forcibly took drank the soma juice kept for ahuti. Tvashta got angry and poured the remaining juice in the fire praying for an enemy to kill Indra and chanted Indrasatrur vardhasva. But he chanted with tatpurusha svara instead of bahuvrihi svara (Tatpurusha is anta-udatta and bahuvrihi is purvapada-prakritisvara - chanted udatta on the vowel of the first word instead of on the second word). So there arose a being from the altar, vritrasura, huge in form and Tvashta had to ask Indra to kill it.

शीक्षां व्याख्यास्यामः । वर्णः स्वरः । मात्रा बलम्। साम सन्तानः । इत्युक्तः शीक्षाध्यायः।

शीक्षाम् - the science of pronunciation; व्याख्यास्यामः - we shall expound; वर्णः - (It deals with) letters; स्वरः - accents; मात्रा - duration; बलम् - effort; साम - pace; सन्तानः - and flow; इति - these factors; उक्तः - are mentioned; शीक्षाध्यायः - in the science of pronunciation.

> Om. We shall expound the phonetics: letter, intonation, length, effort, modulation and flow. Thus has been taught the lesson on phonetics.

[७४] विवक्षितार्थसिद्ध्यर्थं सम्यग् ग्रन्थ-उच्चारणेऽपि यत्नः कार्यः एवेति। (सच्चिदानन्द)

शीक्षा-व्याख्यान-भाष्यम्

(शिक्षा-शब्दस्य द्वेधा व्युत्पत्तिं दर्शयति - शिक्ष्यते इत्यादिना) शिक्षा शिक्ष्यते अनयेति (करणव्युत्पत्या) वर्णाद्युच्चारण-लक्षणम् (लक्षणम् - अकुह+ इत्यादि शास्त्रम्। ननु एवं सति वर्णाद्युच्चारण-लक्षणम् शिक्ष्यते अनयेति व्युत्पत्तिः अयुक्ता, तल्लक्षणस्य शीक्षाशब्दिते अध्याये शिक्षण-अदर्शनाद् {तस्य अन्यत्रैव सिद्धत्वात्} इत्याशङ्क्य व्युत्पत्यन्तरं दर्शयति - शिक्ष्यन्ते इति)। शिक्ष्यन्ते (वेदनीयत्वेन उपदिश्यन्ते इत्यर्थः) इति वा (कर्मव्युत्पत्या) शिक्षाः वर्णादयः[७५]। शिक्षैव शीक्षा। दैर्घ्यं छान्दसम्। तां **शीक्षां व्याख्यास्यामः** विस्पष्टम् आ समन्तात् कथयिष्यामः। (चक्षिङः ख्याञ् {आर्धधातुके} इति सूत्रेण {पा.सू २.४.५४ चक्षिङ् व्यक्तायां वाचि - अदादि - आत्मने चष्टे इत्यादि} ख्याञादिष्टः यस्य तस्य इदं रूपम्, न तु ख्या - प्रकथने {२ - परस्मै ख्याति इत्यादि सार्वधातुके एव} इत्यस्य, तस्य आर्धधातुके प्रयोग-अभावादित्यर्थः) चक्षिङो वा ख्याञादिष्टस्य व्याङ्-पूर्वस्य व्यक्त-वाक्कर्मण(:) (व्यक्ता वाक्कर्म क्रिया अर्थः यस्य तस्य इत्यर्थः) एतद्रूपम्। तत्र **वर्णः** अकारादिः। **स्वरः** उदात्तादिः। **मात्रा** ह्रस्वाद्याः। **बलं** प्रयत्न-विशेषः (आभ्यन्तर-बाह्य-भेदभिन्नः संवृतादिविशेषप्रकारः)। **साम** वर्णानां मध्यम-वृत्त्या उच्चारणं (अतिद्रुवत्वादिकं विना इत्यर्थः। आदिना अतिविलम्बितत्वम्) (मणिप्रभा - समतेति साम। अतिद्रुतम् अतिविलम्बं च परिहृत्य यस्य यावद् उच्चारणकालः तावतिकाले तस्य उच्चारणरूपम् इति वा साम। सामगीतिवेशेष इति वा साम। जैमिनिनाप्युक्तम् - गीतिषु सामाख्या इति।) समता। **संतानः** संततिः, संहिता इत्यर्थः। एष शिक्षितव्योऽर्थः[७६], शीक्षा यस्मिन्नध्याये सोऽयं **शीक्षाध्यायः इति** एवम् **उक्तः** उदितः। उक्तः इति उपसंहारार्थः।

> Phonetics is the text by which the method of pronouncing the letters etc. Or the word Phonetics may here mean the host of letters etc. that are taught. Letters such as “a”, intonation such as udatta or high tone, lengths such as short etc., balam, a special effort, sama, pronouncing the letters in medium pace, and santana, flow in the pronunciation. These are the things to be taught. Thus is the lesson on phonetics. The word “uktah” indicates the conclusion of the section.

The first *valli* does not have *brahmavidya*. It is dealing with all other *sadhanas* necessary for *vidya*. It has many *upāāsanās*, values, rituals etc. In the beginning, the teacher is introducing the topic of proper chanting of the Vedas, the science of pronunciation. It is *Siksha* in Sanskrit, phonetics. In *Mundaka*, we saw, *tatra apara vidya, siksha* etc. It is given with lengthening. It is Vedic usage. We will understand correctly. We should not correct.

Sankara introduces here the section. Upanishad being *arthajnana pradhana*, to gain understanding of *vakyas*. That is predominant. So one can be indifferent to this chanting of the words of the Vedas especially with reference to six factors. Let it not be there *iti*.

Siksha is mode of chanting the letters. That by which a person is taught the method of chanting letters, syllables etc. *Akuha+* etc is *siksha* which will expound clearly and fully. *Caksh* is the root. In *arthadhatuka*, we have a substitute of *Khya* (*khyanjn*). These are

---

[७५] शिक्ष्यते अनया इति करणव्युत्पत्तौ लक्षणं गम्यते । शिक्ष्यन्ते इति कर्मव्युत्पत्तौ तु वर्णादयः अनुपदमेव वक्ष्यमाणा गम्यन्ते । अत्र वर्णादिपूग एव शिक्षा इत्याचार्यस्य अभिप्रायः गम्यते । “शिक्षा यस्मिन् अध्याये” इति उत्तरत्र दर्शनात् । (सच्चिदानन्द)

[७६] यद्यपि शीक्षादिशब्दानाम् एकश्रुत्या अधीयमानत्वात् व्याकरणोक्त-प्रकृति-प्रत्ययादि-प्रयुक्तः स्वरो नोपलक्ष्यते, तथापि संप्रदायप्रसिद्धः स्वरस्तथैव अभ्यसनीयः , तेन च अदृष्टं फलं भविष्यति , शीक्षाध्यायविहितत्वात् स्वरादीनाम् - इति सायनभाष्ये।

irregular roots (i.e., the substitutes). *Caksh* means to speak in manifest form. There are 2 prefixes. What is *sarvadhatukam* and *ardhadhatukam*. *Tingsit sarva+*

I shall briefly mention the important topic of science of pronunciation. In pronunciation itself there is mistake. It is not pronunciation. Similar is renounce and renunciation. The teacher is going to mention important features but not systematically unfold them. Because in the normal course one comes to Vedic study after studying these *sastras*. They are therefore called *Vedangas*. These are basics. Like physics requires knowledge of basic mathematics, and biochemistry the knowledge of chemistry. So too here, other branches are necessary while entering Study of Vedas. Simultaneously taught. Teacher takes for granted the student knows *Siksha* etc. So he briefly mentions.

Why should he introduce it here. Why he is recollecting it? We may not like to remember it. The reason for recollecting here is *uccaharanam* is important. Any wrong in it will change the meaning of the word. We see *atamnyeva atmana* ***dushtah*** and ***tushtah***. Here importance is in understanding not doing. *Jnana padhana khanda. Phalam* is for karma there and here for knowledge. Another factor is there is *prayascitta* (karma, *japa ahuti* etc) for any lack in karma. We chant mantra *hinam+*. So we can afford to do mistake. In *jnanakanda*, there is no *parihara*. Misunderstanding can not become right by pilgrimage etc. Again by right understanding only. Again for which you require *Siksha* etc. Without understanding the meaning, we do chant like marriage mantras. It is okay there. Here *arthajnanam* is important. An indirect benefit here is we are alert in speaking. We don't take for granted anything, Otherwise there is *pramada* or looseness or negligence. Minute observation is required for Vedanta to set in. Even we have taken ourselves for granted. In *uccharana* also, even change in tone changes the meaning like polite and rude expression. *Svaras* are therefore given for *varnas* to give particular meaning. *Svaras* point out the type of compounds. Same compound may mean differently according to the type. *Svara prakaranam* is there. *Ubhau lokanathau*. King was angry. How can be two *lokanathas*. *Bahuvrihi samasoham shashti tatpurusho bhavan*. For me *loka* is support, I am a beggar. You are the support of the world. The story is said of a prayer for *Indrasatru* by *tavshta*. The change of *svara* gave him one for whom *Indra* is *satru*. Even in the *svara* of *Satyam jnanam*, there is an argument about its meaning.

What are the important features is mentioned. *Varna, svara, matra, balam, sama* and *santana*. There six factors have to be observed in chanting.

Varna: Letters. "a" etc. What is *pratyahara* for it? *al*. Every letter must be properly known and chanted. *Guruve namah* not. *Gurave*. Not *bhagavatam* but *bhagavata*. *Brihma* not *Brahma*. Initially caused by ignorance. Later by mechanicalness. *Aksharasuddhi* must be there. There is *sthanam* for every letter.

Svara: Intonation or accent. In Vedic chanting, there are three. In *Panini sutras* we have *svaras* for *dhatus*. We do use *svara* for emphasis in talking also. We go up and down. In Sanskrit it is systematised. *Vritrasura* was born to kill *Indra*. But pronunciation was wrong. So he got killed. *Indra satru u* is to be raised. In another r to be raised. *Mantro+ Kumbhakarna* also same case. he wanted *nirdevatvam*, but he said *nidravatvam* by wrong placement of r.

Matra: The length of every vowel. Short or long or prolated. It should be properly chanted. *Hrasva* etc. *Pluta* is more than two. At the beginning of Vedic chanting, we have *Harih Om*

ri is down. and o is *pluta* of three points. At the end it is *harih om* where *ri* is up. *Om* o is four. We use in calling one who is far away. Or to call somebody's attention like vendor saying *takram*.... Or used to emphasise. A short vowel followed by a double consonant, a gap must be given. Like in *Bhukti mukti pradata ca*. The consonants should be pronounced with emphasis by giving a gap. Short vowel prosodialy becomes long and hence we give gap. *Svaras* for vowels only.

Balam: Effort. How much effort to be given is decided by *prayatnam* in *sastra*. *ka* and *Kha* though have same throat place. But *prayatna* is different. *phala* and *bala*. *prama* and *bharam*. *svajana* my people *svajana* is dogs. *Sakalam* all, *sakalam* bit. *sakrit* means once. *Sakrit* means excretion. *yadyapi bahuna Adhite Tathapi patha putra vyakaranam svajana: svajano ma bhut Sakalam sakalam sakrit Sakrit*. *Yatno divdha. Adhyo pancadha spashtesat-spashtesat-vivruta-vivruta-samvrutabhedat. Bahya-prayatnas-tvekadasahda. vivara, samvara, svaso nado gosho agosho alpaprano mahaprana udattao.*. (underlined is *Khar*)

Sama: The speed of chanting or pace. *Madhyama vrittya uccaranam*. Neither too fast or too slow. *Aksharam* will be swallowed. We will sleep, if too slow. All should be of equal pace.

Santana: Flow. We should not stop at unnecessary places. It should have only four stops in a verse. Like *parthaya*. For convenience we do in between once. It is okay. But not more than that. It also means *sandhi*, conjunction of letters and words.

How can one who does not know Sanskrit do take care of all these things. No. If you even do not know, you have to only repeat what is said by the teacher. There is no alertness in hearing. Attentiveness is important. Student is only parrot in Gurukulam. When I say *Rshayah khseenakalmashah*. The *visarga* has to be pronounced in full. If attention is developed in chanting class, you will get the same attention in Vedanta class. Thus is the section on *Siksha*. *Uktah* means taught. (In *Purva Bhaga*). The whole idea is that one should not neglect these things in pronunciation. Don't expect more from this *sastra*. So Sruti says it is concluded.

तृतीयोऽनुवाकः

संहितोपासना

अधुना संहितोपनिषदुच्यते।

उपासना-फल-प्रार्थनम्

१९) तत्र संहितादि-उपनिषत्परिज्ञाननिमित्तं यत् **यशः** प्रार्थ्यते[७७], तत् **नौ** आवयोः शिष्याचार्ययोः **सह** एव अस्तु। तन्निमित्तं च यत् **ब्रह्मवर्चसं** तेजः तच्च **सह** एव अस्तु इति, शिष्य-वचनम् आशीः। शिष्यस्य हि अकृतार्थत्वात् प्रार्थना उपपद्यते। न आचार्यस्य। कृतार्थत्वात्। कृतार्थो हि आचार्यो नाम भवति।।

पञ्च संहितोपासनाधिकरणानि

२०) **अथ** अनन्तरम् अध्ययन-लक्षण-विधानस्य पूर्व-वृत्तस्य। **अतः** यतः[७८] अत्यर्थं ग्रन्थ-भाविता बुद्धिः न शक्यते सहसा अर्थज्ञान-विषये अवतारयितुम् इत्यतः। **संहितायाः उपनिषदं** संहिता-विषयं दर्शनम् इत्येतत्। ग्रन्थ-संनिकृष्टाम् एव **व्याख्यास्यामः**। **पञ्चसु अधिकरणेषु** आश्रयेषु। ज्ञान-विषयेषु इत्यर्थः। कानि तानि इति? अतः आह। **अधिलोकम्** लोकेष्वधि यद्दर्शनम्, तदधिलोकम्। तथा **अधिज्यौतिषम्**, **अधिविद्यम्**, **अधिप्रजम्**, **अध्यात्मम्** इति। **ताः** एताः पञ्च-विषयाः उपनिषदः लोकादि-महावस्तु-विषयत्वात् संहिता-विषयत्वाच्च, महत्यश्च ताः संहिताश्च **महासंहिताः इति आचक्षते** कथयन्ति वेदविदः।।

उपासना-क्रमः

२१) **अथ** तासां यथोपन्यस्तानां मध्ये[७९] **अधिलोकं** दर्शनम् उच्यते। दर्शन-क्रम-विवक्षार्थः अथ-शब्दः सर्वत्र। **पृथिवी पूर्वरूपम्**। पूर्वो वर्णः पूर्वरूपम्। संहितायाः पूर्वे वर्णे पृथिवी-दृष्टिः कर्त्तव्या इत्युक्तं भवति। तथा च **द्यौः उत्तररूपम्**[८०]। **आकाशः** अन्तरिक्ष-लोकः। **सन्धिः** मध्यं पूर्वोत्तररूपयोः। सन्धीयेते अस्मिन् पूर्वोत्तररूपे इति। **वायुः सन्धानम्**। सन्धीयते अनेन इति सन्धानम्। **इति अधिलोकं** दर्शनम् उक्तम्। **अथ अधिज्यौतिषम्** इत्यादि समानम्। इतीमाः इति उक्ताः उपप्रदर्श्यन्ते।।

संहितोपासना-फलम्

२२) **यः** कश्चित् **एवम् एताः महासंहिताः व्याख्याताः वेद** उपास्ते। 'वेद' इति उपासनं स्यात्। विज्ञानाधिकारात्। "इति प्राचीनयोग्योपास्व (तै.उप.१.६)" इति च वचनात्। उपासनं च यथा-शास्त्रं तुल्य-प्रत्यय-संततिः, असंकीर्णा च अतत्प्रत्ययैः, शास्त्रोक्त-आलम्बन-विषया च। प्रसिद्धश्च उपासन-शब्दार्थो लोके - "गुरुम् उपास्ते", "राजानम् उपास्ते" इति।

---

[77] पा.भेद - प्राप्यते इति।

[78] पा.भेद - अध्ययन-लक्षण-विधानस्य यतः इति आनन्दाश्रमः।

[79] पा.भेद - यथोपन्यस्तानां अधिलोकमिति आनन्दाश्रमः।

[80] पा.भेद - तथा च उत्तररूपम् इति आनन्दाश्रमः।

यो हि गुर्वादीन् संततम् उपचरति स(ः) उपास्ते इत्युच्यते। स(ः) च फलम् आप्नोति उपासनस्य। अतोऽत्रापि य एवं वेद **संधीयते** प्रजादिभिः स्वर्गान्तैः। प्रजादि-फलं प्राप्नोति[81] इत्यर्थः।।

(इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषत्-शीक्षावल्ली-भाष्ये तृतीयोऽनुवाकः)।।

[81] पा.भेद - प्रजादिफलान्याप्नोति इति आनन्दाश्रमः।

THIRD ANUVAKA

संहितोपासना

(अथातः संहिताया इत्यादेः तात्पर्यमाह - अधुना इति। वर्णानामत्यन्तसामीप्यं संहिता, तद्विषय-उपनिषद् उपासनम् इदानीम् उच्यते इत्यर्थः) अधुना संहिता[८२]-उपनिषदुच्यते।

सह नौ यशः। सह नौ ब्रह्मवर्चसम् ।

सह नौ - for both of us; यशः - Let there be fame; सह नौ - for both of us; ब्रह्मवर्चसम् - Let there be the spiritual effulgence.

Let there be fame for both of us. Let there be brilliance for both of us.

उपासना-फल-प्रार्थनम्

१९) तत्र संहितादि-उपनिषत्परिज्ञाननिमित्तं यत् **यशः** प्रार्थ्यते[८३], तत् **नौ** आवयोः शिष्याचार्ययोः **सह** एव अस्तु। तन्निमित्तं च यत् **ब्रह्मवर्चसं** तेजः तच्च **सह** एव अस्तु इति, शिष्य-वचनम् आशीः। शिष्यस्य हि अकृतार्थत्वात् प्रार्थना उपपद्यते। न आचार्यस्य। कृतार्थत्वात्। कृतार्थो हि आचार्यो नाम भवति।।

उपासना-फल-प्रार्थनम्

("शं नो मित्रः" इत्याशीर्वादः कृत्स्नोपनिषच्छेषः। संहितोपनिषच्छेषमाशीर्वादान्तरं प्रथममाह - तत्रेति।) तत्र संहितादि[८४]-उपनिषत्परिज्ञाननिमित्तं (शमदम-ज्ञानादिनिमित्तम्) यत् **यशः** (उपनिषत् परिज्ञानम् उपासनाविषयकं ज्ञानम्, तच्च शिष्यस्य आचार्योपदेशजनितम् आचार्यस्य च तदुपदेशप्रयोजकम्, तन्निमित्तकं यशः इत्यर्थः।) प्रार्थ्यते, तत् **नौ** आवयोः शिष्याचार्ययोः **सह** एव अस्तु। तन्निमित्तं च यत् **ब्रह्मवर्चसं** तेजः (मुखकान्त्यादि रूपम् उपनिषत्परिज्ञाननिमित्तकमित्यर्थः) तच्च **सह** एव अस्तु इति (ननु सहैव अस्तु इति केन प्रार्थ्यते, तत्राह - शिष्यवचनमिति।) शिष्य-वचनम् आशीः (आशिस् स्त्री. आशास् + क्विप्)। (तत्र विनिगमकमाह - शिष्यस्य हि इति। तस्य अकृतार्थत्वं प्रसिद्धमिति हि शब्दार्थः)। शिष्यस्य हि अकृतार्थत्वात् प्रार्थना उपपद्यते। न आचार्यस्य कृतार्थत्वात्। (ननु आचार्योऽपि अकृतार्थः एव शिष्यसापेक्षत्वादिति, नेत्याह - कृतार्थो हि इति । न हि आचार्यस्य स्वप्रयोजनसिद्ध्यर्थं शिष्यापेक्षा अस्ति, किन्तु केवलं तदनुग्रहार्थमेव आचार्यप्रवृत्तिरिति भावः। ननु एवम् आचार्यस्य शिष्येण किमर्थं यश आदि प्रार्थ्यते, स्वार्थमेवेति ब्रूमः। यशस्विनः शिष्या हि लोके यशस्विनः भवन्ति, यशस्विनां च लाभपूजादिकं फलं प्रसिद्धम्। अतः स्वार्थमेव शिष्यः गुरोर्यशः प्रार्थयते इत्यनवद्यम्।) कृतार्थो हि आचार्यो नाम भवति।

Now the upasana regarding conjunction (samhita) is taught by the Sruti. Whatever fame that accrues from the knowledge (and practice) of the upasanas on samhita-upasana etc., may it accrue to both of us, student and the teacher. Whatever lustre that

---

[८२] संनिधानाच्च स्वशाखा संहितैव ग्राह्या । (आनन्दगिरि) । अथात इत्यादिवक्तुः आचार्यस्य प्रकृत-शाखया एव संनिधानाद् यजुर्वेदीयसंहितैव ग्राह्या इत्यर्थः । (गोविन्दानन्द)

[83] पा.भेद - प्राप्यते इति।

[८४] अत्र आदिशब्देन उपासनान्तराण्यपि ग्रहीतव्यानि इति भाति। (सच्चिदानन्द)

arises due to that may that also accrue to both of us. This prayer chanting of the student. This prayer can pertain only to the student, since he has not yet accomplished his ends. It is not of the teacher as he has fulfilled his aspirations. A teacher indeed is one who has accomplished all his ends.

INVOCATION FOR FAME AND LUSTRE

The first two lines happen to be prayer before starting the *upasana*. Because *upāsanā* is a separate topic and important, another special prayer, a particular prayer seeking successful completion of *upāsanā* and getting its results. It is prayer of student. Not teacher who has nothing to achieve. He says *yasah astu*. Let us both have good fame. *nau* both. Fame born out of some *samarthya* on his part in chanting etc. Let us also have the effulgence born out of Vedic *upasana* - study and practice (*parijnanam*). Brahma means Veda. Brightness and brilliance in the personality is *varchas*. The glow, *tejas* in the face comes out of *adhyayanam* of Veda. The very chanting gives such glow or shining in the face. It is not light that will send out rays in dark room. Educated person you can distinguish from illiterate. Some change takes place in eyes and face by the intelligence. Of course when the values are followed there is calmness in the face. There is wrinkles and tension only in his face who has told different lies to different people and there is always tension of remembering. Gloomy face. Other one is relaxed. There is *santi*. *Brahmacari* asks for it. *Medhavi bhuyasam. Tejasvi bhuyasam*. etc.

Here student wants *moksha*. *Moksha* requires *sadhana*+ which includes *vairagyam*. He is here asking for name and fame and *varchas*. Is it not wrong. Superficially so. But not so because the motive is different. His aim in asking for them is, as we see later, for getting more students. *Amayantu*+ I should become a good teacher and when I become a teacher many students should come to me from various directions. In olden days the students had two fold intentions: I should do *svadhyaya* and also I should to my capacity do propagation also. Veda itself enjoins these two in this *valli. rtam ca*+ etc. *svadhayaprvaca*+ Any science one learns, he should propagate. Even his own son will be okay to part with. This is because

1) in olden days, this wisdom was gained by *sravanam* and so it is *karna-paramapara*. Books etc. were not there. So I should make it available to next generation. Otherwise I would be denying this to next generation. My *rnam* gets over only by handing over, not by *gurudakshina* or *namaskara*. So they even frighten by saying you will become *brahma-rakshas*. We take care to see that the family is not broken by progeny.

2) Another thing is learning is further strengthened by teaching. Because many things that seemed to be clear, is discovered to be unclear when we want to teach to someone.

3) Even if it is clear, it becomes a *nididhyasanam*. To maintain tradition, to fulfil *rnam* and to get clarity. For this teacher should become well-known, popular. So he seeks fame etc. This prayer is given by student and not by teacher. *Sankaracarya* says so and defends it, which is *bhashya-lakshanam*. This is *sishya's* words because the teacher has nothing to achieve. *Kritah purusharthah yena*. He is *purnah*. Still we can say, the fame and lustre accrues to the teacher also in the sense the teacher feels happy when the student attains the fruits of prayer.

Tika : Why not we say, *acarya* is *acarya* only when *sishya* is there. *Acaryatvam* depends on *sishya*. If he wants *sishyas*, then he is *akritartha*. No. He became *acarya* not to

become a great *acarya* to be recognised by all. He became so only to bless the *sishyas*. Then why *sishya* prays for *acarya's yasas*. That is also for his own end. Because if you are *sishya* of a famous teacher, then only you can become famous. What do you get out of it? You get gain, puja etc. So *svarthameva*.

अथातः संहितायाः उपनिषदं व्याख्यास्यामः। पञ्चस्वधिकरणेषु ।अधिलोक-मधिज्यौतिषमधिविद्यमधिप्रजमध्यात्मम्। ता महासंहिता इत्याचक्षते।

अथ - now; अतः - since (the student is familiar with Vedic chanting); संहितायाः - based on conjunction of letters; उपनिषदं - meditations; व्याख्यास्यामः - we shall teach; पञ्चसु - dealing with five; अधिकरणेषु - topics; अधिलोकम् - dealing with deities related to the worlds; अधिज्यौतिषम् - dealing with deities related to luminaries; अधिविद्यम् - dealing with deities related to knowledge; अधिप्रजम् - dealing with deities related to progeny; अध्यात्मम् - dealing with deities related to individual; ताः - them; महासंहिताः इति - as great conjunctions; आचक्षते - (the sages) call.

Now, therefore, we will expound the upasana of samhita, sacred conjunction in five loci, locations - with reference to five topics viz., with reference to worlds, with reference to luminaries, with reference to knowledge, with reference to progeny and with reference to one's body.

पञ्च संहितोपासनाधिकरणानि

२०) **अथ** अनन्तरम् अध्ययन-लक्षण-विधानस्य पूर्व-वृत्तस्य। **अतः** यतः[85] अत्यर्थं ग्रन्थ-भाविता बुद्धिः न शक्यते सहसा अर्थज्ञान-विषये अवतारयितुम् इत्यतः। **संहितायाः उपनिषदं** संहिता-विषयं दर्शनम् इत्येतत्। ग्रन्थ-संनिकृष्टाम् एव **व्याख्यास्यामः**। **पञ्चसु अधिकरणेषु** आश्रयेषु। ज्ञान-विषयेषु इत्यर्थः। कानि तानि इति? अत(ः) आह। **अधिलोकम्** लोकेष्वधि यद्दर्शनम्, तदधिलोकम्। तथा **अधिज्यौतिषम्, अधिविद्यम्, अधिप्रजम्, अध्यात्मम्** इति। **ताः** एताः पञ्च-विषयाः उपनिषदः लोकादि-महावस्तु-विषयत्वात् संहिता-विषयत्वाच्च, महत्यश्च ताः संहिताश्च **महासंहिताः इति आचक्षते** कथयन्ति वेदविदः।।

पञ्च संहितोपासनाधिकरणानि

अथ अनन्तरम् अध्ययन-लक्षण-विधानस्य[86] पूर्ववृत्तस्य (पूर्ववृत्तस्य अनन्तरम् इति सम्बन्धः।), (सच्चिदानन्द - अद्ययनलक्षणं ग्रन्थपाठे अनुसर्त्तव्यः प्रकारविशेषः तद्विधानं पूर्ववृत्तम्। तदनन्तरमिदं विधीयते इत्यर्थः।) **अतः** (वस्तूपासनम् हित्वा प्रथमतः शब्दोपासनविधाने हेतुः अतः शब्देन उक्तः इत्याह - यतः इति) यतः अत्यर्थं ग्रन्थ-भाविता बुद्धिः न शक्यते सहसा अर्थज्ञान-विषये (ज्ञानम् उपासनं तदेव विषयः तस्मिन् इत्यर्थः।)

[85] पा.भेद - अध्ययन-लक्षण-विधानस्य यतः इति आनन्दाश्रमः।

[86] अध्ययनं लक्ष्यते अवगम्यते अनेनेति अध्ययनलक्षणम् । वर्णः स्वर इत्यादि शिक्षा । तद्विधानानन्तरम् इत्यर्थः ।

अवतारयितुम् इत्यतः[८७] **संहितायाः उपनिषदं** संहिता-विषयं दर्शनम् (उपासनम्) इत्येतत्। ग्रन्थ-संनिकृष्टामेव ({वर्णादिविषयत्वात्} संहितारूपग्रन्थप्रधानमेवेति यावत्) **व्याख्यास्यामः**। **पञ्चसु**[८८] **अधिकरणेषु** आश्रयेषु। (मणिप्रभा - पञ्चसु इति सप्तमी तृतीयार्थे विपरिणेया । पञ्चभिः पदार्थैः विशेषितं ज्ञानं संहितावर्णेषु कर्त्तव्यम् इत्यर्थः) (ननु अधिकरणेषु इति सप्तम्या लोकादिषु संहितादृष्टिविधिः इह विवक्षितः इति प्रतीयते। तथा सति लोकानामेव संहिता-दृष्ट्या उपास्यत्वं स्यात्, तच्च उपक्रम-उपसंहार-विरुद्धम्, "अथातः संहितायाः" इत्युपक्रमे "य एवमेता" इत्युपसंहारे च संहितायाः एव उपास्यत्व-अवगमात् इत्याशङ्क्य आह - ज्ञानेति। अधिकरण-पदस्य विषयपरत्व-उक्तिः उपलक्षणम्, सप्तमी तृतीयार्थपरा इत्यपि द्रष्टव्यम्। तथा च लोकाद्यात्मना संहिता एव उपास्या इति लभ्यते। अतो न विरोध इति भावः।) ज्ञान-विषयेषु इत्यर्थः। कानि तानि इति? अत(:) आह। - **अधिलोकम्** लोकेष्वधि (लोकविषयकमिति यावत्। {लोकानधिकृत्य, लोकान् ध्येयत्वेन उपादाय वर्त्तमानम् अधिलोकम्। लोकदृष्ट्या यदुपासनम्} एवमुत्तरत्रापि।) यद्दर्शनम्, तदधिलोकम्। तथा **अधिज्यौतिषम्, अधिविद्यम्, अधिप्रजम्, अध्यात्मम्** इति। (आ.गिरि - {अधिविद्यमित्यत्र} विद्याशब्देन विद्याप्रतिबद्धः आचार्यादिः विवक्षितः {अजहल्लक्षणया ग्राह्यः}। तथैव प्रजाशब्देन प्रजाप्रतिबद्धः पित्रादिः विवक्षितः। अध्यात्ममिति आत्मानं भोक्तारमधिकृत्य यद्वर्त्तते जिह्वादि तद्विवक्षितम्। सर्वत्र तत्तदभिमानिनी देवतैव ग्राह्या। अन्यस्य उपास्यत्व-असम्भवात् इति)। (अत्र विधित्सितानां उपासनानां स्तावकं ता महासंहिता इति वाक्यम्। तद् व्याचष्टे - ता इति) (आ.गिरि - विधिशेषमर्थवादमाह - ता एता इति) **ताः** एताः पञ्च-विषयाः उपनिषदः लोकादि-महावस्तु-विषयत्वात् संहिता-विषयत्वाच्च, महत्यश्च ताः संहिताश्च **महासंहिताः** (महावस्तुदृष्ट्या करणीयाः संहिता-विषयोपासनाः इति महासंहिताः इति उच्यन्ते इत्यर्थः) (मणिप्रभा - संहितायाः महत्त्वं बहुत्त्वं च लोकादिविषयाणां महत्त्वाद् बहुत्त्वाच्च इति बोध्यम्) **इति आचक्षते** कथयन्ति वेदविदः।

> After what has been said in the preceding section as to the science of phonetics that forms the basis of recitation, thereafter, since the intellect, which has been accustomed to think in terms of words, cannot get into the realm of understanding of words and upasanam suddenly, the Sruti says: We shall now expound the upasana on samhita - how samhita should be meditated upon - a subject matter which is close to the text. What are those? They are with reference to five topics, viz., concerning worlds, a meditation for which the subject is worlds. Similarly, concerning lights, concerning knowledge, concerning progeny and concerning the body. Since these five pertain to great things like worlds and are related to samhitas, the knowers of Vedas speak of them as great samhitas.

SAMHITA MEDITATION ON FIVE OBJECTS

Now, thereafter, after offering prayer or after *siksha*, we will talk about *upanishad*. Here *upanishad* indicates *upasana*. This usage is because, 1) like *brahmavidya*, *upasana* also removes our sorrow by taking us to *brahmaloka* or higher *lokas* where our sorrows are reduced. So *gauna-prayoga*. 2) There is another reason also. Upanishad means *rahasyam*, which cannot be freely given to anyone unless tested for fitness and whether the listener will not be confused. This rule applies to *upasana* also. If the person has no interest or sincerity, then he will not honour it. *Bija-mantras* require disciplines of *acara* and *anushthana*. Like

---

[८७] शब्दप्रवणचित्तानामर्थज्ञाने तदपेक्षया सूक्ष्मे बुद्धिप्रवेशः सहसा न भवति इत्यर्थः । एतेन अथशब्दस्य शीक्षाव्याख्यान-आनन्तर्यमर्थः । अतःशब्दस्य संहितोपासनाप्रारम्भे हेतुभूतः सुखेन बुद्धिप्रवेशोऽर्थः इत्युक्तं भवति। (सच्चिदानन्द)

[८८] पञ्चसु इति सप्तमी तृतीयार्थे विपरिणेया । अधिकरणशब्दश्च विषयपर्यायः । पञ्चभिः पदार्थैः विशेषितं ज्ञानं वर्णेषु कर्त्तव्यम्। यथा विष्णुदर्शनं प्रतिमायाम् इत्यर्थः । (आ.गिरि)

powerful tablets require additional ones like B-complex. So cannot be given to all. Both are therefore *rahasya* and hence *upasana* is *upanishad*. *Atasmin tadbuddhi is upasana. Tasmin tadbuddhi is jnanam.*

The first *upasana* is *Samhita-upasana*. Conjunction of letters or combination of letters is *samhita*. *Parah sannikarshah* is *samhita*. *Kru sh na* - each one is *samhita* letters. But not *kru* and *na*. Adjacent is *samhita*. It can be between letters within the word (it is *nitya*) or between words (optional in speech). This principle is going to be taken for *upasana*. *Upasana* involves three factors. *Upasaka*, *upasya* and *alambana*. A symbol is to think of the *upasya*, which is *paroksha*. *Alambana* is *pratyaksha*. It cannot be *kamadhenu*. *Upasana* is named after the symbol or the *devata*. *Viradupasana* is after *devata*. In *Omkara-upasana* is name is after *alambana*. *Samhita upasana*. *Samhita* is going to be used as a symbol. The combination of letters is *alambana*. There are five of them. *Alambana* will remain the same while the *upasya vishaya* will vary in each one of them, like *loka* in one, luminary in another and so on. We are going to take combination of letters as obtaining in Vedas. So Veda *Samhita* only. Because they are most sacred letters, though sound only. They are most efficacious. That is why chanting in the original form will be definitely more efficacious. The sound itself has certain power. Not the meaning alone counts in prayer.

Here the mantra taken for illustration is *ishe-(t)-tva*+ , first *mantra* of *Yajurveda*. Meaning is not necessary here. The *samhita* here is *ish* and *e*. *e* is the last letter of the first word. t is the first letter of the second word. e and t are in *samhita*. The rules of combination are there in Sanskrit called *Sandhi*. There is an addition of t in between. There is double t, t . The third stage is important for us, viz. 1) e 3) t 2) t. e first, gap or *antarala* is *sandhi* and t numbered 2nd is last. First is called *purvarupa*, last *t* is *uttara rupa*. Middle gap is *sandhi*. The t numbered as 3rd is *sandhanam* which is the letter added. It is the link or connecting letter. In the gap between *purva* and *uttara* is the link letter added**.** (अनचि च । अचः परस्य यरः द्वे वा स्तः न त्वचि) These four factors we have to remember. In each of the *alambana*, viz. in each of the four factors a *devata* is invoked. *Upasanas* are 5. So 20 *devatas*. You meditate on them with the help of these four elements.

Why this head ache. *Upasana* is to quieten the mind. Even to understand this *upasana* it take so much strain. It is complicated. *Sankara* says: *atah*, when the student comes to Vedanta, he is coming fresh from Veda *adhyana*. (this is not in keeping with 20th century student. So it appears complicated) 12 years and 12 hours of chanting per day, the whole mind has only one thing. Vedic mantras. *Padapatha* also is there. *Namah te Rudra*.. His mind is applied to Vedic letters/words and combinations . So this is an ideal *alambana*. *Alambana* should be easily available one and where mind effortlessly goes. It keeps his mind arrested. For a Vedic student, it is *samhita*. So it is taken as *alambana*. *Atyanta grantha bhavita buddhih* is there. *Sahasa* it cannot be taken out and placed in gaining the knowledge of the meaning of words of the *sastra*. So through *upasana*, it is aimed. From letters he will come out and see a cosmos outside him. The *upasanas* are connected to words only. So they are *grantha-samipya* only. . 7th case is with reference to. How many *devatas*? Dealing with five topics or five types of *devatas*. *Kani tani*? 1) *upasana* dealing with worlds, connected to worlds 2) dealing with luminary in the sky 3) dealing with knowledge 4) dealing with progeny and 5) dealing with the body. Four factors in each will be taken for superimposition on *samhita*.

They are said to be great *samhitas*. They, the knowers of Veda, call it great because the *upasya* is big like worlds. *Alambana* is also Vedic words. Great *lokas* are seen on them and so the *samhitas* become glorious. Association makes it great. Fruit remaining same, associated with mahatma, it becomes *prasada*. "*Gunavad vastu samsargat yatisvalpopi gauravam pushpamalanu-shangena sutram sirasi dharyate.*" A single thread nobody wears. But when connected to flowers, it also is worn. So too *samhita* becomes great by *vishya* of *upasanam*.

Anandagiri says that one should do *samhitopanishad* is *utpattividhi*. How it should be done is given by *viniyogavidhi* by *Atha tasam* etc. *Ta etah mahasamhitah* is *vidhisesha arthavada*.

अथाधिलोकम् । पृथिवी पूर्वरूपम् । द्यौरुत्तररूपम् । आकाशः सन्धिः। १ वायुः सन्धानम् । इत्यधिलोकम् । अथाधिज्यौतिषम् । अग्निः पूर्वरूपम् । आदित्य उत्तररूपम् । आपः सन्धिः । वैद्युतः सन्धानम्। इत्यधिज्यौतिषम्। अथाधिविद्यम्। आचार्यः पूर्वरूपम् । अन्तेवास्युत्तररूपम्। विद्या सन्धिः। प्रवचनं सन्धानम्। इत्यधिविद्यम्। अथाधिप्रजम्। माता पूर्वरूपम् । पितोत्तररूपम्। प्रजा सन्धिः । प्रजननं सन्धानम्। इत्यधिप्रजम्। ३ । अथाध्यात्मम्। अधराहनुः पूर्वरूपम्। उत्तराहनुरुत्तररूपम्। वाक् सन्धिः । जिह्वा सन्धानम्। इत्यध्यात्मम्। इतीमा महासंहिताः ।

अथ - now begins; अधिलोकम् - the meditation related to the worlds; पृथिवी - the earth; पूर्वरूपम् - is the previous letter; द्यौः - the heaven; उत्तररूपम् - is the latter letter; आकाशः - the (intermediary) space; सन्धिः - is the junction; वायुः - and the air; सन्धानम् - is the linking medium; इति अधिलोकम् - thus is the meditation related to the worlds; अथ - now begins; अधिज्यौतिषम् - the meditation related to the luminaries; अग्निः - the fire; पूर्वरूपम् - is the previous letter; आदित्यः - the sun; उत्तररूपम् - is the latter letter; आपः - the waters; सन्धिः - are the junction; वैद्युतः - and the lightning; सन्धानम् - is the linking medium; इति अधिज्यौतिषम् - thus is the meditation on the lights; अथ - now begins; अधिविद्यम् - the meditation related to the knowledge; आचार्यः - the teacher; पूर्वरूपम् - is the previous letter; अन्तेवासी - the student; उत्तररूपम् - is the latter letter; विद्या - the knowledge; सन्धिः - is the junction; प्रवचनम् - and the teaching; सन्धानम् - is the linking medium; इति अधिविद्यम् - thus is the meditation on the knowledge; अथ - now begins; अधिप्रजम् - the meditation related to the progeny; माता - mother; पूर्वरूपम् - is the previous letter; पिता - father; उत्तररूपम् - is the latter letter; प्रजा - progeny; सन्धिः - is the junction; प्रजननम् - and procreation;

सन्धानम् - is the linking medium; इति अधिप्रजम् - thus is the meditation related to the progeny; अथ - now brgins; अध्यात्मम् - the meditation as related to the body; अधराहनुः - the lower jaw; पूर्वरूपम् - is the previous letter; उत्तराहनुः - the upper jaw; उत्तररूपम् - is the latter letter; वाक् - the organ of speech; सन्धिः - is the junction; जिह्वा - and the tongue; सन्धानम् - is the linking medium; इति अध्यात्मम् - thus is the meditation on the body. इति - thus; इमाः महासंहिताः - these are the great conjunctions

> Now as to the worlds: Earth is the previous letter. Heaven is the latter letter. The intermediary space is the junction. And air is the linking medium.Thus is the *upasana* on the worlds. Now as to the lights: Fire is the previous letter. Sun is the latter letter. Waters are the junction. And lightning is the linking medium.Thus is the upasana on the lights. Now as to the knowledge: Teacher is the previous letter. Student is the latter letter. Knowledge is the junction. And teaching is the linking medium.Thus is the upasana on the knowledge. Now as to the progeny: Mother is the previous letter. Father is the latter letter. Progeny is the junction. And procreation is the linking medium.Thus is the upasana on the progeny. Now as to the body: Lower jaw is the previous letter. Upper jaw is the latter letter. Organ of speech is the junction. And tongue is the linking medium.Thus is the upasana on the body. Thus these are the great conjunctions.

उपासना-क्रमः

२१) **अथ** तासां यथोपन्यस्तानां मध्ये[८९] **अधिलोकं** दर्शनम् उच्यते। दर्शन-क्रम-विवक्षार्थः अथ-शब्दः सर्वत्र। **पृथिवी पूर्वरूपम्**। पूर्वो वर्णः पूर्वरूपम्। संहितायाः पूर्वे वर्णे पृथिवी-दृष्टिः कर्त्तव्या इत्युक्तं भवति। तथा च **द्यौः उत्तररूपम्**[९०]। **आकाशः** अन्तरिक्ष-लोकः। **सन्धिः** मध्यं पूर्वोत्तररूपयोः। सन्धीयेते अस्मिन् पूर्वोत्तररूपे इति। **वायुः सन्धानम्**। सन्धीयते अनेन इति सन्धानम्। **इति अधिलोकं** दर्शनम् उक्तम्। **अथ अधिज्यौतिषम्** इत्यादि समानम्। इतीमा(ः) इति उक्ताः उपप्रदर्श्यन्ते।।

उपासनाक्रमः

(अथाधिलोकम् अथाधिज्यौतिषम् इत्यादिवाक्यस्थ-अथ-शब्दानामर्थमाह - दर्शनक्रमेति। अत्र उपासनस्य एकत्वेन कर्त्तुः एकत्वाद्, लोकादिभेदेन प्रयोगभेदाच्च {अनुष्ठेयानां बहुत्वात्} अवश्यंभाविनि क्रमे तद्विधानार्थाः अथशब्दाः इत्यर्थः। तत्र आद्योऽथशब्दः आरम्भार्थः, इतरे तन्निरूपितक्रमार्थाः इति भावः।) **अथ** (उपनिषदः कथं कर्त्तव्या इत्याकाङ्क्षायां आह - तासामिति।) (आ.गिरि - संहितोपनिषदः कर्त्तव्याः इति उत्पत्ति-विधिः[९१] उक्तः। कथं कर्त्तव्याः इति आकाङ्क्षायां विनियोगविधिम्[९२] आह - तासामिति।) तासां यथोपन्यस्तानां मध्ये **अधिलोकं** दर्शनम् उच्यते। (इति शेषः)। दर्शन-क्रम-विवक्षार्थः[९३] अथ-शब्दः सर्वत्र। **पृथिवी पूर्वरूपम्**। पूर्वो वर्णः पूर्वरूपम्। संहितायाः (ननु संहितायाः पूर्ववर्णः पृथिवी इति कथं सामानाधिकरण्यं, तयोर्भेदादित्याशङ्क्य आह - पूर्व वर्णे इति।

---

[89] पा.भेद - यथोपन्यस्तानां अधिलोकमिति आनन्दाश्रमः।

[90] पा.भेद - तथा च उत्तररूपम् इति आनन्दाश्रमः।

[९१] कर्मस्वरूपमात्रबोधको विधिः , यथा अग्निहोत्रं जुहोति इति। (गोविन्दानन्द)

[९२] अङ्गसम्बन्ध-बोधको विधिः , यथा दध्ना जुहोति इति। (गोविन्दानन्द)

[९३] अधिलोकदर्शनं तावत् कर्त्तव्यम्। तदनन्तरम् अधिज्यौतिषम् इत्येवंक्रमेण उपासनानि कर्त्तव्यानि इति विवक्षार्थः। (सच्चिदानन्द)

मनो ब्रह्म इत्यादिवदत्र सामानाधिकरण्यमिति भावः।) पूर्वे वर्णे पृथिवी-दृष्टिः कर्त्तव्या इत्युक्तं भवति। (मणिप्रभा - केचित्तु पृथिव्यादिशब्दैः पृथिव्याद्यभिमानिन्यः देवताः ग्राह्याः, अन्यस्य उपास्यत्व-असम्भवाद् इत्याहुः)। तथा च **द्यौः उत्तररूपम्**[94]। **आकाशः** अन्तरिक्ष-लोकः। **सन्धिः** मध्यं (पूर्वोत्तररूपे संधीयेते अस्मिन्निति व्युत्पत्त्या यत्संधिशब्दवाच्यं पूर्वोत्तररूपयोर्मध्यं तत्र अन्तरिक्ष-लोकदृष्टिः कर्त्तव्या इत्यर्थः)। पूर्वोत्तररूपयोः। सन्धीयेते अस्मिन् पूर्वोत्तररूपे इति। (संधीयेते पूर्वोत्तररूपे अनेनेति व्युत्पत्या संधानशब्दवाच्यं यत्संहितारूपं तत्र वायुदृष्टिः कर्त्तव्या इत्यर्थः।) **वायुः सन्धानम्**। सन्धीयते अनेन इति सन्धानम्। **इति अधिलोकं** दर्शनम् उक्तम्। (इदं च क्वचिदुताहृत्य प्रदर्श्यते - इषे त्वा इत्यत्र षकारस्योपरि योऽयमेकारः सोऽयं पृथिवीरूपः यश्च उपरितनस्तकारः स द्युलोकः, तयोर्वर्णयोर्मध्यदेशः अन्तरिक्षलोकः, तस्मिन् देशे संहितानिमित्तः द्विर्भावेन आपादितः योऽन्यस्तकारः स वायुरिति।) **अथ अधज्यौतिषम्** इत्यादि समानम् (समानमिति - अथाधिज्यौतिषम् अग्निः पूर्वरूपम्। आदित्य उत्तररूपम्। आपः सन्धिः । वैद्युतः सन्धानम्। इत्यधिज्यौतिषम्। ज्योतिःशब्देन अत्र जहल्लक्षणया आपः संगृहीताः विद्युदेव वैद्युतः। अथाधिविद्यम्। आचार्यपूर्वरूपम्। अन्तेवास्युत्तररूपम्। विद्या सन्धिः। प्रवचनं सन्धानम्। इत्यधिविद्यम्। इत्यधिविद्यम् इत्यत्र विद्याशब्देन आचार्यादयः जहल्लक्षणया एव संगृहीताः इति बोध्यम्। विद्याशब्दश्च अध्येतव्यग्रन्थपरः। ग्रन्थस्य अध्ययनं अध्यापनं वा प्रवचनम्। अथाधिप्रजम्। माता पूर्वरूपम्। पितोत्तररूपम्। प्रजा सन्धिः। प्रजननं सन्धानम्। इत्यधिप्रजम् इत्यत्र प्रजाशब्दः मात्रादीनपि पूर्ववत् संगृह्णाति । प्रजननं प्रजाया उत्पत्तिः। अथाध्यात्मम्। अधरा हनुः पूर्वरूपम्। उत्तरा हनुरूत्तररूपम्। वाक् सन्धिः। जिह्वा सन्धानम्। इत्यध्यात्मम्। अत्र आत्मा देहः तदवयव-विषयमुपासनमध्यात्मम् इत्यर्थः। एतेषु समानं योजनमित्यर्थः । इतीमा(:) इति उक्ताः उपप्रदर्श्यन्ते[95]। (उपसंह्रियन्ते इति यावत्)।

> Now, among those taught in sequence, the meditation with reference to the world is said. Everywhere, the word atha is intended to mean the order in which the meditation is to be done. The erath is the prior form, the first letter. One should meditate the earth on the prior letter of conjunction. Similarly, heaven is the latter letter. The intermediary space is the middle place wherein the prior and latter letters join. Air is the connectiion, that by which the prior and latter letters are connected. Thus is the meditation with reference to the world said. Then that relating to the luminaries and the rest are to be seen in the same way. The words 'thus' and 'these' point to what is said earlier.

MEDITATION RELATED TO THE WORLDS

The word "*atha*" in the *upasanas* refers to the order of doing them. Of the *samhita-upasanas* mentioned, that with reference to the worlds is being told now. Earth is the previous letter of the *samhita*, the first of the two sounds joined together. What is said here is that on the first sound one should have the idea of earth. Similarly heaven is the latter sound. The intermediary space is the junction, middle space where the previous and the latter sounds join together. Air is the linking medium, that by which the two sounds are joined together. Thus is the teaching on the *samita-upasana* with reference to the worlds.

Loka is earth. Earth is *purvarupa/varna*. On "*e*" meditate *earth*. *Samanadhikaranya* is there between "*e*" and earth. Like *saligrame vishnubuddhih*. It is *purusha tantra*. You have to imagine. Sastra says. So it is deliberate. *Nikrushta vastuni utkrishta vastu*

---

[94] पा.भेद - तथा च उत्तररूपम् इति आनन्दाश्रमः।

[95] "इतीमा महासंहिताः" इति वाक्येन यथोपवर्णिताः पञ्चोपनिषदः परामृश्यन्ते । विध्युपसंहारार्थम्, उत्तरवाक्येन फलसंकीर्त्तनार्थं चेति शेषः। (सच्चिदानन्द)

aropah. If earth is *purvarupa*, then what can be *uttararupa*. For one who swallows mountain as chaval, door will pappada. Malai+ Heaven is *uttararupa*. On "*t*" meditate heaven. In between is space. The gap is to be meditated as अन्तरिक्षलोक. It is called *sandhi* because *purva* and *uttara* joins there. The additional "*t*" is *sandhana*. That by which they are connected is *sandhana*. That element is *vayu*, on it, the *sandhana*, meditate *Vayu*. *Vayu devata* is called *antariksha-devata*. The intermediary world or *bhuvarloka* is called *vayu* here as *vayu* does *sanchara* in the middle space. *Atha* in every *adhikarana* indicates *krama*. *Atha uccharana* is *mangalam*. But its meaning is *arambha* and *krama*. All the five *upasanas* put together is called one *upasana*. Each one is *anga-upasanam*. So it is first phase of *upasana* that is *adhiloka*.

There are many psychological benefits in this *upasana* 1) when you meditate them as *devatas* then your respect for them, for the world increases. You don't now look at them as a bundle of matter but it is *devata* which is to be honoured. It is manifestation of the Lord. I cannot ill treat, exploit, misuse earth. (Destruction of forests etc.) Now they say respect nature. We said look upon nature as Lord. It is *Isvara-sariram*. *Sarvam vishnumayam jagat*.

The second benefit is the expansion of the mind. Our mind is confined to a small part of the universe alone all the time. I am thinking of my body or mind or family members or small house. As my vision expands, I can accommodate everyone. Our aim is I want to discover I am Brahman. So this expansion of vision is important.

MEDITATION RELATED TO THE LUMINARIES

On the same four loci, we invoke four *devatas* each in every *upasana*. The *devatas* will be connected to one topic like *loka* etc.

Agni is first letter. Sun is the later letter. *Apah* in next *upasana* is moon by *lakshana* because it has to be another luminary. Waters means the waters of the rain bearing clouds also. That is the intermediary gap. Down below is fire principle. Above is Sun which is also *agni-tattva*. In between is clouds full of water. What connects both the principle is lightning. That is the linking letter. The energy which is above only comes down to us through lightning. The electricity in the lightning is said to be at amazing level and it can satisfy the requirements of the world for one year. We do not know how to collect and store them. That one flash contains so much energy. In those regions, the temperature is supposed to be very high. Lightning will flash only when rain bearing clouds are there.

Here also the same benefit. We respect all natural powers and energies. We worship them not out of fear, but out of respect. Sages declare of fearlessness only. It is out of appreciation, recognition of the totality. Secondly, mind expands.

MEDITATION RELATED TO THE KNOWLEDGE

Adhividyam: Now he has come to immediate surrounding. The glory of human being is because of his superior knowledge. Lord has given *buddhi* to achieve anything. Penguins can survive in Antarctica. We can also do by additional dress. From the standpoint of student also, he being *vidyarthi*, knowledge matters and is significant. Teacher is *purva*. He is to be meditated upon "e". *Svayam acartai* and *paran*+ is *acarya*. *yad yad acarati*+ His words will have tremendous strength and value. Visual impact is more than audio impact. In the class audio and in his life, visual. *Puranas* are like visual e.g., *Hariscandra* comes to mind.

I imbibe his characters. Residential-student (because half the learning is by observing the *acarya*. So lived with teacher) is *uttararupa*. The context of meeting is knowledge. (Or, the book, *upanishad* text, is *sandhi*. That on which teaching takes place is Sastra.) What connects both is teaching. Knowledge is invisible in teacher's mind. Word is the medium of communication, for passing this knowledge. Thought is converted into sounds. You convert the sounds back into thought. Words become the link between both.

The benefit is respect to the *acarya*. This is very important for gaining knowledge. I respect not the person, but the vision, the *sastra* gives this vision. In each *upasana* our attitude and outlook changes.

MEDITATION RELATED TO PROGENY

Adhipraja-samhitopasana: Dealing with progeny. Here we are dealing with mother principle and father principle. *Sandhi* is junction which brings them together, i.e, son. Procreation is the linking factor between them. In Vedas, *praja* is talked about very often. It is glorified very much. Here also it will come again. *Praja ca+*. The primary institution where *dharma* is taught to the child is home. Parents exert maximum influence. Even during the pregnancy, mother influences the child's growth. Mother's thinking and actions are said to affect the child. So lot of prenatal (3) *samskaras* are there for the child. Many post natal *samskaras* also. With *upanayana samskara* only the teacher begins his teaching. Hence the primary responsibility of imparting *samskara* lies with family. It is the brick of Indian culture. *Sanyasis* are produced by families having ideal culture and *sanyasis* are maintained also by this culture alone. So *Arjuna* said *kula kshaye+*. That is why in *sankalpa* it is said, *dharma-praja abhivriddhyartham imam kanyam parineshyami*. To perpetuate this *sampradaya*, progeny is very important. *Praja* is therefore embodiment of *dharma*, who will carry the torch of *dharma* to next generation. The benefit of this *upasana* is respect for parents who are responsible for my physical personality and dharmic personality. If I have some religious or cultural thought, they have been influenced by them.

MEDITATION RELATED TO THE SELF (BODY)

Fifth sub-division is *adhyatmam*. Dealing with the individual, body. *Atmanam adhikrtya pavrittam*. Since *upasaka* is student, mouth is taken here. Either *acarya* or student, both are using mouth. *Hanuman* - one who has pronounced (lower) jaw. You cannot use *matup pratyaya* if there is no plenty or speciality in the possession. Like *dhanavan*. The junction or in which context the lower and upper jaw comes together is speech. *Vak* means speech. It can be either organ or speech. Here the speech is indicated. (*Vak indriya* includes all places of production in the mouth, *sthanas*.) What links both is tongue. Tongue has an important role in speaking. That is *sandhanam*. Individual is as much important as the total. The ashram should take care of means all of us put together is ashram. Whatever small role I play, I am important. Secondly, when I meditate on myself, I begin to revere myself, see divinity in myself. All the time, we feel divinity is outside. Lord is outside. I will then look down upon myself. Everyone else is superior. Lord is superior. But what we want to know is I am that. So this *upasana* is important. There is objective *upasana* earlier and in the last there is subjective *upasana*. Later we will have *ahamgraha upasana*, where I am the *alambana* for *upasana*. *Atma* puja is done even in *pujas*. Will it not lead to arrogance. No. You the *atma* is great, not you the body. In *ahamgraha upasana*, I think I am great. In *jnanam*,

there is recognition that I am great. All put together, this is equivalent to *hiranyagarbha upasana* who is all *devatas* put together.

There is a gradual *unfoldment* here. From the entire universe to the individual. Totality first and self last. Reverse of what our thinking is. The *upasana* covers the entire range of existence.

य एवमेता महासंहिता व्याख्याता वेद । संधीयते प्रजया पशुभिः । ब्रह्मवर्चसेनान्नाद्येन सुवर्ग्येण लोकेन।।

य - one who; एवम् - thus; एताः महासंहिताः - on these great conjunctions; व्याख्याताः - that were expounded above; वेद - does meditation; संधीयते प्रजया - he is united with progeny; पशुभिः - cattle; ब्रह्मवर्चसेन - lustre arising from Vedic study and performance of Vedic karma; अन्नाद्येन - plenty of wholesome food; सुवर्ग्येण लोकेन - and the heavenly world.

One who does upasana thus on these conjunctions that were expounded, he is united with progeny, wealth, lustre arising from Vedic study and performance of Vedic karma, plenty of wholesome food and heaven.

मणिप्रभा

इति उक्तलक्षणया इमा अधिलोकादिरूपाः महासंहिताः महत्यः उपासनाः उक्ताः। फलसाधनत्व-विशिष्टोपासनं विधत्ते। यः कोपि अधिकारी एता अधिलोकादिरूपाः महासंहिताः व्याख्याताः श्रुत्या निरूपिताः एवं उक्तया लोकादिदृष्ट्या वेद उपास्ते सः प्रजया पुत्रपौत्रादिरूपया पशुभिः गवादिलक्षणैः ब्रह्मवर्चसेन ब्रह्मणः तपस्स्वाध्यायादेः वर्चस्तेजो ब्रह्मवर्चसं तेन अन्नाद्येन अदनीयान्नेन सुवर्ग्येण लोकेन स्वर्गाख्य-भोग-भूमिरूपेण सन्धीयते इत्यर्थः। अत्र सकामेन क्रियमाणं संहितोपासनं कामितफलाय भवति। निष्कामेन क्रियमाणं ब्रह्मविद्यासाधनं भवति इति ब्रह्मविद्यासन्निहित-आम्नानसामर्थ्यात् कल्प्यते इति भावः।

संहितोपासना-फलम्

२२) **यः** कश्चित् **एवम् एताः महासंहिताः व्याख्याताः वेद** उपास्ते। 'वेद' इति उपासनं स्यात्। विज्ञानाधिकारात्। "इति प्राचीनयोग्योपास्व (तै.उप.१.६)" इति च वचनात्। उपासनं च यथा-शास्त्रं तुल्य-प्रत्यय-संततिः, असंकीर्णा च अतत्प्रत्ययैः, शास्त्रोक्त-आलम्बन-विषया च। प्रसिद्धश्च उपासन-शब्दार्थो लोके - "गुरुम् उपास्ते", "राजानम् उपास्ते" इति। यो हि गुर्वादीन् संततम् उपचरति सः उपास्ते इत्युच्यते। सः च फलम् आप्नोति उपासनस्य। अतोऽत्रापि य एवं वेद **संधीयते** प्रजादिभिः स्वर्गान्तैः। प्रजादि-फलं प्राप्नोति[96] इत्यर्थः।।

संहितोपासना-फलम्

[96] पा.भेद - प्रजादिफलान्याप्नोति इति आनन्दाश्रमः।

यः कश्चित् **एवम्** {यथाविहित-प्रकारेण} **एताः महासंहिताः व्याख्याताः वेद** उपास्ते। (वेद इत्यस्य ज्ञानवाचित्वात् कथं ज्ञानावृत्तिरूप-उपासनपरत्वम् इत्याशङ्क्य तत्साधयति - वेद इत्युपासनं स्यादित्यादिना।) 'वेद' इति उपासनं स्यात्। {न तु वस्तुतन्त्रं ज्ञानम्}। विज्ञानाधिकारात्[९७] (उपास्ति-प्रकरणाद् इत्यर्थः)। (तत्र मानमाह - इति प्राचीनेति) "इति प्राचीनयोग्योपास्व (तै.उप.१.६)"[९८] इति च वचनात् (विज्ञानाधिकारे लिङ्गम्)। उपासनं[९९] च यथा-शास्त्रं (यथाशास्त्रम् इत्यनेन यत्र अहंग्रहः चोदितः तत्र अहंग्रहेण, अन्यत्र तं विना इति विवक्षितम्) तुल्य-प्रत्यय-संततिः[१००] (तुल्यत्वम् एकविषयकत्वम्) असंकीर्णा च अतत्प्रत्ययैः[१०१] (ध्येय-अन्यगोचरैः प्रत्ययैः) शास्त्रोक्त-आलम्बन-विषया[१०२] च (एकवस्तुगोचरा, विच्छेदरहिता प्रत्ययसंततिः उपासनमिति निष्कर्षः)। (ननु सकृत्प्रत्यय एव उपासनमस्तु किं तदावृत्त्या इत्याशङ्क्य क्रिया-आवृत्तौ एव उपासनशब्दः प्रसिद्धः लोके, न सकृत्क्रियायाम्, अतोऽत्र वेद इत्यनेन प्रत्यय-क्रिया-आवृत्तिरेव लक्षणीया इत्याशयेन आह - प्रसिद्धश्च इत्यादिना।) प्रसिद्धश्च उपासन-शब्दार्थो लोके - "गुरुम् उपास्ते", "राजानम् उपास्ते" इति। (ननु तत्रापि सकृदुपचारक्रियैव उपासनम्। नेत्याह - यो हि इति।) यो हि गुर्वादीन्[१०३] संततम् उपचरति सः उपास्ते इत्युच्यते। (पृथिवी पूर्वरूपम् इत्यादि-वेदनामात्रात्फल-असम्भवादपि उपासनमेव अत्र विधेयम्, उपासनस्य तु योग्यतया वक्ष्यमाणं फलं सम्भवति, लोकेऽप्युपासनस्य फलवत्त्वसिद्धेः इत्याशयेन आह - स चेति।) सः च (गुर्वाद्युपासकः, सततध्यायी) फलमाप्नोति उपासनस्य। अतोऽत्रापि (गुर्वाद्युपासनस्य फलवत्त्वदर्शनाद् अत्रापि संहिताविषयेऽपि यः एवं लोकादिदृष्ट्या संहिता उपास्ते इत्यर्थः।) य एवं वेद {निरन्तरमुपास्ते} **संधीयते** (संबध्यते) प्रजादिभिः स्वर्गान्तैः। प्रजादि-फलं (प्रजादीनि दृष्टफलानि, स्वर्गः अदृष्टं फलम्) प्राप्नोति इत्यर्थः। (अत्र फलकामिना क्रियमाणम् उपासनं कामितफलाय भवति फलाभिसंधिरहितेन तु क्रियमाणम् तदेव विद्यासाधनं भवति इति ब्रह्मविद्या-संनिध्याम्नानबलात् कल्प्यते इति मन्तव्यम्।)।

Whosoever meditates on these great samhitas. The verb "veda" means here meditation, the context being upasanam. Further it is said later here " O Pracinayogya! you meditate thus". Meditation consists in maintaining same thought flow, not scattered by dissimilar thoughts and the object of which is as mentioned in the scriptures. The

---

[९७] उपासनप्रकरणत्वादस्य इत्यर्थः । अस्यां हि वल्ल्याम् उपासनमेव ध्यान-अपर-अभिधानं प्रपञ्च्यते । न तु ज्ञानम् । विद्युपास्त्योः च वेदान्तेषु अव्यतिरेकेण प्रयोगो दृश्यते। सू.भा ४.१.१. बृ.भा १.४.७ (सच्चिदानन्द)

[९८] न केवलं प्रकरणात्, किन्तु "उपास्स्व" इति कण्ठरवेण उक्तत्वात् च वेदनमत्र उपासनमेव । (सच्चिदानन्द)

[९९] उपासनसामान्ये केचन विषयाः ब्रह्मसूत्रोक्ताः स्मर्त्तव्याः । आसीनः सम्भवात् (४.१.७) - उपास्तौ आसनादिनियमः नास्ति, आसीनस्यैव चित्तैकाग्र्यं सम्भवेत् । तिष्ठतेः देहधारणे मनः व्याप्रियेत , शयानस्य अकस्माद् निद्रा समागच्छेत् ।। यत्रैकाग्रता तत्राविशेषात् (४.१.११) उपासनासु दिग्देशकालादिनियमोऽपि नास्ति । चित्तैकाग्र्यम् उपासनायामावश्यकं, यत्र यस्मिन् देशे काले सा सम्पद्यते स एव आश्रयणीयः श्रुत्यां विशेष-अश्रवणात् । देवतादृष्ट्या उपासनं कार्यं तादृश-उपासनसंस्कृतस्य पूर्ववर्णस्य फलजनकत्वं द्रष्टव्यम् , ब्रह्मदृष्टिः उत्कर्षात् (४.१.५) इत्यनेन निकृष्टे उत्कृष्टदृष्टिः कर्त्तव्या इति व्युत्पादनात्। (शास्त्रि)

[१००] समानप्रत्ययप्रवाहीकरणम् (सच्चिदानन्द)

[१०१] विजातीयप्रत्ययैः अमिश्रिता । तद्यथा अधिलोकसंहितोपासने प्रस्तुते उपासनान्तरं लौकिकविषयप्रत्ययं वा नाभ्यन्तरीकुर्यात् । एवमेव उपासनान्तरेऽपि बोध्यम्। (सच्चिदानन्द)

[१०२] सर्वत्र हि शास्त्रविहितमेव उपास्यं न अशास्त्रोक्तं विद्यमानपि । (छा. भा २.२.१) अविद्यमानं स्वयमेव चिन्तयति चेत् विपरीतप्रत्ययत्वात् ततोऽनर्थप्राप्तिरेव स्यात् । (बृ.भा १.३.१) उपासन-लक्षणस्थलानि : भ.गी १२.३, बृ.भा १.५.२, १.३.९, छा.अव, (सच्चिदानन्द)

[१०३] अत्र यद्यपि द्वे एव उदाहरणे त थापि ईदृशस्थलेषु ध्योनोपासनशब्दौ एवमर्थकौ एव प्रयुज्येते इत्युपलक्षणार्थमुदाहरणमिति बहुवचनेन द्योतयति । सू.भा ४.१.१. (सच्चिदानन्द)

meaning of the word “upasanam” is well known in such usages in the world as “he dedicatedly serves the teacher,” “he dedicatedly serves the king”, etc. One who serves the teacher etc. constantly is said to worship the teacher. And he gains the results of upasanam. So too here also one who meditates is united with things beginning from wealth etc. ending with heaven. The idea is that he gains the results such as progeny.

THE RESULT OF SAMHITOPASANA

What is the benefit of this *upasana*? That is said here. Whether karma or *upasana*, we have two types of benefits. Because there are two types of attitudes possible in them, viz *sakama* and *nishkama*. *Sakama* is desire for worldly ends. *Nishkama* is opposite. (No desire for something other than myself). For all karma - if *nishkama*, the result is purity of mind. If *sakama*, the result is in keeping with the *sankalpa* and varies from karma to karma. Similarly *upasana*. For all *upasanas*, if *nishkama*, the *phala* is single-pointedness, steadiness and sharpness of the mind. If *sakama*, whatever is desired. So for *nishkama* karma and *upasana*, the result is not mentioned and taken for granted. Any *phala* is for *sakama* only.

The *phala* here is for all the five *upasanas* put together. The rule for *sakama upasana* is that in whatever form I meditate, in the same form. If I take Lord as *sarvajna*, I get knowledge. If as strength, I get it. *Yatha yatha upaste, tatha tatha bhavati*. He has meditated as *praja* etc. So that is the *phalam*.

Iti imah mahasamhitah. These are great *samhitas*, *upasanas*. Though ordinary sounds, now great because of association with great things. Here Veda means *upaste*. Why? Because the result is not for knowledge, but for doing. It is karma *phalam*. Meditation is mental. Knowing also is mental. So *vid* root is used. The context also is *upasana*. How to do *upasana*? *evam*, in the same manner described. *Prithivi* as *purva rupa* etc. I cannot interchange. *Yatha sastram*.

What is *upasana*. In keeping with *sastram*, maintaining the same thought form, dwelling upon the same object. Not one thought only. Every thought is same thought. *Atat pratyaya* is eliminated. Any other thought is negated by bringing back to the object of meditation. So you cannot complain mind does not stay. That the mind moves is a blessing. Nothing enters while teaching because mind is stay put in its own thinking or object. *Alambana* is as given in the *sastra*. Holding on to something. It is not one time doing. Like serving a guru, you have to do for a length of time with commitment. Guru alone is kept in mind. The *phalam* is grace etc.

Here also, the *phala* is here and hereafter. Here is *praja*, wealth, *brahmavarcas* (which he asked at the time of prayer) and food which is desired and desirable (eatable, *adaniya annam*, not old food). *Sandhiyate* is used. Because of combination meditation, he is united. After death, heaven. *Suvargya* is *svarga*. *Sandhiyate* will go with each one. Vedanta student has understood, *na karmana na prajaya*+ He can do with *nishkama*. Rules are relaxed, if it is *nishkama*. Even if the order is changed, it will not matter because the *phala* is *drishta* and not unseen. You see maturity of mind right now. You forget small things, when you expand your vision. Like feeding brahmins, rules are to be observed like direction, seated, items, invoking etc. Not removing hunger. If it is to remove hunger, you don’t have rules. Standing you can make him eat. This applies to chanting also. Mistakes not matters if *nishkama*.

Some more $upasanas$ are going to come now. But before that there is a small diversion in the form of some $japa\ mantras$ and $homa\ mantras$.

चतुर्थोऽनुवाकः

जप-होम-मन्त्राः

सम्बन्ध-भाष्यम्

२३) "यश्छन्दसाम्" इति मेधा-कामस्य श्री-कामस्य च तत्प्राप्ति-साधन-जपहोमौ[१०४] उच्येते। "स मेन्द्रो मेधया स्पृणोतु", "ततो मे श्रियम् आवह" इति च लिङ्ग-दर्शनात्।।

मेधा-कामस्य जप-मन्त्राः

२४) **यः छन्दसां** वेदानाम् **ऋषभः** इव ऋषभः, प्राधान्यात्। **विश्व-रूपः** सर्व-रूपः, सर्व-वाग्व्याप्तेः। "तद्यथा शङ्कुना (छा.उप. २.२३.३)" इत्यादि-श्रुत्यन्तरात्। अत एव ऋषभत्वम् ओङ्कारस्य। ओङ्कारो ह्यत्र उपास्यः इति ऋषभादि-शब्दैः स्तुतिर्न्याया एव ओङ्कारस्य। **छन्दोभ्यः** वेदेभ्यः। वेदाः हि अमृतम्। तस्मात् **अमृतात् अधिसंबभूव**। लोक-देव-वेद-व्याहृतिभ्यः सारिष्टिं जिघृक्षोः प्रजापतेः तपस्यतः ओङ्कारः सारिष्टत्वेन प्रत्यभादित्यर्थः। न हि नित्यस्य ओङ्कारस्य अञ्जसैव उत्पत्तिः अवकल्पते[१०५]। **सः** एवंभूतः ओङ्कारः **इन्द्रः** सर्व-कामेशः परमेश्वरः **मा** मां **मेधया** प्रज्ञया **स्पृणोतु** प्रीणयतु बलयतु वा। प्रज्ञा-बलं हि प्रार्थ्यते। **अमृतस्य** अमृतत्व-हेतु-भूतस्य ब्रह्म-ज्ञानस्य तदधिकारात्। हे **देव**, **धारणः** धारयिता **भूयासं** भवेयम्।।

कार्य-करण-योग्यता-प्राप्त्यर्थं प्रार्थना

२५) किञ्च, **शरीरं मे** मम **विचर्षणं** विचक्षणं योग्यमित्येतत्। 'भूयात्' इति प्रथम-पुरुष-विपरिणामः। **जिह्वा मे** मम **मधुमत्तमा** मधुमती। अतिशयेन मधुर-भाषिणी इत्यर्थः। **कर्णाभ्यां** श्रोत्राभ्यां **भूरि** बहु **विश्रुवं** व्यश्रवम्। श्रोता भूयासम् इत्यर्थः। आत्मज्ञान-योग्यः कार्य-करण-संघातोऽस्तु इति वाक्यार्थः। मेधा च तदर्थमेव हि प्रार्थ्यते।।

ज्ञानार्थं प्रार्थना

२६) **ब्रह्मणः** परमात्मनः **कोशः असि** असेरिव, उपलब्ध्यधिष्ठानत्वात्। त्वं हि ब्रह्मणः प्रतीकम्। त्वयि ब्रह्म उपलभ्यते। **मेधया** लौकिक-प्रज्ञया **पिहितः** आच्छादितः। स त्वं सामान्य-प्रज्ञैः अविदित-तत्वः इत्यर्थः। **श्रुतं** श्रवण-पूर्वकम् आत्मज्ञानादिकं विज्ञानं[१०६] **मे गोपाय** रक्ष तत्प्राप्त्यविस्मरणादिना[१०७]। जपार्था एते मन्त्राः मेधा-कामस्य।।

श्री-कामस्य होम-मन्त्राः

२७) होमार्थास्तु अधुना श्री-कामस्य मन्त्राः उच्यन्ते - **आवहन्ती** आनयन्ती **वितन्वाना** विस्तारयन्ती। तनोतेः तत्कर्मत्वात्। **कुर्वाणा** निर्वर्तयन्ती **अचीरम्** अचिरं क्षिप्रमेव। छान्दसो दीर्घः। चिरं वा कुर्वाणा। **आत्मनः** मम। किमित्याह - **वासांसि** वस्त्राणि **मम गावष्टा**। गाष्ट

---

[104] पा.भे - तत्प्राप्तिसाधनं जपहोमौ इति आनन्दाश्रमः।

[105] पा.भे - उत्पत्तिः एव कल्प्यते इति आनन्दाश्रमः।

[106] पा.भे - आत्मज्ञानादिकं मे इति आनन्दाश्रमः।

[107] पा.भे - तत्प्राप्त्यविस्मरणादि कुरु इत्यर्थः इति आनन्दाश्रमः।

इति यावत्। **अन्नपाने च सर्वदा**। एवमादीनि कुर्वाणा श्रीर्या तां **ततः** मेधा-निर्वर्त्तनात् परम् **आवह** आनय। अमेधसो हि श्रीः अनर्थाय एव इति। किं-विशिष्टाम्। **लोमशाम्** अजाव्यादि-युक्ताम्। अन्यैश्च **पशुभिः सह** युक्ताम्[108]। 'आवह' इति अधिकाराद् ओङ्कारः एव संबोध्यते[109]। **स्वाहा**, स्वाहाकारो होमार्थ-मन्त्रान्त-ज्ञापनार्थः।।

बहु-शिष्य-प्राप्त्यर्थं प्रार्थना

२८) **आ मा यन्तु** इति। आयन्तु माम् इति व्यवहितेन सम्बन्धः। **ब्रह्मचारिणः विमायन्तु, प्रमायन्तु, दमायन्तु, शमायन्तु** इत्यादि। **यशो** यशस्वी **जने** जनेषु[110] **असानि** भवानि। **श्रेयान्** प्रशस्यतरः। **वस्यसः** वसीयसः वसुतराद् वसुमत्तराद्वा[111]। तेषु मध्ये श्रेयान् **असानि**[112] इत्यर्थः।।

ईश्वरैक्यार्थं प्रार्थना

२९) किञ्च, **तं** ब्रह्मणः कोश-भूतं **त्वा** त्वां हे **भग** भगवन् पूजावन् **प्रविशानि**। प्रविश्य च अनन्यः त्वदात्मा एव भवानि इत्यर्थः। **सः** त्वमपि **मा** मां **भग** भगवन् पूजावन् **प्रविश**। आवयोरेकत्वमेव अस्तु।।

बहु-शिष्य-प्राप्त्यर्थ-प्रार्थनोपसंहारः

३०) **तस्मिन् त्वयि सहस्र-शाखे** बहु-शाखा-भेदे[113] **निमृजे** शोधयामि **अहं** पापकृत्याम्। **यथा** लोके **आपः प्रवता** प्रवणवता निम्नवता देशेन **यन्ति** गच्छन्ति। **यथा** च **मासाः अहर्जरम्**। संवत्सरो अहर्जरः, अहोभिः परिवर्त्तमानः लोकान् जरयति इति। अहानि वा अस्मिन् जीर्यन्ति अन्तर्भवन्ति इति अहर्जरः। तं च यथा मासाः यन्ति **एवं मां ब्रह्मचारिणः** हे **धातः** सर्वस्य विधातः माम् **आयन्तु** आगच्छन्तु **सर्वतः** सर्वदिग्भ्यः। **प्रतिवेशः** श्रमापनयन-स्थानम्। आसन्न-गृहमित्यर्थः। एवं त्वं प्रतिवेशः इव प्रतिवेशः। त्वच्छीलिनां सर्व-पाप-दुःखापनयन-स्थानम् **असि**। अतो **मा** मां प्रति **प्रभाहि** प्रकाशय आत्मानम्। **प्र मा पद्यस्व** प्रपद्यस्व च माम्, रस-विद्धम् इव लोहं त्वन्मयं त्वदात्मानं कुरु इत्यर्थः।

विद्या-प्रकरणे धन-प्रार्थनायाः साङ्गत्यम्

३१) श्रीकामोऽस्मिन् विद्या-प्रकरणे अभिधीयमानो धनार्थः। धनं च कर्मार्थम्। कर्म च उपात्त-दुरित-क्षयार्थम्[114]। तत्क्षये हि विद्या प्रकाशते। तथा च स्मृतिः "ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः। यथाऽऽदर्शतले प्रख्ये पश्यत्यात्मानम् आत्मनि" इति (म.भा. शान्ति.पर्व २०४-८; गरुड.पु १.२३७.६)।।

---

[108] पा.भे - संयुक्तामिति आनन्दाश्रमः।

[109] पा.भे - अभिसंबध्यते इति आनन्दाश्रमः।

[110] पा.भे - जनसमूहे इति आनन्दाश्रमः।

[111] पा.भे - वसुमत्तराद् वा इत्यनन्तरं 'धनवत्जातीयपुरुषात् विशेषवान् अहम् असानि इत्यर्थः' इत्यधिकं क्वचित्।

[112] पा.भे - वसुमत्तराद् वा असानि इत्यन्वयः इति आनन्दाश्रमः।

[113] पा.भे - बहु-भेदे इति आनन्दाश्रमः।

[114] पा.भे - उपात्तदुरितक्षयार्थम् इति आनन्दाश्रमः।

(इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषत्-शीक्षावल्ली-भाष्ये चतुर्थोऽनुवाकः)।।

FOURTH ANUVAKA

विविध-जप-होम-मन्त्राः

यश्छन्दसामृषभो विश्वरूपः। छन्दोभ्योऽध्यमृतात् संबभूव। स मेन्द्रो मेधया स्पृणोतु । अमृतस्य देव धारणो भूयासम् । १ । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरि विश्रुवम्। ब्रह्मणः कोशोऽसि मेधया पिहितः । श्रुतं मे गोपाय । २ ।

यः - may that Om, the Lord; छन्दसाम् - among the Vedic mantras; ऋषभः - is the greatest; विश्वरूपः - is endowed with all forms; छन्दोभ्यः from the Vedas; अमृतात् - that are eternal; अधिसंबभूव - has manifested; सः - that; मा - me; इन्द्रः - Omkara; मेधया - with intelligence; स्पृणोतु - strengthen me; अमृतस्य - of that eternal knowledge; देव - O Lord!; धारणः भूयासम् - let me become the upholder; शरीरम् - physical body; मे - my; विचर्षणम् - become fit for the pursuit of knowledge; जिह्वा - tongue; मे - my; मधुमत्तमा - be the sweetest; कर्णाभ्याम् - through (my) ears; भूरि - more and more; विश्रुवम् - let me listen to the scriptures; ब्रह्मणः - of Brahman; कोशः - the abode; असि - you are; मेधया - by the knowledge of objects; पिहितः - veiled; श्रुतम् - what is heard; मे - of (by) me गोपाय - may you protect;

May that Om, the supreme Lord, which has manifested from the eternal Vedas, which is the greatest among Vedic mantras and is endowed with all forms, strengthen me with intelligence. O Lord! let me become the upholder of that eternal knowledge which is Brahman. May my physical body become fit for the pursuit of knowledge. Let my tongue be one that speaks pleasing words. May my ears listen to the scriptures more and more. You are the abode of Brahman, veiled by the knowledge of objects. May you protect my knowledge.

उत्तरग्रन्थसम्बन्धः

(ननु यश्छन्दसाम् इत्यादयो मन्त्राः किमर्थम् आम्नायन्ते? तत्राह - मेधेति। मेधाकामस्य मेधाप्राप्तिसाधनं जप उच्यते श्रीकामस्य श्रीप्राप्तिसाधनं होम उच्यते इति विभागः) "यश्छन्दसाम्" इति मेधाकामस्य श्रीकामस्य च (आ.गिरि - मेधाहीनेन ब्रह्मणः अवगन्तुम् अशक्यत्वाद् मेधाकामस्य जपोऽपि ब्रह्मविद्यार्थो भवति। श्रीविहीनेन सत्त्वशुद्ध्यर्थं यागादि अनुष्ठातुं न शक्यते इति श्रीकामस्य होमोऽपि परम्परया ब्रह्मविद्या-उपयोगीति महत्तात्पर्यं विद्यासन्निधि-समाम्नातानां सर्वत्र द्रष्टव्यम्।) तत्प्राप्तिसाधनजपहोमौ उच्येते। (एवं तात्पर्यवर्णने कारणमाह - स मेन्द्र इत्यादिना) "स मेन्द्रो मेधया स्पृणोतु", "ततो मे श्रियमावह", इति च लिङ्गदर्शनात्[११५]।

In the text beginning with "which among...." a prayer and a fire ritual are being mentioned for the one who desires for intelligence and wealth respectively that are means for their gain. That this is talked about is indicated by the express statements of the Sruti as "May that Indra strengthen me with intelligence", and "Then, may you bring wealth for me".

PRAYER FOR MEDHA, INTELLIGENCE

[११५] एतेन एतेषां मन्त्राणां लिङ्गकल्प्य एव विनियोग इत्युक्तं भवति । (शास्त्रि)

There is a special prayer for a Vedantic seeker. The fitness for Vedanta *jnanam* is prayed for. This *yogyata* alone is *sadhana catushtaya+* . I should have health. We should not have *abhimana* for body. But it is the vehicle for accomplishing anything and should not be neglected. *Kalidasa* says: *Sariramadyam+*. Sense organs should also function for doing *sravnam*. Finally I should have *medha sakti*. This power is asked for here specially. It is most important. Incidentally pray for other types of fitness like that of *sthula sarira* and *sukshma sarira*. *Medha* means *granthartha grahana dharana saktih*. Power to grasp and retain the meaning of the words of scriptures along with the words. Both are necessary. If retain well but not *grahanam*, retain what? Only illustrations and jokes. Missing the main thing is problem. If you remember both then okay. Other is not retaining. Building is not possible. A student requires both. It is *grantha grahana* and *dharana* at the time of Veda *Adhyayanam*. Now *granthartha*. (Though *grantha* also is necessary).

What is coming is *japa*, where oral recitation is there and fire ritual, where you offer *ahuti* and so *svaha* will be there. *Svaha* means offering is involved. This section is for *medhakama*. This is for *Japa*. *Avahanti Mantras* are for one who desires wealth and they are meant for *homa*. How do you say one is *japa* meant for *medha* and another is *homa* meant for wealth. *Bhashyakara* quotes the sentences that reveal them. *Indra* is *paramesvara*, invoked in the form of *Om*, "may he strengthen my mind with intelligence. Here there is no *svaha* also. Later it comes., "May you bring wealth". Separate result is thus mentioned for both. Here *svaha* is there. There is a discussion that this is also *japa* and not *homam*.

मेधाप्रार्थना

यः छन्दसां वेदानाम् ऋषभ इव ऋषभः, प्राधान्यात् (गवां मध्ये प्रधानत्वाद् यथा ऋषभः श्रेष्ठः तथा वेदानां मध्ये प्रणवः श्रेष्ठः प्राधान्यात् इत्यर्थः)। विश्वरूपः सर्वरूपः, (कथम् ओङ्कारस्य सर्वरूपत्वम् इत्याशङ्क्य आह - सर्वेति) सर्ववाग्व्याप्तेः (शब्दमात्रे कृत्स्नस्य अभिधेयस्य अन्तर्भावं तस्य वाक्तन्तिः इत्यादि-श्रुत्युक्तं सिद्धं कृत्वा तस्य सर्वशब्दात्मकत्वे प्रमाणमाह - तद्यथा इति) **"तद्यथा शङ्कुना"** - छा.उप २.२३.३ (सर्वाणि पर्णानि संतृण्णानि एवम् ओङ्कारेण सर्वा वाक् संतृण्णा ओङ्कार एव इदं सर्वम् ओङ्कार एव इदं सर्वम् इति श्रुत्यन्तरम् । तस्य च अयमर्थः यथा लोके अश्वत्थपर्णानि शङ्कुशब्दवाच्येन स्वगतशलाकाविशेषेण व्याप्तानि तद्वद् ओङ्कारेण सर्वा शब्दात्मिका वाग्व्याप्ता इति) (सच्चिदानन्द - पर्णनालेन सर्वाणि पर्णानि तदवयवजातानि व्याप्तानि एवं ओङ्कारेण सर्वा वाक् व्याप्ता। ओङ्कारव्यतिरिक्त-शब्द-अभिधेय-विकाराणाम् अनृतत्वाद् ओङ्कारस्य एव सर्ववाचकत्वेन पर्यवसानाद् इति श्रुतेः अर्थः।) इति श्रुत्यन्तरात्। अत एव (विश्वरूपत्वाच्च तस्य श्रेष्ठत्वम् इत्यर्थः) ऋषभत्वमोङ्कारस्य। (ननु ओङ्कारस्य अत्र स्तुतिः अन्याय्या, न इत्याह - ओङ्कारो ह्यत्र इति। अस्यां संहितोपनिषदि ओङ्कारस्य ओमिति ब्रह्म इत्यत्र उपासनं प्रसिद्धमिति हि शब्दार्थः।) ओङ्कारो ह्यत्र उपास्यः इति ऋषभादिशब्दैः स्तुतिः न्याय्या एव[११६] ओङ्कारस्य। छन्दोभ्यः (ओङ्कारस्य सर्ववेदेषु प्राधान्यं कुतः इत्याशङ्क्य तद्धेतुप्रदर्शनपरं छन्दोभ्यः इति वाक्यं व्याचष्टे - वेदेभ्यः इत्यादिना।) वेदेभ्यः (अमृताद् इति वेदविशेषणं वेदाः ह्यमृताः इति श्रुत्यन्तराद्, एकवचनं च च्छान्दसमिति आशयेन आह - वेदा ह्यमृतम् इति। वेदानाम् अमृतत्वं नित्यत्वं. तच्च अवान्तरप्रलये नाशाभावरूपं विवक्षितम्। न तु आत्यन्तिकं नित्यत्वम् अस्ति वेदानां, कल्पादौ सृष्टिश्रवणाद्, महाप्रलये नाश-अभ्युपगमाच्च। इदे च देवताधिकरणे विस्तरेण निरूपितं तत्रैव द्रष्टव्यम्।)

[११६] उपास्यत्वेन विहितस्य स्तवने बि तदुपासनायां प्रवर्त्तेरन् अधिकारिणः (सच्चिदानन्द)

वेदा ह्यमृतम् तस्माद् अमृताद् अधिसम्बभूव, (सम्बभूव इत्यस्य अर्थमाह - लोकदेवेति) लोक-देव-वेद-व्याहृतिभ्यः सारिष्ठं (सारतमम्) जिघृक्षोः प्रजापतेः तपस्यतः ओङ्कारः सारिष्ठत्वेन प्रत्यभादित्यर्थः (तथा च श्रुतिः - प्रजापतिः लोकान् अभ्यतपत्। तेभ्यः अभितप्तेभ्यः त्रयी विद्या संप्रास्रवत्। ताम् अभ्यतपत्। तस्या अभितप्ताया एतान्यक्षराणि संप्रास्रवन्त भूर्भुवस्सुवरिति। तानि अभ्यतपत्। तेभ्यः अभितप्तेभ्यः ओङ्कारः संप्रास्रवत्। तद्यथा शङ्कुना...। इति छा.उप २.२३.२। अभ्यतपत् सारजिघृक्षया पर्यालोचितवान् इत्यर्थः। त्रयः वेदाः त्रयी विद्या। यद्यपि अस्यां श्रुतौ लोकानन्तरं देवा न श्रूयन्ते, तथापि "प्रजापतिर् लोकान् अभ्यतपत् तेषां तप्यमानानां रसान् प्रावृहत् {गृहीतवान्, सारत्वेन ज्ञातवान्} अग्निं पृथिव्या वायुमन्तरिक्षाद् आदित्यं दिवः स एतास्तिस्रो देवता अभ्यतपत् तासां तप्यमानानां रसान् प्रावृहत् अग्नेः ऋचः वायोः यजूंषि सामान्यादित्यात्। स एतां त्रयीं विद्यां अभ्यतपत्। तस्याः तप्यमानायाः रसान् प्रावृहत्। भूरिति ऋग्भ्यः भुवरिति यजुर्भ्यः स्वरिति सामभ्यः" - छा.उप ४.१७.१-३ इत्यत्र देवा अपि श्रूयन्ते इत्यभिप्रेत्य {अनयोः श्रुत्योः एकवाक्यत्वमाश्रित्य} देवग्रहणम् इति मन्तव्यम्।) (ननु सम्बभूव इति पदं जन्मपरत्वेन एव कुतो न व्याख्यायते तत्राह - न हि इति) न हि नित्यस्य[११७] (अवान्तर-प्रलयावस्थायिनः) ओङ्कारस्य अञ्जसा एव (मुख्यवृत्या एव) उत्पत्तिः अवकल्पते[११८] (प्रणवस्य वेद-अन्तर्भूतत्वेन वेदसमानयोगक्षेमस्य वेदेभ्यः सकाशान् मुख्यं जन्म न हि सम्भवति इत्याशयः)। स एवंभूतः ओङ्कारः इन्द्रः सर्वकामेशः[११९] (परमेश्वरः इत्यस्य विवरणं सर्वकामेशः इति) परमेश्वरः[१२०] मा मां मेधया प्रज्ञया स्पृणोतु (स्पृ प्रीतिपालनयोः ६-प.प. स्वादि स्नु) प्रीणयतु (ननु मेधाप्रदानेन यत्प्रीणनं तात्कालिक-प्रीतिसंपादनं न तद्विद्याकामस्य विवक्षितं प्रयोजनम् इति अस्वरसादाह - बलयतु वा इति।) बलयतु वा (अत्र विद्याकामस्य अपेक्षां दर्शयति - प्रज्ञेति) (बलयतु इति) प्रज्ञाबलं हि प्रार्थ्यते (प्रज्ञात्र मेधाशब्दार्थः। सा च ग्रन्थ-तदर्थ-धारणशक्तिः, सैव बलम्। प्रज्ञाबलस्य च नायमात्मा बलहीनेन लभ्यः इति श्रुतिसिद्धं विद्यासाधनत्वं द्योतयितुं हि शब्दः)। अमृतस्य अमृतत्वहेतुभूतस्य ब्रह्मज्ञानस्य[१२१] तदधिकारात्[१२२] (अमृतशब्दमुख्यार्थस्य ब्रह्मणो धारण-असम्भवाद् अमृतशब्देन मुख्यार्थाद् अन्यदेव किंचिल्लक्षणीयम्। तच्च अमृतशब्दित-ब्रह्म-प्राप्ति-साधनं ब्रह्मज्ञानमेव वक्तव्यम्। तत्साधनप्रज्ञाप्रार्थनेन तस्यैव बुद्धिस्थत्वाद् इत्यर्थः) हे देव, धारणः धारयिता भूयासं भवेयम्।

He who is a bull among the Vedic mantras, - like a bull, because of prominence; who is all form because of pervading all words, as is said in another Sruti: Just as by fibers (all leaves are pervaded, so all speech is pervaded by Om). Hence Om has the status of being like a bull. The praise here of om through the words like bull is justified because Om is the object of meditation here. From the Vedas that are eternal (it came). Vedas are indeed eternal. From that Vedas Om was uniquely born. The idea is that Om revealed itself to Brahmaji who performed austerity with a view to extract the essence of the worlds, gods, Vedas and the Vyahritis. In a literal sense, origin for Omkara cannot be imagined as Om is eternal. May that Omkara, which is of this kind, the

---

[११७] वेदस्य अमृतत्वात् तत्सारस्य ओङ्कारस्यापि तथात्वमिति भावः ।(सच्चिदानन्द)

[११८] ओङ्कारस्य परमेश्वरवाचकत्वेन तेन नित्यसम्बद्धत्वाद् तस्य मुख्यवृत्या एव उत्पत्तिः नोपपद्यते । तस्माद् "सम्बभूव" इति "प्रजापतेः एवं प्रत्यभात्" इति व्याख्यातम् इत्यभिप्रायः। (सच्चिदानन्द)

[११९] एतद् ह्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् (कठ १.२.१६) इति श्रुत्यन्तरात् । (सच्चिदानन्द)

[१२०] परमेश्वरप्रतीकत्वात् तदभेदेन इन्द्रः इत्युच्यते इति भावः।(सच्चिदानन्द)

[१२१] कार्यभूतम् अमृतत्वम्। तद्वाचकेन शब्देन कारणभूतं ज्ञानं लक्ष्यते इत्यभिप्रायः । (सच्चिदानन्द)

[१२२] कृत्स्नायाः उपनिषदः ब्रह्मज्ञानप्रकरणत्वात्। (सच्चिदानन्द)

dispenser of all desires, the supreme Lord, please or strengthen - for the strength of wisdom is the object prayed for.

OM, THE ESSENCE OF THE VEDAS

Prayer is here addressed to Lord (*maya visishtam* Brahman) invoked on *Om*. *Indra* here is not *devendra*. *Indra* is represented by *Om*. So prayer is addressed to *Om*. Before asking for boon, we glorify the altar. We always find this in *sruti* as we see in *vyavahara*. *Devas* going to *Vaikuntha* and praising him before asking for help. First two lines are glorification of *Om*.

Among the Vedas or Vedic mantras, this *om* is the greatest. If all the mantras of Vedas are taken as cattle, *Om* is like bull which stands out. It is like a bull. Why? because it is prominent. It is all forms. Because it pervades all the other words. a and m in *Om* covers all *varnas*, "a" being the first letter and "m" being the last in terms of pronunciation because it closes the mouth. "u" covers all intermediary letters. *Om* is therefore the essence of all letters. Crush all words and *Om* you get. So all words. Word is sound symbol for object. So *Om* is all objects. So it is *visvarupa*. There is Sruti also to this effect. Like even a leaf is pervaded by membranes without which there is no leaf at all. When chlorophyll is gone you see all of them. Similar is *Om*. There are many deities mentioned in the Vedas. All are aspects of *Isvara*. *Om* is the best of all the *upasyas* because all are included in *Om*. It is a word symbol for *Isvara*. So it is proper to call *Om* as *rishabha*.

Who took out the *Om* essence from what? *Omkarascatha*+ This *Om* came from the Veda alone. Veda is *amrta*, eternal. (*Chandogya* says this). There are two types of *nitya*. One *Atma* alone is *nitya*, not bound by time. But Veda has *pravaha nityatvam*. It is cyclic. In every *kalpa* it is revealed from the dormant state in which it was during *pralaya*. It is within time but perennially eternal. *Om* came from that as the essence of all the mantras. It is the *upadana karanam* of all mantras. *Omkarena sarva vak santrunna*. How do you know *Om* is Lord. Vedas talk so. How it came into being. *Brahmaji* did *tapas* and created the world. He was desirous of finding out the essence of the creation. He meditated on what is the essence of this world. He churned the entire world and the 3 Vedas came to his mind. Again, what is their essence? He churned the 3 Vedas got three words *bhuh* etc. called *vyahriti*. What is their essence? He churned the three *vyahritis* and got *Om*. *Om* occurred to him in this way. he uttered *Om*. Also *Om* is great as it is discovered by no less than *Brahmaji*. Vedas are eternal in the sense Vedas have *pravaha nityatvam*. So *Om* also like that. It did not come into being one day. This is praise for *Omkara*. So you can appreciate this *pratika* as *isvara*. *Pratika* is sound symbol. Form symbol is *pratima*. So when *Om* is uttered you should get the idea of Lord like even word pot does, the form of pot.

Aitareya Arnyaka 2.1.6.1 says all things are comprehended in speech in the section, "Speech is breath's rope, the names its knots. Thus by his speech, as by a rope and by his names, as by knots, all this is bound. For all these are names indeed." Just as a shepherd ties together many animals by knots attached to a long rope, similarly through the long rope of his speech, and knots of names such as *Devadatta*, all things in the universe are tied up. When hearing his name, everyone responds as if bound and dragged by the knots of rope. *Chandogya* says this speech itself is comprehended in *Om*. How? It is through the syllable 'a' *Ait*. *aranyaka* 2.3.6.14

What is that I want? This *Om* being the Lord of all desires, which he *fulfills* them, like the Lord, there being no *bheda* between *abhidhana* and *abhidheya*. May he bless or please me with desired object i.e., with intelligence. *Artha-sphuranam* of what is taught and *dharana-sakti* regarding what is learnt. May he reinforce my mind with these two powers. Because *nayamatma*+ Where is *na*? Not physical strength. That is also commitment. Here *prajna balam*. There is no protection sought from any other problem because the student is a *viveki*. He wants protection from *samsaritvam* caused by ignorance. So he seeks *jnanam*. O *Deva*, effulgent one, may I become one who upholds the eternal Brahman. How? Brahman upholds everything. In temple power you see figures holding the *mandapas*. Like that who am I to hold? So here it refers to knowledge which is cause of *nityatvam*, not Brahman. How do you suddenly bring that? That is the subject matter here. May I possess *jnanam* not immortality. Immortality is not to be possessed because it is already possessed. What we require is knowledge of that fact. By making use of the *medha sakti* that you are going to give me, may I get the *jnanam*. Even after *medhasakti*, there can be obstacles. They say there are many slips between the cup and the lips. A fly is enough. An attack is enough. You may open and may not close the mouth. So here also I have to get a guru, *adhyatmikadi* obstacles should not be there. Teacher should accept me and so on. The same thing is prayed in *sandhyavandana* also in *apohishta*+ *Medha sakti* is prayed. We require other things like fitness of *karya-karana-sanghata*.

कार्यकरणयोग्यताप्रार्थनम्

किं च शरीरं मे मम विचर्षणं विचक्षणं (रोगरहितम्) योग्यमित्येतत्, भूयादिति पुरुषविपरिणामः (उत्तमपुरुषत्वेन पूर्वत्र प्रयुक्तस्य भूयासमित्यस्य भूयादिति प्रथमपुरुषत्वेन अत्र व्यत्यासः {विपरिणामः} कर्त्तव्यः {शरीरमित्यनेन अन्वयार्थम्} इत्यर्थः)। जिह्वा मे मधुमत्तमा मधुमती अतिशयेन[१२३] मधुरभाषिणी (भूयादिति अनुषङ्गः) इत्यर्थः। कर्णाभ्यां श्रोत्राभ्यां भूरि बहु विश्रुवं व्यश्रवम् (अडाभावः छान्दसः) (श्रु श्रवणे भ्वादि श्रुवः शृ च (श्नु) सार्वधातुके ३.१.७४), श्रोता भूयासम् इत्यर्थः। (ननु चक्षुरादेरपि ज्ञानं प्रत्यानुकूल्यं कुतो न प्रार्थ्यते? प्रार्थ्यते एव इत्याशयेन शरीरं मे विचर्षणम् इत्यादेः विवक्षितमर्थमाह - आत्मज्ञानेति।) आत्मज्ञानयोग्यः कार्यकरणसंघातः (कार्यं स्थूलशरीरम्, करणानि चक्षुरादीनि तेषां सङ्घातः समुदायः इत्यर्थः) अस्तु इति वाक्यार्थः (जिह्वाकर्णग्रहणं करणान्तराणाम् उपलक्षणमिति भावः)। (ननु सङ्घातनिष्ठा योग्यता चेदात्मज्ञानाय प्रार्थ्यते, किमर्थं तर्हि मेधा प्रार्थ्यते? तत्राह - मेधा चेति।) मेधा च तदर्थमेव हि प्रार्थ्यत[१२४] (रोगादिप्रतिबन्धरहितस्य जितेन्द्रियस्यापि मेधां विना आत्मज्ञान-असम्भवात् सापि प्राधान्येन आत्मज्ञानार्थमेव प्रार्थ्यते इत्यर्थः। आत्मज्ञानं प्रति प्रज्ञायाः प्रकृष्टसाधनत्वद्योतनार्थो हि-शब्दः।)

Further, may my body (become fit). The verb 'bhuyat' has to be converted into third person. May my tongue become extremely sweet. It means let it be one that speaks

[१२३] अतिशयेन मधुमती मधुमत्तमा इति विग्रहं दर्शयति मधुमती अतिशयेन इति। तसिलादिषु आकृत्वसुचः इति पुंवद्भावः । ६.३.३५ (A feminine word not ending in the affix ऊङ् and having an equivalent and uniform masculine is changed to such masculine form before the affixes beginning with tasil and ending with krtvasuc - from 5.3.7 to 5.4.17) घरूपेति (६.३.४३) (Before the affixes tara, tama, rupa etc a word ending in the feminine affix ङी becomes short, when the feminine consists of two or more syllables and has an equivalent and uniform masculine.) परत्वाद् ह्रस्वबाधस्य च्छान्दसो बाध- इति भावः । (गोविन्दानन्द)

[१२४] न मेधार्थमेव । विशेषकामसिद्ध्यर्थम् अनुष्ठेयानां काम्यकर्मणां कर्मकाण्डे एव विहितत्वात्, ज्ञानकाण्डे ऽस्मिन् ज्ञानार्थमेव मेधादिप्रार्थना क्रियते इति भावः। (सच्चिदानन्द)

extremely sweet words. May I listen a lot through the ears. May I become a listener (of scriptures). The meaning of this whole section is that let the body-mind-sense-complex become fit for gaining the knowledge of the self. The intelligence is also prayed for that purpose only.

PRAYER FOR THE HEALTH OF BODY-MIND-SENSE-COMPLEX

Let my body be healthy, capable. *Vicarshanam* is *sthira anga*. It includes both gross and subtle bodies. Subtle body's health is strong and functioning senses. Eyes can distract. Ears can distract. While talking you can see the eyes travelling different directions. *Karya* is body *karana* is organs. We are interested in the strength of these two only. *Sarira* is 3rd person. *Bhuyat* we have to convert. It is grammatical *purusha*. My body and senses may they become fit for this pursuit. You require body. Body should co-operate. But dedication is not to body or health. Concerned about calorie and weight all the time. Sprout *bhaktas*. Let the body does not have fits. Let it be fit.

Let my tongue be sweet, honeyed. Not the local sugar sweet. Let the words come out be recordable words. You should be able to play them anywhere. Because later he would like to become a teacher. That is kept in mind. Secondly, not only from the stand point of becoming a teacher, even in the world it is necessary to have sweet words. *Lakshmi vasati jihvagre, jihvagre vasati mitra bandhavah bandhanam caiva jihvahre jihvagre maranam dhruvam*. Money, friends and relative, bondage and even death. As you use, so they give. So it is a general value also. As a control over expression also, he is seeking. Let speech be sweet. You can create problems while talking. Others' sensitivity you be aware of. All forms of disciplines, it stands for. In talking it is more important. *Vang me manasi*+ May I talk in consonance with what I think and vice versa and let me talk consciously.

He is a student. So the most important thing is *sravanam*. So he asks, may I listen to the scriptures with my ears. *Bhadram karvebhih*+ *Bhuri* is plenty. May I listen repeatedly. Each time one point or other gets clarified. In notes we can see. One point is missed in one, another in another. So you see more clarity. Secondly, even if completely understood, it becomes *nididhyasnam*. So I remain in Vedanta. So may I listen more that enriches my knowledge even in *laukika* matters.

Sankara gives *vakyartha*. *Vakya* is a sentence. Even the whole section is a *vakya*. The whole Vedanta also is one *vakya*. The *vakyartha* of the section is that my body-mind-sense complex be fit for gaining this knowledge. So whatever is left is to be included. *Medha* also is for that sake only. Knowledge of self is not for examination passing. People say, you have to unlearn. Teacher has not learnt anything. So he will advise. To unlearn, you have to keep in mind. Then you remember more. How can you unlearn. It is silly to say unlearn. Like the proverbial saying, you remember more the monkey before you do *japa*, if someone says don't think of a monkey. You think of all types ordinary and special and friends too who behave like. You thought yourself to be something basically. We are unwinding the whole thought process. It is done only cognitively. The whole thing is *avicarasiddham* and so it is purely due to lack of attention or lack of means of knowledge. So *medha* for what? Why should I have memory when I try to forget everything. If you are *atmajnani*, you cannot therefore remember at all, it seems. *Medha* is something that is *Bhagavan's* blessing. Everyone has it. We have to use it. This is prayed for *atmajnanam* alone.

ज्ञानार्थ प्रार्थना

(आ.गिरि - अचेतनशब्दं प्रति प्रार्थना कथं, कथं च इन्द्रशब्देन अभिधानम् इत्याशङ्क्य ब्रह्माभेदविवक्षया इत्यभिप्रेत्यआह - ब्रह्मण: इति) (अत्र अचेतनस्यापि ओङ्कारस्य ब्रह्माभेदेन प्रार्थितफलप्दाने सामर्थ्यमवगन्तव्यम्। ननु कथं तस्य ब्रह्माभेद:? तत्प्रतीकत्वादिति ब्रूम:। कथं तस्य तत्प्रतीकत्वम्? तत्राह - ब्रह्मण: इति) ब्रह्मण: परमात्मन: कोश: असि, असेरिव (ननु असिं प्रति प्रसिद्धकोशस्य इव ब्रह्म प्रति प्रणवस्य स्वस्मिन् अन्तर्भावयितृत्व-रक्षकत्वादे: अभावान्न मुख्यं केशत्वमस्ति। तत्राह - उपलब्धीति। यथा असि: कोशे उपलभ्यते तथा ओङ्कारे ब्रह्म उपलभ्यते ततश्च उपलब्धिस्थानत्व-साम्यात् कोशशब्दो गौण ओङ्कार: इत्यर्थ:।) उपलब्ध्यधिष्ठानत्वात्[१२५]। (तदेव साम्यं विवृणोति - त्वं हि इति) त्वं हि (तस्य ब्रह्मप्रतीकत्वे श्रुत्यन्तरप्रसिद्धि-द्योतनार्थो हि-शब्द:) ब्रह्मण: प्रतीकम्, (दृष्टि-आलम्बनम् इत्यर्थ:), (ब्रह्मदृष्टिफलमाह - त्वयि इति) त्वयि ब्रह्म उपलभ्यते (उपलब्धि: साक्षात्कार:) (ननु यदि ओङ्कार: {ब्रह्माभेदेन} प्रार्थितफलदाने समर्थ: तर्हि किमिति स सर्वै: नोपास्यते इति शङ्कावारणार्थं मेधया पिहित इति वाक्यम् । तद्व्याचष्टे - मेधया इत्यादिना) मेधया लौकिक-प्रज्ञया (आ.गिरि - शालग्रामादिषु इव देवतावुद्ध्या इत्यर्थ: as the salagrama stone is concealed by the idea of Lord Vishnu) पिहित: आच्छादित: (ननु शास्त्र-अजनिता प्रज्ञा लौकिकप्रज्ञा तस्या: कथं पीठादेरिव पिधायकत्वमिति आशङ्क्य अत्र विवक्षितं पिधानं कथयति - स त्वमिति) स त्वं सामान्यप्रज्ञै:[१२६] अविदित-तत्व: इत्यर्थ: (उक्तलौकिकप्रज्ञामात्रयुक्ता: सामान्यप्रज्ञा: स त्वं सामान्यप्रज्ञै: अविदितमहिमासि, तस्मात्त्वं न सर्वै: उपास्यते इत्यर्थ:)। श्रुतं श्रवणपूर्वकमात्मज्ञानादिकं (ज्ञानोपाय: अत्र आदिशब्देन ग्राह्य:।) विज्ञानं मे गोपाय रक्ष तत्प्राप्त्यविस्मरणादिना[१२७] (श्रवणपूर्वकमात्मज्ञानादिलक्षणं विज्ञानं श्रुतम्, तत्प्राप्त्यविस्मरणादिना गोपाय इति योजना - अन्वय:) (प्रथमादिपदेन मननजनितं ज्ञानं संगृह्यते। द्वीतयादिपदेन रागादिलक्षण प्रतिबन्धनिवृत्ति: संगृह्यते। तदुक्तं वार्त्तिके - रागद्वेषादिहेतुभ्य: श्रुतं गोपाय मे प्रभो इति।) जपार्था एते मन्त्रा मेधाकामस्य। (आ.गिरि - न एतेषु आर्षेयादि[१२८] मृग्यं ब्राह्मणोत्पन्नत्वात्)।

> Of the limitless self, Brahman, you are the sheath as of a sword, being the locus of appreciation of it. You are the symbol of Brahman. In you Brahman is appreciated. You are concealed by the worldly knowledge. That is, the truth of you is not known by people of worldly intelligence. May you protect what I have heard viz., the knowledge of the self and the like that I have gained through listening. That is you make me own that knowledge and not forget it. These are the mantras for chanting by those who desire intelligence.

Oh Om! One who is invoked as Om! You are the cover for Brahman. How sword is available where the sheath is there, so too you are the place where Brahman is appreciated. The meaning of Om is $paramatma$. $Kosa$ means cover or $upalabdhi\text{-}sthanam$. Your own $buddhi$ can be cover or it can be $upalabdhi\text{-}sthanam$, if you are ready. You are the abode of Brahman. Where will sword be there. Where the cover is there. Om is word revealing the meaning of Brahman. So analysing Om, you can arrive at knowing Brahman. So $pada$ analysis leads to $padarthajnanam$. So $padartha$ resides in $pada$. $Pada$ is like cover. Om $namah$ $pranavarthaya+$ $\underline{Brahma\ abhidhanatvat}$. If Om is opened up you get Brahman.

---

[१२५] एषणात्रयोत्थिता: त्वय्येव परमात्मानं पश्यन्ति इत्यर्थ: । परमात्मनोऽभिधानत्वात्, प्रतीकत्वाच्चेति वार्त्तिके (१.७५)। भाष्यमते तु प्रतीकत्वेन एव ग्राह्य ओङ्कार: इति विवक्षितमिति समनन्तर-उत्तर-वाक्याद् गम्यते। (सच्चिदानन्द)

[१२६] लोकिकप्रज्ञा बाह्यविषय-अभिनिवेश: । अशास्त्रप्रज्ञै: यस्माद् अमृतत्वप्राप्तिसाधनत्वेन न ज्ञात: । अत: एव त्वां नोपासते ते इत्यर्थ: । (सच्चिदानन्द)

[१२७] आदिशब्देन शिष्येषु विनियोग: गृह्यते। (सच्चिदानन्द)

[१२८] ऋषिर्देवताछन्द: इति यावत् । आर्षेयमित्यत्र इतश्च अनिञ: इति ढगपत्ये। (गोविन्दानन्द)

Brahman is hiding in *Om*. (*avasthatraya* and *caturtham*). Secondly *Om* is used as *alambana* for Brahman *Upasanam*. It is a symbol of Brahman so abode of Brahman. Like idol is abode of Lord, like *linga* or *salagrama*. *Brahmapratikatvat* If I chant *Om* how come I don't see Brahman. I am not able to see it because it is not understood. It is covered. Covered by what? By academic knowledge. It can even include Vedic knowledge relating to heavens etc. That for which you have time is *laukikaprajna*. Worldly knowledge makes me extrovert and I have no time and mind for seeing you. So Brahman is hidden. Like the idea of country covers the cloth called flag. Extrovertedness covers. Those who are committed to common pursuits, they don't know you.

Due to some *purva punya* I have come to Vedanta. You reveal yourself. That knowledge which I have gained by *sravanam*. You protect me by giving me the capacity to protect what I have learnt. Let me not forget. Let me not have *ragadvesha*. *Tejasvi na*+ Whatever has been learnt by us let it be bright in our mind. The prayer alone will not preserve. My *purushartha* also necessary. It is in spending some time in going through what I have studied.

आवहन्ती वितन्वाना । कुर्वाणा चीरमात्मनः । वासांसि मम गावश्च ।
अन्नपाने च सर्वदा । ततो मे श्रियमावह। लोमशां पशुभिः सह स्वाहा । ३

चीरम् आवहन्ती - that will instantly bring; वितन्वाना - increase; कुर्वाणा - and preserve; आत्मनः - for me; वासांसि - plenty of clothes; मम गावः च - and plenty of cattle for me; अन्नपाने च - and plenty of food and drinks (for me); सर्वदा - all the time; ततः - thereafter; श्रियम् - fortune; मे आवह - bring me; लोमशाम् - and plenty of wooly animals (i.e.,sheep etc.); पशुभिः सह - along with other animals; स्वाहा - offering is made.

> Thereafter bless me with fortune that will instantly bring and increase and preserve plenty of clothes for me, plenty of cattle for me, and plenty of food and drinks and poenty of wooly animals (i.e., sheep etc.) along with other animals all the time.

श्रीकामस्य होममन्त्राः

होमार्थाः तु अधुना श्रीकामस्य मन्त्रा उच्यन्ते - आवहन्ती आनयन्ती वितन्वाना विस्तारयन्ती तनोतेः तत्कर्मत्वात् (तनोतेः धातोः तदर्थकत्वाद् - विस्तारार्थकत्वाद् - इत्यर्थः) कुर्वाणा निर्वर्तयन्ती अचीरम् अचिरम् (अचिरमिति च्छेदः संभावनामात्रेण। दैर्घ्यं छान्दसम्) क्षिप्रमेव, चिरं वा (कुर्वाणा चीरमिति च्छेदे, चिरकालं यावदित्यर्थः) कुर्वाणा आत्मनः मम (मम अन्नपानादिकं सर्वमानयन्ती सर्वदा संपादयन्ती तथा संपादितं सर्वं विस्तारयन्ती वर्धयन्ती वर्धितं सर्वं चिरं दीर्घकालं कुर्वाणा वर्त्तयन्ती , यथा विनष्टं न भवति तथा कुर्वती इति यावत्)। किमित्याह - (किमावहन्ती इत्याकाङ्क्षायामाह इत्यर्थः।) वासांसि वस्त्राणि मम गावश्च गाश्च इति यावत् (गावश्च इति प्रथमायाः द्वितीयात्वेन विपरिणामः कर्त्तव्यः इति भावः)। अन्नपाने च सर्वदा। (अत्र आवहन्ती इत्यादि पदत्रयं श्रियः विशेषणम्। ननु आवहन्ती इत्यादि पदत्रयस्य प्रथमान्तस्य द्वितीयान्तस्य श्रीपदस्य च कथं विशेषण-विशेष्य-भावेन अन्वयः इत्याकाङ्क्षायामाह - श्रीर्यां ताम् इति) । एवमादीनि कुर्वाणा श्रीर्यां ताम् (तामावह इति उत्तरेण अन्वयः)। ततो मे श्रियम् इत्यत्र तत इत्यस्य व्याख्या मेधानिर्वर्त्तनात् परम् इति) ततः मेधानिर्वर्त्तनात् परम् आवह आनय (ननु मेधानिष्पत्यनन्तरमेव किमिति श्रीः प्रार्थ्यते। तत्राह - अमेधसो हि

इति। प्रज्ञाहीनस्य अपात्रव्ययादिना धनादिकम् अनर्थाय एव इत्येतत् प्रसिद्धम्। अतो मेधानन्तरमेव श्रीः प्रार्थ्यते। इत्यर्थः।) अमेधसो हि श्रीः अनर्थाय एव इति (हेतोः शास्त्रज्ञाननिर्वर्तनानन्तरमेव श्रियमावहेति प्रार्थ्यते)। किं विशिष्टां च (पुनः च किं विशिष्टाम् - श्रियम् - इत्यर्थः)। लोमशां अजाव्यादियुक्ताम् (अजादीनां लोमशत्वात् तद्रूपा श्रीः लोमशा इति भावः) (अजाव्यादियुक्तत्वम् श्रियः लोमशत्वम् स्वतः तदयोगात्) अन्यैश्च पशुभिः सह युक्ताम्[१२९] आवह इति। (श्रियमावह इति - क्रियया - कः संबोध्यते तत्राह - अधिकाराद् इति। संनिधानादित्यर्धः।) अधिकाराद् (प्रकरणाद्) ओङ्कार एव संबोध्यते स्वाहाकारो होमार्थ-मन्त्रान्त-ज्ञापनार्थः। (ओङ्कारस्य प्रार्थितश्रीप्रदाने योग्यतासूचनार्थो हि शब्दः) (मणिप्रभा - स्वाहापदं तस्मै श्रीप्रदाय इद् द्रव्यं हुतमस्तु इति हवनीयद्रव्यप्रक्षेपार्थम्)।

> Now the mantras meant for use in fire ritual are being said for one who desires wealth. Wealth which brings, which expands, for the root meaning of “tan” is to spread, and which accomplishes without delay. The word aceeram is to be construed as aciram and the lengthening is Vedic. Or it can be ciram meaning which accomplishes for me for long time. Accomplisher of what? Clothes and cattle and food and drink. The word gauh is to be construed as gaah. Bring that wealth to me which accomplishes all these for me for ever, after I have been blessed with intelligence. For, wealth in one devoid of wisdom causes all evils. Of what characteristic? Woolly i.e., wealth consisting of goats, sheep etc along with other animals. The prayer is addressed to Omkara alone by the context. The word svaha marks the end of the mantra uttering which an oblation is offered.

PRAYER FOR WEALTH

Here after we are getting another topic. a prayer for getting wealth. *Sri praptyartham*. Here this is to be used as not *japa* but in *homa*. *Svaha* indicates that it involves offering in the fire. Every *svaha* is followed by one offering. *Srikamasya homa*. Previously *medha-kamasya japa*. Since it begins as *avahanti*, so it is called *avahanti homa*. This mantra is therefore popular. Not the previous one. Everyone wants *sri* only. Sri is various forms of wealth. *Tu* is to show contrast from previous mantras.

Why should the student seek prosperity. It may be because wealth is for doing karma. noble service, *yagas* and *annadana* is prescribed. Bigger *yaga*, bigger is *annadana*. Laying the roads *etc istapurta* is prescribed for eliminating selfishness so that they are for *antahkarana suddhi*. *Karma* for *duritakshayartham*. *na karmana na prajaya .. tyagena eke+ Danam* is *tyaga*. *Cittasuddhi* is for what? *jnanartham*. *Jnanam* is for *mokshartham Artham* means for the sake of. Beautiful. So *brahmacari* is here planning for *grhasthasrama*. If he directly becomes *sannyasi*, then also he can pray because, he is asking for many students to propagate this knowledge. They have to be maintained. So the needs are many. So prosperity is nor for *artha-kama* purpose.

The prayer is addressed to the same Lord indicated by *Omkara*, *Indra*. *Tato me sriyam*, we have to take first. O *Indra*, *paramesvsara*! You bring wealth for me. How? *tatah* thereafter. After what? In the previous mantra I asked for *medhasakti*. After that. First give me *medhasakti*, proper culture and wisdom. It is *sastrajnanam*. Then alone give me prosperity. *Sankaracarya* says, otherwise it will lead to *anartha* without education and

---

[१२९] अत्र वा - दैवेन मानुषेणैव वित्तेनामुत्रिकैहिकम् । कर्म कर्त्तुम् अलं यस्मात् प्रार्थ्यते तेन तद्वयम्। (१.८१) । तत्र दैवं वित्तं मेधा मानुषं तु पश्वादियुक्ता श्रीः ।

samskara etc. We see children getting spoiled because of too much money as pocket money to children. Out of love they give. It spoils them. *Sucinam srimatam geha*+ That is why student was taken away from family. Whether rich or poor or king or citizen, all the differences were taken away before giving education or wealth. Wealth is useful only when one can handle it. Otherwise it will be frittered away. Like Saddam Hussain. Money is a bad master but a good servant. *Dharmadharma viveka* is necessary, not *atmajnanam*.

What type of prosperity? Student is very particular. I want soon. So *aciram*. *Ciram* will go with *kurvana*. Which will preserve, remain with me, for long time. *Aciram* will go with *avahanti*. *Aciram avahanti* - which should quickly bring me the following. In short time come and stay for long time. Sri that brings *vasamsi* etc. *Vitanvana* - Sri that which is brought should be such which improves itself, multiplies manifold. Not that which siphons off. That which keeps growing. The root tan having the object/*vishaya* of this. Karma is *vishaya*. *Tadarthatvat*. Growing Sri. Again, the *sri* that stays permanently after growth. it is not lost *ityarthah*. *Lakshmi* is known as *cancala*. Lengthening is *chandasa*. *aciram* means Soon. Or *ciram* means that which stays long time.

What is that is it should bring etc. clothes for me, cattle which is real wealth and food. Plenty of milk and ghee. It is for ritual. Offering involves ghee. *Gobrahmanebhyah*+ How long these things? *Sarvada*. Sri is not merely currency. What do you buy by it is called wealth. Health etc. are wealth. Always *avahanti*. *ya srih tam tatah avaha*. When? After gaining *medha*. Further what type of wealth? Along with other animals which have bodily hair. *Sitanivarini knatha*. *pasubhih saha Lomasa sri*. That which has *loma*. Hair on the body is called *loma*. Hair on the head is *roma*. Bodily hair is - goat, sheet etc. that have this. You bring. Who? *Omkara* i.e., *omkara-rupa paramesvara*. alone. How? By context. *Svaha* indicates the end of mantra chanting which offering is to be made before beginning next mantra.

आमायन्तु ब्रह्मचारिणः स्वाहा। विमायन्तु ब्रह्मचारिणः स्वाहा। प्रमायन्तु ब्रह्मचारिणः स्वाहा। दमायन्तु ब्रह्मचारिणः स्वाहा। शमायन्तु ब्रह्मचारिणः स्वाहा। यशो जनेऽसानि स्वाहा । श्रेयान् वस्यसोऽनि स्वाहा ।

आ यन्तु मा - let them come to me; ब्रह्मचारिणः - many students; (स्वाहा) वि - from various directions; आयन्तु मा - let them come to me; ब्रह्मचारिणः - many students; (स्वाहा) प्र - with intelligence; आयन्तु मा - let them come to me; ब्रह्मचारिणः - many students; स्वाहा मा द - possessed of sense control; आयन्तु - let them come to me; ब्रह्मचारिणः - many students; (स्वाहा) मा श - possessed of mastery over mind; आयन्तु - let them come to me; ब्रह्मचारिणः - many students; (स्वाहा) यशः असानि - let me be very well known as a teacher; स्वाहा जने- among the people; श्रेयान् असानि - let me be the greatest; वस्यसः - among the wealthy (स्वाहा)

Let many students come to me. Let them come from various directions. Let them come with intelligence. Let them come possessed of sense control. Let them come possessed of mastery over mind. Let me be very well known as a teacher among the people. Let me be the wealthiest among rich.

शिष्यागमनार्थं मन्त्राः

(मेधाविनः श्रीयुक्तस्य विद्याप्रदानाय शिष्यप्राप्तिः प्रार्थनामन्त्रः आमायन्तु इति। तं व्याचष्टे आ यन्तु मामिति) (मणिप्रभा - इदानीं विद्यासंप्रदायप्रवृत्त्यर्थं शिष्यसंपादकहोमार्थान् पञ्चमन्त्रान् आह - आमायन्तु इति) आ मा यन्तु आ यन्तु मामिति व्यवहितेन सम्बन्धः ब्रह्मचारिणः। विमायन्तु। प्रमायन्तु। दमायन्तु। शमायन्तु इत्यादि (मणिप्रभा - मा व्यायन्तु विविधकामनावन्तः सन्तः आयन्तु। मा प्रायन्तु प्रज्ञातिशयेन प्रकृष्टाः सन्तः आयन्तु। मा द आयन्तु देत्यव्ययेन दम उच्यते। तथा च दान्ताः सन्तः आयन्तु। मा श आयन्तु। शेत्यव्ययेन शम उच्यते। शमशब्दः शान्तिपरः। क्रोधादिचित्तदोषराहित्यं शान्तिः। तथा च शान्ताः सन्तः आयन्तु।)। (स्वस्य आचार्यत्वप्रयुक्त-कीर्त्तिप्रार्थना-मन्त्रः यशो जन इति। तं व्याचष्टे - यशस्वी इति) यशो यशस्वी (मणिप्रभा - विद्यासंप्रदायजनितकीर्त्तिमान् इति यावत्) जने जनेषु (सर्वेषु मध्ये) असानि भवानि (बहुब्रह्मचार्यागमनप्रयोजनमिदं यश आदि)। श्रेयान् प्रशस्यतरः। वस्यसः वसीयसः (वस निवासे, वस आच्छादने इति धातुद्वयाद् उ प्रत्ययः शीलार्थेः। वेश्मसु वसनशीलः {वासगृहादिमान्} पराच्छादनशीलो वा वसुः अतिशयेन वसुः वसीयान् तस्माद् वसीयसः। ईलोपः छान्दसः। यद्वा धनवाचिना वसुशब्देन वसुमान् लक्ष्यते। तथा च अतिशयेन वसुमान् वसुमत्तरः तस्माद् इत्यर्थः इत्याशयेन आह - वसुमत्तराद्वा इति) वसुमत्तराद्वा[१३०] तेषु (वसीयःसु वसुमत्तरेषु वा इत्यर्थः) मध्ये श्रेयान् असानि इत्यर्थः (इत्यन्वयः इति पा.भे)।

> The letter "आ" goes with yantu which is located away. May the students come to me. Likewise, may they come to me from all quarters, come in various manner and come with restraint of senses and mind. May I become more renowned in the society Vasyasa construed as vasiyasa meaning than him who is exceedingly wealthy. May I become very distinguished among them. This is how the sentence is to be read.

PRAYER FOR OBTAINING STUDENTS

The prayer is continued. It is for something else. It is beautiful order. First wisdom, then wealth and finally students. *Amayantu*+ Let students come to me later for the propagation of this noble teaching. Because *pravacan* is equally emphasised. No printing was there. Even then, subtle ideas cannot be brought out in writing. It will not have life or impact. It much come from the heart of the person for whom this wisdom is very life. *Dharma* is very embodiment. It is considered discharge of *rishi rnam*. *Ayantu* means come. Since it is residential courses and therefore asked for *brahmacaries*. *viyantu*+ *vi* stands for from different directions. Let them have any desire - to study any discipline of knowledge. Or let them have different interest, one may have taste for grammar, another *tarka* and so on. Or let them be different people. No sons of the soil policy. *pra ayantu* means who are qualified. Those who have *medha sakti*. If they are sharp, teacher can get new methods of reply. *Tva drng no*+ . *Da ayantu*. *Da* stands for *dama*. *dantah santah*. Those who have disciplines, control over the sense pursuits. *Sa ayantu- Sa* stands *sama*. *Santah*. *Sadhana catushtaya sampannah*.

If students have to come to me, I should be popular. So he says. May I become famous among the people for giving *vidya*. ***Sa ha nau yasah***+ *Yasas* is excellence. By excellence of knowledge may I become famous. *Yasa* here is *yasasvi*. May I be famous by wealth also. May I become highly recognised. Among whom? Among *vasa nivase* and *acchadane*. *Seelarthe u pratyaya*. Among those who can shelter very well. Here *ikara lopa*. Or one

---

[१३०] वसुतराद् अतिशयेन वसोः । वसनशीलस्य इत्यर्थः । वासगृहादिमतः इत्यर्थः । अथवा वसुरिति वसुमान् उच्यते । वसीयसः अतिशयेन वसुमतोऽपि सकाशाद् अहं श्रेयान् भवानि इति प्रार्थना। (सच्चिदानन्द) (मणिप्रभा - वसुः अस्य अस्ति इति वसुमान् अतिशयेन वसुमान् वसीयान् । वसुमच्छब्दाद् ईयसुन्प्रत्ययः । विन्मतोर्लुगिति मतुब्लोपः छान्दसः ईयसुनः ईकारलोपश्च। तस्माद् वस्यसः)

who is greatly rich. *Iyasun* with *vasu*. Here also *matup* in *vasu* and *ikara lopa*. This attitude is important. Otherwise prayer has no meaning.

तं त्वा भग प्रविशानि स्वाहा । स मा भग प्रविश स्वाहा। तस्मिन्त्सहस्रशाखे । निभगाहं त्वयि मृजे स्वाहा । यथापः प्रवता यन्ति । यथा मासा अहर्जरम् । एवं मां ब्रह्मचारिणः । धातरायन्तु सर्वतः स्वाहा । प्रतिवेशोऽसि प्र मा भाहि प्र मा पद्यस्व ।

तं त्वा - into you; भग - oh Lord; प्रविशानि - let me merge; (स्वाहा) सः (तं) - may you; भग - oh Lord; मा प्रविश - merge into me; (स्वाहा) तस्मिन् त्वयि - in you; सहस्रशाखे - who have thousands of forms; भग - oh Lord; अहम् निमृजे - let me purify myself; (स्वाहा) एवं यथा - just as; आपः - waters; प्रवता - downwards; यन्ति - rush; यथा - and just as; मासाः - the months rush towards; अहर्जरम् - the (next) year; माम् - to me; ब्रह्मचारिणः - students; धातर् - oh Lord; आयन्तु - let (students) come; सर्वतः - from all directions; (स्वाहा) प्रतिवेशः असि - (oh Lord) you are like a resthouse; मा - to me; प्रभाहि - reveal yourself; प्रपद्यस्व मा - (and) enter into me.

> Oh Lord let me merge into you. Oh Lord May you merge into me. Oh Lord Let me purify myself in you who have thousands of forms. Oh Lord Let students come to me naturally and regularly from all directions just as waters rush downwards naturally and just as the months merge into the (next) year regularly. Oh Lord You are like a resthouse. Reveal yourself unto me and enter into me.

जीवेश्वरैक्यप्रार्थना

(विद्यातत्साधनप्रार्थनानन्तरं विद्याफलप्रार्थनां दर्शयति - कि च इति) किं च तं ब्रह्मणः कोशभूतं त्वा त्वां हे भग भगवन् पूजावन् (मणिप्रभा - भगशब्दः ऐश्वर्यादिषड्गुणवाचकः। भगशब्देन तद्वान् उपलक्ष्यते।) प्रविशानि (ननु अत्र विदुषो ब्रह्मरूपे प्रणवे मुख्यप्रवेश-असम्भवादहं ब्रह्मास्मीति ज्ञानमेव तस्य तस्मिन् प्रवेशत्वेन विवक्षणीयम्। तस्य च अमृतस्य देव धारणो भूयासम् इत्यनेनैव प्रार्थितत्वात् पुनरुक्तिः स्यादित्याशङ्क्य तात्पर्यम् आह - प्रविश्य च इति।) प्रविश्य च अनन्यः त्वदात्मा एव भवानि इत्यर्थः। सः त्वमपि मा मां भग प्रविश। (वाक्यद्वयस्य विवक्षितम् अर्थं संक्षिप्य आह - आवयोरिति । भेद-हेतुमज्ञानं नाशय इत्यर्थः। तयोरेकत्वस्य स्वतः सिद्धत्वादिति मन्तव्यम्।)। आवयोरेकत्वमेव अस्तु।

> Further, O Adorable Lord! May I enter into you, the sheath of Brahman. Having entered you, may I become yourself, as nonseparate. May you also O Lord enter me. Let there be oneness between both of us.

PRAYER FOR THE UNION WITH THE LORD

From here again the prayer is little different. It is most important prayer. Because when we enter into even such noble *vyavahara* as teaching, quietly without our knowledge we may get interested in or attached to those activities. If the emphasis is constantly on assimilating the knowledge, then no problem. If the aim is forgotten, it may turn out to be for name and fame and wealth and institution, I may fall. Set up also is *anatma* as my body. It may be more than family *samsara*. Similarly attachment to students can become a problem. Worry can be who will take care of the institution after me. Student therefore makes a prayer that let

all these be means for assimilation of the identity knowledge. Let me not be side-tracked by any of these activities. *Medhasakti* etc. are not ends in life. Let me not forget the main goal i.e., identity. So he says let me become one with you and vice versa.

Homa continues. *Bhaga* stands for wealth. Absolute power, virtue, fame, fortune, wisdom and non-attachment are *bhagas*. One who has them is *Bhagavan*. Lord! (*Omkara*) May I enter/merge into you (*tva*) who are that *pratika* of Brahman - tam. I is the subject. How my entry will be complete. Will I not go and sit in his stomach as a worm? So he says, You also may enter into me. That is complete. So no other Vedanta is possible. It is obtaining oneness. So may I gain that knowledge. *sa (tvam) ma = mam bhaga! Sah* = such you *ma* = in me *pravisa*. It should not be partial merger like river merging into ocean. It occupies only a part of ocean. It will be like *amsa* of Lord. Here we don't want that. I will still be limited. So it is total oneness. Both are one. Thus part-whole relationship is eliminated. Here we should not imagine going to Lord and merging with him. It is not physical. Lord will be limited if he is in one place. So there cannot be any travel. Merger happening as an incident or event will be undone later. Merger is therefore in the form of knowledge. Like the dreamer merging into the waker. Dreamer does not travel for this. As long as he travels, he will continue to be in dream. The only way is by waking up. On waking up, he discovers I am waker. I mistook myself as dreamer. That correction is merger. So too here with Lord. Understanding and owning up the knowledge is merger. Oh Lord! Remove the gap between me and you caused by ignorance.

प्रार्थनोपसंहारः

तस्मिन् त्वयि सहस्रशाखे बहुभेदे[१३१] (शिव-विष्णवादि-अनेक-मूर्त्ति-उपेते त्वयि पापं नाशयामि , त्वन्मूर्त्तिभजनेन पापं नाशयामि इति यावत्।) निमृजे (मृज् १.प.प. २.प.प. १० उ.प) शोधयामि अहं पापकृत्याम्। (यदुक्तं ब्रह्मचारिणः मामायन्तु इति तदेव दृष्टान्तेन प्रपञ्चयति - यथा इति) यथा आपः प्रवता प्रवणता निम्नवता देशेन यन्ति गच्छन्ति (सच्चिदानन्द - त्वरांशे निदर्शनमिदम्)। यथा च मासाः (चैत्रवैशाखादयः द्वादश) अहर्जरम् संवत्सरो अहर्जरः। अहोभिः परिवर्त्तमानः लोकान् जरयति इति। अहानि (त्रिशत-षष्टिसंख्यानि) वा अस्मिन् जीर्यन्ति अन्तर्भवन्ति इति अहर्जरः। तं यथा मासाः यन्ति[१३२] एवं मां ब्रह्मचारिणः हे धातः सर्वस्य (कर्मफलस्य) विधातः माम् आयन्तु आगच्छन्तु सर्वतः सर्व-दिग्भ्यः। प्रतिवेशः[१३३] श्रमापनयनस्थानम् आसन्नं गृहमित्यर्थः। एवं त्वं प्रतिवेश इव त्वच्छीलिनां (त्वदुपासकानाम्) सर्वपापदुःख-अपनयनस्थानम् असि। अतो मा मां प्रति (त्वन्निष्ठायाः संसार-श्रम-अपनयनस्थानत्वाद् तदपनयनाय मां प्रति स्वात्मानं तत्वतः प्रकाशय इत्यर्थः) प्रभाहि प्रकाशय आत्मानम्। (आदरसूचनार्थमुक्तज्ञानं पुनः प्रार्थयित्वा मुक्तिमपि तदर्थमेव पुनः प्रार्थयते - प्रपद्यस्व इति) प्र मा पद्यस्व प्रपद्यस्व च माम्। रसविद्धमिव[१३४] लोहं त्वन्मयं त्वदात्मानं कुरु इत्यर्थः। (त्वत्साक्षात्कारं अनुगृह्णीष्व इति यावत्) (रसविद्धः लोहः रसमयो भवति तद्वन्मां त्वमन्यं कुरु इत्यर्थः)। (विद्यासन्निधौ श्रुतस्य श्रीकामस्य प्रणाड्या विद्यायाम् उपयोगं दर्शयति - श्रीकामः इत्यादिना।) श्रीकामः अस्मिन् विद्याप्रकरणे

[१३१] परमेश्वरस्यैव बहुमूर्त्तिभेदेन बहुभेदत्वम्। (सच्चिदानन्द)

[१३२] अनुक्रमेण सातत्येन च यथा संवत्सरमेत्य तत्रान्तर्भवन्ति इत्यर्थः । (सच्चिदानन्द)

[१३३] प्रतिप्राणिप्रवेशाद्वा प्रतिवेशोसिकीर्त्यसे । (वा १.९१) इत्यर्थान्तरमपि दृश्यते (सच्चिदानन्द)

[१३४] रसः क्षारभेदः तन्मिश्रणेन यथा लोहं लोहान्तरेण तादात्म्यमापद्यते तद्वदिति यावत्। (गोविन्दानन्द)

अभिधीयमानः धनार्थः। धनं च कर्मार्थम्। कर्म च उपात्तदुरितक्षयार्थम्। तत्क्षये हि विद्या प्रकाशते (अभिव्यज्यते उत्पद्यते इति यावत्)। तथा च स्मृतिः "ज्ञानमुत्पद्यते पुंसः क्षयात् पापस्य कर्मणः। यथादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि" इति (महाभारत शा. २०४-८) (यथा आदर्शतले निर्मले प्रतिबिम्बं स्फुटं पश्यति तथा पापक्षयेण निर्मलादर्शतलतुल्ये अन्तःकरणे ब्रह्मात्मानं पश्यति इति स्मृतेः उत्तरार्ध-अर्थः) (सच्चिदानन्द - यथा आदर्शतले निघर्षणादिना स्वच्छतां गमिते आत्मानं प्रतिबिम्बितं पश्यति आत्मनि अन्तःकरणे अपि दुरितक्षयात् शुद्धिंगते स्वात्मानं पश्यति इत्यर्थः।)।

> In you alone (as in a river) of thousand branches, I wash all acts of sin. As waters flow effortlessly downwards and as months enter the year, The year is called aharjara, consumer by days or consumer of days, because it emaciates the world revolving round and round in the form of days or because days are dissolved in the year in which they are comprehended. In the same manner, the students come to me from all quarters. You are like a resthouse wherein one shakes off all weariness. You are the home wherein the worshippers of you shake off all their papa and pain by resting. You therefore shine for me. May you come towards me. May you make me one with yourself like the metal dipped in mercury becomes one with mercury. The seeker of wealth, mentioned in this section, , i.e., in the chapter on knowledge, is one who seeks wealth which is meant to perform rituals which again serve to destroy all accumulated papas of the past. On the elimination of papas, that knowledge shines, as the smriti also says: "Knowledge arises in people on the destruction of papakarmas. Just as in a clear mirror, they see the self in the intellect."

*In *Santiratnakra Avahantihoma-prakriya* is given. See page 391 of Mahesh Research Institute *Upanisahd* Vol I footnote.

PRAYER - CONCLUSION

After the four prayers, he concludes the same. He says, if I have to merge into you, I should be as pure as you are. Only two pure things can merge. If impure is mixed with pure, they will stand separate like oil and water. Where you want to join, you rub off with sand paper and join. Even painting, you first scrub the wall for removing the old paint. If I have the idea of my being impure, I will reject the knowledge that I am Lord. So I have to make myself pure to remove the idea I am impure. By mere thinking I cannot become pure. Impurities of *punya-papa, raga-dvesha* and ignorance. So I am purifying myself here. Here *atma* is not purified. Only mind is purified. Where can I go for purification? The student says, for that also I come to you alone. The student imagines Lord to be a big main river and the various deities as tributaries. I will take a bath in one of the tributaries. So any *ista-devata* is good enough for washing off the papas.

May I wash, launder myself my *papakarmas* in you. You can only wash in *Bhagavan* only. Otherwise their dirt comes to you. Like washerman you give, they will wash in any water available. Your dirt you can have instead of having the slush dirt. He is *asnaga*. You can wash anything in him. I don't want to dirty *Bhagavan* you should not say. You who have 1000 branches, viz., one who is in various forms like *Indra, Varuna* etc. *Sarvadeva namaskarah Sri kesavam*+ . *Nimrje* = let me purify. *tvayi* = in you. What type of you? In you who have got thousands of branch rivers as if. It is like ghats of a river. You cannot take bath anywhere in the river. Only in ghats, you can take bath. You won't know depth, approach etc. Temple is like ghat. I visit various temples and wash off my sins. Symbolic of spiritual *sadhana* is mentioned.

The previous idea/prayer regarding more students is repeated and the section concluded. Student also reveals by that he is very particular in having more students. Let the students come from all directions. $Dhatah$ means address. Oh Lord! How they should come? Two examples are given. $Yatha\ apah$ - just as waters gush down a slope. $pravata$ is slope. In slope waters rushes down. Let the students not hesitate. Let them gravitate towards me. Like the natural flow of water downward. $Vidhata$ is $niyanta$. the order. It is $sambuddhi$. Another example is given. $yanti$ we have to supply. $Aharjaram$ is year. Just as months go very fast to merge into a year. All months are interested in becoming the next year to become one whole year. We say time flew away. $Aharjaram$ is year because by/in the form of days, changing in the form of days, the year emaciates the beings. It makes every person age. Ageing agent is year. Or all the days merge/dissolve in which period of time is called year. How months quietly enter into year without your doing anything and they do it regularly, so too let students come to me regularly. $Dinayaminyau$ + $Kala$ while playing, makes us age. So too, students come to me like that constantly. From all directions let them come including from up if possible. The intention is not to make gurudom. But purely for propagation/self-assimilation.

He addresses the Lord that you are like a rest house. It is a beautiful name for Lord. You are home where weariness goes away after sweating it out outside. You are in the form of order. So I can relax in your order. You relax. $Prativesa$ is also resthouse. Its job is to give rest when I have a long travel and my destination has not come. Before continuing my walk, I want to remove my tiredness. Mental refreshment also is required. How long I have to go? Mind may get anxious and get frustrated. Life is a long journey in search of peace. We have been travelling $anadikala$. For us, the resthouse then is Lord. A student also feels the same thing. Will I get the knowledge? Will I be able to maintain resolves. We should get the strength from outside, viz. God.. The student seeks this strength to continue my journey not bothered by any ideas of comparison etc. I forget all problems when I visit the ashram or temple. You are like a resthouse.

He travels and again feels tired. So he says Oh Lord you approach me. I cannot move a step ahead. I give up and throw my hands up. $prapadyasva$ means you come to me. I have reached the end of my energy. May you reveal yourself unto me. $prabhahi$ means reveal. You bless me. Like the metal dipped in mercury may you make me like you. There was a $rasavada\ vidya$ in which they change base metal into gold. The process is through mercury. They take mercury and crystallise it. You cannot stop it. So they make it solid. Then they bring about some atomic change and make it gold. The process is costly than gold and so they don't do. It was popular. A metal through mercury, how it becomes mercury like. You make me yourself. $mayat$ is $pracurye$. The whole thing is symbolic. But the idea is give me strength. Through $japa$ one prayer and through $homa$ three prayers.

Why these mantras seeking wealth etc. $Medha$ is okay. $Sanakra$ clarifies. The desire for wealth is there in this knowledge section and it is meant for wealth only. Wealth is for rituals. Rituals are costly. $Dakshina$ you have to give. Materials you have to collect. Karma is for $papakshaya$. Why should you to eliminate papas. It is for knowledge to shine. $Smriti$ also says so. Knowledge is born in a person only when papa is eliminated. For papa karma neutralisation. Everyone is $misra$. Morning he is one mood and evening in another. Like on the surface of a mirror that is clean one sees oneself, so too $buddhi$ which is clean in that

one can know the self. $Buddhi$ is like mirror. $Prakhya$ means $tulya$. Equal to the surface of mirror.

In fourth $anuvaka$, four things were prayed for. $Medha$, wealth, $sishyas$ and $Aikya$. Intellectual arrogance $medha$ can bring. Wealth can cause pride that I have helped the society. Attachments can cause problem. Even he is asked to renounce guru and $sastram$ also after knowledge. Not the teaching. $Sambandha$ with $guru$, $sastra$ and $Isvara$ is broken by cutting the $sikha$. Even though $homa$ for all three including $aikyam$, yet for wealth only it is known. Now comes $vyahriti\ upasanam$.

FIFTH ANUVAKA BHASHYAM

व्याहृत्यात्म-ब्रह्म-उपासना

संबन्ध-भाष्यम्

३२) संहिता-विषयम् उपासनम् उक्तम्। तदनु मेधा-कामस्य श्री-कामस्य च मन्त्राः अनुक्रान्ताः। ते च पारम्पर्येण विद्योपयोगार्थाः एव। अनन्तरं व्याहृत्यात्मनः ब्रह्मणः अन्तरुपासनं स्वाराज्यफलं प्रस्तूयते।।

चतस्रः व्याहृतयः

३३) **भूर्भुवस्सुवः इति**। 'इति' इति उक्त-उपप्रदर्शनार्थः। 'एतास्तिस्रः' इति प्रदर्शितानां परामर्शार्थः। परामृष्टाः स्मार्यन्ते **'वै'** इत्यनेन। **तिस्रः एताः** प्रसिद्धाः **व्याहृतयः** स्मार्यन्ते तावत्। **तासाम्** इयं चतुर्थी व्याहृतिः 'महः' इति। ताम् **एतां चतुर्थीं** महाचमसस्य अपत्यं **माहाचमस्यः प्रवेदयते**। **'उ'**, **'ह'**, **'स्म'** इत्येतेषां वृत्तानुकथनार्थत्वात्, विदितवान् ददर्श इत्यर्थः। माहाचमस्य-ग्रहणम् आर्षानुस्मरणार्थम्। ऋष्यनुस्मरणमपि[१३५] उपासनाङ्गम् इति गम्यते, इहोपदेशात्।।

मह-इति व्याहृतेः अङ्गित्वम्

३४) येयं माहाचमस्येन दृष्टा व्याहृतिः **मह इति**, **तद् ब्रह्म**। महत् हि किल ब्रह्म। महष्ट[१३६] व्याहृतिः। किं पुनस्तत्? **स आत्मा**। आप्नोतेः व्याप्ति-कर्मणः आत्मा। इतराष्ट्र व्याहृतयो लोकाः, देवाः, वेदाः, प्राणाष्ट्र मह इत्यनेन व्याहृत्यात्मना आदित्य-चन्द्र-ब्रह्मान्नभूतेन व्याप्यन्ते यतः। अतः **अङ्गानि** अवयवाः **अन्याः देवताः**। देवता-ग्रहणम् उपलक्षणार्थं लोकादीनाम्। महः इत्येतस्य व्याहृत्यात्मनो देव-लोकादयः[१३७] सर्वे अवयवभूताः यतः, अतः[१३८] आह आदित्यादिभिः लोकादयो महीयन्ते इति। आत्मना हि अङ्गानि महीयन्ते। महनं वृद्धिः, उपचयः। **महीयन्ते** वर्धन्ते इत्यर्थः।

चतसृणां व्याहृतीनां प्रत्येकं चतुष्प्रकारत्वम्

३५) **अयं लोकः**, **अग्निः**, **ऋग्वेदः**, **प्राणः** इति प्रथमा व्याहृतिः **'भूः'**[१३९] **इति**। एवमुत्तरोत्तरा एकैका चतुर्धा भवति[१४०]। **'महः' इति ब्रह्म**। 'ब्रह्म' इति ओङ्कारः। शब्दाधिकारे अन्यस्य असम्भवात्। उक्तार्थमन्यत्।।

व्याहृतीनां चतुष्प्रकारत्वस्य पुनरुपदेशः उपासननियमार्थः

---

[135] पा.भे - ऋषिस्मरणमपि इत आनन्दाश्रमः।

[136] पा.भे - महती च इति।

[137] पा.भ - देवा लोकादयः इति।

[138] पा.भे - यतः आह इति आनन्दाश्रमः।

[139] पा.भे - अन्तरिक्षं वायुः सामानि अपानः इति द्वितीया व्याहृतिः भुवः। असौ लोकः आदित्यः यजूंषि व्यानः इति तृतीया व्याहृतिः सुवः। आदित्यः चन्द्रमाः ब्रह्म अन्नम् इति चतुर्थी व्याहृतिः महः इति एवम् इत्यधिकम्।

[140] पा.भे - एवमुत्तरा एकैकशः चतुर्धा भवन्ति इति।

३६) 'ता वा एताश्चतस्रश्चतुर्धा' इति। **ता वा एताः** भूः, भुवः, सुवः, महः - इति **चतस्रः** एकैकशः **चतुर्धा** चतुष्प्रकाराः। धा-शब्दः प्रकार-वचनः। **चतस्रश्चतस्रः** सत्यः चतुर्धा भवन्ति इत्यर्थः। तासां यथा-क्लृप्तानां पुनरुपदेशः तथैव उपासन-नियमार्थः।।

व्याहृत्युपासनम् एकमेव - वक्ष्यमाणानुवाकेन एकवाक्यत्वात्

३७) **ताः** यथोक्त-व्याहृतीः[141] **यो वेद, स वेद** विजानाति। किम्? **ब्रह्म**। ननु 'तद् ब्रह्म, स आत्मा' इति ज्ञाते ब्रह्मणि, न वक्तव्यम् अविज्ञातवत्, 'स वेद ब्रह्म' इति। न। तद्विशेष-विवक्षुत्वाद् अदोषः। सत्यं विज्ञातं चतुर्थ-व्याहृत्यात्मा 'ब्रह्म' इति। न तु तद्विशेषः, हृदयान्तरुपलभ्यत्वं मनोमयत्वादिष्ट 'शान्ति-समृद्धम्' इत्येवमन्तः विशेषण-विशेष[142]-रूपो धर्म-पूगो विज्ञायते[143] इति। तद्विवक्षु हि शास्त्रम् अविज्ञातमिव ब्रह्म मत्वा 'स वेद ब्रह्म' इत्याह। अतो न दोषः। यो हि वक्ष्यमाणेन धर्मपूगेन विशिष्टं ब्रह्म वेद, स वेद ब्रह्म इत्यभिप्रायः। अतो वक्ष्यमाणानुवाकेन एक-वाक्यता अस्य। उभयोर्हि अनुवाकयोः एकम् उपासनम्। लिङ्गाच्च। 'भूरित्यग्नौ प्रतितिष्ठति' इत्यादिकं लिङ्गम् उपासनैकत्वे। विधायकाभावाच्च। न हि 'वेद', 'उपासीत', इति वा[144] विधायकः कश्चित् शब्दोऽस्ति व्याहृत्यनुवाके। 'ता यो वेद' इति च वक्ष्यमाणार्थत्वाद् न उपासना-भेदकः। वक्ष्यमाणार्थत्वं च 'तद्विशेष-विवक्षुत्वात्' इत्यादिना उक्तम्।।

अङ्गोपासनाफलम्

३८) **सर्वे देवाः अस्मै** एवं-विदुषे अङ्ग-भूताः **आवहन्ति** आनयन्ति **बलिं** स्वाराज्य-प्राप्तौ सत्याम् इत्यर्थः।।

(इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषत्-शीक्षावल्ली-भाष्ये पञ्चमोऽनुवाकः)।।

---

[141] पा.भे - यथोक्ताः व्याहृतीः इति।

[142] पा.भे - विशेषण-विशेष्य-रूपः इति आनन्दाश्रमः।

[143] पा.भे - न तु तद्विशेषः - हृदयान्तरुपलभ्यत्वं मनोमयत्वादिष्ट। 'शान्ति-समृद्धम्' इत्येवमन्तः विशेषण-विशेष-रूपः धर्म-पूगो **न** विज्ञायते इति।

[144] पा.भे - 'वेद', 'उपासीतव्यः' इति, इति आनन्दाश्रमः। क्वचिद् वा इति नास्ति।

FIFTH ANUVAKA

व्याहृत्यात्मब्रह्मोपासना

भूर्भुवस्सुवरिति वा एतास्तिस्रो व्याहृतयः । तासामु ह स्मैतां चतुर्थीम्। माहाचमस्यः प्रवेदयते। महः इति । तद् ब्रह्म। स आत्मा। अङ्गान्यन्या देवताः ।

भूः भुवः सुवः इति - Bhuh, Bhuvah and Suvah - ; वै एताः - these are indeed; तिस्रः व्याहृतयः - the three vyahritis; तासाम् - among them; उ ह स्म - verily; एताम् चतुर्थीम् - the following fourth vyahriti; माहाचमस्यः - the sage Mahacamasya; प्रवेदयते - reveals; महः इति - which is Mahah; तद् ब्रह्म - that is to be meditated as Brahma; सः आत्मा - he is the Atma; अङ्गानि -are his limbs; अन्याः देवताः - all other gods.

Bhuh, Bhuvah and Suvah - these are indeed the three vyahritis. Verily, among them, the sage Mahacamasya reveals the following fourth vyahriti which is Mahah. That is to be meditated as Brahma. He is the Atma. All other gods are his limbs.

अनुवाकसंबन्धः

{विविधे कर्मणि आह्रियन्ते प्रयुज्यन्ते इति व्याहृतयः} (वृत्तानुवादपूर्वकम् उत्तरानुवाकद्वयतात्पर्यमाह - संहितेत्यादिना।) संहिताविषयम् उपासनमुक्तम्। तदनु मेधाकामस्य श्रीकामस्य च अनुक्रान्ताः मन्त्राः। (संहितोपासनं फलाभिसन्धिं विना अनुष्ठितं चित्तशुद्धिद्वारा विद्योपयोगार्थमिति सूचयति - ते च इति। च शब्दः अप्यर्थः, संहितोपासनवत् तेऽपि इत्यर्थः) ते च पारम्पर्येण विद्या-उपयोगार्थाः एव। अनन्तरं व्याहृत्यात्मनः ब्रह्मणः अन्तरुपासनं (व्याहृतीनां श्रद्धागृहीतत्वात् तत्परित्यागेन उपदिश्यमानं ब्रह्म न बुद्धिमारोहति । अतो व्याहृतिशरीरस्य ब्रह्मणो हृदयान्तर् उपासनम् उपदिश्यते इत्यर्थः।) (आ.गिरि - व्याहृतीनां[१४५] श्रद्धागृहीतत्वात् तत्परित्यागेन उपदिश्यमानं ब्रह्म न बुद्धिमारोहेदिति ततो व्याहृतिशरीरं हिरण्यगर्भाख्यं ब्रह्म अन्तर्हृदये ध्येयत्वेन उपदिश्यन्ते इत्यर्थः) स्वाराज्यफलं प्रस्तूयते।

The meditation with reference to conjunction has been stated. Thereafter the mantras for one who desires intelligence and wealth have been given in that order. They are also indirectly useful in gaining knowledge. Then the internal meditation on Brahman as identified with the vyahritis is being begun now. which has for its result the attainment of sovereignty.

After *siksha*, *samhita upasana* was told. A *upasana* in which *sandhi* is *vishaya* was given. Thereafter, mantras for one who is interested in *medha* and wealth were enumerated /mentioned. They are said as useful for knowledge, not directly, but indirectly. The *parampara* was told. Then now *vyahriti upasana* is being told. It gives the result of your becoming the king of yourself, one's own kingdom. *Brahman (Hiranyagarbha - samashti-*

[१४५] तद् ब्रह्म। स आत्मा। अङ्गान्यन्या देवताः इत्येतन्न तावत् सर्वं ब्रह्म इतिवद् बाधायां सामानाधिकरण्यमपि तु मनो ब्रह्म इत्यादिवद् अध्यास एव इति विवक्षन्नाह - व्याहृतीनामित्यादि । यद्वा वयाहृतीः परित्यज्य शब्दान्तरेषु उपदिश्यमानं इत्यर्थः बोध्यः। (गोविन्दानन्द)

sukshma-sarira-abhimani/avacchinna caitanyam, same awareness conditioned by the total *sukshma sarira*. *Isvara* at that level is called *Hiranyagarbha*) in the form of *vyahriti* - is meditated upon. It is *antarupasanam*. So mental. Previously *japa*, *uccaranam* (*vakkarma*). Then *kaya - homa*. Now mental *japa*. All three are here. Three types of prayer. *prastuyate* is *arabhyate*.

व्याहृतिपरिगणनम्

(तात्पर्यमुक्त्वा अक्षरव्याख्यानाय प्रतीकमादत्ते - भूर्भुवस्सुवरिति)। भूर्भुवस्सुवरिति। इति इति उक्तप्रदर्शनार्थः (वाक्यविन्यासः इति शेषः। उक्तस्य वेदेषु प्रसिद्धस्य व्याहृतित्रयस्य इत्यर्थः - गोविन्दानन्द।) (भूर्भुवस्सुवरिति वाक्येन उक्तानां व्यहृतीनां पाठक्रमलब्ध-क्रम-अनुवादार्थः श्रुतौ इति शब्दः इत्यर्थः)। एतास्तिस्रो इति प्रदर्शितानां (प्रदर्शितक्रमोपेतानां व्याहृतीनां स्वरूपानुवादार्थः "एतास्तिस्रः व्याहृतयः" इति शब्दः इत्यर्थः) परामर्शार्थः। (ननु क्रमतः स्वरूपतः च ताः किमर्थं परामृश्यन्ते तत्राह - परामृष्टाः इति।) परामृष्टाः स्मार्यन्ते वै इत्यनेन। (स्मृतिं विवृणोति - तिस्रः इति) तिस्रः एताः प्रसिद्धाः व्याहृतयः स्मार्यन्ते तावत्। (तावत् शब्दः प्राथम्यार्थः। कर्मकाण्डे कर्माङ्गत्वेन प्रसिद्धव्याहृतयः इह प्रथमं स्मर्यन्ते वै-शब्देन, तासु क्रमेण उपासनविधानार्थमित्यर्थः।) तासाम् इयं चतुर्थी व्याहृतिः मह इति। ताम् एतां चतुर्थीं महाचमसस्य (सोमपानार्थं महांश्चमसो यस्य स महाचमसः इति वेदभाष्यकाराः) अपत्यं (गोत्रापत्यमित्यर्थः। तथा च वार्त्तिके दर्शितम् - महोचमसगोत्रत्वाद् गोत्रार्थस्तद्धितो भवेत्।) माहाचमस्यः प्रवेदयते। (प्रवेदयते इति लटः भूतार्थत्वेन व्याख्याने हेतुमाह - उ ह स्म इति) उ ह स्म इत्येषां वृत्त-अनुकथनार्थत्वात् विदितवान् (ऋषेः चतुर्थव्याहृतिविषयकं वेदनं योगप्रभावजनितं प्रत्यक्षमेव इति मत्वा आह - ददर्श इति) ददर्श इत्यर्थः {प्रवेदयते स्म ह इति ददर्श इत्यर्थकः}। माहाचमस्यग्रहणम् आर्ष-अनुस्मरणार्थम् (ऋषिसम्बन्ध्यनुस्मरणम् आर्षम्। तस्य अनुस्मरणस्य कर्त्तव्यताद्योतनार्थम् इत्यर्थः)। (ननु तस्य उपासनाङ्गत्वे सति कर्तव्यता सिध्यति, तदेव कुतः इति - तत्राह - ऋष्यनुस्मरणमिति।) ऋष्यनुस्मरणमपि उपासनाङ्गमिति गम्यते इह उपदेशात् (उपासनप्रकरणे ऋषेः { माहाचमस्य इति } संकीर्त्तनाद् इत्यर्थः। उत्तरत्र उपदेक्ष्यमाणायाः गतेरपि चिन्तनम् उपासनाङ्गत्वेन कर्त्तव्यम् इह उपदेश-अविशेषाद् इति अपेः अर्थः)।

> The word iti is to draw attention to what was stated earlier (viz. the three vyahritis). And the words etah tisrah, too, are to call up to memory the ones that have been drawn to attention. By the word vai, what has been called up to memory are made to be remembered. Thus the well known three vyahritis are reminded in this manner. Of them, this is the fourth vyahriti called Mahah. Mahacamasya, the son of Mahacamasa knows this fourth vyahriti. The word knows has to be understood as knew, i.e., visualised because the particles u, ha, sma are meant to narrate what had taken place. The mention of Mahacamasya is to remember the seer with gratitutde. From this it is known that remembrance of the seer is a part of the meditation.

THE WELL-KNOWN THREE VYAHRITIS AND THE FOURTH ONE

We get this *vyahriti upasana* here. It is called so because in this *upasana*, *vyahriti* mantras are taken as *alambanam*. The teacher will introduce as *bhuh* etc. The deity of *upasana* is not *vyahriti*. It is only symbol. The deity is *Hiranyagarbha*. From that standpoint, it will be only called *Hiranyagarbha upasanam*. *Alambanam* is a perceptual symbol, visible to the eyes. The deity is invisible. The name is either after symbol or deity. Like in *samhita upasana*, it is also named after *alambanam*. The deity there also is only *Hiranyagarbha* (all *loka* etc put together). Here the difference is only in *alambanam*.

Samhitalambanaka HG *Upasanam* there. Here *vyahriti-alambanaka* HG *Upasanam*. If named after deity, then both will be same *upasanam* and we cannot distinguish.

Vyahriti means what? *Brahmaji* before creation, uttered these words. *Vyahru* means to utter. *Brahmana eva pura ya vyahrita sa. hru* means to take away. *vyahrati papan iti*. That which completely takes away all papas, robber is *vyahriti.* In *sandhi* it is *va*. If you split then *vai*. These are well known in *karma kanda*. In *prokshanam* we say ... *Gayatri* begins with *Om* and *vyahriti*. (though not part of *Gayatri*). So it is well known to you, the teacher says. To these three, a fourth was added by *Mahacamasyah*.

Anuvaka five and six form one *upasana* together. *Vyahriti* is the *pratika*. *Vyaharanam* means *uccaranam*. *Vyahriti* is something meant for *uccaranam*. Like *Om*. *Vyahriti* is single syllable. They are the essence of the *lokas. Bhuh, bhuvah* and *svah* are the 3 *vyahritis* covering the entire creation. *Svah* is that which covers the unseen. You deliberately see something on something else. If you see deliberately it is not error. You superimpose a big thing on a small thing. Then you relate to that. In *upasana*, which is visualisation and mental, two things are there. 1) on what you visualise and 2) what you visualise. *Bhuh* is looked upon as the entire world, *agni* etc. One more *vyahriti* is brought in. That is *mahah* and it is fourth and it is seen by *mahacamasya*. *Mahah* becomes the main and everything else becomes *anga* of it. Trunk of this physical body is *angi*. Hands, legs etc. are *anga*. All are connected to the body. Similarly *mahah* and other *vyahritis*. As you repeat the *vyahritis*, you see in them what is asked to be superimposed on them. One who meditates as told here, he becomes everything, he is identified with this whole order. It is *hiranyagarbha upasana*. Even *devas* offer him oblations instead of himself doing to them. he gains all his desires fulfilled. It is for *ekagrata* of mind and recognising *Isvara* in the form of the universe. This is something to be practised.

To introduce this *upasana*, what is the *pratika* is to be told. The place where you meditate upon is *pratika*. It is the three syllables. Which are *prasiddha*. The word *iti* in the *sruti* is to conclude what is said. In order to show these are the *vyahritis*, *iti* is used. *Etah* = these three. What was already said is brought to your memory by *etah*. What is repeated is remembered by *vai*. They are going to be loaded by Sruti. So recollected. *pravedayate sma*. So it becomes past. Particles indicate what has gone before. Of these *vyahritis*, *maha* is fourth. *Mahacamasya aptyam - gotrapatyam*. He is born in the family of *mahacamas*. Big laddle, spoon. He had a big *camas* in the *somayaga* for drinking the balance soma juice. He, doing *yagas* all the time, was having this ladle only all the time in his hand and so also *Mahacamas*. So he was called. He saw this *vyahriti* (we have to take past tense) because it had happened before as indicated by the particles. God revealed through him. It was not his *kapola kalpita*. Every mantra has *rishi*, *chandas* and *devata*. They have to be remembered. It is *upasananga* also. It is part of the *upasana*. One who sees is called *rishi*. In his mind this *maha vyahriti* occurred. The mention of *rishi's* name is to remember him. Because remembering is an *anga* of *upasanam*.

मह इति व्याहृतेः प्राधान्यम्

येयं माहाचमस्येन दृष्टा व्याहृतिः मह इति तत् ब्रह्म [HG] (तच्चतुर्थव्याहृतिस्वरूपं ब्रह्मेति चिन्तयेद् इत्यर्थः)। (इतरव्याहृतित्यागेन चतुर्थव्याहृतिस्वरूपे ब्रह्मदृष्टिविधाने नियामकमाह - महद्धि इति। {ब्रह्मशब्दस्य वृद्ध्यर्थकः बृहिधातोः उत्पन्नत्वाद् महत्ववक्तृत्वम्, व्याहृतेः महः इति अभिधानादेव} महत्वं व्यापकत्वम्। तच्च ब्रह्मणः श्रुतिषु प्रसिद्धमिति द्योतनार्थौ हि किल इति निपातौ। चतुर्थव्याहृतेः इतरव्याहृत्यपेक्षया व्यापकत्वं वक्ष्यति। तथा च व्यापकत्वसाम्येन चतुर्थव्याहृतिस्वरूपे ब्रह्मदृष्टिविधिरिति भावः।) महद्धि किल ब्रह्म। महती च व्याहृतिः (चतुर्थव्याहृतेः व्यापकत्वं निरूपयितुं पृच्छति - किं पुनस्तद् इति। मह इति व्याहृतिस्वरूपं ब्रह्म इत्युक्तम्। तद्व्याहृतिस्वरूपं पुनरपि किं कीदृशमित्यक्षरार्थः। अत्र उत्तरं स आत्मा इति श्रुतिः। विधेयापेक्षया पुंलिङ्गनिर्देशः। स चतुर्थव्याहृतिस्वरूपम् आत्मा, इतरव्याहृत्यपेक्षया व्यापकम् इत्यर्थः।) किं पुनस्तत्? स आत्मा। (ननु चेतने रूढस्य आत्मशब्दस्य कथं व्यापकत्वमर्थः। योगेन इत्याह - आप्नोतेः इति। व्याप्तिः कर्म क्रिया अर्थः यस्य, ततश्च व्याप्तिवाचकाद् आप्नोतेः सकाशाद् निष्पन्नः अयमात्मशब्दः व्यापकत्वबोधकः इत्यर्थः।) आप्नोतेः व्याप्तिकर्मणः आत्मा (सच्चिदानन्द - आप्लृ व्याप्तौ इति धातोः व्युत्पन्नत्वाद् आत्मशब्दस्य, व्यापकत्वाद् आत्मा मह इत्यर्थः)। (मह इति व्याहृतेः आत्मश्रुत्युक्तम् इतरव्याहृत्यपेक्षया व्यापकत्वम् उपपादयति - इतराश्च इत्यादिना यतः अतः इत्यन्तेन।) इतराश्च (च शब्दः अवधारणे) व्याहृतयः (ननु आदित्यादीनां लोकादिषु एव व्याप्तिः, न व्याहृतिषु अनुपलम्भात् ततश्च कथम् आदित्यचन्द्रब्रह्मान्नभूतेन मह इत्यनेन इतरा व्याहृतयः व्याप्यन्ते इत्याशङ्क्य तासामादित्यादिव्याप्यता-सिद्ध्यर्थम् लोकाद्यात्मकतामाह - लोकाः देवाः वेदाः प्राणाश्च इति। इतरव्याहृतयः लोकदेववेदप्राणात्मिका इत्यक्षरार्थः। तासामित्थं लोकाद्यात्मकत्वं श्रूयते। भूरिति वा अयं लोकः। भुव इत्यन्तरिक्षम्। सुवरित्यसौ लोकः। भूरिति वा अग्निः। भुव इति वायुः। सुवरित्यादित्यः। भूरिति वा ऋचः। भुव इति सामानि। सुवरिति यजूंषि। भूरिति वै प्राणः। भुव इत्यपानः। सुवरिति व्यानः इति।) लोकाः देवाः वेदाः प्राणाश्च मह इत्यनेन व्याहृत्यात्मना (ननु इतरव्याहृतयः मह इत्यनेन व्याप्यन्ते इत्युक्तम्। इतरव्याहृतिषु मह इत्यस्य अक्षर-अनुवृत्तेः अदर्षनाद् इत्याशङ्क्य आह - आदित्यचन्द्रब्रह्मान्नभूतेन इति । मह इति व्याहृत्यात्मनः आदित्यादिभूतत्वम् इत्थं श्रूयते - मह इत्यादित्यः। मह इति चन्द्रमाः। मह इति ब्रह्म। मह इत्यन्नम् इति। मह इति ब्रह्म इत्यत्र ब्रह्म ओङ्कारः इति वक्ष्यति।) आदित्यचन्द्रब्रह्मान्नभूतेन व्याप्यन्ते यतः अतः (इत्थम् स आत्मा इति वाक्यं व्याख्याय अनन्तर-वाक्यमादत्ते - अङ्गानि इति) अङ्गानि अवयवाः अन्या देवताः। (ननु अन्या व्याहृतयः यथा देवतारूपत्वेन श्रुताः तथा लोकादिरूपत्वेनापि श्रुताः। ततश्च कथम् अग्न्यादि-देवतारूपाणामेव तासामङ्गत्ववचनम्। तत्राह - देवताग्रहणमिति। देवतापदमजहल्लक्षणया लोकादीनामपि ज्ञापनार्थम्। अतो नोक्तदोषः इत्यर्थः।) देवता-ग्रहणम् उपलक्षणार्थं लोकादीनाम् (लोकदेववेदप्राणानाम्)।

> The vyahriti that was seen by Mahacamasya as Mahah is Brahman. For, Brahman is, indeed. mahat, great and the vyahriti also is mahah, great. What is it again? It is the self, the word atma having been derived from the root ap which has its meaning of pervading. For, the other vyahritis representing the worlds, gods, the Vedas and the pranas, are pervaded by the self in the form of Mahovyahriti that represents the sun, the moon, the Atharva Veda and food. Hence the other gods are the limbs The mention of the word gods is to suggestive of the other factors also such as worlds.

MEDITATION ON THE UTTERANCES

Now the *upasana* is introduced with some information. If we take the body, it has many limbs. All these limbs put together is the whole body. The whole is called *angi*. Parts are called *angas*. There is part-whole relationship between the two. Which is superior? *Angi* is superior. Because it is whole and it gives life to every *anga*. Without *angi*, *anga* cannot survive. *Angi* is always only one. If one or more *angas* are not there, still *angi* exists. *Angi* is

present in and through all *angas*. *Anga* is not present everywhere. When I say I, I refers to *angi*. Leg if somebody touches and asks who is this, it is I. In any part I am. It is called *mahah* or Brahman because it is great, superior. It is called *atma*, because it pervades all *angas*. Three *vyahritis* are *anga* and *maha* is *angi*. In this fashion we have to do *upasana*. In 3 syllables, *anga devatas* have to be meditated upon and in *maha* main *devata* to be meditated. Like this, four sub-*upasanas* are there. So 16 *devatas* are going to be involved. So that *maha vyahriti* is Brahman.

What is that *maha*? It is Brahman, great, *Hiranyagarbha*. In *upasanam* only *sagunam* Brahman. HG is *angi* because he consists of all *devatas*. That *maha* is *atma*, as it pervades all *angas* as *angi*. If *maha* is *angi*, the 3 syllables are *angas* and they represent other *devatas*. If you don't see, you become *maharshi*. Brahman is *mahat* and *Vyahriti* also *mahati*. So *maha* is Brahman. It is main thing. *Atma* means *angi*. It is not *cetana atma*. *Apnoteh vyaptikarmanah atma*. This is *atma*. It is from the root *aap* which has the sense of *vyapaka*, which pervades. Karma means here meaning. That which is main, which pervades all *angas* is *atma*. All other *vyahritis* - *vayhritis* which were presented as *lokas*, *devatas*, Vedas and *pranas* - are pervaded by this *maha vyahriti* which is pervader of the others. *Maha* is presented like that as pervader of the worlds, gods etc. viz. as sun, moon, Brahman and food. *Devata grahanam* by *sruti* in *anya devatah* is *upalakshana* for Vedas, worlds and *prana*. Only second is *devata*. So we have to take other three also. Because all of them are also limbs. Whatever three *vyahritis* stand for, they are part of that standing for *maha*. Stomach is in trunk. All important thing is here only. Control tower is top. All four *pranavritti* is in trunk only *Udana* for death only. All limbs are sustained by the trunk. It is *maha* because by that the limbs grow.

Summary: *Vyahriti*: meaning (3)

Name: ----*alambanam* (on what) & Deity (what) [HG] -*Isvara* at that level

Antar Upasanam: Visualization (practice) *japa* / *homa* / *dhyana* All 3 types here

Phalam : *Svarajya* / *ekagrata* & Recognition of the order

Mahah: Superiority (superior things superimposed) Brahma (Name *maha* also indicates)

Pervasive. Because *Atma*.

Upasanam on 4 vyahritis 3+1 (16 devatas) Illustration of Body and limbs.

भूरिति वा अयं लोकः । भुव इत्यन्तरिक्षम्। सुवरित्यसौ लोकः। मह इत्यादित्यः । आदित्येन वाव सर्वे लोका महीयन्ते ।

भूः वै - Bhuh; अयं लोकः इति - is to be meditated as this world i.e., earth; भुवः - Bhuvah; अन्तरिक्षम् इति - is to be meditated as the intermediary world; सुवः - Suvah; असौ लोकः इति - is to be meditated as the other world, heaven; महः - Mahah; आदित्यः इति - is to be meditated as the sun; आदित्येन वाव - by the sun alone; सर्वे लोकाः - all the worlds; महीयन्ते - are glorified.

Bhuh is to be meditated as this world i.e., earth. Bhuvah is to be meditated as the intermediary world. Suvah is to be meditated as the other world, heaven. Mahah is to be meditated as the sun. By the sun alone all the worlds are glorified.

मणिप्रभा

भूरिति। भूः इत्याकारिका व्याहृतिः वै प्रसिद्धः अयं लोकः प्रत्यक्षगोचरः पृथिवीलोकः। भुव इति भुव इत्याकारिका व्याहृतिः अन्तरिक्षम् अन्तरिक्षलोकः। सुवरिति सुव इत्याकारिका व्याहृतिः असौ लोकः शास्त्रप्रसिद्धः द्युलोकः। मह इति मह इत्याकारिका व्याहृतिः आदित्यः सूर्यः आदित्येन वाव प्रसिद्धेन सर्वे लोका पृथिवीलोक-अन्तरिक्षलोक-द्युलोकाः प्रकाशिताः सन्तः महीयन्त प्राणिनां व्यवहारक्षमत्व-लक्षणां वृद्धिं प्राप्नुवन्ति। तस्मान् मह इति व्याहृतेः आदित्यरूपत्वं युक्तम्।

MEDITATION ON THE UTTERANCES AS WORLDS

The four topics of *upasanam* are now presented. *Adhilokam, adhidevam, adhivedam* and *adhipranam*. The *vyahritis* are loaded. Each one will have four *devatas*. 16 put together is HG. We meditate upon these *devatas* only and not on HG. On *Bhu* this world is superimposed and mediated upon. On *bhuvah* - intermediary space where demigods dwell. On *suvar*, that world, the heavens. Far away means *svargaloka*, by implication. (including *Brahmaloka*). On *maha*, the *suryaloka*. Why *maha* is sun. Because all the three worlds are glorious only because of sun. They are sustained by sun. The teacher is justifying the word *maha*. *Aditya* alone deserves to be *maha*. The three worlds receive glory and so they are *anga*. By this *upasana*, the mind which is used to dwell upon in narrow things like myself, my body, my family etc. expands to appreciate the world that is - अत्यन्तकुशलशिल्पिभिः अपिदुर्निर्माणम् - केन, मनसापि अचिन्त्यरचनारूपम् - सूत्र.भा. - and in front of that my small problems become insignificant.

भूरिति वा अग्निः । भुव इति वायुः । सुवरित्यादित्यः । मह इति चन्द्रमाः। चन्द्रमसा वाव सर्वाणि ज्योतींषि महीयन्ते ।

भूः वै - Bhuh; अग्निः इति - is to be meditated as the god of the fire; भुवः - Bhuvah; वायुः इति - is to be meditated as the god of the air; सुवः - Suvah; आदित्यः इति - is to be meditated as the god of the sun; महः - Mahah; चन्द्रमाः इति - is to be meditated as the god of the moon; चन्द्रमसा वाव - by the moon-god alone; सर्वाणि ज्योतींषि - all these luminaries; महीयन्ते - are glorified.

> Bhuh is to be meditated as the god of the fire. Bhuvah is to be meditated as the god of the air. Suvah is to be meditated as god of the sun. Mahah is to be meditated as the god of the moon. By the moon god alone all these luminaries are glorified.

मणिप्रभा

भूरिति भूः इत्याकारिका व्याहृतिः वै प्रसिद्धः अग्निः इयमग्निदेवता। भुव इति भुव इत्याकारिका व्याहृतिः वायुः अन्तरिक्षे स्थितः वायुदेवता। सुवरिति सुव इत्याकारिका व्याहृतिः आदित्यः सर्वलोकप्रकाशकः सूर्यदेवता। मह इति मह इत्याकारिका व्याहृतिः चन्द्रमाः चन्द्रदेवता। चन्द्रमसा SÉxpäùhÉ सर्वाणि ज्योतींषि अग्नि-वायु-आदित्य-देवतारूपाणि निखिलानि महीयन्ते वर्धन्ते। वायौ ज्योतिःशब्दप्रयोगस्तु अजहल्लक्षणया बोध्यः। वावशब्देन चन्द्रकलापानेन तेषां वृद्धिः प्रथमां पिबते वह्निः इत्यादिशास्त्रप्रसिद्धा इति स्मारयते।

MEDITATION ON THE UTTERANCES AS GODS

In *bhu*, fire *devata*, (because it is near in *bhuloka*.) In *bhuvah, vayu devata* (because *vayu* moves about there, slightly farther.) In *suvar, aditya devata*. On *maha*, the deity of moon. Because of moon alone, all other *devatas*/luminary. *Mahiyante* here means *sobhante*. With full moon in the sky all others become beautiful. *Vayu* is not luminary but by majority view it is also luminary. *Vayu* by *ajahallakshanaya* or *jahallakshanaya* means all stars. Because *Vayu*, the gas being cause for all luminaries. *Vayoh agni*. Perceptually, it is moon that gets glorified by sun. *Surya* is *devata* of sun. Moon is *devata* of mind. Mind is supported by eyes or mind by eye? So from the *devata* angle, moon is superior.

भूरिति वा ऋचः । भुव इति सामानि । सुवरिति यजूंषि । मह इति ब्रह्म । ब्रह्मणा वाव सर्वे वेदा महीयन्ते ।

भूः वै - Bhuh; ऋचः इति - is to be meditated as Rgveda; भुवः - Bhuvah; सामानि इति - is to be meditated as Samaveda; सुवः - Suvah; यजूंषि इति - is to be meditated as Yajurveda; महः - Mahah; ब्रह्म इति - is to be meditated as Omkara; ब्रह्मणा वाव - by Omkara alone; सर्वे वेदाः - all the Vedas; महीयन्ते - are glorified.

Bhuh is to be meditated as Rgveda. Bhuvah is to be meditated as Samaveda. Suvah is to be meditated as Yajurveda. Mahah is to be meditated as Omkara. By Omkara alone all the Vedas are glorified.

मणिप्रभा

भूरिति भूः इत्याकारिका व्याहृतिः वै प्रसिद्धाः ऋचः ऋग्वेदीयाः पादबद्धमन्त्राः। भुव इति भुव इत्याकारिका व्याहृतिः सामानि सामवेदीयगीतिसहिताः ऋचः। सुवरिति सुव इत्याकारिका व्याहृतिः यजूंषि यजुर्वेदीया अविवक्षितच्छन्दस्काः मन्त्राः। मह इति मह इत्याकारिका व्याहृतिः ब्रह्म प्रणवः। "भूरिति वा ऋचः" इत्यादि-वेदावयव-भूत-शब्द-सन्निधाने मुख्यार्थ-ग्रहणायोगात्, चतुर्थ-व्याहृतौ पूर्वमेव मुख्य-ब्रह्म-दृष्टेः उक्तत्वेन पुनरुक्ति-प्रसङ्गाच्च। ब्रह्मणा प्रणवेन वाव सर्वे निखिलाः वेदाः ऋगादयः महीयन्ते वर्धन्ते। वेदवृद्धेः प्रणव-उच्चारण-पूर्वक-अध्ययन-अधीनत्वात्। तथा च अष्टम-अनुवाके वक्ष्यति ओमिति ब्राह्मणः प्रवक्ष्यन्नाह इति।

MEDITATION ON THE UTTERANCES AS THE VEDAS

On *bhu Rgveda*. On *bhuvah Samaveda* and on *suvar Yajurveda*. So we accept this order because Sruti gives. On *maha* Brahman, the *Omkara*. Other meanings of Brahman will not fit in. If *angas* are *sabdatmaka*, then *angi* also must be *sabdatmaka*. *Sabdarupam* Brahma is *Omkara*. So we have to take Brahman as *omkara*, as it is given in *sabda-adhikara*. In the next section it is said, *brahmana*+ All the three Vedas are glorified because of Brahman. *Omkara* being the essence of Vedas, it pervades them. It has to be chanted before and at the end of chanting Vedas. Later we will see it is so glorious, that if a person learns Vedas, after the chanting of *Omkara*, he will study the Vedas completely. *Omiti brahmanah*+ . So *om uccharanam* is so great that he can easily study Vedas. It is therefore very important mantra. *Omkara* is *angi* and Vedas are *angas*. So it pervades all Vedas, the *angas*. It is directly said so in the *sruti*. And so *angi*. Like butter pervades all over the milk giving essence to the milk. If *angas* are *lokas*, *angi* also is *loka*. If *angas* are *devatas*, *angi* also *devata*.

भूरिति वै प्राणः। भुव इत्यपानः । सुवरिति व्यानः । मह इत्यन्नम्। अन्नेन वाव सर्वे प्राणा महीयन्ते ।

भूः वै - Bhuh; प्राणः इति - is to be meditated as Prana; भुवः - Bhuvah; अपानः इति - is to be meditated as Apana; सुवः - Suvah; व्यानः इति - is to be meditated as Vyana; महः - Mahah; अन्नम् इति - is to be meditated as food; अन्नेन वाव - by food alone; सर्वे प्राणाः- all the organic functions; महीयन्ते - are glorified.

Bhuh is to be meditated as Prana. Bhuvah is to be meditated as Apana. Suvah is to be meditated as Vyana. Mahah is to be meditated as food. By food alone all the physilogical functions are glorified.

मणिप्रभा

भूरिति भूः इत्याकारिका व्याहृतिः वै प्रसिद्धः प्राणः मुखनासिकाभ्यां प्राग्गमनवान् वायुः। भुव इति भुव इत्याकारिका व्याहृतिः अपानः अर्वाग्गमनवान् वायुः। सुवरिति सुव इत्याकारिका व्याहृतिः व्यानः नानाविधगतिमान् वायुः। मह इति मह इत्याकारिका व्याहृतिः अन्नं व्रीहियवादिलक्षणम् अन्नेन भुक्तेन उक्तान्नेन वाव प्रसिद्धाः सर्वे प्राणाः प्राणापानव्यानरूपाः महीयन्ते तर्प्यन्ते वर्धन्ते। एतत् प्रसिद्धं लोके। श्रुतिरप्याह - शुष्यन्ति वै प्राणाः ऋतेऽन्नादि इति।

MEDITATION ON THE UTTERANCES AS LIFE-BREATHS

The fourth is *adhipranam*. On *Bhu prana* is to be meditated upon. *Bhuva* is *apana*. *Suvar* is *vyana*. *Maha* is *annam*. *Angi* is *maha*. It is *annam* because by food alone all these *pranas* are glorified, become powerful. If we do not eat, we will know very well. *Angi* has two-fold important. One is glorious, greater than *anga* in status and the second it pervades the *angas*. *Annam* is greater as well as it pervades the *pranas* as energy. They are *anna sakti* alone converted into *prana* etc. Brahma word is used because it is superior and *atma* because of pervasion. Sun is superior and it pervades all the worlds. Moon is superior and mental power pervades all senses. Similarly *om* is superior and pervades. This is *sarvatma upasana*.

चतसृणां व्याहृतीनां प्रत्येकं चतुष्प्रकारत्वम्

(लोकाद्युपलक्षणे कृते सति फलितम् अङ्गान्यन्या देवताः इति वाक्यार्थं दर्शयति - मह इत्येतस्य इत्यादिना इति इत्यन्तेन) मह इत्येतस्य व्याहृत्यात्मनो देवा लोकादयश्च सर्वे अवयवभूताः। यतः आह आदित्यादिभिः लोकादयो महीयन्ते इति (अत्र इति शब्दः अतः इत्यर्थे, यतः इति उपक्रमात् । तथा च यतः आदित्यादिभिः लोकादयो महीयन्ते अतः सर्वे देवा लोकादयश्च मह इत्येतस्य व्याहृत्यात्मनो अवयवभूताः इति योजना।)। (अत्र दृष्टान्तमाह - आत्मना इति) आत्मना ह्यङ्गानि महीयन्ते (प्रसिद्धशरीरस्य मध्यभागः अत्र आत्मशब्दार्थः। तेन हस्तपादाद्यङ्गानि महीयन्ते। शरीरमध्यभागगत-अन्नादिना अङ्गानां वृद्धिः प्रसिद्धा इति हि-शब्दार्थः। अयं भावः - यथा देवदत्तस्य मध्यमभागं प्रति पादादीनि अङ्गानि मध्यमभाग-अधीन-वृद्धिभाक्त्वात्, मध्यमभागश्च अङ्गी तद्वृद्धिहेतुत्वात्। तथा लोकाद्यात्मिका इतर व्याहृतयः पादादिरूप-अङ्गाणि, आदित्यात्मकं चतुर्थव्याहृतिस्वरूपम् अङ्गी इति कल्प्यते। मह इत्यस्य आदित्याद्यात्मना इतरवृद्धिहेतुत्वेन वृद्धिहेतुत्वसाम्यात्, इतरव्याहृतीनां च लोकाद्यात्मना तदधीनवृद्धिभाक्त्वेन प्रसिद्ध-अङ्गवद् वृद्धिभाक्त्वसाम्यात्। तत्रापि प्रथमा व्याहृतिः पादौ, द्वितीया बाहू, तृतीया शिर इति विभागः। तथा च व्याहृतिचतुष्टयं मिलित्वा शरीरं संपद्यते। तस्मिन् व्याहृतिमये शरीरे यदङ्गित्वेन

कल्पितं चतुर्थव्याहृतिस्वरूपं तत्र तद्ब्रह्म इति वाक्येन ब्रह्मदृष्टिः विहिता। तथा च वक्ष्यति - मह इत्यङ्गानि ब्रह्मणि इति। आदित्यादीनां च लोकादिवृद्धिहेतुत्वम् इत्थं श्रूयते - आदित्येन वाव सर्वे लोका महीयन्ते। चन्द्रमसा वाव सर्वाणि ज्योतींषि महीयन्ते। ब्रह्मणा वाव सर्वे वेदा महीयन्तेअन्नेन वाव सर्वे प्राणा महीयन्ते इति। अयमर्थः लोकास्तावद् आदित्येन प्रकाशिताः सन्तः प्राणिनां व्यवहार्यत्वलक्षणां वृद्धिं प्राप्नुवन्ति। अग्नि-वाय्वादित्य-देवतारूपाणि ज्योतींषि चन्द्रमसा वर्धन्ते इत्येतत् प्रथमां पिबते वह्निः इत्यादिशास्त्रसिद्धम्। चन्द्रकलापानेन तेषां वृद्धेः आवश्यिकत्वात्। ब्रह्मणा प्रणवेन सर्वे वेदाः वर्धन्ते वेदवृद्धेः प्रणवपूर्वक-अध्ययन-अधीनत्वात्। तथा च वक्ष्यति ओमिति ब्राह्मणः प्रवक्ष्यन्नाह इति। अन्नेन प्राणी वर्धन्ते इत्येतत् प्रसिद्धम्। श्रुतिश्च अत्र भवति शुष्यति वै प्राणः ऋतेऽन्नात् इति। महनं वृद्धिः उपचयः। महीयन्ते वर्धन्ते इत्यर्थः। (भूरिति वा अयं लोकः इत्यादौ एकैका व्याहृतिः चतुष्प्रकारा ज्ञातव्या इति तात्पर्यमाह - अयं लोकः इत्यादिना) अयं लोकः अग्निः ऋग्वेदः प्राणः इति प्रथमा व्याहृतिः भूरिति (चतुर्धा भवति इति शेषः)। एवमुत्तरा एकैकशः चतुर्धा भवन्ति (अन्तरिक्षं वायुः सामानयपानः इति द्वितीया व्याहृतिः भुव इति। सुवर्लोक आदित्यो यजूंषि व्यान इति तृतीया व्याहृतिः सुवरिति। आदित्यश्चन्द्रमा ओङ्कारोऽन्नमिति चतुर्थी व्याहृतिः मह इति। एवमेता उत्तरा व्याहृतयः प्रत्येकं चतुर्धा भवन्ति इत्यर्थः) मह इति ब्रह्म। (मह इति ब्रह्म इत्यत्र ब्रह्मशब्दस्य मुख्यार्थपरत्वं वारयति - ब्रह्म इति ओङ्कारः इति) ब्रह्म इति ओङ्कारः (भूरिति वा ऋचः इत्यादिना वेदावयवभूतशब्दसंनिधाने मुख्यार्थग्रहण-अयोगात्, चतुर्थव्याहृतौ पूर्वमेव मुख्यब्रह्मदृष्टेः उक्तत्वेन पौनरुक्त्य-प्रसङ्गाच्च इत्यपि द्रष्टव्यम्।) शब्दाधिकारे अन्यस्य असम्भवात्। उक्तार्थमन्यत्। (आदित्यादिभिः लोकादयो महीयन्ते इत्यादिना इति शेषः)।

> Since the others, viz., the gods, the worlds, etc., are the limbs of the Self in the form of vyahriti called Mahah, therefore the Sruti says that the world etc. shine in glory by the sun etc. just as the limbs flourish through the trunk of the body, i.e.,. the self . The word mahanam means growth, development. Hence mahiyante means they grow. This world, fire Rgveda and Prana - these are the first vyahriti bhuh. Similarly, each of the succeeding ones becomes fourfold. Mahah is Brahman. Brahman here means Omkara, for this being a context of words, any other meaning is not tenable.The remaining portion is already explained.

The teacher concludes the *upasana* here.

ता वा एताश्चतस्रश्चतुर्धा । चतस्रश्चतस्रो व्याहृतयः । ता यो वेद । स वेद ब्रह्म । सर्वेऽस्मै देवा बलिमावहन्ति ।

ताः वै एताः चतस्रः - thus these four (vyahritis); चतुर्धा - are meditated in four different ways; चतस्रः चतस्रः व्याहृतयः - and four-fold vyahritis are there (in each meditation); ताः - these four vyahritis; यः वेद सः - he who knows and meditates on; वेद ब्रह्म - will know Brahma (Hiranygarbha); सर्वे देवाः - and all gods; अस्मै - to this meditator; बलिम् आवहन्ति - will bring offerings.

> Thus these four vyahritis are meditated in four different ways and four-fold vyahritis are thre in each meditation. The one who knows and meditates on these four vyahritis will know Brahma and all gods will bring offerings to this meditator.

मणिप्रभा

ताः प्रकृताः वै प्रसिद्धाः एताः भूर्भुवस्सुवर्महर्लक्षणाः चतस्रः चतुःसंख्याकाः चतुर्धा एकैका चतुःप्रकारा सती चतस्रश्चतस्रो व्याहृतयः। (यदा चिन्त्यते तदा षोडसकलःपुरुषः उपासितो भवति इति शेषः) ताः उक्तप्रकाराः व्याहृतीः यः वेद उपास्ते सः व्याहृत्युपासकः ब्रह्म वेद जानाति। अस्मै व्याहृत्युपासकाय सर्वे निखिलाः देवाः अङ्गभूताः लोकाद्यभिमानिनः बलिम् उपहारं आवहन्ति प्रापयन्ति उपहारसमर्पणेन पूजां कुर्वन्ति इत्यर्थः।

चतसृणां व्याहृतीनां प्रत्येकं चतुष्प्रकारत्वम्

ता वा एताश्चतस्रश्चतुर्धा इति (चतुरनडुहोरामुदात्तः चत्वारः पुं । त्रिचतुरोः तिसृ चतसृ स्त्रियाम् अचि र ऋतः चतस्रः। चतुरनडुहोराम् चत्वारि - नपुं)। ता वै एताः[१४६] भूर्भुवस्सुवर्महः इति चतस्रः एकैकशः चतुर्धा चतुःप्रकाराः। धा-शब्दः प्रकारवचनः। (धा-शब्दस्य प्रकारवचनत्वे सति चतस्रश्चतुर्धा इति वाक्यस्य फलितमर्थं क्रिया-अध्याहारपूर्वकं दर्शयति - चतस्रश्चतस्रः सत्यः इति। स्वरूपेण चतस्रः व्याहृतयः द्रष्टव्यलोकादिभेदेन प्रत्येकं चतस्रः सत्यः इत्यर्थः) चतस्रश्चतस्रः सत्यः चतुर्धा भवन्ति इत्यर्थः। (ननु व्याहृतिषु प्रत्येकं पदार्थ-चतुष्टयदृष्टिवाक्येभ्यः एव तासां प्रत्येकं चतुर्धात्वक्लृप्तिसिद्धेः चतस्रश्चतुर्धा इति वाक्यं पुनरुक्तमिति। न इत्याह - तासां इति)। तासां यथाक्लृप्तानां पुनरुपदेशः (गोविन्दानन्द - ता वा एताः इत्यादिः) तथैव उपासन-नियमार्थः (भूरिति वा अयं लोकः इत्यादिवचनानां व्याहृतिस्तुतिपरत्वशङ्कानिरासेन तथैव उपासनकर्त्तव्यता-आवश्यिकत्व-द्योतनार्थः इत्यर्थः। चतस्रश्चतस्रो व्याहृतयः इति वाक्यं तु निरूपितानां तासाम् उपसंहारार्थमिति भावः)।

> These four vyahritis are four-fold. Each one of them is of four kinds. The suffix dha indicates mode., i.e., they becoming a group of four individually, become fourfold again. The purpose of repeating the teaching of these that have already been said, is to regulate their meditation in that particular order.

VYAHRITIS REPRESENT PURUSHA IN HIS 16 PHASES

The *vyahritis* that have been mentioned (those these, what were mentioned they have brought to comprehension) these four, each one of them become fourfold. Why? *Dha pratyaya* is to indicate the *prakara*, ways, meaning. *Dha* is also division. Each one of them being fourfold each, thus becomes fourfold. In the context of *loka* etc. the same *bhu* is meditated upon in four ways. Thus four *vyahritis*. Why this repetition that the *vyahritis* are meditated in four fold ways and in each four *vyahriti iti*? There is a significance. For enjoining meditation. Not here some *stuti*. *Maha* you take and it has four *upasanas*. It is *angi* and three *angas* each having four *upasanas* each. The repetition is to mention that in that same order the visualisation is to be done. We cannot interchange the *vyahritis* and *devata* in any way. Neither the order of *vyahritis* nor the *devatas*. In *karmakanda*, it is not available for change. *vacanat pravrittih* and *vacanat nivrittih*. Why and why not is allowed in *janna-kanda* but not in *karma-kanda*. The reason is because they give invisible result. You don't know what will happen if you change. So better obey. When I don't know the mechanism of working a medicine, the best thing is to implicitly obey. If you know the working, you can change. It is *adrshta-vishayam*. In *jnana-kanda*, it is *drshtam*. All *kosas*,

[१४६] एकैका व्याहृतयः यदा चतुष्प्रकाराः चिन्त्यन्ते तदा षोडशकलः पुरुषः उपासितः भवति इत्यभिप्रेत्य संक्षेपमाह - ता वा इति (आ.गिरि) । प्रश्नोपनिषदि उक्तानां प्राणादिषोडशकलानाम् इह व्याहृतिषु ध्येयत्वेन उक्तेषु लोकादिषु अन्तर्भावसंभवादिति भावः । (गोविन्दानन्द) - प्रश्न ६.४ प्राण, श्रद्धा, खं, वायु, ज्योति, आपः, पञ्चथिवी, इन्द्रियं, मनः, अन्नम्, वीर्यं, तपः, मन्त्राः, कर्म, लोकाः, नाम इति शोडशकलाः

avasthas etc are all seen matter. So *upasana* is defined as *yathasastram*. (The repetition is intended to impress that each *vyahiriti* should be contemplated in its four aspects so that the contemplation may comprehend the *purusha* in his 16 phases - AG)

व्याहृत्युपासनं वक्ष्यमाणविशेषणसहितम् एकमेव

ताः यथोक्ताः व्याहृतीः यः वेद स वेद विजानाति। किम्?। ब्रह्म । (ज्ञातस्य ब्रह्मणः पुनर्ज्ञानोपदेशे पौनरुक्त्यं स्यादिति शङ्कते - ननु इति।) ननु "तद् (महः) ब्रह्म स आत्मा" इति ज्ञाते ब्रह्मणि न वक्तव्यम् अविज्ञातवत् "स वेद ब्रह्म" इति। (तद्ब्रह्मेति वाक्ये ब्रह्ममात्रमवगतं न तु तद्गुणजातम्, स वेद ब्रह्म इति वाक्ये तु वक्ष्यमाणगुणविशिष्टत्वेन ज्ञातव्यत्वमुपदिश्यते । तथा च वक्ष्यमाणगुणविशिष्टत्वेन पूर्वमज्ञातत्वाद् न पौनरुक्त्यम् इति परिहरति - न इति। न च वक्ष्यमाणगुणानामपि वक्ष्यमाण-अनुवाकेनैव अवगन्तुं शक्यत्वाद् इदं वचनं व्यर्थमेव स्यादिति वाच्यम्। एतदनुवाक-अवगते चतुर्थव्याहृत्यात्मके ब्रह्मणि वक्ष्यमाण-गुणवत्व-अवगमस्य एतद्-वचन-अधीनत्वेन वैयर्थ्य-अप्रसक्तेः इति भावः) । न। तद्विशेषविवक्षुत्वाद् अदोषः। (सङ्ग्रहं विवृणोति - सत्यम् इत्यादिना) सत्यम्, विज्ञातं चतुर्थव्याहृत्यात्मा ब्रह्मेति। न तु तद्विशेषः, (न तु तद्विशेषो विज्ञायते इति सम्बन्धः। तस्य ब्रह्मणो विशेषमेव विवृणोति - हृदयान्तरित्यादिना। योऽयमुत्तर-अनुवाक-उपक्रमे दर्शितः हृदयान्तरुपलभ्यमानत्व-मनोमयत्व-आदि-हिरण्मयत्वान्तः गुणपूगः यश्च तदुपसंहारे प्रदर्शितः आकाश-शरीरत्वादि-शान्तिसमृद्धमित्येवमन्तः धर्मपूगः स न ज्ञायते इत्यर्थः। विशेषणविशेष्यरूपः इत्यत्र विशेष्यपदम् अविवक्षितार्थम्। अत एव धर्मपूगस्य विशेषणत्वमात्रमेव वक्ष्यति - धर्मपूगेन इति । यद्वा अत्र विशेषणानां पाठक्रम-अनुसारेण क्रमविशिष्टतया चिन्तनमभिप्रेत्य विशेषणविशेष्यरूप्त्वमुक्तम्। तच्च पूर्वापरीभूतत्वरूपम्। अत एव इति प्राचीनयोग्य इत्यत्र इति-शब्देन प्रकारवाचिना क्रमविशिष्टतया एव गुणानाम् उपासनं प्रतीयते इति बोध्यम्।)। हृदयान्तरुपलभ्यत्व-मनोमयत्वादिः शान्तिसमृद्धमित्येवमन्तः विशेषणविशेष्यरूपः धर्मपूगः विज्ञायते इति। (ननु तद् ब्रह्म स आत्मा इत्यत्र अस्तु तद्विशेष-अज्ञानम्, ततः किम्, तत्राह - तद्विवक्षु इति) तद्विवक्षु हि शास्त्रम् अविज्ञातमिव ब्रह्म मत्वा "स वेद ब्रह्म" इत्याह। अतो न दोषः। (एवं पौनरुक्त्यदोषं परिहृत्य स वेद ब्रह्म इति वाक्यस्य अर्थं कथयति - यो हि इति) यो हि वक्ष्यमाणेन धर्मपूगेन विशिष्टं ब्रह्म वेद स वेद ब्रह्म इत्यभिप्रायः। (ननु लोकादि-दृष्टिपरिगृहीत-व्याहृतिशरीर-ब्रह्मोपासन-विधायकस्य अनुवाकस्य वक्ष्यमाणेन अनुवाकेन एकवाक्यतां विना कथं तत्रत्य गुणानाम् अत्र अन्वयः इत्याशङ्क्य वक्ष्यमाण-गुण-आकर्षकात् स वेद ब्रह्म इति वाक्यादेव अनयोरेकवाक्यत्वं कल्प्यते इत्याशयेन आह - अतः इति) अतो वक्ष्यमाण-अनुवाकेन एकवाक्यता अस्य। (ननु अनुवाकद्वये उपासनैक्यं विना कथमेकवाक्यत्वम्, अर्थैक्य-निबन्धनत्वादेकवाक्यतायाः इत्याशङ्क्य तदपि वक्ष्यमाण-गुण-आकर्षक-वाक्यबलादेव कल्प्यते इत्याशयेन आह - उभयोरिति।) उभयोः ह्यनुवाकयोरेकम् उपासनम्। लिङ्गाच्च[१४७] । (लिङ्गाच्च उपासनमेकमेव इत्युक्तमेव विवृणोति - भूरित्यग्नौ इति। व्याहृत्यनुवाक-उक्तानाम् अग्न्यादि-दृष्टीनां वक्ष्यमाण-अनुवाके फल-कथन-लिङ्गाद् व्याहृति-शरीर-ब्रह्मोपासनम् उभयत्र एकमिति गम्यते।) "भूरित्यग्नौ प्रतितिष्ठति" इत्यादिकं लिङ्गम् उपासनैकत्वे (आ.गरि - यदि व्याहृत्यवयवमेव ब्रह्म उत्तरत्र उपास्यते तदैव उपासकस्य प्रथमव्याहृत्यात्मके अग्नौ प्रतिष्ठाभिधानं घटेत। तस्माद्

[१४७] अङ्ग-प्रधान-संबन्धबोधको विधिः विनियोगविधिः । एतस्यविधे- सहकारिभूतानि षट्प्रमाणानि। शब्दसामर्थ्यं लिङ्गम् सामर्थ्यं रूढिरेव। One of the 6 pramanas used in viniyoga sruti, linga (rudhi), vakya, prakarana, sthana and samakhya (yaugika) . Words are rudha (Gauh - samudaya saktya arthapratipadakah), yaugika (pacakah - avayavasaktya+) and yaugikarudha Girija or saroja - by both). Their samarthya is by abhidha, lakshana and vyanjana. A hamlet on the Ganga has all 3. Four steps in linga. Svabhidheya-pratipadanam, samarthya-nirupanam, srutikalpana and anga-bodhakatvam vakyasya. (Mimamsa - Sutra-Bhashya-tika of Bhatta : slokavarttikam(1.1.) , Tantravarttikam(1.2 to 3rd ch) and Tuptika (rest)

व्याहृत्यात्मकदेवताप्राप्त्यभिधानम् उपासनैकत्वे लिङ्गम्)। विधायकाभावाच्च (उपासन-भेदक-विध्यभावाद् इत्यर्थः। तमेव विवृणोति - न हि इति)। न हि "वेद", "उपासीत", इति वा विधायकः कश्चिच्छब्दः अस्ति[१४८] व्याहृत्यनुवाके । (ननु व्याहृत्यनुवाकस्थः ता यो वेद इति विधिरेव तद्भेदकोस्तु, न इत्याह - ता यो वेद इति तु इति । इति शब्दः वेदेति विधिं परामृशति। तथा च "ता यो वेद" इति अयं विधिः नोपासनाभेदकः इति योजना। अयं भावः - "ता यो वेद" इत्यत्र व्याहृतिशरीरस्य ब्रह्मणः प्रधानविद्याविधिः उत्तरानुवाके गुणविधिः इति प्रकारेण उपासनैक्येपि "ता यो वेद" इति विधिसंभवात् न तस्य विद्याभेदकत्वम् इति। "ता यो वेद" इति तु (ननु तर्हि स वेद ब्रह्म इति विधिः भेदकोस्तु, नेत्याह - वक्ष्यमाणार्थत्वादिति। स वेद ब्रह्म इति वाक्यं व्याहृत्यनुवाकस्थे ब्रह्मोपासने वक्ष्यमाण-गुण-आकर्षणार्थत्वात् न विद्या-ऐक्य-विरोधि, किं तु तदनुकूलमेव इत्यर्थः।) वक्ष्यमाणार्थत्वाद् [it refers to what is to come next] न उपासना-भेदकः[१४९]। (हेत्वसिद्धिं पूर्वोक्तार्थ-स्मारणेन निराचष्टे - वक्ष्यमाणार्थत्वम् इति) वक्ष्यमाणार्थत्वं च (आ.गिरि - स वेद ब्रह्म इति ब्रह्मवेदनं फलत्वेन न सङ्कीर्त्यते अधिकारविधिवाक्ये[१५०]। किन्तु वक्ष्यमाण-अनुवाकेन अस्मिन्नेव ब्रह्मोपासने गुणविधानं भविष्यति इति सूचयितुम् - ब्रह्मवेदनं संकीर्त्यते इति पूर्वेण अन्वयः इत्याह - तद्विशेषविवक्षुत्वादिति) "तद्विशेष-विवक्षुत्वाद्" इत्यादिना उक्तम्।

He who knows the vyahritis in said manner, knows. Knows what? Brahman.
Objection: When Brahman is known already from the statement "That is Brahman. That is the self" that fact should not have been mentioned again as "he knows Brahman" as if it remains unknown still.
Answer: There is no defect, since the purpose here is to explain certain more attributes regarding Brahman. It is true that Brahman has been known in the form of the fourth vyahriti viz., Maha, but the additional attributes regarding its availability within the heart and its manomayatva that are being explained through the relationship of substance and attributes in the mantra that ends with abounding in peace (1.6.2) are not known. Hence, in order to explain these, the Sruti says "he knows Brahman", presuming as though Brahman is not known. Hence there is no defect. The idea is that he who knows Brahman qualified by the host of attributes to be mentioned later, indeed knows it. Therefore, this anuvaka is linked with the succeeding anuvaka on the basis of the unity of the subject matter, for in both the chapters the topic is but one meditation.
And this becomes evident from the indication also, for the statement "He becomes established in fire as the vyahriti Bhuh (1.6.1) goes to show the unity of *upasana* in both the anuvakas. And it could be seen as such from the absence of any vidhi, for there is no such word having the force of vidhi as veda, or upasitavya in this section. The expression "he who knows these", in the anuvaka on vyahriti implying something to be stated later, does not divide the upasana into two. That there is something to be stated later is mentioned by the words, "it is intended to state certain special attributes (regarding brahman) etc

ONENESS OF MEDITATION OF THIS ANUVAKA AND THE NEXT ANUVAKA

One who knows these *vyahritis* as stated as representing the 16 *devatas* he knows Brahman, HG. If I know *vyashti devatas*, it is as good as knowing the *samasti* HG. Already

[१४८] उत्तरानुवाके तु इति प्राचीनयोग्योपास्स्व इति विधिरस्ति (सच्चिदानन्द)

[१४९] ता यो वेद स वेद ब्रह्म इति न विधिः । किन्तु वक्ष्यमाणगुणकब्रह्मपरामर्शकः । न च अत्र अन्यः विधायकः शब्दः अस्ति (सच्चिदानन्द)

[१५०] सर्वेस्मै इति फलस्वाम्यबोधकत्वादस्य अधिकारविधित्वम्। (गोविन्दानन्द) । फलसंबन्धबोधकविधिः अधिकारविधिः । यथा स्वर्गकामो यजेत इति ।

Brahman is known as in which form it is to be meditated. So what else he is going to learn. There are lot of attributes intended to be said in the next section. Those also he knows. He will know HG completely. What is known here is *maha*, the fourth *vyahriti* is Brahman. What will be stated are: that *purusha*, HG, is knowable in the space in the heart, he is *manomaya* etc. Therefore, *sastra* desiring to talk about that says so (taking it as unknown). Therefore both *anuvaka* talk about same *upasanam*. **Ekavakyata means one subject matter.** It is technical term. The second one is incomplete without this. There is *linga* also for this. **Linga is indication.** This is *mimamsa*, typical. To find if two *upasana* or one, we have to see *linga* etc. Since *phala* is mentioned therefore there is doubt. *Vidhi vakya* is not there in this *anuvaka* as you should do this *upasanam*. (The *phalam* also is not very clearly mentioned.). We find that in the next *anuvaka*, the incompleteness of this section is taken care of. *Vidhi* also is clearly there and *phalam*. So both are one *upasanam* to be done together.

अङ्गोपासनाफलम्

सर्वे देवाः अस्मै एवं विदुषे अङ्गभूताः आवहन्ति आनयन्ति बलिम् (विदुषे देवाः कदा बलिं प्रयच्छन्ति इत्याकाङ्क्षायां स्वाराज्यप्राप्त्यवक्तरमित्याशयेन आह - स्वाराज्य इति। स्वयमेव राजा स्वराट् तस्य भावः स्वाराज्यम्। अङ्गदेवताधिपतित्वमिति यावत्। तत्प्राप्त्यनन्तरमेव अङ्गदेवताभिर् बल्युपहरणमुचितम्। अत एव अर्थक्रमानुसारेण सर्वेस्मै देवा इति वाक्यम् आप्नोति स्वाराज्यम् इति वाक्यानन्तरं पठनीयम्। एतच्च अग्रे स्फुटं वक्ष्यति - स्वयमेव राजा अधिपतिः भवति अङ्गभूतानां देवतानां यथा ब्रह्म देवाश्च सर्वे बलिमावहन्ति इति। एतेन अनुवाकयोः पृथक्फलश्रवणाद् उपासनभेदः इति शङ्कापि निरस्ता भवति फलभेदश्रवणस्य एव असिद्धेः इति।) स्वाराज्यप्राप्तौ सत्यामित्यर्थः[१५१] (अत्र भूरादिव्याहृतिषु लोक,देव,वेद,प्राणदृष्टयः चोद्यन्ते इदं च उपासनं षष्ठानुवाकोक्त-ब्रह्मोपासनस्य अङ्गभूतम् अत एव उपासकस्य सकलदेवपूज्यत्वम् उपपद्यते यथाश्रुते प्रतीकोपासकानां ब्रह्मलोक-अभावात् तदुपपत्तेः - सायण)।

To him who knows thus, all the gods that are the limbs pay tributes, on the gain of self-sovereignty by him.

THE RESULT OF UPASANA

What does he get? The detailed result will be pointed out later as *hiranyagarbha-prapti*, oneness with HG. Here it is mentioned in brief, indirectly. Because HG is *samasti*, *vyasti devatas* will certainly worship HG. *Surya* for eyes only. HG for whole subtle body. *Devatamayi*. So it means you will become HG, adorable to all *devatas*. We turn the table. You were offering to *devatas*. Now they offer oblations to you. Raja beginning to pay tributes to you. *svayameva raja svarat. tasya bahvah.* self-appointed *raja. Raja* to himself. That is what is required. It is very interesting way of ruling. You can sit under the tree and say I am raja. All the *devas* who were in the form of *angas* bring oblations. It is praise. When he has gained the *svarajya*, it happens.

There is an objection here that Vedanta sutra 4.3.15 says *Brahmopasana* independent of symbol will give the result of *Brahmaloka*. How can *vyahrityatmaka brahmaupasana* will give this result? The answer is when this *upasana* is done, he also does *brahmopasana* as taught in the next lesson which is primary one.

---

[१५१] आप्नोति स्वाराज्यम् इति उत्तरत्र पठिष्यते अहमस्मि महः इति व्याहृत्यात्मकं ब्रह्म, मदङ्गानि देवादयः इचि यो वेद तस्य एतत्फलमित्यर्थः । (सच्चिदानन्द)

SIXTH ANUVAKA BHASHYAM

मह-व्याहृत्यात्मक-ब्रह्मणः उपासना-स्थानम्, विशेषणानि, प्राप्ति-मार्गः च

सम्बन्धभाष्य

३९) भूर्भुवःसुवःस्वरूपाः महः इत्येतस्य व्याहृत्यात्मनो[१५२] ब्रह्मणः अङ्गानि अन्या देवता इत्युक्तम्। यस्य ताः अङ्गभूताः, तस्य एतस्य ब्रह्मणः साक्षाद् उपलब्ध्यर्थम् उपासनार्थं च हृदयाकाशः स्थानम् उच्यते, शालग्रामः इव विष्णोः। तस्मिन् हि तद्ब्रह्म उपास्यमानं मनोमयत्वादि-धर्म-विशिष्टं साक्षाद् उपलभ्यते, पाणौ इव आमलकम्। मार्गष्ट्र सर्वात्म-भाव-प्रतिपत्तये वक्तव्यः इत्यनुवाकः आरभ्यते।।

मह-व्याहृत्यात्मनः ब्रह्मणः उपलब्धिस्थानम् विशेषणानि च

४०) 'सः' इति व्युत्क्रम्य 'अयं पुरुषः' इत्यनेन संबध्यते। **य एषः अन्तर्हृदये** हृदयस्यान्तः। हृदयमिति पुण्डरीकाकारः, मांस-पिण्डः, प्राणायतनः, अनेक-नाडी-सुषिरः, ऊर्ध्व-नालः, अधोमुखः, विशस्यमाने पशौ प्रसिद्धः उपलभ्यते। तस्य अन्तः य एषः **आकाशः** प्रसिद्धः एव करकाकाशवत्। **तस्मिन्** सः **अयं पुरुषः**। पुरि शयनात्। पूर्णाः वा भूरादयो लोकाः येन, इति पुरुषः। **मनोमयः** मनः विज्ञानम्। मनुतेः ज्ञान-कर्मणः। तन्मयः तत्प्रायः[१५३] तदुपलभ्यत्वात्। मनुते अनेन इति वा मनः अन्तःकरणम्। तदभिमानी तन्मयः। तल्लिङ्गो वा। **अमृतः** अमरण-धर्मा। **हिरण्मयः** ज्योतिर्मयः।।

उपासकस्य ब्रह्मप्राप्ति-मार्गः

४१) तस्य एवं-लक्षणस्य हृदयाकाशे साक्षात्कृतस्य विदुषः आत्मभूतस्य इन्द्रस्य ईदृश-स्वरूप-प्रतिपत्तये[१५४] मार्गः अभिधीयते। हृदयाद् ऊर्ध्वं प्रवृत्ता सुषुम्ना नाम नाडी योग-शास्त्रेषु च प्रसिद्धा। सा च **अन्तरेण** मध्ये **तालुके**[१५५] तालुकयोः गता। **यः** च **एषः** तालुकयोर्मध्ये **स्तन इव अवलम्बते** मांस-खण्डः तस्य च अन्तरेण इत्येतत्। **यत्र** च **असौ केशान्तः**[१५६] केशानाम् अन्तः अवसानं मूलं केशान्तः। विवर्त्तते विभागेन वर्त्तते। मूर्ध-प्रदेशः इत्यर्थः। तं देशं प्राप्य[१५७] तत्र विनिःसृता। **व्यपोह्य** विभज्य, विदार्य **शीर्षकपाले** शिरः-कपाले विनिर्गता या **सा इन्द्रयोनिः**। इन्द्रस्य ब्रह्मणो योनिः मार्गः। स्वरूप-प्रतिपत्ति-द्वारम् इत्यर्थः।।

उपासना-फलम्

४२) तया एवं विद्वान् मनोमयात्मदर्शी मूर्ध्नो विनिष्क्रम्य अस्य लोकस्य अधिष्ठाता **भूरिति** व्याहृति-रूपो योऽग्निः महतो ब्रह्मणोऽङ्गभूतः, तस्मिन् **अग्नौ प्रतितिष्ठति**। अग्न्यात्मना इमं

---

[152] पा.भे - हिरण्यगर्भस्य व्याहृत्यात्मनः इति।

[153] पा.भे - तन्मयः तदुपलभ्यत्वात् इति आनन्दाश्रमः।

[154] पा.भेद - आत्म-भूतस्य ईश्वररूपस्य प्रतिपत्तये इति। आत्म-भूतस्य इन्द्रस्य इन्द्ररूपस्य ब्रह्मणः स्वरूपप्रतिपत्तये इति वा।

[155] पा.भेद - प्रसिद्धे तालुके इति।

[156] पा.भेद - यत्र च केशान्तः इति आनन्दाश्रमः।

[157] पा.भेद - तं देशं प्राप्य तेनान्तरेण व्यपोह्य इति।

लोकं व्याप्नोति इत्यर्थः। तथा **भुव इति** द्वितीय-व्याहृत्यात्मनि **वायौ**। 'प्रतितिष्ठति' इत्यनुवर्त्तते। **सुवरिति** तृतीय-व्याहृत्यात्मनि **आदित्ये**। **मह इति** अङ्गिनि चतुर्थ-व्याहृत्यात्मनि **ब्रह्मणि** प्रतितिष्ठति इति। तेषु आत्मभावेन स्थित्वा **आप्नोति** ब्रह्म-भूतः[158] **स्वाराज्यं** स्वराड्-भावम्। स्वयमेव राजा अधिपतिः भवति, अङ्गभूतानां देवानां यथा ब्रह्म। देवाश्च सर्वे अस्मै अङ्गिने बलिम्[159] आवहन्ति अङ्गभूताः, यथा ब्रह्मणे। **आप्नोति मनसस्पतिम्**। सर्वेषां हि मनसां पतिः। सर्वात्मकत्वाद् ब्रह्मणः। सर्वैः हि मनोभिः तद् मनुते। तदाप्नोत्येवं विद्वान्। किञ्च, **वाक्पतिः** सर्वासां वाचां पतिर्भवति। तथैव **चक्षुष्पतिः** चक्षुषां पतिः। **श्रोत्रपतिः** श्रोत्राणां च पतिः। **विज्ञानपतिः** विज्ञानानां च पतिः। सर्वात्मकत्वात् सर्वप्राणिनां करणैः तद्वान् भवति इत्यर्थः।।

मह-व्याहृत्यात्मनः ब्रह्मणः विशेषणान्तराणि

४३) किञ्च, **ततः** अपि अधिकतरम् **एतद् भवति**। किं तत्? उच्यते। **आकाश-शरीरम्**। आकाशः शरीरमस्य, आकाशवद्वा सूक्ष्मं शरीरमस्य इति आकाश-शरीरम्। किं तत्? प्रकृतं **ब्रह्म**। **सत्यात्म** सत्यं मूर्तामूर्तम्, अवितथं स्वरूपं च आत्मा स्वभावः अस्य तदिदं सत्यात्म। **प्राणारामं** प्राणेषु आरामः आरमणम् आक्रीडा यस्य तत् प्राणारामम्। प्राणानां वा आरामो यस्मिन् तत् प्राणारामम्। **मन-आनन्दम्** आनन्द-भूतं सुखकृदेव यस्य मनः तद् मन-आनन्दम्। **शान्ति-समृद्धं** शान्तिः उपशमः, शान्तिश्च तत्समृद्धं च शान्ति-समृद्धम्। शान्त्या वा समृद्धवद् उपलभ्यते[160] इति शान्ति-समृद्धम्। **अमृतम्** अमरणधर्मि। एतच्च अधिकतरं विशेषणं तत्रैव 'मनोमयः' इत्यादौ द्रष्टव्यम्।।

उपासनोपदेशविधिः उपसंहारश्च

४४) **इति** एवं मनोमयत्वादिधर्मैः विशिष्टं यथोक्तं ब्रह्म हे **प्राचीनयोग्य उपास्स्व** इति आचार्य-वचनोक्तिः आदरार्था। उक्तस्तु उपासन-शब्दार्थः[161]।।

(इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषत्-शीक्षावल्ली-भाष्ये षष्ठोऽनुवाकः)।।

---

158 पा.भे - ब्रह्म-भूतम् इति।

159 पा.भे - अस्मै बलिम् इति आनन्दाश्रमः।

160 पा.भे - समृद्धं तत् उपलभ्यते इति आनन्दाश्रमः।

161 पा.भे - उक्तस्तु उपासन-शब्दार्थः इत्येतन्नास्ति आनन्दाश्रमे।

SIXTH ANUVAKA

महोब्रह्मोपासने स्थानादि

स य एषोऽन्तर्हृदय आकाशः। तस्मिन्नयं पुरुषो मनोमयः। अमृतो हिरण्मयः।

सः - that; यः एषः - this; अन्तर्हृदयः - within the heart; आकाशः - space; तस्मिन् - in that locus; अयम् पुरुषः - this purusha, Hiranyagarbha (is to be meditated); मनोमयः - who is the total mind; अमृतः - who is eternal; हिरण्मयः - who is effulgent.

That eternal and effulgent Hiranyagarbha who is the total mind (is to be meditated) in thatl locus which is the space within the heart.

मणिप्रभा

हृदयपुण्डरीकस्य मध्ये स्वाङ्गुष्ठपरिमितः आकाशः वर्त्तते, स एष इत्येताभ्यां दूरसामीप्यवाचिभ्यां व्यवहितयोगशास्त्रप्रसिद्धः सन्निहितश्रुत्यन्तरप्रसिद्धः च उच्यते। ईदृशः यः हृदये पुण्डरीक-आकार-मांसपिण्डे ऊर्ध्वनाले अधोमुखे अन्तः अन्तर्वर्त्तमानः आकाशः दहराकाशः स्वाङ्गुष्ठपरिमितः आकाशः इत्यर्थः। तस्मिन्नाकाशे तद्ब्रह्म स आत्मा इत्यनेन पूर्वं परोक्षतया उक्तस्य आत्मनः अपरोक्षवाचक-अयं-शब्देन साक्षात्कारयोग्यता-अभिधानाद् अयं अहंप्रत्ययगोचरः पुरुषः शरीरात्मक-पुरि शयनात् पुरुषः भूरादयो लोकाः पूर्णाः येन इति वा पुरुषः परमात्मा। वर्त्तते इत्यध्याहारेण संबन्धः। यद्यपि असौ सर्वत्र वर्त्तते तथापि तस्य उपलब्ध्यर्थम् उपासनार्थं च हृदयस्थानम् उपदिश्यते। तमेव विशिनष्टि - मनोमयः मननं मनः ज्ञानं तन्मयः ज्ञानप्रायः। अमृतः नाशरहितः हिरण्मयः ज्योतिर्मयः स्वप्रकाशस्वरूपः इत्यर्थः।

सम्बन्धभाष्य

(वृत्तानुवादपूर्वकमुत्तरानुवाकतात्पर्यमाह - भूर्भुवरित्यादिना । मह इति व्याहृत्यपेक्षया अन्या भूर्भुवःसुवःस्वरूपा व्याहृतयः देवतादिरूपाः चतुर्थव्याहृत्यात्मकस्य ब्रह्मणोऽङ्गानि इत्युक्तमित्यर्थः।) भूर्भुवःसुवःस्वरूपा मह इत्येतस्य व्याहृत्यात्मनो ब्रह्मणोऽङ्गान्यन्या देवता (देवलोकादयः) इत्युक्तम्। यस्य (ब्रह्मणः) ताः (व्याहृतयः) अङ्गभूताः तस्य एतस्य (स इति तच्छब्देन अस्मिन् अनुवाके समाकृष्टस्य इत्यर्थः। पुरुषपदापेक्षया स इति पुल्लिङ्गनिर्देशः इति न तद्विरोधः। उपासनार्थं साक्षादुपलब्ध्यर्थं च इत्यर्थक्रमः उपासनाफलत्वात् साक्षात्कारस्य।) ब्रह्मणः साक्षादुपलब्ध्यर्थम् (सच्चिदानन्द - साक्षात्करणार्थम्। अहमयमेव इति तद्भावापन्नस्य हि उपासना-फलम्। सू.भा ३.३.५९) (where you direclty experience) उपासनार्थं च हृदयाकाशः स्थानमुच्यते, (उपासनार्थं स्थानविशेष-उपदेशे दृष्टान्तमाह - सालग्राम इति) सालग्राम इव विष्णोः (सर्वव्यापकस्य)। (साक्षादुपलब्ध्यर्थमित्युक्तं प्रपञ्चयति - तस्मिन् हि) तस्मिन् हि (उपासकानाम् इदं प्रसिद्धमिति द्योतनार्थो हि-शब्दः) तद्ब्रह्म उपास्यमानं मनोमयत्वादिधर्मविशिष्टं साक्षादुपलभ्यते, पाणाविव आमलकम्। मार्गश्च (सच्चिदानन्द - उपासनास्थानवद् उपास्यविशेषणवच्च मार्गश्च वक्तव्यः यस्मात् तदनुशीलनेन तेनैव मार्गेण

प्रतिष्ठते उपास्यदेवताप्राप्तये । सू.भा ४.२.१७) सर्वात्मभाव-(मनोमयत्वादिगुणकब्रह्मभाव)-प्रतिपत्तये[१६२] (प्राप्तये) वक्तव्यः इत्यनुवाकः आरभ्यते।

> It was said that the vyahritis, bhuh, bhuvah and suvah representing other deities are the limbs of Brahman as identified with the vyahriti called mahah. Now, just as Salagrama, a stone symbol, serves as locus for Vishnu, a place viz., space in the heart is presented for the purpose of direct gaining of and meditation on Brahman for whom those vyahritis are limbs, There indeed, when Brahman is meditated upon characterised by the attributes such as "having the form of thoughts" etc, is directly realised like a myrobalan fruit in one's palm. Moreover, the path for gaining the sate of universal self has to be said. Keeping all this in view, the next chapter is begun.

In this section also the *upasana* is going to be HG *upasana* with the attributes of HG described here. In all of them HG alone is meditated upon. The methodology differs. We did not directly meditate on HG but meditated on 20 *devatas*, totally put together is HG. In *Vyahriti upasana* also, it was HG in 16 forms. Put together is HG. *Alambanam* differed in both. Here also we are getting HG *upasana* in a different method. *Alambanam* is going to be different. Space of the heart is *alamabanam*. *Devata* is HG only We can say it is *hridayalambana* HG *Upasana*.

This *upasana* is of higher grade also. Because, the *alambanam* were outside. Here it is heart itself. That is my own heart which is closer to me. Ultimately, our knowledge is I am god. If that should come, I should practise the *upasana* of I am god. Thus I am HG is an *upasana* closer to *aham brahmasmi*. When *sivalinga* is seen as god, the *samskara* is Lord is other than me. They are all *dvaita samskara*. They are obstacle for *abheda jnanam*. So we have to break this *bheda*. How to do this. I begin to worship Lord in myself, taking my own body - physical or subtle - as Lord. if a stone can become Lord for us to worship, why not *cetana purusha*, better than stone or turmeric powder, be not an *alambanam*. And, this is called *ahamgraha upasanam*. The *alambanam* in which is myself. This is not equal to *jnanam*. The difference is between imagination and fact. Imagination is never fact. Imagine you are a PM means not fact. It is not real. Knowledge is *prama* and *upasana* is deliberate *bhrama*. It creates an *abheda samskara*. When revealed, the fact stays. So three stages - *bheda upasana* (*samhita upasana*, *vyahriti upasana*, all *pujas*), *abheda upasana* (HG *upasana*) and *abheda jnanam*. Mind itself is seen as HG. *Bheda upasana* are many. *Abheda upasana* is only one type. Why *samhita* and *vyahriti* are chosen. Why not *linga* etc.? It is given to Vedic student who is coming from karma *kanda*/sanskrit *sandhi* study. *Abheda jnanam* will come later. Here *kramamukti* is pointed out for the *uapsaka* who will get *jnanam* from *Brahmaji* in *Brahmalaoka*.

व्याहृत्यात्मनो ब्रह्मणः उपलब्धिस्थानम् विशेषणानि च

स इति व्युत्क्रम्य (सन्निहितमाकाशमुल्लङ्घ्य इत्यर्थः) अयं पुरुषः इत्यनेन संबध्यते (योऽयं परोक्षत्वेन उपदिष्टः महोव्याहृत्यात्मकः सोऽयं हृदयाकाशे द्रष्टव्यः) (not with akasa)। य एषः अन्तर्हृदये हृदयस्यान्तः (adv. compound)। हृदयमिति (हृदयस्वरूपमाह - पुण्डरीक इति) पुण्डरीक-आकारो

[१६२] सर्वात्मभावोऽत्र मनोमयत्वादिगुणकब्रह्मभावः । तस्याः प्रतिपत्तिः प्राप्तिः । अयं च भावः हिरण्यगर्भसाधर्म्यमिति व्याख्यातव्यम्। (सच्चिदानन्द)

मांसपिण्डः प्राणायतनः (हृदि प्राणः इति प्रसिद्धेरिति भावः) अनेकनाडीसुषिरः (अनेकनाड्याश्रयभूतानि सुषिराणि यस्य इति विग्रहः। प्रश्न -एकाधिकशतं प्रधाननाड्यः 101। शतोत्तरदशसहस्राणि शाखानाड्यः 10100। द्वासप्ततिलक्षाधिक-द्वासप्ततिकोट्यः प्रतिशाखानाड्यः 72,72,00,000)। ऊर्ध्वनालः अधोमुखः (पुण्डरीक-आकारत्व-अधोमुखत्व-ऊर्ध्वनालत्वविशिष्टे मांसखण्डे मानमाह - विशस्यमाने इति) विशस्यमाने (शसु हिंसायाम् १ प.पद. to cut up) पशौ प्रसिद्धः उपलभ्यते (पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुखम् इत्यादिश्रुतिप्रसिद्धो यथोक्तमांसखण्डः विशस्यमाने पशौ प्रत्यक्षतः उपलभ्यते इत्यर्थः) । तस्य अन्तः य एष आकाशः प्रसिद्ध एव (योऽयमन्तर्हृदये आकाशः इत्यादिश्रुतिषु इति शेषः) करकाकाशवत्[१६३] (कमण्डलौ च करके इत्यमरः) (करकाकाशो यथा प्रसिद्धः इति दृष्टान्तयोजना)। तस्मिन् सः अयं [१६४] पुरुषः पुरि शयनात् (पुरि हृदये शरीरे वा शयनाद् अवस्थानात् पुरुषः) (सच्चिदानन्द - हृदये स्थितत्वात्, तत्र उपलभ्यमानत्वात्) पूर्णत्वात् (पूर्णत्वात् वा पुरुषः) पूर्णाः (मह इत्यनेन व्याप्ताः) वा भूरादयः (भूरादयः पूर्णाः येन स पुरुषः इति वा) लोकाः येनेति (सच्चिदानन्द - भूरादिलोकात्मकाः व्याहृतयः मह इत्यनेन व्याप्ताः इति हि उक्तम्) पुरुषः। मनोमयः (मननं मन इति भावव्युत्पत्तिमाश्रित्याह - मनो ज्ञानम् इति) मनो ज्ञानं (मननं ज्ञानमित्यत्र हेतुमाह - मनुतेरिति । ज्ञानं कर्म क्रिया वाच्यभूता यस्य तस्मान्मनुतेः धातोः निष्पन्नः मनःशब्दः यतो ज्ञानवाची इत्यर्थः।) (सच्चिदानन्द - मन ज्ञाने ४ - आ.पद - मनु ८ आ.पद अवबोधने इति धातुद्वयमस्ति। अत्र यदि आद्यः धातुः विवक्षितः तदा मन्यतेः इति निर्देशः स्यात् इत्यतः मनु अवबोधने इति अस्य एव उपादानम् इति भाति।) मनुतेर्ज्ञानकर्मणः, तन्मयः (पुरुषस्य मनोविकारत्व-अभावाद् आह - तत्प्रायः इति। मनःप्रधानः इत्यर्थः) तत्प्रायः (तत्र हेतुमाह - तदुपलभ्यत्वात् इति। तेन उपासनसंस्कृतेन मनसा उपलभ्यमानत्वाद् इत्यर्थः) तदुप-लभ्यत्वात् (आ.गिरि - ज्ञानाकारपरिणामिनि मनसि एव उपलभ्यत्वाद् ध्यायिभिः इत्यर्थः) (सच्चिदानन्द - मनसा उपलभ्यत्वमेव तत्प्रायत्वमिति उक्तं भवति)। मनुते अनेन इति वा मनः अन्तःकरणम् तदभिमानी (सच्चिदानन्द - समष्टिज्ञानशक्त्युपाधित्वात् छा.भा ३.१४.२) तन्मयः। तल्लिङ्गो वा (गोविन्दानन्द - मनसा मय्यते इति विग्रहः) (अस्मदादिमनसा अस्मदादिभिः अनिवार्येण तन्नियन्तृतया ब्रह्मानुमान-संभवादिति भावः। {मनसा हि लिङ्ग्यते अयं पुरुषः इति। समष्टि-मन-उपाधिकत्वात्।}।) (आ.गिरि - तस्य जडस्य मनसः प्रवृत्तिं दृष्ट्वा तदधिष्ठातृतया हिरण्यगर्भः अनुमीयते। तस्य शास्त्रे सकलकरण-अधिष्ठातृत्वेन प्रसिद्धत्वादिति तल्लिङ्गत्वम् उक्तमित्यर्थः)। अमृतः अमरणधर्मा (हिरण्यगर्भरूपेण कल्पान्तः-स्थायित्वात्, वस्तुतः परमेश्वर-अव्यतिरेकाच्च)। हिरण्मयः ज्योतिर्मयः (स्वप्रकाशः इत्यर्थः।) (सच्चिदानन्द - न हि वस्तुतः एव हिरण्य-विकारित्वं संभवति)

The word sah in the mantra is to be connected to the ayam purushah transcending the order of words as they appear. That/this space which is within one's heart. The heart here is a lump of flesh in the form of a lotus bud, which is the seat of vital air, with the apertures of many nadis opening into it, which has its stalk upwards and which faces downwards and which description is well known as seen in an animal when dissected. Within that heart, this space that is well known like the space obtaining in a water-pot, exists this person who was mentioned earlier. Purusha is so called because he lies in the

[१६३] सर्वगतस्यापि हृदयान्तःस्थत्ववचनं तदुपहितत्व-अभिप्रायेण कमण्डल्ववच्छिन्न-आकाशवत् । तस्माद् य एष इति प्रसिद्ध एव भूताकाशः परामृष्ट इत्यभिप्रायः । (सच्चिदानन्द)

[१६४] सः इति व्युत्क्रम्य संबन्धः इति यदुक्तं तस्य उपप्रदर्शनमिदम् योऽयं परोक्षत्वेन उपदिष्टः महोव्याहृत्यात्मकः सोऽयं हृदयाकाशे द्रष्टव्यः इत्यर्थः (सच्चिदानन्द)

city of body or because the worlds such as bhuh, earth are filled by him. He is manomayah. Manah means knowledge as the word is derived form the root “man” meaning “to know”. Manomayah means full of knowledge as the purusha pervades it and hence known through it. Or manah may mean that by which the jiva thinks, viz the antahkaranam and the purusha is identified with it or is indicated by it. He is immortal and effulgent.

BRAHMAN IN THE HEART

HG with the described glories must be meditated upon here. He has infinite glories like *manomayatva* etc. being total *sukshma sarira*. Some are mentioned here. With those descriptions we do. In the previous also HG alone was meditated. It was different pattern. No external *alambana* here. There is space (like space in a pitcher) in the heart. (heart is compared to lotus bud, not blossomed). (*prana ayatana* where your life is hanging). (it is hollow - *sushira*. it is inverted lotus. stalk or *nala* is above. in a dissected cow it is seen. In *yajna* they do.) We turn our attention to heart. Heart is physical only. There is physical on the right hand and spiritual on the left etc. we listen. The physical heart is the locus of our mind. During sleep, when the thoughts are not there, our mind gets resolved in heart alone. In waking etc. it may be different. When we talked about sense organs, we said two aspects are there. One is physical part (*golaka*) and the other power of perception (part of *sukshma sarira*). Our mind also must have *golaka* and power of thinking etc. Heart is probably the *golaka* (physical) and *sankalpa sakti* etc. belongs to subtle body. So heart often represents mind. *Hridaya* means *hridayastha* mind. *Mamsakhanda - Sankara* says.

In this heart, there is space. *Angushtamatra* etc. they say. What is present there is mind. Individual mind. In this *upasana*, in that very same place we have to meditate the *samasti* mind, the HG. *Purau sthula sarire vasati iti*. HG obtains within every physical body. So he is called *purusha*. *Purayati sarvam* - he pervades all bodies, so also *purusha*. He is *upasyah*. (We say I have done by pointing out to heart, not bad karma for which head is shown)

In what manner he should be meditated. As *manomaya*, total mind. *Manovikararupah*, every *vrittijnanam* is *manovikara*. Who is HG? He consists of all knowledge in this world. Total knowledge. Physics knowledge is *manovikara*. Every knowledge is so. So *vrittijnana mayah*. *Purusha* is *manomaya* because he is available only in mind. Or he knows through the mind and so is called *manomaya*. Mind is *linga* for whom. I know *purusha* is, I am, because I think. Mind becomes *linga* for his existence. *Amritah* is immortal. Immortality in the sense of relativeness. He survives for a very very long time. *Kalpakalam*. 2000 *yugas* one full day for him (BG 8th ch *sahasrayugaparyantam*+). One *yuga* consists of 4,320,000 years 432000 X 4 is *Satyayuga*; x 3 is *treta*; x 2 *dvapara* and x 1 is *kali)*. He is *hiranmayah*. *Prakasa svarupah*. He is *svaprakarupah* because of his knowledge and purity and *punyam* like gold. Such HG is to be meditated upon. In *jyotirmaya maya* is *pracurya*.

अन्तरेण तालुके । य एष स्तन इवावलम्बते । सेन्द्रयोनिः । यत्रासौ केशान्तो विवर्त्तते । व्यपोह्य शीर्षकपाले ।

अन्तरेण - between; तालुके - the two parts of the palate; यः एषः अवलम्बते - (Sushumna Nadi passes through that part) which hangs down; स्तनः इव - like a nipple; सा इन्द्रयोनिः - this is the passage to (the world of) Brahma; यत्र - where; असौ केशान्तः - the roots of the hair; विवर्त्तते - are divided apart; व्यपोह्य - (It comes out) breaking open; शीर्षकपाले - the two portions of the crown of the head.

(Sushumna Nadi passes through that part) which hangs down like a nipple between the two parts of the palate. (It comes out) breaking open the crown of the head where the roots of the hair are divided apart. This is the passage to (the world of) Brahma.

मणिप्रभा

एवम् उपास्यब्रह्मस्वरूपम् अभिधाय उपासकस्य ब्रह्मलोकगतये मार्गविशेषमाह - अन्तरेण तालुके मुखबिलस्य अन्तर् जिह्वामूलस्य उपरि स्थितौ वामदक्षिणभागौ तालुके इत्युच्येते। तयोः तालुकयोः अन्तरेण मध्ये स्तन इव स्तनसदृशः स्वल्पः कश्चित् मांसखण्डः अवलम्बते लम्बमानस्तिष्ठति संलग्नो भवति इति वा। तस्य मांसखण्डस्य योगशास्त्रप्रसिद्धिं द्योतयितुं यच्छब्दः। तस्यैव प्रत्यक्षतां द्योतयितुं एषशब्दः। तथा च लम्बिकाकरण-प्रवीणस्य जिह्वाग्रस्पर्शनेन प्रत्यक्षः परकीयमुखे परकीय-चक्षुषा एव प्रत्यक्षः। स च मांसखण्डः शाखाचन्द्रदर्शनन्यायेन स्वसमीपतरवर्त्तिनीं योगशास्त्रप्रसिद्धां सुषुम्णाख्यां नाडीमपलक्षयति। तथा च तत्समीपगा सुषुम्णाख्या नाडी। यत्र यस्मिन्मूर्धदेशे असौ सर्वजनप्रत्यक्षः केशान्तः केशानामन्तः अवसानं मूलं विवर्त्तते विभागेन वर्त्तते तं मूर्धदेशं प्राप्यमाणा शीर्षकपाले शिरसो वामदक्षिणकपाले व्यपोह्य भित्त्वा निर्गता या सा सुषुम्नाख्या नाडी इन्द्रयोनिः इन्द्रस्य ब्रह्मणो योनिः ब्रह्मलोकप्राप्तिमार्गः स्वरूपप्रतिपत्तिद्वारमिति यावत्। तेनैव द्वारेण ऊर्ध्वं गच्छन् उपासकः मुच्यते इत्यर्थः।

उपासकस्य ब्रह्मप्राप्तये नाडीमार्गः

तस्यैवंलक्षणस्य हृदयाकाशे साक्षात्कृतस्य विदुषः आत्मभूतस्य (व्याहृतिशरीरे ब्रह्मणि मनोमयत्वादिगुणवति अहंग्रहम् अभिप्रेत्य विदुषः आत्मभूतस्य इत्युक्तम्। अहंग्रहं विना तद्भाव-अयोगात् तद्भावं विना च स्वाराज्यप्राप्ति-अयोगात्। अतः स्वाराज्यप्राप्तिवचन-अनुरोधेन विदुषो ब्रह्मभावः ब्रह्मणि अहंग्रहश्च कल्प्यते इति भावः। तथा च श्रुतिः देवो भूत्वा देवानप्येति इति - इहैव भावनया देवभावं प्राप्य देहपातोत्तरकालं देवभावं प्राप्नोति इति तदर्थः।)। इन्द्ररूपस्य (सेन्द्रयोनिः इति वाक्यशेषदर्शनादिन्द्ररूपत्वमुक्तम्।) ईदृशस्वरूपप्रतिपत्तये (ईदृशेति उक्तविशेषणविशिष्टेत्यर्थः) मार्गः अभिधीयते - (शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभि निःसृतैका (निर्गता)। तयोर्ध्वमायन्नमृतत्वमेति। इति श्रुत्यन्तरमनुसृत्य आह - हृदयादूर्ध्वम् इति - काठक २.३.१६) इतिहृदयादूर्ध्वं प्रवृत्ता (श्रुतिप्रसिद्धायां शताधिकायां नाड्यां नामान्तरेण योगशास्त्रप्रसिद्धिं कथयति - सुषुम्ना इति) सुषुम्ना नाडी (कठ २.३.१७, प्र ३.७, - अथ एकया ऊर्ध्वः उदानः। छा ८.६.६. refers) योगशास्त्रेषु प्रसिद्धा। सा च अन्तरेण मध्ये तालुके (अन्तर-अन्तरेण युक्ते - द्वितीया पा.२.३.४ A word takes 2nd case in association with these two) तालुकयोः (तालुके इत्यस्य अर्थकथनमिति भाति) गता। यः च एषः तालुकयोर्मध्ये स्तन इव (आस्यान्तर् इति शेषः) (लबि अवस्रंसने १ आ.पद to hang लम्बिका or uvula. Lambikayoga is to touch this with the tip of the tongue) अवलम्बते मांसखण्डः तस्य च अन्तरेण इत्येतत्। यत्र च केशान्तः केशानामन्तः अवसानं मूलं विवर्त्तते विभागेन वर्त्तते मूर्धप्रदेशः (सच्चिदानन्द- एतयैव द्वारा परमात्मा कार्यकरणसंघातं प्रविष्टवान् इति ऐतरेयिणः समामनन्ति। ऐ.भा १.३.१२ - "स एतमेव सीमानं विदार्य एतया द्वारा प्रापद्यत"। इति) इत्यर्थः। तं देशं (ब्रह्मरन्ध्रम्) प्राप्यमाणा

तेन (तस्य इत्यर्थः। तस्य च अन्तरेण अन्तर्देशं प्राप्यमाणा शीर्षकपाले व्यपोह्य या निर्गता इति योजना।) अन्तरेण व्यपोह्य (उहिर् अर्दने १. प.पद to kill) विभज्य विदार्य शीर्षकपाले शिरःकपाले निर्गता या सा इन्द्रयोनिः। इन्द्रस्य ब्रह्मणः (इदि परमैश्वर्ये १. प.पद इन्दति इति रन् प्रत्ययान्त) योनिः मार्गः स्वरूपप्रतिपत्तिद्वारम् इत्यर्थः (सच्चिदानन्द - एतया नाड्या उदानवायुपूरितया रेचक-प्राणायाम-बलेन उपासको व्रजेत् इति वार्तिके १-११६, ११७ - विशेषः उक्तः)।

A path to the attainment of the Hiranyagarbha of this nature, whose characteristics have been described in this manner, who has been realised in the heart and who has become the self of the meditator, is pointed out. The nerve called sushumna rises up from the heart which is well known in the yoga literature. It runs through the well known middle portion of the two palates. And also through that one, the piece of flesh hanging down like a teat between the two palates, the sushumna nadi runs - this is the idea. And where the ends or roots of the hair divide i.e., the top of the head, after reaching that place, it emerges out of it splitting the skull bones on the head. That is the path of Brahman, the door for the attainment of the position of Hiranyagarbha.

THE PATH LEADING TO BRAHMAN

Now result is going to be talked. The *phalam* for HG *upasana* is HG *praptih* - HG of this description. That is *brahmaloka praptih*. The route for this *loka* for the *upasaka* is being described now. *Jiva* is put in this rocket for sending him to *brahmaloka*. In *Mundaka* it is said, there is *marga* for going there as *sukla gati*. *Krishna gati* involves return, not *sukla gati*. How he goes there? *satam ca eka ca hrdayasya nadyah, tasam murdhanam abhinisritaika. tayordhvamayan amrtatvameti vishvang anya atkramanaya bhavati+ (Katha).* There it is said, *jiva*(causal and subtle plus *caitanya*) goes out through one *nadi* or the other. (in pursuit of one *loka* or other including *adholoka*.) *Upasaka* goes out through *sushumna nadi*, known in *Yogasastra*, a psychic artery. It is said to be *marga* for *brahmaloka prapti*. Here that *nadi* is described. Then it will be said he will pass though this *nadi*. *Indrayoni* is *sushumna nadi*. This name came because *Indra* means HG. *Yoni* means path. The path leading to HG is *Indrayoni*. Where does it start? It starts from heart. All *nadis* start from there. It passes through *antarena taluke* - the two palates. In the palate there is *mamsakhanda* hanging down. Through that it passes. It is hanging down like a nipple. It is tonsil, it seems. *Antarena* we have to supply. *Indrayoni* passes between the two palates and passes through inner *mamsakhanda*. (The right and left sides of the mouth's interior situated just above the root of the tongue are called *talukas*. Between them lies the hanging flesh. Touching it with one's tongue is called *lambikayoga*. That is seat of *Indra*. That flesh is spoken for *Sushumna* because the *nadi* is close to it like *Sakhacandranyaya*.

Later, *vyapohya sirshakapale sushumna nadi bahiragacchati*. By cleaving the crown of the head. (It is said *jiva* entered through this soft crown and then it closed). That top portion of the head is described as *yatra*+ In which crown, there is the tip of the air or root of the air (bottom tip) is there divided into many parts. The essence is *Sushumna nadi* comes out through that subtle opening. Thereafter it is *suklagati*. Till then *sushumna nadi gati*. When? *prarabdha avasana kale. Upasaka* goes through this *nadi*, we have to supply.

There are many ways of *jiva* getting out. Sometimes he opened his mouth and it went away. Then mouth remains open. If eye, they remain open. Wherever *kramamukti* is there, they talk about *marga* for *jiva* to travel. This is *sastra* style. The type of travel is pointed out by

certain indications. *Uttrayana* etc, *Kasi* etc, in what condition the *jive* leaves - these *kala*, *desa* and *nimitta* are pointed out.

भूरित्यग्नौ प्रतितिष्ठति । भुव इति वायौ । १ । सुवरित्यादित्ये । मह इति ब्रह्मणि । आप्नोति स्वाराज्यम्। आप्नोति मनसस्पतिम् । वाक्पतिश्-चक्षुष्पतिः । श्रोत्रपतिर्विज्ञानपतिः । एतत्ततो भवति । आकाशशरीरं ब्रह्म। सत्यात्म प्राणारामं मन आनन्दम् । शान्तिसमृद्धममृतम् । इति प्राचीनयोग्योपास्स्व।

भूः इति - which is symbolised by bhuh; अग्नौ - the fire; प्रतितिष्ठति - (After death) the meditator merges into; भुवः इति - which is symbolised by bhuvah; वायौ - he merges into the wind; सुवः इति - which is symbolised by suvah; आदित्ये - he merges into the sun; महः इति - which is symbolised by mahah; ब्रह्मणि - he merges into Hiranyagarbha; आप्नोति - he attains; स्वाराज्यम् - the supreme Lordship; आप्नोति - he attains; मनसस्पतिम् - the Lordship over all the minds; वाक्पतिः - he becomes the Lord of the power of speech; चक्षुष्पतिः - the power of sihgt; श्रोत्रपतिः - the powerof hearing; विज्ञानपतिः - and the power of understanding; एतत् - this Hiranyagarbha; ततः - thereafter (after death); भवति - the meditator becomes; ब्रह्म - Hiranyagarbha; आकाशशरीरम् - is one who has a body which is all pervasive like the space; सत्यात्म - and which consists of the entire universe with and without form; प्राणाराम्म् - who has all the pranas as the sporting ground; मन आनन्दम् - who has all the minds as the source of happiness; शान्तिसमृद्धम् - and who is all peace and prosperity; अमृतम् - and eternal; इति - thus; प्राचीनयोग्य - Oh Pracinayogya! उपास्स्व - may you meditate.

> After death, the meditator merges into the fire, which is symbolised by bhuh; he merges into the wind, which is symbolised by bhuvah; he merges into sun which is symbolised by suvah; he merges into Hiranyagarbha which is symbolised by mahah. He attains the supreme Lordship. He attains the Lordship over all the minds. He becomes the Lord of the power of speech, the power of the hearing and the power of understanding. The meditator becomes more than that, as described below, thereafter (after death). The Hiranyagarbha is one who has a body which is all pervasive like the space and which consists of the entire universe with and without form, who has all the prana as the sporting ground, who has all the minds as the source of happiness and who is all peace and prosperity and eternal. Oh Pracinayogya! May you meditate thus.

मणिप्रभा

एवं ब्रह्मलोकमार्गमभिधाय यथोक्तोपासकस्य फलमाह - भूरिति। भूः इत्याकारक-व्याहृति-रूपो योऽग्निः अस्य लोकस्य अधिष्ठाता तस्मिन् असौ प्रतितिष्ठति व्यष्ट्यग्न्यात्मना भूर्लोकं व्याप्नोति इत्यर्थः। भुवरिति भुव इत्याकारकद्वितीयव्याहृतिरूपवायौ प्रतितिष्ठति इति अनुषङ्गः। व्यष्टि-वायुरूपेण अन्तरिक्षलोकं व्याप्य तिष्ठति इत्यर्थः। इत्यादि।

उपासनाफलम्

तया एवं विद्वान् मनोमयात्मदर्शी मूर्ध्नो विनिष्क्रम्य विनिष्क्रम्य प्रतितिष्ठति इति संबन्धः) अस्य लोकस्य (ऋग्वेदस्य प्राणस्य च इत्यर्थः) अधिष्ठाता भूरिति व्याहृतिरूपो योऽग्निः महतो (better is महो ब्रह्मणः) ब्रह्मणोऽङ्गभूतः तस्मिन् अग्नौ प्रतितिष्ठति अग्न्यात्मना इमं लोकं (ऋग्वेदं प्राणं चेत्यपि द्रष्टव्यम्। प्रथमव्याहृतौ लोकाग्निऋग्वेदप्राणानां चतुर्णां दृष्टत्वेन लोकाग्निभाववद् ऋग्वेदप्राणभावस्यापि वक्तव्यत्वात्। न च प्रधानब्रह्मोपासनफलवचनेन मह इति ब्रह्मणि इत्यनेन सर्वात्मकब्रह्मभावे कथिते सति विदुष ऋग्वेदप्राणभावस्यापि सिदधतवान्न पृथक्तद्भावो वक्तव्य इति वाच्यम्। तथा सति लोकाग्निभावस्यापि तत एव सिद्धत्वेन अग्नौ प्रतितिष्ठति इति श्रुतिवचनम् अग्न्यात्मना इमं लोकं व्याप्नोति इति भाष्यवचनं चानर्थकं स्यात्। एतेन भूरितिव्याहृतौ ऋग्वेदप्राणदृष्ट्योर् ब्रह्मोपासनं प्रति अङ्गतया प्रधानफलेनैव फलवत्वात् श्रुतौ भाष्ये च पृथक्तद्भाव-वचनाभाव इति शङ्कापि निरस्ता तस्यां लोकाग्निदृष्ट्योरपि अङ्गत्वेन तत्फलस्यापि अवक्तव्यत्व-आपत्तेः। यदि च अङ्गानां प्रधानफलेनैव फलवत्वे अपि अङ्गस्तुत्यर्थं पृथक्फलवचनमपेक्षितमित्युच्यते तदा ऋग्वेदादि-दृष्टौ अपि तदर्थं पृथक्फलं वक्तव्यम्। एवमुत्तरत्रापि द्रष्टव्यमिति संक्षेपः।) व्याप्नोति इत्यर्थः। तथा भुव इति द्वितीय-व्याहृत्यात्मनि वायौ प्रतितिष्ठति इत्यनुवर्त्तते । सुवरिति तृतीयव्याहृत्यात्मनि आदित्ये। मह इति अङ्गिनि चतुर्थव्याहृत्यात्मनि ब्रह्मणि प्रतितिष्ठति[१६५] इति, तेषु आत्मभावेन स्थित्वा। (अत्र क्रमकथनं पाठक्रममाश्रित्य। वस्तुतस्तु क्रमो न विवक्षितः। विदुषः सर्वात्मकब्रह्मभावे एव अग्न्यादिभावस्य अन्तर्भावेण क्रम-अभावादिति भावः)। आप्नोति ब्रह्मभूतः (सन्) (मह इति ब्रह्मणि इति वाक्योक्तब्रह्मभावप्रयुक्तम् इत्यर्थः।) स्वाराज्यं स्वराड्भावं स्वयमेव राजा अधिपतिः भवति (आ.गिरि - निरङ्कुशमैश्वर्यं जगत्स्रष्टृत्वादिलक्षणं न भवति इत्याह - अङ्गभूतानां देवतानाम् इति) अङ्गभूतानां देवतानां यथा ब्रह्म {कठ. उप - भयादस्याग्निस्तपति..} देवाश्च सर्वे अस्मै अङ्गिने बलिमावहन्ति अङ्गभूताः यथा ब्रह्मणे (उक्तस्य अनुवादः एषः)। आप्नोति मनसस्पतिम्। सर्वेषां हि मनसां पतिः (उपासकः सर्वेषां हि मनसां पतिर्भवति इत्यत्र हि-शब्दसूचितं हेतुमाह - सर्वात्मकत्वाद् इति) सर्वात्मकत्वाद् ब्रह्मणः (ब्रह्मभूतस्य विदुषः सर्वजीवात्मकत्वादित्यर्थः)। (ननु ब्रह्मणः सर्वात्मकत्वे सिद्धे तद्भावमापन्नस्य विदुषः सर्वात्मकत्वं स्यात्, तदेव कुतः इत्यत्र आह - सर्वैः हि इति। सर्वैः उपाधिभूतैः मनोभिः प्राप्तजीवभावं सन् मनुते चक्षुरादिद्वारा रूपादिकमनुभवति।) सर्वैः हि (ब्रह्मणो जीवभावे मानत्वेन प्रवेशवाक्यादि सूचनार्थो हि-शब्दः) मनोभिः तद् (ब्रह्म) मनुते। (न केवलं उपासकः सर्वमनसां पतिः किं तु वागादीनामपि इत्याह - किं चेति) किं च वाक्पतिः। सर्वासां वाचां पतिर्भवति। तथैव चक्षुष्पतिः चक्षुषां पतिः। श्रोत्राणां च विज्ञानानां च पतिः सर्वात्मकत्वात् (विदुषः इति शेषः)। (ननु त्वगादिपतित्वमपि कुतो नोक्तमित्याशङ्क्य आप्नोति मनसस्पतिमित्यादेः विवक्षितमर्थमाह - सर्वप्राणिनामिति। नियम्य-नियामकभावसंबन्धः मत्वर्थः) सर्वप्राणिनां करणैः तद्वान् भवति इत्यर्थः।

By that nadi, the meditator of the Hiranyagarbha thus in the form of knowledge, gets out from the head and gets established in fire, which is represented by the vyahriti Bhuh, a limb of the great Brahman (as identified with mahovyahriti), who presides over this world. It means he pervades this world by being identified with fire. Similarly in the air, represented by the second vyajriti bhuvah. The verb “becomes established” is to

[१६५] मह इति व्याहृत्यात्मा एव अत्र प्राधान्येन उपास्यः । अङ्गोपासनाफलम् अग्न्यादिभावं प्राप्य क्रमेण अङ्गिनि प्रतितिष्ठति इत्यर्थः । (सच्चिदानन्द)

be brought in here. (He becomes established) in the sun represented by the third vyahritii suvah. He becomes established in Brahman, represented by the fourth vyahriti Mahah. Staying in them identified as self, and becoming Brahman, he attains sovereignty, meaning he becomes himself the ruler over others just as Brahman does over the gods that form its limbs. All the deities that form the limbs, bring offerings to this upasaka just as they do for Brahman. He attains the status of being the lord of all the minds. Brahman being all the minds, he is the lord of the minds of all. He indeed thinks through all minds. One who meditates thus gains that. Moreover, he becomes the lord of all the speech. So also, he becomes the Lord of the eyes, the lord of the ears and the lord of the knowledge. The idea is that he being the self of all beings, he becomes possessed of all senses by identifying with the respective senses of all beings.

THE MODE OF ATTAINING BRAHMAN

He merges into *agnidevata*. What happens to him? He merges into *agnidevata* which was represented by *vyahriti Bhu*. He merges in *Angadevata* first. Then, in *Vayudevata* represented by *bhuvah*. (higher than *agni*) Then in *adityadevata* represented by *suvah* (further higher). Not only in these *anga devatas*. We have to take all of them. Finally in HG, represented by *maha* which is ***angi**-devata*. We have to add *pratitishtati* in every sentence.

Having gone there to *Brahmaloka*, he becomes *agni* etc. which are *angas*, *vidvan* who is *manomaya-atmadarsi* - (not *satcidananda brahma darsi*), he (who has gained some seen results like *santi*, composure, self-mastery etc.) by unseen result went there, he having gone out by this special *nadi*, he is available in fire. He is the order in fire. The substance, the reality of that order is Satyam Brahma. The order is also mithya**.** Before he was going to them. Now he being the *Isvara*, all *devas* offer him. As *Isvara rupa*, as *adhinshthana rupa*, he is in fire and as fire he pervades this world. So too *vayu* etc. *Bhuva iti* means not as *bhuva*. We have to supply *bhuva iti yah vyahrityatma tasmin*. We have to take *veda*, *prana* etc that he becomes.

The teacher should have said he merges in HG because *yatha yatha upasate*+ Interestingly enough we find he merges in *agni*. We get reference to *vyahriti*. It should not come. So *Sankaracarya* says, this *upasana* and *vyahriti upasana* must be taken as one. Otherwise we cannot connect these *phalavakyas*. It comes like bolt from the blue. First he merges in *angadevata* and finally in **angi**-*devata*. This *phalam* should be connected to what was said earlier as *sarvesmai*+ Now all gods bring him offering. That is how we get the clue to know both the *upasanas* are one. He gains the sovereignty, the greatest ruler. Not installed by anybody *ityarthah*. He is not under anyone. Like Brahman is *angi* and *svarat*. They have to get up when he comes. There were two types of kings before. Small kings who used to give taxes to the emperor. *Indra* etc are like that. They are all under HG. HG is *svarat*. He need not consult anyone. That position or status is called *svarajyam*. This is also relative, though highest. It is not *moksha*. *Moksha samrajyam* is absolute. That is further explained here by *manasaspati* etc. He gains oneness with HG who is lord of all minds. *Candrama* being part of HG, he will therefore be Lord of minds also though *candrama* is lord of mind. Whatever happens in the mind is due to him because he is the order. Further HG alone thinks through all the minds. That HG is Lord of speech, not of one speech organ, but *samasti* organ. *Agni devata rupena vagpatih*. *Vak* represents organ of action. *Vak* means word. It has a meaning or object. The connection between word and object is always there in any language. There is an order governing that. He is that order. Similarly the letters are uttered based on

which order, that also. Eyes represent all sense organs. Mind represents all divisions of mind. Here also those results spill over. He is respected by all. They are all implied.

मनोमयात्मनो विशेषणान्तराणि

(न केवलमेतावदेव विदुषः फलं भवति, किं तु इतः अपि बहु फलं भवति इत्याह - किं च ततः इति)। किं च ततः अपि अधिकतरम् एतद् भवति। किं तत्?। उच्यत्। आकाशशरीरं[१६६]। आकाशः शरीरमस्य आकाशवद्वा सूक्ष्मं (जलादिभिः दुःखादिभिश्च संश्लेष-अयोग्यत्वं सूक्ष्मत्वम्। तदाह भगवान् - यथा सर्वगतं सौक्ष्म्याद् आकाशं नोपलिप्यते। सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते इति।) शरीरमस्य (शरीरपदं स्वरूपपरम्। ततश्च आकाशमधिष्ठानभूतस्य ब्रह्मणः कल्पितं स्वरूपम् इत्यर्थः) इत्याकाशशरीरम्। किं तत्?। प्रकृतं ब्रह्म। सत्यात्म। सत्यं (सत् भूतत्रयलक्षणं मूर्त्तम्। त्यद् वाय्वाकाशात्मकम् अमूर्त्तम्। तदुभयं सच्च त्यच्च सत्यमिति व्युत्पत्या सत्यशब्दवाच्यम् तद् (मूर्तामूर्तम्) आत्मा कल्पितं रूपमस्य इत्यर्थः) मूर्तामूर्तम् (सत्यशब्दस्य परमार्थवस्तुनि रूढिमाश्रित्य आह - अवितथमिति) अवितथं स्वरूपं वा आत्मा स्वभावः यस्य तदिदं सत्यात्म। प्राणारामम्। प्राणेषु (सविषयेषु इन्द्रियेषु इत्यर्थः। इदं च व्याख्यानं ब्रह्मणो जीवभावाभिप्रायम्।) आरमणम् आक्रीडा यस्य तत्प्राणारामम्। (केवलब्रह्मपरत्वेनापि व्याचष्टे - प्राणानां वा इति।) प्राणानां वा आरामः यस्मिन् (यस्मिन् ब्रह्मणि नियन्तृरूपे सति इत्यर्थः) तत्प्राणारामम्। (मनआनन्दमिति पदं ब्रह्मणो जीव-भावाभिप्रायेणैव व्याचष्टे - मन इत्यादिना।) मनआनन्दम्[१६७]। आनन्दभूतं सुखकृदेव यस्य मनः तन्मनआनन्दम्। शान्तिसमृद्धम्। शान्तिः उपशमः (सर्वद्वैतनिवृत्ति-रूपमित्यर्थः। अज्ञानतत्कार्यध्वंसस्य अधिष्ठानब्रह्म-अनतिरेकादिति भावः।) शान्तिश्च तत्समृद्धं (सम्यगात्मभावेन ऋद्धिं व्याप्तिं गतं समृद्धम्। सर्वव्यापकम् इत्यर्थः) च शान्तिसमृद्धम्। शान्त्या वा समृद्धवदुपलभ्यते इति (सर्ववृत्युपरमलक्षणया समाधिशब्दितया शान्त्या समृद्धवत्पूर्णानन्दरूपेण योगिभिः उपलभ्यते इत्यर्थः) शान्तिसमृद्धम्। अमृतम् अमरणधर्मः। एतच्च (ननु फलत्वेन उक्तस्य अधिकतरविशेषणस्य कथम् उपास्यगुण-अन्तर्भाव उच्यते। नैष दोषः। तं यथा यथा उपासते इति श्रुत्या फलत्वेन अवगतस्यापि विशेषणजातस्य ध्येयत्व-अवगमात्। विशिष्य अत्र व्यवहित-सन्निहितसकलगुण-पूग-लक्षण-प्रकार परामर्शिना इति पदेन अधिकतरविशेषणस्य उपास्तिं प्रति विषयतया समर्पणाच्च। न चैवं आप्नोति स्वाराज्यम् इत्यादौ उक्तानां सर्वदेवाधिपतित्वसर्वदेवपूज्यत्व-सर्वकरणपतित्वानामपि फलरूपाणाम् उपास्यगुणत्वप्रसङ्गः इति वाच्यम्। इष्टत्वात्। तत्संग्रहार्थः एव एतच्च इत्यत्र चकार इति संक्षेपः।) अधिकतरविशेषणं तत्रैव मनोमयः इत्यादौ द्रष्टव्यम्।

> Further he becomes this which is much more than that. What is it? It is being said: He becomes that which has space as body or that which has a body as subtle as space. What is that? It is Brahman that is under discussion; that which has formful and formless elements as its nature and at the same time whose nature is non-negatable, true; that which sports in pranas, vital functions or that in which the joy of pranas abides; that whose mind has become happiness, the producer of only happiness; who is all peace i.e., resolution of all conflicts and prosperity or that which is seen to be enriched with peace; and which is immortal by nature. These additional attributes are to be seen as part of those earlier attributes of Brahman as characterised by knowledge etc

[१६६] विराडभेदेन आह - आकाशः शरीरमस्य इति । वस्तुतो हिरण्यगर्भस्य सूक्ष्मत्वादाकाशवदिति। (गोविन्दानन्द)

[१६७] दुःख-असंमिश्रितम् । सत्तवप्रचुरत्वात् । (सच्चिदानन्द)

Furthermore he becomes HG of the following descriptions. He is having all pervasive space as body. Or his body is subtle like space. *Atma* means body. HG is not located in one body. *Satyam* means the world of elements of gross and subtle forms (*murta-amurta - sat* and *tyat*), elements with and without forms. Or whose *svabhava* is changeless or not subject to negation. The *pranas* of all the people are source of happiness for that HG. *Arama* is sporting ground the recreation place. In HG *pranas* are supported for their happiness. All neuter. *Prana* is power behind all action. It is energy behind speaking etc. *Annam* gets converted to *prana* and it gets converted to *kriya-sakti*. All the *prana* belong to HG. So he is *pranarama*. *Mana anandam* - All minds are source of joy for HG. *sarvani manamsi anandah yasya*. Every joy belongs to him. He is the embodiment of peace and prosperity. He is eternal, relative. *Apekshika amrtatvam*. Santi is resolution of all conflicts. Basic conflict is duality. That resolution is not that the truce obtaining between two conflicts. It is long. What is achieved by yogis through *samadhi* is pointed out here as nature.

उपासनोपदेशविधिः उपसंहारश्च

इति एवं मनोमयत्वादिधर्मैः विशिष्टं यथोक्तं ब्रह्म हे प्राचीनयोग्य {प्राचीनैः पूर्वकाण्डोक्तकर्मभिः क्षीणपाप। तेन प्राचीनेषु उपासनासु अधिकृत} उपास्स्व इति आचार्यवचनोक्तिः (ननु उपासनस्य श्रुत्या स्वेन रूपेण उक्तौ अपि अनुष्ठानसिद्धेः आचार्योक्तिकल्पनं (acarya is mahacamasya) मुधा, नेत्याह - आदरार्था इति। उपासनानुष्ठाने आदर-अतिशय-सिद्ध्यर्था इत्यर्थः) आदरार्था[१६८]। उक्त एव उपासनशब्दार्थः।

> Thus O Pracinayogya! meditate on the Brahman described above as endowed with the attributes of full of knowledge etc. This exhortation or presentation of the utterance of teacher indicates his respect for the meditation taught here. The meaning of the word upasana has already been explained.

MEDITATION ENJOINED

The *vidhi vakyam* is coming here. In the earlier section it was not there. In this manner may you meditate. The student is addressed as *pracinayogya*. Oh *napraciyogya*. Oh one fit for this ancient *vidya/upasana*. Veda uses it is *pracina*. When are you going to arrive at the date of Vedas? *Pracina* means ancient. It indicates the wisdom that is ancient. Here it means the *upasana*. *Yogya* means fit for. Student is deserving student.

Meditate how? With the *gunas* mentioned. Some mentioned earlier. *Manomaya*, *amrta* and *hiranmaya*. Some later as *manaspati* etc, *akasasariram* etc. Joining all of them together. Where? *Antarhrdaye*. In the space within the heart. *Vyahrtyatmaka* HG as well as *Gunavisishta* HG both you meditate. We have to connect this *vidhi vakya* to both *upasanas*.

Note

व्याहृत्यात्मकस्य हिरण्यगर्भस्य आत्मत्वेन उपासनम् इह विधीयते। इति प्राचीनयोग्योपास्स्व इति विधिदर्शनात्। पूर्वानुवाके तु एतदुपासनाङ्गं भूरादिव्याहृतिषु अग्न्यादि-देवतोपासनम् उक्तम्। अयमेव अभिप्रायः आनन्दगिरेः वार्तिकस्य भाष्यस्य च इति स्पष्टमवगम्यते। इदं च ब्रह्मोपासनम् अहमिति गृहीत्वा कर्त्तव्यम् - आत्मेति तु उपगच्छन्ति ग्राहयन्ति च - सू. ४.१.३ (आत्मत्वेन परमेश्वरस्य ग्रहणं युक्तम् इति) इति न्यायात्। मनोमयस्य ब्रह्मत्वं च - सर्वत्र प्रसिद्ध-उपदेशात् - सू. १.२.१ (वेदान्तेषु प्रसिद्धस्य ब्रह्मणः मनोमयत्वादि-धर्मैः विशिष्टत्वेन उपदेशः न तु जीवस्य) इति अधिकरणे स्पष्टम्।

[१६८] प्राचीनयोग्य इति माहाचमस्योक्तिः योग्यशिष्याय एव विद्यायाम् अधिकारः इति द्योतनद्वारा उपासनायाम् आदरप्रदर्शनार्था इत्यर्थः। (सच्चिदानन्द)

उपासनानां यावज्जीवमावृत्तिः कर्त्तव्या अन्त्यप्रत्ययस्य एव फलजनकत्वेन तत्सिद्ध्यर्थम् आवश्यकत्वाद् इति - "आप्रायणात् तत्रापि हि दृष्टम्" - सू.४.१.१२ इत्यत्र उक्तम्। पृथिव्यन्तरिक्षम्-इत्यादिना जगदुपाधिविशिष्टब्रह्मोपासनमुक्तम्। ओमिति ब्रह्म इति प्रणवस्य परापर-ब्रह्म-दृष्ट्या उपासनमुक्तम्। (शास्त्रि)

That the *upasanas* mentioned in both the *anuvakas* treat of one and same *upasana* because:

"whoever contemplates them, he knows Brahman (*Anuvaka* 5.9)" indicates both are for one person.

6th *anuvaka* states the fruits of *vyahriti-upasana* as well. (*anuvaka* 6.13)

The differences in object of meditation is explainable by presenting them as one of *anga-angi bhava*.

Some special points:

Brahma-*upasanas* in various *upanishads* such as *sandilyavidya* Ch. 3.14, *madhuvidya* Ch 3.1-11, *dahara-vidya* ch.8.1-6, are different because the attributes assigned are different.

A meditator need to do only one *ahamgraha upasana*. If one *upasana* gives *phalam*, others are redundant. Again, *pratyaya* of identity cannot remain firm if different *upasanas* are resorted.

Upasanas should be practised till death as the last *pratyaya* decides the future course of life of the *upasaka* like in the case of any *jiva*. In the case of *karmas apurva* will give the desired result and no need to think of *svarga* at the end. But in *upasanas*, the repetition is known and tangible means of obtaining the result and hence to be done. Otherwise there is no need to take any effort for any pleasure being the result of *apurva* (past karma). But it does not work. One has to work for getting food.

An *upasaka* dying in night also will take to *sukla gati* because there exists some connection between the *nadis* and the rays of the sun. (Sutra 4.2.18-19) Also *Uttarayana* does not mean time alone but the *devata* or *caitanya* identified with that time. So one dying in *dakshinayana* also has access to northern path. (Sutra 4.2.20-21).

SEVENTH ANUVAKA BHASHYAM

पाष्ट-ब्रह्म-उपासना

संबन्ध-भाष्यम्

४५) यदेतद् व्याहृत्यात्मकं ब्रह्म उपास्यमुक्तं, तस्यैव इदानीं पृथिव्यादि-पाष्ट-स्वरूपेण उपासनम् उच्यते। पञ्च-संख्या-योगात् पष्टिच्छन्दःसंपत्तिः। ततः पाष्टत्वं सर्वस्य। पाष्टष्ट यज्ञः। "पञ्चाक्षरा पष्टिः[169] (तै.सं १.५.२)", "पाष्टो यज्ञः (बृ.उप १.४.१७)" इति श्रुतेः। तेन यत्सर्वं लोकाद्यात्मान्तं च पाष्टं परिकल्पयति यज्ञमेव तत्परिकल्पयति। तेन यज्ञेन परिकल्पितेन पाष्टात्मकं प्रजापतिम् अभिसंपद्यते। तत्कथं पाष्टमिदं सर्वम् इति? अत आह -

बाह्य-पाष्ट-त्रयम्

४६) **पृथिवी**, **अन्तरिक्षम्**, **द्यौः**, **दिशः**, **अवान्तर-दिशाः** - इति लोक-पाष्टम्। **अग्निः**, **वायुः**, **आदित्यः**, **चन्द्रमाः**, **नक्षत्राणि** इति देवता-पाष्टम्। **आपः**, **ओषधयः**, **वनस्पतयः**, **आकाशः**, **आत्मा** इति भूत-पाष्टम्। आत्मेति विराट्, भूताधिकारात्। **'इत्यधिभूतम्'** इति अधिलोकाधिदैवत-पाष्ट-द्वयोपलक्षणार्थम्। लोक-देवता-पाष्टयोष्ट्र अभिहितत्वात्।।

आध्यात्मिक-पाष्ट-त्रयम्

४७) **अथ** अनन्तरम् **अध्यात्मं** पाष्ट-त्रयम् उच्यते। प्राणादि वायु-पाष्टम्। चक्षुरादि इन्द्रिय-पाष्टम्। चर्मादि धातु-पाष्टम्। एतावद् हि इदं सर्वम्। अध्यात्मं बाह्यं च पाष्टमेव इति।।

पाष्टोपासन-फलम्

४८) **एतद्** एवम् **अधिविधाय** परिकल्प्य ऋषिः वेदः, एतद्दर्शन-संपन्नो वा कश्चिद् **ऋषिः अवोचत्** उक्तवान्। किमिति? आह - **पाष्टं वा इदं सर्वम्**। **पाष्टेनैव** आध्यात्मिकेन संख्या-सामान्यात् **पाष्टं** बाह्यं **स्पृणोति** बलयति, पूरयति। एकात्मतया उपलभते इत्येतत्। एवं पाष्टम् इदं सर्वम् इति यो वेद, स प्रजापत्यात्मा[170] एव भवति इत्यर्थः।।

(इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषत्-शीक्षावल्ली-भाष्ये सप्तमोऽनुवाकः)।।

---

[169] पा.भे - पञ्चपदा पष्टिः इति आनन्दाश्रमः।

[170] पा.भे - प्राजापत्यात्मा इति।

SEVENTH ANUVAKA

पाङ्क्तब्रह्म-उपासना

पृथिव्यन्तरिक्षं द्यौर्दिशोवान्तरदिशाः । अग्निर्वायुरादित्यश्चन्द्रमा नक्षत्राणि । आप ओषधयो वनस्पतय आकाश आत्मा । इत्यधिभूतम् । अथाध्यात्मम्। प्राणो व्यानोऽपान उदानः समानः । चक्षुः श्रोत्रं मनो वाक् त्वक् । चर्म मांसंस्नावास्थि मज्जा । एतदधिविधाय ऋषिरवोचत् । पाङ्क्तं वा इदं सर्वम्। पाङ्क्तेनैव पाङ्क्तं स्पृणोतीति ।

पृथिवी - The earth; अन्तरिक्षं - the atmosphere; द्यौः - the heavens; दिशः - the four main quarters; अवान्तरदिशाः - the four intermediary quarters; । अग्निः - the fire; वायुः - the air; आदित्यः - the sun; चन्द्रमाः - the moon; नक्षत्राणि - stars; आपः - the waters; ओषधयः - the herbs; वनस्पतयः - trees; आकाशः - the space; आत्मा - Virat; इति - these (three groups of five factors); अधिभूतम् - are related to the objective universe; अथ - now; अध्यात्मम् - the three groups of five factors related to the individual subject; प्राणः - prana; व्यानः - vyana; अपानः - apana; उदानः - udana; समानः - samana; चक्षुः - the eyes; श्रोत्रम् - the ears; मनः - the mind; वाक् - the organ of speech; त्वक् - the outer skin; चर्म - the inner skin; मांसम् - the flesh; स्नावा - the muscle; अस्थि - the bone; मज्जा - the marrow; एतत् - them; अधिविधाय - having revealed; ऋषिः - the sage; अवोचत् - said; पाङ्क्तम् - panktas (i.e., groups of five factors) only; वै - indeed; इदं सर्वम् - all this; पाङ्क्तेन - with the help of the subjective three panktas; एव - only; पाङ्क्तम् - the objective three panktas; स्पृणोति इति - one should meditate upon

> The earth, the atmosphere, the heavens, the four main quarters and the four intermediary quarters; the fire, the air, the sun, the moon and stars; the waters, herbs, trees, the space and Virat - these (three groups of five factors) are related to the objective universe. Now follows the three groups of five factors related to the individual subject: prana, vyana, apana udana and samana; the eyes, the ears, the mind, the organ of speech and the outer skin; the inner skin, the flesh, the muscle, the bone and the marrow. Having revealed them the sage said - all these are indeed panktas (i.e., groups of five factors only). With the help of the subjective three panktas one should meditate upon the objective three panktas.

अनुवाकविषयः

(उत्तरोप्यनुवाकः प्राकारान्तरेण ब्रह्मोपासनविषय इत्याह - यदेतद् इत्यादिना।) यदेतद्-व्याहृत्यात्मकं ब्रह्मोपासनमुक्तं तस्यैव (अपरब्रह्मणः) इदानीं पृथिव्यादिपाङ्क्तस्वरूपेण उपासनमुच्यते। (पृथिव्यादिजगतः कथं पाङ्क्त्वम् इत्याकाङ्क्षायां पङ्क्त्याख्यस्य च्छन्दसः पृथिव्यादौ संपादनाद् इत्याह - पञ्चसंख्यायोगाद् इति।) पञ्चसंख्यायोगात् पङ्क्तिच्छन्दःसंपत्तिः {=संपादनम्} (सच्चिदानन्द - पञ्च-संख्या-संबन्धात् पङ्क्तिच्छन्दस्त्वेन संपादनम्) {पङ्क्तिच्छन्दसः[१७१] इदं संबन्धी इति पाङ्क्तम्। संख्यासामान्यात् पञ्चाक्षरपादा

[१७१] यद्यपि अष्टाक्षराः पञ्चपादा यस्याः सा पङ्क्तिरुच्यते। इन्द्रे महाय वावृधे इत्थाहि सोम इन्महे । इति सर्वानुक्रणीव्याख्याने अस्या अष्टाक्षरपादत्वमुक्तं तथापि तत्रैव पङ्क्तिभेदानां बहुधा उक्तत्वेन विषमाक्षरपादत्वमपि न विरुध्यते इति अवधेयम् ।

पङ्क्तिः। तथा च सूत्रम् - अक्षरपङ्क्तिः पञ्चकाः चत्वारः इति पञ्चाक्षरैः चतुर्भिश्च पादैः उपलक्षिता अक्षरपङ्क्तिर्नाम छन्दो भवति इति सूत्रार्थः)}। ततः पाङ्क्त्वं सर्वस्य। (न केवलं पञ्च-संख्यायोगात् पङ्क्तिच्छन्दःसंपादनम्, यज्ञत्वसंपादनमपि कर्तुं शक्यते इत्याह - पाङ्क्तश्च यज्ञः इति। पत्नी-यजमान-पुत्र-दैव-मानुषवित्तैः पञ्चभिर्योगाद्यज्ञः {पञ्चभिः संपाद्यते इति} पाङ्क्तः इत्यर्थः। दैववित्तम् उपासनं, मानुषवित्तं गवादि इति विभागः।) पाङ्क्तश्च यज्ञः। पङ्क्तिच्छन्दसो यज्ञस्य च पञ्च-संख्यायोगात् पाङ्क्त्वे क्रमेण श्रुतीः दर्शयति - पञ्चाक्षरा इति) "पञ्चाक्षरा पङ्क्तिः" (पा.भेद - पञ्चपदा पङ्क्तिः) तै.सं १.५.२, "पाङ्क्तो यज्ञः" बृ.उप १.४.१७ इति श्रुतेः। (जगतो यज्ञत्वसंपादनमेव दर्शयति - तेनेति) तेन (पञ्चसंख्या-योगलक्षणेन यज्ञसाम्येन इत्यर्थः) यत्सर्वं लोकाद्यात्मान्तं च (प्राणादिमज्जान्तं च इति चकारार्थः) पाङ्क्तं परिकल्पयति (श्रुतिः इति शेषः)। (एवं ब्रह्मोपाधिभूतं सर्वं जगत् पङ्क्तिच्छन्दोरूपं यज्ञरूपं च परिकल्प्य तादृक्पाङ्क्तजगदात्मकं प्रकृतं ब्रह्माहमस्मि इति चिन्तयतः किं फलं भवति इति आकाङ्क्षायाम् आह - तेन यज्ञेन इति। स्थूलसर्वप्रपञ्च-उपाधिकस्य ब्रह्मणः प्रजापतिरूपत्वात् तं यथा यथा उपासते इति न्यायेन जगदात्म-ब्रह्मोपासनाज्जगदात्मानं प्रजापतिमेव प्राप्नोति इत्यर्थः।) तेन यज्ञेन परिकल्पितेन पाङ्क्तात्मकं प्रजापतिमभिसंपद्यते (प्राप्नोति)। (एवं तात्पर्यमुक्त्वा पृथिव्यादिजगतः पञ्चसंख्यायोगात् पाङ्क्तस्वरूपत्वं प्रश्नपूर्वकं श्रुत्या दर्शयति - तत्कथम् इत्यादिना।) तत्कथं पाङ्क्तमिदं सर्वम् (सच्चिदानन्द - कथं पाङ्क्त्वेन परिकल्पयितव्यम् इति) इत्यत आह - ।

Hiranyagarbha was presented as an objec tof meditation as identified with vyahritis. Now of the same Hairanyagarbha, a meditation in the form of a group of five factors beginning with earth is stated. Becasue of the similarity of number five, there is the gaining of the name of the metre called pankti (for this upasanam). All the five factors, thereby, are identified with pankti. And a fire ritual, too, is identified with pankti as supported by the sruti passage:"Pankti has five feet (with five syllables in each); the sacrifice is also called pankta.". Therefore everything commencing from the worlds and ending with Virat that is thought of as Pankti is thus actually regarded as a fire ritual. Through the ritual, imagined as above, one becomes Prajapati who is identified with all that is equated with pankta. How does all this become pankta? The answer follows:

THE SUBJECT MATTER OF THIS ANUVAKA IS MEDITATION OF HIRANYAGARBHA

In this section again we are getting HG *upasana* alone in a different pattern. This is the 4th *upasana* we are getting. This is known as *panktabrahma upasana*. There is no loading here. Brahman is looked upon as in the form various fives. Earlier we saw four four. We have an improvement here. Here the external world is going to be divided into three groups. Each group consisting of five members. Similarly the subjective, the individual is also going to be divided into three groups, each consisting of five members. Thus *samasti* is divided into 3x5 and *vyasti* also divided into 3x5. We are going to see the identity that *samasati* is not different from the *vyasti*. The *samasti* is HG and this HG is divided into groups of five and in Sanskrit the word five is indicated by *panktam* here. Therefore we say, it is *pankta* HG *upasana* otherwise *panktabrahma upasana*. Here we meditate upon Brahma or HG dividing into three groups of five five members. We have *pankta brahma* at the *samasti* level and *pankta jiva* at the *vyasti* and I should meditate *pankta brahma* I am. Because Brahman also has three *panktams* and I also have three *panktams*. *Pankta* means group of five. So *panktam Brahma ahamasami*. Previously we said *mano-maya-rupa brahma ahamamsmi*. Here *panktam brahma ahamasmi*.

What is the significance of the word *pankta*. Normally the word five is translated as *panca*. So why not say *panca*. The word *pankta* is used in *karmakanda* very often to indicate five

factors or a group of five. *Sankara* gives two examples. *Yanja* is often called *pankta* in *karmakanda*. Because an *yanja* normally includes five important factors. Five factors are *yajamana*, one who performs the ritual, *patni* or wife, (without wife *yajna* cannot be done (*Rama* had to make golden Sita to perform ritual), son, *upasanam* or *daivam vittam* (mantra etc. spiritual material got from priests etc.) and *manusham vittam* or money etc. materials. Because they are five, it is called *pankta*. It is only incidental point for the word *pankta*. *Putra* is also necessary for some *yajnas*. So this *upasana* also is called *pankta*. Visualising the fivefold nature in *loka* etc is equivalent to doing *yajna*. So it is called *panktam*.

Sankaracarya gives another example or explanation also. There is a Sanskrit metre called *pankti*, a Vedic metre. (Metre is the rules such as number of letters in a *pada* etc. in which poetry is written) In *sandhayvanadam* we say *gayatri ushnik*...These are important or famous Vedic meters. The fifth one is *pankti*. In enumeration also it is fifth metre. It consists of five letters. *Pancakshara panktih*. A metre which has got five letters is also called *pankti*. A *yajna* which has five factors is called *panktam yajna*. Therefore the student is familiar with the idea of *pankta*. Since this meter has five syllables and called *pankti*, the *upasana* which has five factors is also called *pankta*. Therefore when he hears *panktabrahma upasana*, for the Vedic student it is an attractive thing because he has lot of *karma kanda vasana* in his mind. When a person has got certain *vasana*, habit, the mind will naturally be attracted towards it. Therefore they can become ideal *alambanam*. *Alambanam* should always be popular one or one which is suitable for the student. Like *samhita* in the *samhita upasanam* for a student is fresh from gurukulam. *Vyahriti* also he is used. Student's mind is full of *pankta* thoughts.

बाह्यपाङ्क्तत्रयम्

पृथिवी अन्तरिक्षं {द्यावापृथिव्योः अन्तरालवर्तिलोकः} द्यौः दिशः {प्राची-अवाची-प्रतीची-उदीची-रूपाः} अवान्तरदिशाः {अग्निकोण-नैर्ऋतकोण-वायुकोण-ईशानकोणरूपाः} इति लोकपाङ्क्तम्। अग्निः वायुः आदित्यश्चन्द्रमा नक्षत्राणि इति देवतापाङ्क्तम्। आपः ओषधयो {व्रीह्यवादयः, फलपाकान्ताः मनु.१.४६} वनस्पतयः {वृक्षादिरूपाः। वनस्य पतिः। सुट्। पारस्करप्रभृतीनि संज्ञायाम् ६.१.१५७ एतानि ससुट्कानि निपात्यन्ते।} आकाशः आत्मा इति भूतपाङ्क्तम् आत्मेति विराड् (आप ओषधयः इत्यादिस्थूलभूताधिकाराद् भूतमयो विराड्देह इह आत्मशब्दार्थः इत्यर्थः) भूताधिकारात्। इत्यधिभूतम् इति अधिलोक-अधिदैवतपाङ्क्तद्वय-उपलक्षणार्थम्। (इत्यधिभूतम् इति उपसंहारवचनम् इत्यधिलोकम् इत्यधिदैवतम् इत्येवंरूपयोः अधिलोक-अधिदैवतपाङ्क्तद्वय-उपसंहारवचनयोः उपलक्षणार्थम् इत्यत्र हेतुमाह - लोक-देवता-पाङ्क्तयोश्च इति) लोकदेवता-पाङ्क्तयोश्चाभिहितत्वात् (तयोरपि पूर्वमुक्तत्वाद् इत्यर्थः)।

> The earth, the atmosphere, the heavens, the four main quarters and the four intermediary quarters - these form the five factors concerning the worlds. The fire, the air, the sun, the moon and stars - these constitute the group of five deities. The waters, herbs, trees, the space and Virat - these form the group of five outer things of the world. By the term atma, Virat is meant here because the context here is natural things. The expression - "thus is the meditation related to natural things" is meant to imply the groups of deities and worlds also as the groups of deities and worlds too have been mentioned earlier.

EXTERNAL GROUPS OF FIVE

First the *sruti* talks about the three *panktams* belonging to the total level. What are they? Earth, intermediary space *Bhuvarloka*), heavens (*suvarloka*), the 4 main directions, four intermediary quarters. (NE *Isanya*; NW *Vayavya*; SE *Agneya*; and SW *Nair-rita)* Since the members are called *lokam* in this, So *Sankara* calls this as *lokapanktam*. The second belongs to again *samasti*. They are deities of *agni*, wind, sun, moon and stars (*asvini ityadi devatas* of constellations.). Since all the members are *devatas*, it is called *devata-panktam*. The third one belonging to HG is waters, herbs and shrubs - small plants, trees, space, *atma* (*virat*, the rest of the world, other than the four here mentioned). Here most of the members are *bhutam*. So *bhuta-panktam*. This is objective realm of HG. It is *adhibhutam*, three *panktams* belonging to the *samasti*.

आध्यात्मिकपाङ्क्तत्रयम्

अथ अनन्तरम् {अधिभूतादित्रयपञ्चककथनानन्तरम्} अध्यात्मं {आत्मानं देहादिसंघातमधिकृत्य वर्तमानम् उच्यते} पाङ्क्तत्रयम् उच्यते। {देहमध्यवर्तिनः एव अस्यैव वायोः प्राणादीन् पञ्चवृत्तिभेदान् दर्शयति} प्राणादि वायुपाङ्क्तम् {तेषां च सथानान्युक्तानि हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः। उदानः कण्ठदेशे स्यात् व्यानः सर्वशरीरगः}। चक्षुरादि-इन्द्रियपाङ्क्तम्। चर्मादि[१७२] (धारणात् धातुः) धातुपाङ्क्तम् {स्नावशब्देन नाड्यः अभिधीयन्त। मज्जा अस्थ्यन्तर्गतधातुः}

> Thereafter, the three groups of five each with reference to the individual self is stated. They are those commencing with prana, the function of exhaling, known as group of five on air; those beginning with eye, known as the group of five sense organs and those starting with inner skin, known as the group of five dhatus, essential ingredients of the body.

INTERNAL GROUPS OF FIVE

Now begins the three *panktams* belonging to the *vyasti*, individual. *Prana, vyana, apana, udana and samana* - the respiratory, circulatory, excretory, reversing system, and the digestive. This is known as *prana* or *vayu panktam*. Next is eyes, ears, mind, organ of speech and sense of touch, i.e., skin (outer). This group is *indriya panktam*. belonging to the individual level. Last is inner skin (white coloured), flesh, (in chanting you have gum etc.), muscles or nerves, bone and marrow. These are called *dhatu-panktam*. They sustain the body and so called *dhatu. Sariram abhidhatte iti dhatuh.*

पाङ्क्तोपासनफलम्

(ननु पाङ्क्तषट्ककथनेन कथं सर्वस्य जगतः पाङ्क्त्वम् उक्तम्। तत्राह - एतावद्धीति। यद् बाह्यम् अध्यात्मं च पाङ्क्तं श्रुत्या दर्शितम् एतावदेव इदं सर्वं जगत्, न ततोऽधिकमस्ति इत्यवगन्तव्यम् इत्यर्थः। श्रुतिप्रदर्शितपाङ्क्तषट्के कृत्स्नस्य जगतोऽन्तर्भावः प्रसिद्ध इति हि-शब्दार्थः।) एतावद्धीदं सर्वमध्यात्मम् बाह्यं च पाङ्क्तमेव इति। (उपासनाविधिं दर्शयति - एतदेवमिति। एतत् जगद् एवं पाङ्क्तरूपेण इत्यर्थः।) एतद् (सच्चिदानन्द - एतदिति क्रियाविशेषणम् एवमित्यनेन व्याख्यातम्। एतत् = एवम्। सर्वं पाङ्क्तमेव इत्यर्थः।) एवम् अधिविधाय परिकल्प्य ऋषिः = वेदः (Veda) or एतद्दर्शनसंपन्नो वा (साक्षात्कारवान्) कश्चिदृषिः {ऋषति जानाति प्राप्नोति सर्वान् मन्त्रान् ज्ञानेन - अतीन्द्रियस्य वेदार्थस्य द्रष्टा - ऋष्+ ऋगुपधात् कित् उणादि ४.१२१ इति इन् किच्च। ऋषी गतौ तुदादि प.पद } अवोचत् उक्तवान् (उक्तवान् इत्यस्य इति-शब्देन संबन्धः)। किमित्याह - पाङ्क्तं वा इदं सर्वम्। पाङ्क्तेनैव आध्यात्मिकेन संख्यासामान्यात् (आध्यात्मिकमपि पाङ्क्तत्रयं बाह्यमपि पाङ्क्तत्रयम् इति अस्मात् सामान्याद् आध्यात्मिकेन पाङ्क्तेन बाह्यपाङ्क्तस्य पूरणम् इत्यर्थः।) पाङ्क्तं बाह्यं स्पृणोति बलयति पूरयति। (ननु तेन तस्य पूरणं कुसूलादेरिव granary or storehouse धान्यादिना न संभवति इत्याशङ्क्याह - एकात्मतया इति। बाह्यम् आध्यात्मिकं च सर्वं पाङ्क्तजातम् एकात्मत्वेन उपलभते,

[१७२] यद्यपि रसादयो धातवः सप्त इति वैद्यशास्त्रप्रसिद्धः तथापि चर्मादयः शरीरस्य धारणात् धातवः उच्यन्ते । (सच्चिदानन्द)

पाङ्क्तजगदात्मकं ब्रह्माहमस्मीति चिन्तयेद् इति उक्तवानिति यावत्।) एकात्मतया उपलभते इति (सच्चिदानन्द - आध्यात्मिकेन एकात्मतया उपलभते न आध्यात्मिकाद् व्यतिरिक्तं ब्ह्यम पङ्क्तम् इत्येतत् साक्षात्कुरुते इत्यर्थः)। (एतदधिविधाय इत्यादिना उक्तम् उपासनम् अनूद्य तस्य फलम् उपक्रमे कथितमित्याह - एतदेवमिति) एतद् एवं पाङ्क्तम् इदं सर्वम् इति यो वेद (मणिप्रभा - पाङ्क्तात्मकजगद्विशिष्टं ब्रह्म ध्येयम् इति तत्पर्यम्) स प्रजापत्यात्मा एव भवति इत्यर्थः।

> This much indeed is all that pertains to the individual self. as well as the external world which are five-fold. Having visualised these thus, the Vedas or some sage endowed with this vision said. What? That is being said: All this is constituted by five factors. Through the fivefold ones relating to the individual self may one strengthen, fill up the fivefold ones pertaining to the external world. That is to say, may them be realised as one. The meaning is that he who realises all this that exists as fivefold ones becomes established in Prajapati.

THE UPASANA ENJOINED

The teacher is going to ask you to meditate the *samasti* on the *vyasti*. *Etat*+ After visualising everything as fivefold and teaching these six *panktams*, (*adhividhya* = teaching), the teacher whose name is not known or Veda, said the following: Everything in the creation is five-fold, whether you take total or individual, (whether macro or micro) everything is inter connected. So with the help of the *vyasti panktam,* one should meditate upon the *samsmti pantka*, The first *pankta* is *vyasti* and the second is *samasti*. *Sprunati* means should meditate. The *vyasti-panktam* becomes the *alambanam* and the *samastipantam* is *upasyam*. I become the *alambanam* for *samasti*. I the *vyasti* am identical with HG, the total. (because the *samanya* of numerical sameness.) I am HG *iti upasnam*. This is training for the knowledge.

THE RESULT OF UPASANA

What is the result. It is not mentioned. We have to supply. Oneness with HG is the *phalam*. So there are many ways of reaching *Brahmalokam*. The *upasana* can be performed in two ways. One is *sakamarupena* and *nishkamarupena*. HG *phalam* is only for *sakama-upasanam*. The *upanishad* is giving *phalam* for *sakamaupasanam* alone. *Nishkama-upasana phalam* is *cittasuddhi* and *naiscalya*. Another is expansion of the mind in HG *upasanas*. This *phalam* is not possible if we meditate on a given form. Mind will develop only concentration. My *Rama* is 5 feet idol only. *Istadevata* should become *samasti*. Here all *upasanas* are *samasti* ones. We never has time to look into sky and all. In the case of other *upasanas* like idol and picture, you have to go to puja room and all. Here, you can do it any time while waiting for bus etc.

EIGHTH ANUVAKA BHASHYAM

ओङ्कारोपासनम्

संबन्ध-भाष्यम्

४९) व्याहृत्यात्मनो ब्रह्मणः उपासनमुक्तम्। अनन्तरं च पाष्ट-स्वरूपेण तस्यैव उपासनमुक्तम्। इदानीं सर्वोपासनाङ्ग-भूतस्य ओङ्कारस्य उपासनं विधित्स्यते। परापर-ब्रह्म-दृष्ट्या हि उपास्यमानः ओङ्कारः, शब्दमात्रोऽपि परापर-ब्रह्म-प्राप्ति-साधनं भवति। स हि आलम्बनं ब्रह्मणः परस्य अपरस्य च। प्रतिमा इव विष्णोः। "एतेनैवायतनेन एकतरमन्वेति (प्र.उप. ५.२)" इति श्रुतेः।।

ओङ्कारोपासना-विधिः

५०) **ओमिति**। इति-शब्दः स्वरूप-परिच्छेदार्थः। ॐ इत्येतत् शब्द-रूपं **ब्रह्म** इति मनसा धारयेद् उपासीत। यतः **ओमितीदं सर्वम्**। सर्वं हि शब्द-रूपम्[173] ओङ्कारेण व्याप्तम्। "तद्यथा शङ्कुना (छा.उप. २.२३.३)" इति श्रुत्यन्तरात्। 'अभिधान-तन्त्रं हि अभिधेयम्' इति अतः इदं सर्वम् ओङ्कारः इत्युच्यते।

ओङ्कार-स्तुतिः

५१) ओङ्कार-स्तुत्यर्थम् उत्तरो ग्रन्थः, उपास्यत्वात् तस्य। **ओमित्येतद् अनुकृतिः** अनुकरणम्। 'करोमि', 'यास्यामि च' इति कृतम् उक्तम् 'ॐ' इति अनुकरोत्यन्यः। अतः ओङ्कारः अनुकृतिः। **ह स्म वै** इति प्रसिद्धावद्योतकाः[174]। प्रसिद्धं हि ओङ्कारस्य अनुकृतित्वम्। **अपि** च **'ओ श्रावय' इति** प्रैषपूर्वकम् **आश्रावयन्ति** प्रतिश्रावयन्ति। तथा **ओमिति सामानि गायन्ति** सामगाः। **ओं शोम् इति शस्त्राणि शंसन्ति** शस्त्रशंसितारोऽपि। तथा **ओमिति अध्वर्युः प्रतिगरं प्रतिगृणाति**। **ओमिति ब्रह्मा प्रसौति** अनुजानाति प्रैषपूर्वकमाश्रावयति। **ओमिति अग्निहोत्रम् अनुजानाति**। जुहोमि इत्युक्ते 'ॐ' इत्येव अनुज्ञां प्रयच्छति। **ओमिति** एव **ब्राह्मणः प्रवक्ष्यन्** प्रवचनं करिष्यन् अध्येष्यमाणः 'ॐ' इत्येव **आह**। 'ॐ' इति प्रतिपद्यते अध्येतुम् इत्यर्थः। **ब्रह्म** वेदम् **उपाप्नवानि** इति प्राप्नुयां ग्रहीष्यामि **इति**। **उपाप्नोति एव ब्रह्म**। अथवा, ब्रह्म परमात्मानम् उपाप्नवानि इति आत्मानं प्रवक्ष्यन् प्रापयिष्यन् 'ॐ' इत्येव आह। स च तेन ओङ्कारेण ब्रह्म प्राप्नोति[175] एव। ओङ्कारपूर्वं प्रवृत्तानां क्रियाणां फलवत्वं यस्मात्, तस्मात् 'ओङ्कारं ब्रह्म' इति उपासीत इति वाक्यार्थः।।

(इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषत्-शीक्षावल्ली-भाष्ये अष्टमोऽनुवाकः)।।

---

[173] पा.भे - शब्दस्वरूपमिति।

[174] पा.भे - प्रसिद्धार्थावद्योतकाः इति।

[175] पा.भे - उपाप्नोति एव इति आनन्दाश्रमः।

EIGHTH ANUVAKA

ओङ्कारोपासनम्

ओमिति ब्रह्म । ओमितीदं सर्वम् । ओमित्येतदनुकृति ह स्म वा अप्यो श्रावयेत्याश्रावयन्ति । ओमिति सामानि गायन्ति । ओंशोमिति शस्त्राणि शंसन्ति । ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति । ओमिति ब्रह्मा प्रसौति । ओमित्यग्निहोत्रमनुजानाति । ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति। ब्रह्मैवोपाप्नोति ।

ओमिति - upon Omkara; (उपासीत) ब्रह्म - one should meditate on Hiranyagarbha; ओमिति - symbolised by Omkara alone; इदम् सर्वम् - because, all this is; ओमिति एतत् - this Om; अनुकृतिः - an expression of concurrence; ह स्म वै - is indeed; अपि - more over; ओ श्रावय - "Om, you inform the gods"; इति - thus; आश्रावयन्ति - the priests direct the assitants to recite; ओमिति - after uttering Om; सामानि - the Sama-mantra; गायन्ति - the Samaveda-priest chants; ओम् शोम् - Om Som; इति - after uttering; शस्त्राणि - the Rg-mantra; शंसन्ति - the Rgveda-priest chants; ओमिति - by uttering Om; अध्वर्युः - the Yajurveda-priest; प्रतिगरं - his permission; प्रतिगृणाति - expresses; ओमिति - after uttering Om; ब्रह्मा - the Atharvanaveda-priest; प्रसौति - commands the others; ओमिति - by uttering Om; अग्निहोत्रम् - (to do) the agnihotra-ritual; अनुजानाति - the priest permits (the ritualists); ओमिति - Om; ब्राह्मणः - the brahmins; प्रवक्ष्यन् - desiring to learn Vedas; आह - utter; ब्रह्म अपाप्नवानि - "Let me attain Vedic knowledge"; इति - with the intention; ब्रह्म - Vedic knowledge; उपाप्नोति एव - he certainly attains;

One should meditate on Hiranyagarbha upon Omkara because all this is symbolised by Omkara alone. This Om is indeed an expression of concurrence. More over, the priests direct the assistant thus: "Om, you inform the gods." The Samaveda-priest chants the Sama mantra after uttering Om. The Rgveda-priest chants the Rg-mantra after uttering Om Som. The Yajurveda-priest expresses his permission by uttering Om. The Atharvanaveda-priest commands the others after uttering Om. The priest permits the ritualists to do the agnihotra-ritual by uttering Om. Desiring to learn Vedas, the brahmins utter Om with the intention - "Let me attain Vedic knowledge". He certainly attains Vedic Knowledge.

मणिप्रभा

ओङ्कारः परमात्मनो वाचकः। ओम् इति आकारमक्षरं ब्रह्म परापरब्रह्मस्वरूपमिति ध्यायोत्। ओम् इति आकारमक्षरं इदं विविधप्रतीतिगोचरं सर्वं चराचररूपं निखिलं जगदस्ति इति शेषः। सर्वं हि शब्दजातम् ओङ्कारेण व्याप्तम्, अभिधेयस्य च अभिधानाधीनसिद्धिकत्वात् अभिधेयस्य अभिधाने अन्तर्भावः सम्भवति इति ओङ्कारस्य सर्वात्मकत्वमिति भावः। ओङ्कारं स्तुवन् ओमः सर्वसंबन्धं केषुचिद् वैदिकव्यावहारेषु उदाहृत्य दर्शयति - ओमित्येतत्। ओम् इति आकारमक्षरम् एतदनुकृतिः अनुज्ञा। ह स्म

वा इति त्रयो निपाताः प्रसिद्धद्योतकाः। प्रसिद्धं हि लोके यथा केनचित् करोमि इत्युक्ते अन्यः ओमिति अनुज्ञां करोति। अप्योश्रावय, अपिशब्दः वक्ष्यमाण-उदाहरणसमुच्चयार्थः। ओकारो अग्नीध्रसम्बोधनार्थः। तथा चोक्तं वेदभाष्ये - मन्त्रगत ओकारोऽगनीध्रसम्बोधनार्थ इति। हे आग्नीध्र देवान् प्रति हविःप्रदानावसरे श्रावय अस्मभ्यं श्रवणं कारय इति मन्त्रार्थः। इति एवमुक्ते सति आश्रावयन्ति आश्रवणं कारयन्ति। तथा ओमिति ओम् इति आकारमक्षरम् उच्चार्य सामानि गीतिविशिष्टाः ऋचः गायन्ति सामगाः उद्गातारः इति शेषः। बह्वृचा होतारोऽपि वयं किं शंसनं कुर्म इत्यर्थकं "शोंसावोऽम्" इति मन्त्ररूपशस्त्राणि गीतिरहिता ऋचः शंसति पठन्ति। अध्वर्युः यजुःकर्मकर्त्ता ओमिति प्रणवमुच्चार्य प्रतिगरम् "ओथामोद इव" इति मन्त्रं प्रतिगृणाति प्रयुङ्क्ते ओकारेण होता सम्बोध्यते। हे होता अथ अर्धर्चः शंसनानन्तरम् आमोद इव अस्माकं हर्ष इव सम्पन्नम् इति मन्त्रार्थः। ओमिति ओम् इति आकारकं प्रणवम् उच्चार्य ब्रह्मा ऋत्विग्विशेषः प्रसौति प्रसवकर्म करोति। सर्वकर्मणाम् अनुज्ञादानं प्रसवकर्म। यथा प्रोक्षेत्येवं प्रोक्षणे प्रेरयति। अग्निहोत्रम् अहं जुहोमि इत्युक्ते सति ओमिति ओमित्युच्चारणेन अनुजानाति। अग्निहोत्रकरण-अनुज्ञां प्रयच्छति इत्यर्थः। ब्राह्मणः द्विजः प्रवक्ष्यन् अध्ययनं करिष्यन् ओमिति प्रणवम् आह अध्ययनादौ वक्ति इत्यर्थः। ब्रह्मोपाप्नवानि अहं ब्रह्म प्राप्नोमि इति एवं यः कामयते सोऽपि तदुपासनेन ब्रह्म परमपरं वा उपाप्नोति एव। तस्माद् ओङ्कारं ब्रह्म इति उपासीत इति वाक्यार्थः। यद्यपि ओश्रावय, ओथामोद इव इत्यादिषु मकारो नास्ति तथापि ओङ्कार-एकदेशत्वाद् ओङ्कार एव इति बोध्यम्।

संबन्ध-भाष्य - अनुवाकविषयः

(उत्तरानुवाकस्य संगतिं वृत्तानुवादपूर्वकं दर्शयति - व्याहृत्यात्मनः इति) व्याहृत्यात्मनो ब्रह्मण उपासनमुक्तम्। अनन्तरं (अव्यवहितपूर्व-अनुवाकः इत्यर्थः) च पाङ्क्तस्वरूपेण तस्यैव उपासनमुक्तम्। इदानीं (उक्तवक्ष्यमाणसर्वोपासनानां कर्मणां चाङ्गभूतो य ओङ्कारः तस्य उपासनम् इदानीं विधीयते। तथा च पूर्वोक्त-उपासनेषु अङ्गत्वेन उपस्थितस्य प्रणवस्य अत्र उपासनविधानात् संगतिरिति भावः। न च ओङ्कारस्य सर्ववैदिककर्म-उपासनाङ्गत्वे मानाभाव इति वाच्यम्। तस्मादोमित्युदाहृत्य यज्ञदानतपक्रियाः प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्। इति भगवद्वचनस्यैव मानत्वात्।) सर्वोपासन-अङ्गभूतस्य[१७६] ओङ्कारस्य उपासनं विधित्स्यते। (ननु शब्दमात्ररूपस्य ओङ्कारस्य अचेतनतया फलदातृत्व-असम्भवात् कथम् उपास्यत्वम् इत्याशङ्क्याह - परापरब्रह्मदृष्ट्या इति। प्रतिमाद्यर्चन इव ब्रह्मैव फलदात्री इति भावः।) परापरब्रह्मदृष्ट्या हि (ब्रह्मणः एव सर्वत्र फलदातृत्वम् फलमत उपपत्तेः इत्यधिकरणे प्रसिद्धमिति द्योतनार्थः दृष्ट्या हि इत्यत्र हि-शब्दः।) उपास्यमानः ओङ्कारः, शब्दमात्रोपि परापरब्रह्मप्राप्तिसाधनं भवति। प्रणवस्य परापरब्रह्मदृष्ट्यालम्बनत्वं प्रसिद्धमिति सदृष्टान्तमाह - स हि इति) स हि आलम्बनं ब्रह्मणः परस्यापरस्य च प्रतिमेव विष्णोः। (प्रणवस्य परापरब्रह्म-दृष्ट्यालम्बनत्वे तद्दृष्ट्या उपासितस्य तस्य परापरप्राप्तिसाधनत्वे च श्रुतिमाह - एतेनैव इति) "एतेनैवायतनेन एकतरमन्वेति" (प्र.उ. ५.२) इति श्रुतेः (ओङ्कारेणैव आयतनेन प्राप्तिसाधनेन परमपरं वा प्राप्नोति इत्यर्थः)।

The meditation on Brahman as identified with the vyahritis was said. Thereafter a meditation on the same Brahman in the form of five-fold universe. Now a meditation is enjoined on Om which is a part of all upasanas. Om is meditated either with the idea of supreme Brahman or of Hiranyagarbha and accordingly it becomes a means for the attainment of either supreme Brahman or Hiranyagarbha, even though it is a mere sound. Om indeed is a symbol for both Brahman and Hiranyagarbha just as an image is

[१७६] परापरोपासनाङ्गभूतस्य । बृ.भा ५.१.१ (अवतरणिका) द्रष्टव्या । (सच्चिदानन्द)

for Vishnu. There is a sruti statement in this respect : "One becomes united with either of the two with the help of this abode, symbol."

ओङ्कारोपासनाविधिः

$ इति। (एवं तात्पर्यमुक्त्वा अक्षराणि व्याचष्टे - इति इत्यादिना)। इति-शब्दः स्वरूप-परिच्छेदार्थः (संग्रहार्थः इत्यर्थः।) (सच्चिदानन्द - अर्थरूपाद् व्यावर्त्य शब्दरूपं समर्पयितुम्)। $ इत्येतत् शब्दरूपं ब्रह्म इति मनसा धारयेत्। (ओङ्कारस्य परापरब्रह्मदृष्ट्यालम्बनत्वेन श्रुतिषु प्रसिद्धत्वेऽपि प्रकृते मुख्यत्वात् परब्रह्मदृष्टिरेव ओङ्कारे विवक्षिता इति मत्वा तत्र ब्रह्मदृष्ट्यध्यासे किं सादृश्यम् इत्याकाङ्क्षायाम् आह - यतः इति। यतः ओङ्कारः सर्वात्मकः ततः सर्वात्मकत्वसादृश्याद् ओङ्कारे सर्वात्मकब्रह्मदृष्टिः युक्ता इति भावः।) यतः $ इतीदं सर्वम् । (ननु ब्रह्मणः सर्वात्मकत्वं सर्वं खल्विदं ब्रह्म इत्यादिश्रुतिसिद्धम्। ओङ्कारस्य तु कथं सार्वात्म्यम् इति इत्याशङ्क्याह - सर्वं हि इति) सर्वं हि शब्दस्वरूपम् ओङ्कारेण व्याप्तम्। "तद्यथा शङ्कुना" इति[१७७] श्रुत्यन्तरात् छा.२.२३.३। (ननु ओङ्कारस्य सर्वशब्दात्मकत्वेऽपि कथमर्थ-प्रपञ्चात्मकत्वम् इत्याशङ्क्य शब्दद्वारा इत्याह - अभिधानतन्त्रम् इति। अभिधेयजातस्य अभिधानाधीन-सिद्धिकत्वात् वाच्यवाचकयोः तादात्म्यस्वीकारात् च अभिधेयजातस्य अभिधाने अन्तर्भावः सम्भवति इत्यर्थः।) अभिधानतन्त्रं हि अभिधेयम् इति (प्रणवसार्वात्म्यस्यापि श्रुत्यादिसिद्धत्वात् इदं सरवमोङ्कार इति प्रसिद्धवदुपदिश्यते ओमितीदं सर्वमिति वचसा इत्यर्थः) अतः इदं सर्वमोङ्कार इत्युच्यते[१७८] ।

The word iti is sued for identifying the word Om as such (diverting from its meaning). May one meditate on the word Om as Brahman in the mind. For Om is all this. All words are pervaded by Om. There is another sruti to support this fact: "As by the fibres, the leaves are pervaded (so by Om all speech is pervaded)." Since all that is indicated by name is dependent on the names, it is said that all this is Om.

Two *bheda* and one *abheda upasanams* were given. *Pankta* also *abheda upasana* as the *pankta-trayatmaka* individual is *alambanam* for the *upasanam* on *Hiranyagarbha* who is also *pankta-trayatmaka*. So it is also *ahamgraha upasanam* only. Here also *upasana* is HG *upasana*. *Alambanam* here is *Om*. So it is called *Omkara-alambana-HG-upasana*. It is also called *pratika-upasana*. This is fourth one. This is taken as *Isvara Upasana* by some. What is the difference between HG and *Isvara*? *Isvara* is *samasti-karanasarira-sahita caitanyam*. Or *maya-upahita caitanyam*. Both are okay. *Om* can be *alambana* for both. They are called *Karya Brahman* and *Karana Brahman*. Here it is not *nirguna Brahman*.

Meditation upon *saguna brahman* was told. What kind? Brahman in the form of *vyahriti*. Thereafter, in the form of five-fold way. Now, that which is in the form an *anga* in all *upasanas*, which is Om, its *upasana* is enjoined. Without Om you don't start a karma. It is prevalent in all rituals. All means mostly in all. Why? Because, Om that is meditated upon, as Brahman, with the vision of visualising it as Brahman. What kind of Brahman? Both as *para* and *apara*. *Saguna* and *nirguna*. Om can stand for both. Om when we say, it has three letters which stand for manifest and unmanifest world. ("a" for manifest physical world and u for manifest subtle world and m for unmanifest). The *amatra* or silence stand for *param*

[१७७] यथा शङ्कुना पर्णनालेन सर्वाणि पत्रावयवजातानि व्याप्तानि एवम् ओङ्कारेण सर्वं शब्दजातं व्याप्तम् इति छान्दोग्यश्रुतेः अर्थः । (सच्चिदानन्द)

[१७८] ओङ्कारो हि सर्ववाचकः । तदवयवभूतेन अकारेण सर्वशब्दानां व्याप्तत्वात् सर्वस्यापि अभिधेयभूतस्य ओङ्कारवाच्यत्वम्। अभिधानवशेन ह्यभिधेयं प्रकाश्यते इति अभिधानभूत ओङ्कारः सर्वम् इत्युक्तम्। (सच्चिदानन्द)

Brahman. From where Om arises and where it resolves is *amatra* or Brahman. Others are one one *matra*. Thus both *drishti* we can have. So it is means for gaining both though it is mere sound. It is *alambanam* for Brahman, *pratika* or symbol. Like Vishnu on *saligrama*. By this Om which is a symbol, one can gain either of the two - is Sruti.

OM IS BRAHMAN

Om *iti* - in this *iti* is to separate Om and distinguish it. We are not taking *artha* here but the word Om is intended here. The word involves two things. The word called table and the object called table are there. *Saligrama* is *alambana*, when I say, I mean the stone *saligrama*, and not the word *saligrama*. Here also the question comes, are we indicating the word or *artha*. The word Om is *alambanam* here. That is done by *iti*. We have to supply "meditate" after Om *iti*. May you meditate Om as Brahman because Om is all this. All words are pervaded by Om meaning the *vacyam* Brahman pervades everything i.e., the meaning of Om, *abhidheyam* . Om is name and Brahman is *vastu*. All names are pervaded by Om. All *rupas* are pervaded by *Om-sabda-artha* i.e., Brahman. Om is a very good set-up. All forms are bound to name and so all this are Om. The word pot is *abhidhana*. More than the word what is there? Form. Is it an object? Object is clay. There is no object for word pot. So too with clay also which is *abhidhanam*. Object is dependent only on name. Final thing is Brahman which alone is *abhidheya*. So Om alone has got *abhidheya* i.e., Brahman. All *abhidhanas* are nothing but Om All names are words. All words are letters. All letters are but sounds. All sounds are but a and m. (between these two sounds). The section that follows is for praise of Om. Because it is object of meditation. *Upasyam* is to be understood. For understanding sake, *upasya* is explained or described. That also becomes object of praise. Because it is to be meditated. (here Om is *pratika alambanam*. Forms are *pratima alambanam*.)

Generally *alambanam* and *upasyam* should have some similarity. Why it is? If it is there, the moment I see the *alambanam*, because of similarity my mind will easily go to *upasyam* by the law of association. If two names are similar, you go that person mentally. Or by similarity mind travels. That is why we generally take noble things as *alambanam*. Cow is taken for worship. Because it is gentle, giving and helpful etc. Mother is worshipped. Because she stands for love and protection. If you want to say someone is fat, you say potato or pumpkin. If lean, say like beans or drumstick. The more common the characters are between *alambanam* and *upasyam*, the more easy to meditate. So what is the similarity here? The answer is Om includes all the words in the world (the logic is it has a, u, m and a is basic, effortless sound and the final sound is m and the rest are in between them and they are rounded off by u. So Om + entire alphabet in any language. Words = combination of letters.) and so it stands for all names. It is *sarvapada vyapakam*. And HG includes all the forms or objects. Om is *sarvapadatmakas*. HG is *padarthatmaka*. The word *Rama* conveys only one *padartha*. Om conveys all *padarthas* by conveying all *padas*.

ओङ्कारस्तुतिः

(ननु प्रथमवाक्येन प्रणवे ब्रह्मदृष्टिः विहिता तत्र दृष्टिकरणे नियामकं द्वितीयवाक्येन दर्शितम्, अतो विवक्षितार्थस्य सिद्धत्वात् किमुत्तरग्रन्थेन इत्याशङ्क्य आह - ओङ्कार इति) ओङ्कारस्तुत्यर्थम् उत्तरो ग्रन्थः उपास्यत्वात्तस्य। $ इत्येतद् अनुकृतिः अनुकरणम् (अनुज्ञारूपमिति यावत्)। (केनचित् करोमि

इत्युक्त्वा कृतं कर्म अन्यः ओमिति अनुकरोति अनुजानाति, तथा यास्यामि विष्णवालयमित्युक्तम् अन्यः ओमिति अनुकरोति इति योजना।) **"करोमि" "यास्यामि"** वा इति कृतम् (गोविन्दानन्द - कृतम् अनुकरोति इति अन्वयः। कृतमित्येतदेव व्याचष्टे - उक्तमिति। करोमि, यास्यामि च इति इति शिष्यादिना उक्तम् आचार्यादिः ओमित्येव अनुकरोति।) उक्तम् $ इति अनुकरोत्यन्यः अतः ओङ्कारः अनुकृतिः। ह स्म वै इति प्रसिद्ध-अवद्योतकाः। (प्रसिद्धिश्च करोमि इत्यादिना पूर्वं प्रदर्शिता एव) प्रसिद्धं हि ओङ्कारस्य अनुकृतित्वम्। (अप्योश्रावयेत्यत्र अपि-शब्दः वक्ष्यमाण-उदाहरण-समुच्चयार्थः इति मत्वा आह - अपि चेति) अपि च "ओ श्रावय" इति प्रैषपूर्वकम् (ओ श्रावय इति मन्त्रगतेन ओकारेण आग्नीध्रसंबोधनपूर्वकम् इत्यर्थः। तदुक्तं वेदभाष्ये - मन्त्रगतओकारः आग्नीध्रसंबोधनार्थः। हे आग्नीध्र (अग्निम् आदधाति इति, one who kindles the fire, ब्रह्मा इत्यपि उच्यते) देवान्प्रति हविःप्रदानावसरं श्रावय इति मन्त्रार्थः) आश्रावयन्ति (आश्रावयन्ति इत्यस्य अर्थमाह - प्रति इति। प्रतिश्रवं कारयन्ति, प्रत्याश्रवणं कारयन्ति इति यावत्) प्रतिश्रावयन्ति। तथा $ इति सामानि गायन्ति सामगाः।

> The later text is for the praise of Om, for it is to be meditated upon. Om is the word of concurrence (lit. imitation). When someone says "I shall do so" "I shall go, the other person approves the act or speech by uttering Om. Therefore Om is the word of compliance. The particles ha sma and vai reveal the well known status of something. Om indeed is a well known word for concurrence. Moreover with the words of direction, "O recite", they make them recite accordingly. Similarly, uttering Om, the saman chanters start singing the samans.

[सायन भाष्यम्]

दर्शपूर्णमासादियागेषु यजुर्वेदोक्तकर्मानुष्ठायिनः अध्वर्यवः यस्मिन्काले आग्नीध्रं प्रति आश्रावय इति प्रैषमन्त्रं प्रयुञ्जते तदानीम् ओ श्रावय इति मन्त्रं पठन्ति। अत एव आपस्तम्ब आकारादिम् ओकारादिम् ओङ्कारादिं च तं मन्त्रं विकल्पेन उदजहार - आ श्रावय ओ श्रावय ओं श्रावय इति श्रावयति। तेषु पक्षेषु द्वितीय ओकारादिपक्षोऽत्र श्रुत्या उदाहृतः। मन्त्रगत ओकारः आग्नीध्रसंबोधनार्थः। हे आग्नीध्र देवान्प्रति हविःप्रदानावसरं श्रावय (inform) इति मन्त्रार्थः। तस्मिन् मन्त्रे यदेतदोकार-उच्चारणं तदेतदोमित्येतदनुकृति भवति। प्रणवे मकारात् पूर्वभागरूपो य ओकारस्तस्य अनुकृतिः अनुकरणं सादृश्यसंपादनं तद्यस्मिन् उच्चारणे तदुदम् ओमित्येतदनुकृति। प्रसिद्द्योतनार्था ह स्म वा इति त्रयो निपाताः। प्रणवभागसादृश्यम् ओकारे प्रसिद्धम् इत्यर्थः। अपि-शब्दः वक्ष्यमाण-उदाहरण-समुच्चयार्थः। अध्वर्यवः अपि ओकारेण प्रणवभागेनैव आश्रावयन्ति। तथा सामगाः उद्गातारः अपि प्रणवोच्चारणपुरस्सरमेव सामगानं कुर्वन्ति।

> The sruti proceeds to show that the syllable Om is related to all things, by citing a few instances connected with Vedic ritual. In the darsa (new moon) and the purnamasa (full moon) and other sacrificial rituals - when the Adhvaryus i.e., the priests who perform the acts enjoined in the Yajur Veda, have to address a command to the Agnidhra, they utter the mantra "sravaya". Apastamba says that this command may begin with "a" or "o" or "Om" . The second alternative has been adopted by the Sruti here. The "o" in the mantra is intended to address the Agnidhra. So the mantra means." O Agnidhra! inform the gods that an oblation is about to be offered." The syllable "o" in the mantra is similar to Om. The word command "O Sravaya" resembles Om, in so far as "o" occurs in both, and every body knows also that "o" resembles a part of the Pranava. Thus the Adhvaryus give their direction by means of "o" which is only a part of Om. So also, the saman-chanters, the Udgatrs, chant their samans after uttering the Pranava.

GLORIFICATION OF OM

There is glorification of Om now. Because *omkara upasana* is prescribed so it is praised. Then alone there will be interest in the *upasana* for *upasakas*. Like to say buy this object, I have to give a sales talk and praise it. It will go within a minute. *Omkara* should be known as glorious thing to develop attraction in *upasaka*. . Om is every where *iti* it is praised. Further it is said, it is used everywhere in Vedic life - in all three *kandas*. Puranic names not in Vedanta

and Vedantic terms not in *puranas*, like *jagallakshana* etc. Right from the karma *kanda* it is there. In rituals it is widely used. In *upasana* of course it is used as *pratika alambanam*. It is used in Vedanta for *turiya* Brahma *jnana* which we will seeing in *Mandukya* where *omkara* is analysed and *atma janam* is attained.

When you call someone you say Om. When you answer someone you say Om. When you agree for something, you say Om. Are you coming? Om. Om is hence called *anukriti* or approval. ha etc. are reminders of the *prasiddhi* or fame they enjoy for concurrence. Where it is *prasiddham*? In Vaidika world or *yagasala*. *Karmakanda* is full of rituals. There it is there. Om is invoking the grace of *Isvara*.

Now *karmakanda* context is given. The word Om has got the meaning of permission.. Like in okay. It is probably from Om. *ha sma vai* is to indicate famous. In regional languages also we use. O I will go. In rituals, when ever he wants to do some action, he asks for permission from head priest. He says Om

In any big ritual, there are priests from all Vedas. *Rgvedi* takes the job of offering oblations. He is therefore called *hota*. *Yajurvedi* priest conducts whole affairs, who knows the methodology of performing the ritual such as which *devata* is to be invoked, what mantra is to be chanted etc. who will be guiding the *hota* in doing the offering. He is called *adhvaryu*. He will say to *hota*, you do this, you do that etc. *Samavedi's* job is to sing the glories of *devatas*. Whenever an *ahuti* is to be given, the *devata* has to be invoked and invited and praised. He does it. *Samavedi* becomes important for that moment. We have *suktams* for all *devatas* like *Indrasuktam*, *Varunasuktam* etc. He is called *Udgata*. The name shows he is singer in high pitch. The *Atharvanavedi* priest who is supposed to be expert in all the Vedas and supervise the whole *yajna*. He must be greatly learned. He must be knowing the functions of all the other three. Like an umpire. He must know everything happening in the field. From the moment bowler starts his running to see whether he oversteps till it comes back to him and at the same time keep count of the number balls bowled. If anything goes wrong, what is the *prayascitta*, that also he should know. (small to big *prayascittas* are prescribed like some *japas* to giving the entire wealth in *dkashina*.) He is called Brahma. He himself does not do anything.

Om *sravaya* has become o *sravaya*. O refers to Om alone. *Agnidhra* is a priest who kindles fire. *Praisha-purvakam* means *sambodhana-purvakam*. This is in the context of a ritual when *devatas* have to be invited for receiving their *ahutis*. At that time, priests of Rg Veda and Sama Veda have to come and sing in praise of those respective *devatas*. So the main priest will have to ask them to make the *devatas* listen to those mantras. Mantras are not for local people to hear. They are to make the *devatas* here. When such commandment is to be given, he says O *sravaya*. *Sravaya* means make the *devatas* listen. i.e., sing for the *devatas*. *Srunoti* is to hear. *Sravayati* make one listen. *Sama* Veda is always to be sung in high pitch. *Sama* Vedis have wonderful throat. It has to be heard by *devatas*. So they sing high pitch. Here O means Om. *Samavedis* also sing after getting permission from the head priest through Om and they also sing *Sama* Veda after uttering Om. *Gayanti* requires *prathamanta* plural. Whether subject or object you do not know. Neuter has advantage and disadvantage. *Omkara sabda uccaranam* itself is *mangalam*.

$ शोमिति शस्त्राणि (आ.गिरि - गीतिरहिता ऋच उच्यन्ते) शंसन्ति शस्त्रशंसितारोऽपि (शस्त्रशंसितारः होतारः तेऽपि शों सावोम् इति उपक्रम्य शस्त्राणि शंसन्ति, तानि ओमिति समापयन्ति च इत्यर्थः)। तथा $ इति

अध्वर्युः प्रतिगरं {प्रतिगीर्यते प्रत्युच्चार्यते इति प्रतिगरः - assent} (ओऽथामोद इव इति मन्त्रम् इत्यर्थः। ओकारेण होता संबोध्यते। हे होतः अथ अर्धर्चशंसनानन्तरम् अस्माकम् आमोद इव हर्ष एव सम्पन्न इति तदर्थः) प्रतिगृणाति (गृ शब्दे ९ प.प.) (आ.गिरि - होतुः शंसनं प्रति, प्रतिशंसनम् उच्चारयति इत्यर्थः।)। $ इति ब्रह्मा (ऋत्विग्-विशेषः ब्रह्मा यदा अन्येषाम् ऋत्विजाम् अनुज्ञां प्रयच्छति तदा ओं प्रोक्ष इत्यादिरूपेण प्रणवपुरस्सरमेव प्रसौति)। ({प्रसौति इत्यस्य} तस्यार्थमाह - अनुजानाति इति। जुहोमि इत्युक्तवन्तं प्रति अन्यः ओमित्येव अनुज्ञां प्रयच्छति इत्यर्थः) प्रसौति (षु प्रसव-ऐश्वर्ययोः २.आ.प प्रसवोऽभ्यनुज्ञानम् - उतो वृद्धिः लुकि हलि ७.३.८९ हलादी पिति सार्वधातुके लुकिविषये) अनुजानाति { ऋत्विजम् इति शेषः }।

The reciters of Rg-mantras called sastras, chant the sastras by uttering “Om Som”. So also, with Om, the Adhvaryu utters the pratigara mantras. By Om, the priest called Brahma expresses his assent, makes them recite.

[सायनभाष्यम्]

बह्वृचाः (conversant with Rg Veda) होतारोऽपि प्रणवोच्चारणेन ओं शोमिति शब्दोच्चारणेन एव शस्त्राणि निष्केवल्यप्रउगादिनामकानि पठन्ति तथा हि - शस्त्रशंसनस्य अध्वर्युं प्रति अनुज्ञां याचमाना होतारः अनेन मन्त्रेण याचन्तः अध्वर्यो शोंसावोमिति (shall we pray इति) (वयं किं शंसनं कुर्म इत्यर्थकं “शोंसावो३म्” इति) . तत्र आदौ शोमिति शब्दः अन्ते च प्रणव इत्युभयं दृश्यते । तदिदम् अभिलक्ष्य (putting them together the Sruti says the Hotrs pray with Omsom) ओं शोमिति शस्त्राणि शंसन्ति इति आम्नातम्। हे अध्वर्यो होतारः वयं किं शंसनं कुर्म इति अनुज्ञापनं मन्त्रस्यार्थः। यदा होता शस्त्राणि शंसति तदानीम् अध्वर्युः शंसितारं होतारं प्रति प्रोत्साहनद्योतकं शब्दमुच्चारयति। सोऽयं शब्दः प्रतिगर इत्युच्यते। तं प्रतिगरं यदा प्रतिगृणाति उच्चारयति तदानीमोमिति प्रयुङ्क्ते। ... शस्त्रमध्ये एकस्याः ऋचः पूर्वार्धे समाप्ते सति अध्वर्युः ओऽथा मोद इव इत्येतं प्रतिगरं प्रयुङ्क्ते। ओकारेण होता संबोध्यते। हे होता अथ अर्धर्चः शंसनानन्तरम् इव अस्माकं मोद हर्ष इव सम्पन्न इति मन्त्रार्थः। ऋचः अवसाने सति प्रतिगरादौ प्रणवः प्रयोक्तव्यः। स च शस्त्र-शंसनस्य-अङ्गीकारे वर्त्तते। कृत्स्नस्य शस्त्रस्य अवसाने सति अङ्गीकारार्थकः प्रणव एव प्रयोक्तव्यः। अतः प्रतिगरे अपि प्रणवः अनुवर्त्तते। वेदत्रयोक्तप्रयोगज्ञः ऋत्विग् ब्रह्मा, स च प्रोक्षणादिक्रियासु अन्यान् ऋत्विजः प्रेरयति तदानीम् ओं प्रोक्ष इत्येवं प्रणवपुरःसरमेव प्रसौति प्रेरयति।

Similarly, even the Hotrs, the Rg Vedic priests, recite the hymns with Pranava, by uttering “Om Som” The Hotrs seeking the permission of the Adhvaru for reciting hymns address the Adhvaryu and say Somsavom. Here “som” is the first syllable and Om the last. Putting together the first and the last syllables, the Sruti says that the Hotrs pray with “Om Som” When the Hotri has recited the hymns, the Adhvaryu addresses them a word of encouragement, known as pratigara. When uttering the word of encouragement, the Adhvaryu utters om. In the middle of a hymn, on the completion of the first half of a verse, the Adhvaryu utters the words of encouragement: O Hotri your chanting of the first half of the verse has delighted us. On the completion of the verse, the pratigara should be uttered again with the Pranava at the beginning. and the pranava so uttered denotes assent to the chanting of the hymn. When the whole hymn is completed, the pranava alone is to be uttered to convey the assent. Thus even in the pratigara, the pranava is present. When Brahma, who knows the conduct of the rituals as taught in the three vedas, urges the other priests to act - such as the sprinkling of the consecrated waters - then he begins his direction with pranava.

Sastra is Rg mantras chanted without *svaras* in certain contexts. Not weapon. Om *Som iti*. Here also by Om he begins his chanting. Now *Adhvaryu*. He gives his permission (*pratigara*, technically different). He begins with Om. What about Brahma. He also permits (*prasauti*) by Om chanting only.

$ इति अग्निहोत्रम् अनुजानाति (अनु ज्ञा - अवबोधने - ९ उ.प to permit) जुहोमि इत्युक्ते ओम् इत्येव अनुज्ञां प्रयच्छति। $ इति एव ब्राह्मणः प्रवक्ष्यन् {हेतौ अत्र। लृटो सद् वा ३.३.१४} (सच्चिदानन्द - वच २ प.प. परिभाषणे इति धातुमादाय प्रथमं व्याख्यानम्। ओङ्कार-उच्चारणपूर्वकम् अध्येतुं प्रवर्तते यस्मात् तस्मात् वेदं प्राप्नोति) प्रवचनं करिष्यन् (प्रवक्ष्यन् इति वच परिभाषणे इत्यस्य रूपम् अस्मिन् व्याख्याने। द्वितीयव्याख्याने तु वह प्रापणे इत्यस्य अन्तर्भावितण्यर्थस्य रूपमिति भेदः) अध्येष्यमाणः $ इति एव आह।

ओमिति प्रतिपद्यते (प्रारभते) अध्येतुम् इत्यर्थः। ब्रह्म वेदम् (वेदं ग्रहीष्यामि इत्यभिसन्धिमान् आदौ ओमित्येव अध्येतुं ब्राह्मणः उपक्रमते इत्यर्थः) उपाप्नवानि (उप आप् ५ प.प. व्याप्तौ to get. From लोट् to वि.लिङ्) उपाप्नुयाम् ग्रहीष्यामि (ग्रह ९. उ.प उपादाने) इति। (अध्ययनफलभूतां वेदावाप्तिं कथयति ब्रह्म एव उपाप्नोति इति। तद्योजयति - उपाप्नोत्येवेति) उपाप्नोत्येव ब्रह्म। अथवा ब्रह्म परमात्मानम् उपाप्नवानि इति आत्मानं प्रवक्ष्यन् (सच्चिदानन्द - वह प्रापणे इति धातुं स्वीकृत्य तु द्वितीयं व्याख्यानम्। आत्मानं परमात्मानं प्रापयिष्यामि इति ओङ्कारध्यानपूर्वकं प्रयतते यस्मात् तस्मात् तं प्राप्नोत्येव) प्रापयिषयन् (परमात्मानं उपाप्नवानि प्रत्यक्त्वेन प्राप्नुयाम् इत्यभिसन्धिमान् ब्राह्मणः आत्मानं ब्रह्म प्रापयिष्यन् आत्मनो ब्रह्मभावप्राप्त्युपायम् अन्विष्यन् ओमित्याह इत्यर्थः) $ इति एव आह। (स च ब्राह्मणः तेन ओङ्कारेण आत्मज्ञानलक्षणम् उपायं लब्ध्वा ब्रह्म प्राप्नोत्येव इत्यर्थः) स च तेन ओङ्कारेण ब्रह्म (उपाप्नोति) प्राप्नोति एव। (विवक्षितमनुवाकार्थं संक्षिप्य दर्शयति - ओङ्कारपूर्वेति) ओङ्कारपूर्वप्रवृत्तानां (अत्र यद्यपि "ओ श्रावय" इति मन्त्रे "ओऽथामोद इव" इति प्रतिगरनामकमन्त्रे च ओङ्कार एव श्रूयते, न तु ओङ्कारः, तथापि ओकारस्य ओङ्कार-एकदेशत्वात् तत्पूर्वप्रवृत्तानामपि ओङ्कारपूर्वकत्वम् उपचारादुक्तमिति मन्तव्यम्।) क्रियाणां फलवत्वं यस्मात् तस्माद् ओङ्कारं ब्रह्म इति उपासीत इति वाक्यार्थः।

> When a performer of ritual says, " I am offering oblations", he gives his permission for the Agnihotra ritual by uttering Om.. A brahmin does indeed utter Om when he is about to recite the Vedic texts (pravakshyan), when intent on studying. i.e., he starts the recitation by uttering Om with the idea, May I get, I shall acquire the Vedas. He does master the Vedas. Brahma can mean the supreme self, in which case the sentence means: wishing to attain Brahman, the supreme Self, i.e, wishing to lead himself to the supreme self, a brahmin utters Om and Om alone and by that syllable he attains Brahman. The purport of the passage is that since the activities that are undertaken with the utterance of Om become fruitful, Om should be meditated upon as Brahman.

[सायनभाष्यम्]

अग्निहोत्रहोमे अध्वर्युः होमद्रव्यं क्षीरं तत्पात्राद् अग्निहोत्रहवणीनामके पात्रे यदा स्रुवेण उन्नयति (pours) तदानीम् ओम् उन्नेष्यामि हव्यं देवेभ्यः इत्यादिमन्त्रेण यजमानं प्रति अनुज्ञां याचते। स च यजमानः ओङ्कारेण अनुज्ञां प्रयच्छति। तथा च सूत्रकारः - ओमुन्नय इति उच्चैः अनुजानाति इति। तथा ब्रह्मयज्ञं चिकीर्षुः ब्राह्मणः ब्रह्मयज्ञनामकस्य प्रवचनस्य आदौ प्रणवं प्रयुङ्क्ते।

> In the agnihotra homa, when the Adhvaryu is about to take milk out of the milk-vessel by a ladle, and pour into the vessel named agnihotra-havani, then he asks yajamana's permission in the words " Om shall I take out the oblation for devas? " The yajamana grants permission by uttering the syllable Om. In the same way, when about to engage in the Brahma yajna, or sacred study of Vedas, a brahmana commences the study by uttering the pranava.

Until now it is with reference to big rituals. In small rituals like *agnihotra*, a daily ritual, when everything is ready, *yajamana* has to get green signal from the priest before beginning. The priest agrees by chanting Om.

Now he comes to the most fundamental thing. That is before beginning the Veda *adhyayanam*. This is the first spiritual step. It starts from the day of initiation. *Svadhyayo adhyetavyah*. Here it is only *sabdagrahanam*. The very *adhyayanam* creates wonderful *vaidika samskaras*. Every cell of a *brahmana* body contains *Vedasabda*. It is called *brahmi tanuh*. That is why it has to be respected. Healthwise it makes a difference. Very chanting involves indirect *pranayama*. Because you require long breath to chant long sentences. It is not just for remembering. The first line in *sadhana pancakam* is *vedo*+ So in this *adhyayana* he begins with Om. When a brahmin boy wants to study or recite the Vedas, (*pravacanam kartum icchan*) he says Om. *Om Sri gurubhyo namah iti*. The ending also is *Om Sri gurubhyo namah Harih Om*. What was his intention? *Brahma*+ One meaning is Veda. May I study my Veda and gain learning. This is intention in his uttering Om

before beginning the study. Sankaracarya explains in the context of Vedantic study. Om is important in *jnana kanda* also. Here *pravakshyan* means reaching. (*pravah*). Here Brahma is Brahman itself. A brahmin who is desiring of reaching Brahman, utters *Omkara* with the intention that let me attain Brahman. Om *sahanavavatu iti* we begin. The result is he indeed gains Brahman or learns Vedas. Even the first mantra given after initiation is *gayatri* preceded by Om. Even in *aksharabhyasa* it is Om *sri gurubhyo namah*. Therefore, since Om is such a great sound symbol, may you meditate upon Lord on Om. The result is *Brahmaloka*. (depending on *sakama* or *nishkama)*.

NINETH ANUVAKA BHASHYAM

कर्मणां पुरुषार्थसाधनत्व-प्रदर्शनम्

सम्बन्ध-भाष्यम्

५२) विज्ञानादेव 'आप्नोति स्वाराज्यम्' (भाष्य.भागः ४२) इति उक्तत्वात्, श्रौत-स्मार्तानां कर्मणाम् आनर्थक्यं प्राप्तम् इत्यतः तन्मा प्रापद् इति कर्मणां पुरुषार्थं प्रति साधनत्व-प्रदर्शनार्थः इह उपन्यासः।।

उपासकस्य कर्त्तव्यानि कर्माणि

५३) **ऋतम्** इति व्याख्यातम् (भाष्य.भागः १५)। **स्वाध्यायः** अध्ययनम्। **प्रवचनम्** अध्यापनम्, ब्रह्म-यज्ञो वा। एतानि ऋतादीनि 'अनुष्ठेयानि' इति वाक्यशेषः। **सत्यं च** सत्य-वचनम्, यथा-व्याख्यातार्थं वा (भाष्य भागः १५)। **तपः** कृच्छ्रादि। **दमः** बाह्य-करणोपशमः। **शमः** अन्तःकरणोपशमः। **अग्नयः** आधातव्याः। **अग्निहोत्रं च** होतव्यम्। **अतिथयश्च** पूज्याः। **मानुषम्** इति लौकिकः संव्यवहारः। तच्च यथा-प्राप्तम् अनुष्ठेयम्। **प्रजा च** उत्पाद्या। **प्रजनश्च** प्रजननम्। ऋतौ भार्या-गमनम् इत्यर्थः। **प्रजातिः** पौत्रोत्पत्तिः। पुत्रो निवेशयितव्यः इत्येतत्।।

स्वाध्यायप्रवचनयोः सर्वदा आदरः कार्यः

५४) सर्वैः एतैः कर्मभिः युक्तस्यापि स्वध्याय-प्रवचने यत्नतः अनुष्ठेये इत्येवमर्थं सर्वेण सह स्वध्याय-प्रवचन-ग्रहणम्। स्वाध्यायाधीनं हि अर्थ-ज्ञानम्। अर्थ-ज्ञानायत्तं च परं श्रेयः। प्रवचनं च तदविस्मरणार्थं धर्म-प्रवृद्ध्यर्थं च। अतः स्वध्याय-प्रवचनयोः आदरः कार्यः। **सत्यमिति** सत्यमेव अनुष्ठातव्यमिति[179] **सत्यवचाः**। सत्यमेव वचः यस्य सोऽयं सत्यवचाः, नाम वा तस्य। **राथीतरः** रथीतरस्य गोत्रः[180] राथीतराचार्यः[181] मन्यते। **तप इति** तप एव कर्तव्यमिति **तपोनित्यः** तपसि नित्यः तपः-परः। तपोनित्यः इति वा नाम। **पौरुशिष्टिः** पुरुशिष्टस्यापत्यं पौरुशिष्टिः आचार्यः मन्यते। **स्वाध्याय-प्रवचने एव** अनुष्ठेये **इति नाको** नामतः, मुद्गलस्य अपत्यं **मौद्गल्यः** आचार्यः मन्यते। **तद्धि तपस्तद्धि तपः**। हि यस्मात् स्वाध्याय-प्रवचने एव तपः, तस्मात् ते एव अनुष्ठेये इति। उक्तानामपि सत्य-तपः-स्वाध्याय-प्रवचनानां पुनर्ग्रहणम् आदरार्थम्।।

(इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषत्-शीक्षावल्ली-भाष्ये नवमोऽनुवाकः)।।

---

179 पा.भे - अनुष्ठेयमिति।

180 पा.भे - रथीतर-सगोत्रः इति। रथीतरगोत्रः इति वा।

181 पा.भे - राथीतर आचार्यः इति।

NINETH ANUVAKA

कर्मणां पुरुषार्थसाधनम्

ऋतं च स्वाध्यायप्रवचने च । सत्यं च स्वाध्यायप्रवचने च । तपश्च स्वाध्यायप्रवचने च । दमश्च स्वाध्यायप्रवचने च । शमश्च स्वाध्याय-प्रवचने च । अग्नयश्च स्वाध्यायप्रवचने च । अग्निहोत्रं च स्वाध्यायप्रवचने च । अतिथयश्च स्वाध्यायप्रवचने च । मानुषं च स्वाध्यायप्रवचने च । प्रजा च स्वाध्यायप्रवचने च । प्रजनश्च च स्वाध्यायप्रवचने च । प्रजातिश्च स्वाध्यायप्रवचने च । सत्यमिति सत्यवचा राथीतरः। तप इति तपोनित्यः पौरुशिष्टिः। स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः। तद्धि तपस्तद्धि तपः।

ऋतं च - One should observe the following values: right understanding; स्वाध्यायप्रवचने च - as well as the study and propagation of scriptures; सत्यं च - truthfulness; स्वाध्यायप्रवचने च - as well as the study and propagation of scriptures; तपश्च - austerity; स्वाध्यायप्रवचने च - as well as the study and propagation of scriptures; दमश्च - mastery over senses; स्वाध्यायप्रवचने च - as well as the study and propagation of scriptures; शमश्च - mastery over mind; स्वाध्यायप्रवचने च - as well as the study and propagation of scriptures; अग्नयश्च - maintenance of sacrificial fires; स्वाध्यायप्रवचने च - as well as the study and propagation of scriptures;अग्निहोत्रं च - performance of the Agnihotra ritual; स्वाध्यायप्रवचने च - as well as the study and propagation of scriptures; अतिथयश्च - hospitality; स्वाध्यायप्रवचने च - as well as the study and propagation of scriptures; मानुषं च - service to humanity; स्वाध्यायप्रवचने च - as well as the study and propagation of scriptures; प्रजा च - bringing up the family; स्वाध्यायप्रवचने च - as well as the study and propagation of scriptures; प्रजनश्च च - procreation; स्वाध्यायप्रवचने च - as well as the study and propagation of scriptures; प्रजातिश्च - getting grand children; स्वाध्यायप्रवचने च - as well as the study and propagation of scriptures; सत्यमिति - truthfulness is the highest value according to; सत्यवचाः - one whose words are ever truthful; राथीतरः - Sage Ratheetara; तपः इति - austerity is the highest value according to; तपोनित्यः - one who is ever austere; पौरुशिष्टिः - Sage Paurusishti; स्वाध्यायप्रवचने एव इति - the study and propagation of the scriptures alone is the highest value according to; नाकः - Sage Naka; मौद्गल्यः - the son of Sage Maudgalya; तद् हि तपः - That alone is true austerity; तद्धि तपः - That alone is true austerity.

One should observe the following values: right understanding as well as the study and propagation of scriptures, truthfulness, austerity, mastery over senses, mastery over mind, maintenance of sacrificial fires, performance of the Agnihotra ritual, hospitality,

service to humanity, bringing up the family, procreation, and getting grand children. Truthfulness is the highest value according to sage Ratheetara whose words are ever truthful. Austerity is the highest value according to sage Paurusishti who is ever austere. The study and propagation of the scriptures alone is the highest value according to sage Naka, the son of sage Maudgalya. That alone is true austerity. That alone is true austerity.

अनुवाकविषयः

(उत्तरानुवाकस्य व्यवहितानुवाकेन संबन्धमाह - विज्ञानादेव इत्यादिना। कर्मणां स्वाराज्यप्राप्तौ अनुपयोगः प्राप्तः इति शङ्कार्थः। उपासन-सहकारितया तत्फलेन स्वाराज्येन कर्मणां फलवत्त्वसिद्ध्यर्थम् अस्मिन् अनुवाके तेषाम् उपन्यासः इति परिहारार्थः। पुरुषार्थपदं स्वाराज्यपरम्, कर्मणाम् उपासन-सहकारितया तत्फलं प्रति उपयोगप्रकारश्च इत्थम् - उपासकेन स्वकर्माननुष्ठाने तदकरणसूचितेन प्रत्यवायेन प्रतिबद्धम् उपासनं फलपर्यवसायी न भवेत्. अतः प्रतिबन्ध-अपनयद्वारा कर्मणां तत्र उपयोगः इति। तथा च श्रुतिः - अविद्यया मृत्युं तीर्त्वा विद्यया अमृतमश्नुते इति। अविद्यया कर्मणा प्रतिबन्धक-पाप-लक्षणं मृत्युं तीर्त्वा नाशयित्वा विद्यया उपासनलक्षणया स्वाराज्यलक्षणम् अमृतम् अश्नुते इति हि तदर्थः) विज्ञानादेवाप्नोति स्वाराज्यम् इति उक्तत्वात् श्रौतस्मार्तानां कर्मणाम् आनर्थक्यं प्राप्तम् इति अतः तद् मा प्रापद् (लृदित्वादङ् अनिट् आपत् आपताम् आपन् माङि लुङ् ३.३.१७५ सर्वलकारापवादः न माङ् योगे अटाडौ)। इति कर्मणां पुरुषार्थं[१८२] प्रति साधनत्वप्रदर्शनार्थमिह उपन्यासः।

Since it has been said that by meditation alone one gains sovereignty, it leads to the understanding that the karmas enjoined by Sruti and Smriti are useless. Let it not become so - with this end in view there is presentation of karmas here as means for the attainment of human ends.

The *upasana* section is over. The section begins with this idea: One gets *svarajyam* just by meditation (or gains Brahman by knowledge), then the entire *karmakanda* is useless. Karma and values have no place. Why karma? Then Veda will be only few pages like *Kena* Upanishad. Volume is gone. So to overcome this, this section is there. For steadiness of mind is *upasana*. For purification of mind is *karma*. It is an indirect *sadhanam* for knowledge. Neutralising *raga-dveshas* and *duritas*, *karma* is essential. To establish *karmas* and disciplines have a role in attainment of human ends is this section. So *upasana* can never go alone. They go along with proper *karmas* or duties prescribed by Vedas as well as disciplines/values prescribed. *Upasana* is optional. *Karma* can exist independent of *upasanas*. One need not do *upasanas* but must perform duties. For *kevala karma*, the *phalam* is *krishna-gati*. *Upasanas* must be practised with duties or *nityakarmas* etc. One should do *samuccaya* of *karma* and *upasanas*. The lifestyle should include both. Some do karma and become workaholic. If one is committed to *upasana* alone, then also problem to live his social life. (*Grhasta - karma, vanaprastha - upasana* and *sanyasi - jnana*) In *grahstasrama* one should combine. So we have only two options. Either *kevala karma* or *samuccaya* of *karma* and *upasana*. *Karmas* are not merely rituals but it involves proper values also, proper ethics and morals also. Of them the teacher emphasises two *svadhyaya* and *pravacana*.

In *Brahmasutra* 3.4.26 and 27 it has been ascertained that action is necessary for the rise of knowledge. Even though action is not necessary for enabling the knowledge to bear its fruits, it is necessary for knowledge to arise. A horse may not be necessary for dragging a

[१८२] अपरब्रह्मप्राप्तिं प्रति । कर्मकाण्डे तु आश्रमकर्मत्वेन विहितानि कर्माणि । इह पुनर् विद्यासहकारित्वेन इति विशेषः । सू.भा ३.४.३५ (सच्चिदानन्द)

plough but it is useful to drive a coach. *Sruti* says *tametam*+ By creating desire for knowledge, they become means.

The style of *upanishad* is to highlight one value or other in a given context. In *Mundaka satya* was highlighted. *Satyameva jayate*+ In *Kena* also *satyam* was highlighted. Here these two. That does not mean others are less important. In *Mundaka* the same *pravacana* was put down there in *Mundaka*. *Nayamatma pravacanene labhyah. Atmavaranena eva labhyah* i.e., *mumukshutvam* was highlighted. So *medha* etc were put down. Same *medha sakti* was highlighted here. The idea is all values are equally important. In a particular context one is emphasised. In *puranas* also it is to be understood the same way. If *Parasurama* chopped off his mother's head because father commanded, we should not take it on the face value. *Pitruvakya-paripalam* was highlighted. Even if such an act like that has to be obeyed, what to talk of ordinary commands of father. We receive the teaching that *pitruvakya paripalanam* has to be followed. We ignore the story value. Like throwing away the banana skin after eating the banana. The incidents are *arthavada. Kunti's* words also like that. This story also teaches that one' words have to be protected. So too *Naicketa's* father's words. To what extent they go to protect mother's words is the moral to learn. Five husbands and one wife, we have to ignore. *Stuti* of one is followed by *ninda* of the other, but in the *ninda*, there is no *tatparyam*. In *stuti* alone there is *tatparya*. Here also there is no putting down of other values. Since *svadhaya* and *pravacana* is emphasised, it is repeated with every other value. Whatever be the situation, these two should not be given up.

Svadhyaya means recitation of scriptures, study of the scriptures. In the beginning stages, he learns to chant the Vedas. It means, in the initial stages, the regular chanting of Vedas. If he is a vedantic student, it means regularly studying the scriptures under a guru or do it myself. *Sva* indicates studying scriptures of one's recension..

Pravacanam is teaching others. Our whole tradition is maintained only by this. It is responsibility of every one to hand over the knowledge to the succeeding generation, whether it is Vedanta or *ayurveda* or *vyakarna*. It is a duty to the Vedas themselves in addition to the succeeding generation. It is doing something in return to Vedas. It is only in the form of giving to others. It has to be a flow and not a puddle. Or we can help others who are doing it. The help can be in many ways including finance. Or at least not creating obstacles. It is *rishi rinam*. It is topmost *rinam* because people come to know about other *rinams* themselves only by telling about *rinams*. The second meaning of *prvacanam* is *brahmayajna*. It is a small ritual in which he offers prayers to Vedas and *rishis*. *Rishin tarpayami. Rigvedam tarpayami* etc *vyakaranam tarpayami*. I am propitiating all of them - is the meaning of *tarpayami*. Without them, my life would have been a drudgery. I remember with gratitude the *rishis* and the *sastras*. Then he chants a section of each Veda. *Agnimile*+ Then his own recension, he chants. It is one of the *pancayajnas*.

मुमुक्षुणा अवश्यानुष्ठेयानि कर्माणि

ऋतम् इति व्याख्यातम् (शास्त्रान्निश्चितावस्थं दर्शादिकर्मजातम् ऋतशब्दवाच्यम् इति ऋतं वदिष्यामि इत्यत्र व्याख्यातम् इत्यर्थः) (मणिप्रभा - शास्त्रानुसारेण कर्तव्यतया निश्चितः अर्थः)। स्वाध्यायः अध्ययनम् (मणिप्रभा - अधीतस्य वेदस्य प्रत्यहं यथाशक्ति पाठः)। प्रवचनम् अध्यापनम् (उपासकस्य अध्यापनेप्रवृत्तौ उपासना-अनुष्ठ्न-असम्भवाद् अध्यापनस्य काम्यत्वेन तदकरणे प्रत्यवाय-अभावाच्च प्रवचनमध्यापनम् इति व्याख्यानमयुक्तमिति अस्वरसादाह - ब्रह्मयज्ञो वा इति) ब्रह्मयज्ञो वा। एतानि ऋतादीनि अनुष्ठेयानि इति वाक्यशेषः।

सत्यं च सत्यवचनम्, यथाव्याख्यातार्थं वा (शास्त्रात् कर्तव्यतया बुद्धौ विनिश्चितमेव कर्म वाक्कायाभ्यां संपाद्यमानं सत् सत्यशब्दवाच्यमिति सत्यं वदिष्यामि इत्यत्र व्याख्यातार्थकं वा अत्र सत्यपदम् इत्यर्थः।) तपः कृच्छ्रादि (कृती छेदने कृन्तति सुखमिति कृतेः छः क्रू च इति रक् प्रत्यय छ-अन्तादेशः) (मनु ११.२१२ गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्। एकरात्रोपवासञ्च कृच्छ्रं सांतपनं स्मृतम् - पञ्चगव्येन पवित्रः सन् एकरात्रोपवासकरणम् - सांतपनं व्रतम् कृच्छ्रम्) (आदिपदं चान्द्रायणादिसंग्रहार्थम्। न च अशनपरित्यागप्रधाने कृच्छ्रादौ प्रवृत्तस्य कथं स्वाराज्यफलक-उपासनानुष्ठानं संभवति इति वाच्यम्। शक्तस्य तदुभय-अनुष्ठान-संभवात्. अशक्तस्य तु धनिनो धनदान-रूपं सर्वसाधारण्येन मित-अशनादिरूपं वा तपो भविष्यति । तथा च श्रुतिः एतत्खलु वाव तप इत्याहुः यः स्वं ददाति इति तै.सं ६.१.६। हितमितमेध्याशनं तपः इति योगशास्त्रे मिताशनादितपसोऽप्युक्तत्वात्) (मणिप्रभा - भोगत्यागरूपम् वा) दमः बाह्य-करण-उपशमः (मणिप्रभा - बाह्यचक्षुरादीन्द्रियाणां निषिद्धविषयेभ्यः निवर्तनम्)। शमः अन्तःकरण-उपशमः (मणिप्रभा - मनसः निषिद्धानुचिन्तनाद् निवर्तनम्)।

अग्नयश्च आधातव्याः (मणिप्रभा - गार्हपत्य-आहवनीयादयः आधानादिसंस्कारेण निष्पन्नाः इति शेषः)। अग्निहोत्रं च होतव्यम् (मणिप्रभा - सायं प्रातौ आहिताग्नौ हवनं कर्तव्यम् इति शेषः)। अतिथयश्च (एकरात्रं तु विनसन्+ वैश्वानरः प्रविशति) पूज्याः। मानुषम् इति लौकिकः संव्यवहारः (विवाहादौ बन्ध्वाद्युपचारो लोकिकः संव्यवहारः)। तच्च यथाप्राप्तम् अनुष्ठेयम्।

> The word rtam has been explained. Svadhyaya means study of the Vedas. Pravacana is teaching of the Vedas or their recital. These things beginning with rta are to be practised - this much is to be added at the end of the sentence. Satyam is adherence to the truth while speaking or what has been explained earlier. Tapah is austerity like krcchra (involving bodily mortification) etc. Dama is resolution of external organs. Sama is mastery over the inner organs. Fires etc. are to be lighted up. Agnihotra sacrifice has to be performed. Guests are to be honoured. Manusha refers to right social conduct; that has to be practised as the occasion demands.

THE WORKS INCUMBENT ON AN UPASAKA

All *anushteyam iti* we have to supply. *Niscitabuddhi* with reference to what *sruti* says about dos and donts. The word rtam means *yathasastram jnanam*, knowledge in keeping with the scriptures. Speaking in keeping with that knowledge is *satyam*. No gap between what I know and what I speak. No gap between what I know and what the *sastra* says is *rtam*. Knowledge should go with both sides. *Tapah* means self-denial for self-mastery. Self is BMS. I deny certain pleasures and things so that I will prove that I am not a slave to things. Whatever I am taking regularly, I miss them one day. I should not be addicted to any given thing. The *vratas* like going to Ayyappa temple is to deny certain things. It is willing self-denial. Otherwise we will be taking about it all the time. I gave up *iti*. *Vrata*, like fasting and *maunam* and disciplines like *vaktapas*. *Yavamadhya candrayana and pipilikamadhya candrayana* according to waxing and wanig of the moon, followed. *dama and sama* - curtailed activity of organs and mastery over one's ways of thinking - are known. These are to be accomplished. It is for all those who live a vedic way of life whether *grhasta* or *brahmacari* or *sadhu*. *Agni* (plural) is rituals because each ritual is named by one one *agni* like *naciketagni*. *Garhapatyagni*, *Dakshinagni, ahavaniyagni. (Deva yajna).* With the same fire he is cremated. The benefit of rituals is *samskara* which nobody can see which is necessary for *atmajnanam*. *Sraddha* is solidified there. (*tametam vedanu-vacanena* + *Br.Up* 4.4.92). *Agnihotra* is one ritual highlighted here. A prayer or puja has to be done in place of it, if it is not possible. Guests (*tithih na vidyate yasya*) have to received and

extended hospitality. *Katha* Upanishad highlights. They are also Lords. It is social duty. Our religion is so all inclusive that it takes into account one's health, family, society, country etc. (*Manushya yajna). Manusham* is *lokavyavahara*. Conduct on occasions. The social transactions like *varnasrama dharma*. I participate in the social activities like temples and schools buildings and maintenance etc. Social duty to other beings. A *sanyasi* does not have this.

प्रजाश्च उत्पाद्याः (प्रजोत्पत्त्यर्थाः पुत्रकामेष्ट्यादयः कर्तव्याः इत्यर्थः) (मणिप्रभा - पुत्रोत्पत्तिविषयाः गर्भाधानादि-संस्काराः)। प्रजनः प्रजननम्। (गोविन्दानन्द -भार्यागमनस्य रागतः एव प्राप्तत्वेन अविधेयत्वमाशङ्क्य विवक्षितमाह - ऋतौ इति। अनार्तवे नासौ गन्तव्या इति भावः) ऋतौ भार्यागमनम् इत्यर्थः। प्रजातिः पौत्रोत्पत्तिः पुत्रो निवेशयितव्यः (निवेशो विवाहः) (गोविन्दानन्द - पुत्रमुत्पाद्य गार्हस्थ्ये निवेशयेत् इत्यर्थः) इत्येतत्।

> Progeny is to be begotten. Procreation during the ordained periods. Obtaining a grandson is practise of prajati, i.e., the son is to be married.

Now family duty. *Praja* is getting children to maintain *kuladharma*. *Dharma* is primarily imbibed in family. Before the father dies, he gives the responsibility of giving oblations to ancestors. This is an advise to *brahmacari* who is entering *grhastasrama* or to *grhastas*. This is a *vidhi* for one who has to gain *cittasuddhi*. For others *tyagena eke* + *Nijagrhat*+ The advise varies according to *adhikari*. How to get children? One should have *prajananam* i.e., marrying and procreating in keeping with religious commandments. That is marriage in the proper form. Why Sruti mentions? If not mentioned, human beings may violate rules. *Prajatih* means getting granson. Getting the children married properly. (teaching the values to them), if the son is interested in marriage.

स्वाध्यायप्रवचनयोः प्राधान्यम्

(पुनः पुनः स्वाध्यायग्रहणस्य तात्पर्यमाह - सर्वैः इत्यादिना।) सर्वैः एतैः कर्मभिः युक्तस्यापि स्वध्याय-प्रवचने यत्नतः अनुष्ठेये इत्येवमर्थं सर्वेण सह स्वध्यायप्रवचनग्रहणम्। (यत्नतः अनुष्ठेये इत्यत्र हेतुमाह - स्वाध्याय-अधीनं हि इति। अध्ययनाधीनमित्यर्थः। अध्ययनस्य अर्थज्ञानपर्यन्तत्वं पूर्वतन्त्रप्रसिद्धमिति द्योतनार्थो हि शब्दः)। स्वाध्याय-अधीनं हि अर्थज्ञानम्। अर्थज्ञानायत्तं च (प्रणाड्या कर्मकाण्डार्थ-ज्ञानायत्तं परं श्रेयः, साक्षादेव ज्ञानकाण्डार्थ-ज्ञानायत्तं परं श्रेयः इति विभागसूचनार्थ- चकारः) परं श्रेयः। प्रवचनं च तदविस्मरणार्थं धर्मवृद्ध्यर्थं च (पुण्यार्थम्)। अतः (स्वाध्यायस्य अर्थज्ञानद्वारा परमश्रेयःसाधनत्वात् प्रवचनस्य अविस्मरणादि-साधनत्वात् च इत्यर्थः) स्वध्यायप्रवचनयोः आदरः कार्यः।

> Even by him who is engaged in all these activities, learning and teaching of the Vedas are to be practised with effort. That is the reason the learning and teaching have been mentioned with all the of them. The understanding of the meaning is dependent on the study and the attainment of the highest end is dependent on understanding of meaning. The teaching is meant for not forgetting it and for the enhancement of virtues. So it is essential that one should have reverential attitude towards learning and teaching.

The purpose of *svadhyaya* is to receive the *artha-grahanam*. If he chants now, later he can know the meaning of that. If the whole text is in mind, the study of meaning will be far easier and comprehensive. We get the whole picture when the mantras are explained. We can get the whole development. The summary will be clear. (In *Brahmasutra*, he refers to various

mantras all over and unless we know them, we can understand the trend of the discussion.) *Byhearting* is there in all studies before the studies begin. In fact the sutra literature originated to remember the whole *sastra* in capsule form. Veda *vicara* is done only after Veda *adhyayanam*. *Sankaracarya says svadhyaya-anantaryam* tu *samanam*. Whether it is analysis of *purva bhaga* or *uttara bhaga*, Vedas must be studies and byhearted. What for *arthagrahanam*? Depending on it alone, *moksha* is going to come. It is applicable to Veda mantras and Vedanta mantras.

The benefit of *pravacanam* is whether the tradition is maintained or not, when I teach, I wont' forget. *avismaranartham*. Teaching is the best method to keep the wisdom alive. Otherwise, we will be worse than materialistic people even after quoting left and right the *upanishads*. To stay at the same place, not flown/washed away in the flood of *maya*, we have to do *pravacanam*.

सत्यमिति सत्यमेव (अनुष्ठेयानां मध्ये सत्यमेव प्रशस्तं कर्म इति राथीतरस्य मतमिति भावः। तथा च वचनम् - अश्वमेधसहस्रं च सत्यं च तुलया धृतम्। अश्वमेधसहस्रात्तु सत्यमेव विशिष्यते इति।) अनुष्ठेयमिति सत्यवचाः सत्यमेव वचः यस्य सोऽयं सत्यवचाः, नाम वा तत् तस्य। (अत्र द्वितीयनामशब्दः प्रसिद्धिद्योतकः) राथीतरः रथीतरगोत्रः राथीतरः आचार्यः मन्यते। तप इति तप एव (कृच्छ्रचान्द्रायणादि-मिताशन-धनदानरूपं तप एव प्रशस्तं कर्म इति पौरुशिष्टेः मतम्। तस्य प्राशस्त्यं च उत्तमलोकप्राप्तिसाधनत्वात्। तथा च श्रुतिः तपसा ऋषयः सुवरन्वविन्दन् इति।) कर्तव्यमिति तपोनित्यः तपसि नित्यः (मणिप्रभा - नित्यं वर्तते इति) तपःपरः तपोनित्य इति वा नाम[१८३], पौरुशिष्टिः पुरुशिष्टस्य अपत्यं (अपत्यम् अव्ययम्) पौरुशिष्टिः आचार्यः मन्यते। स्वाध्यायप्रवचने एव अनुष्ठेये इति नाको नामतः (मणिप्रभा - यतः सर्वदा स्वाध्यायप्रवचनाभ्यां तुष्टः सन् निर्दुःखः वर्तते अतः) मुद्गलस्य अपत्यं मौद्गल्यः आचार्यः मन्यते। (मौद्गल्य-अभिमते स्वाध्यायप्रवचनयोः उत्तमकर्मत्वे हेतुमाह श्रुतिः - तद्धि इति) तद्धि तपस्तद्धि तपः (इति श्रुतेः वचनम्)। (हि-शब्दार्थकथनम् - यस्मादिति। अत्र स्वाध्यायशब्दितस्य अध्ययनस्य नियमोपेतत्वात् तपःशब्दवाच्यत्वम् । तदुक्तम् - नियमेषु तपःशब्दः इति। प्रवचनशब्दितस्य च ब्रह्मयज्ञस्य तपस्त्वम् तपो हि स्वाध्यायः इत्यादिश्रुतिप्रसिद्धमिति मत्वा तपस्त्वं तयोः उत्तमकर्मत्व हेतुतया उक्तमिति अनुसन्धेयम्।) यस्मात् स्वाध्याय-प्रवचने एव तपः तस्मात् ते एव अनुष्ठेये इति। उक्तानामपि (सत्यं च स्वाध्यायप्रवचने च। तपश्च स्वाध्यायप्रवचने च इत्यत्र उक्तानाम् अपि इत्यर्थः) सत्यतपःस्वाध्यायप्रवचनानां पुनर्ग्रहणम् आदरार्थम् (आदरसूचनद्वारा मतभेदेन उत्तमकर्मत्वख्यापनार्थम् इत्यर्थः)।

> Truth alone is to be practised - Thus thinks Satyavaca, one whose speech does not deviate form truth, or one whose name is Satyavaca, born in the lineage of Rathitara. Austerity alone is to be followed - thus thinks Taponitya, one who is established in austerity or one whose name is Taponidya, son of Purusishti. Naka, son of Mudgala, thinks that svadhyaya and pravacana alone are to be practised. That certainly is the real tapas. That certainly is the real tapas. Since learning and teaching alone is tapas, they alone have to be practised. Though truth austerity and learning and teaching have been mentioned earlier, their mention again is to indicate reverence for them.

THE MOST IMPORTANT OF THE UPASAKA'S DUTIES

[१८३] सत्यमेव अनुष्ठातव्यम्, तप एव कर्तव्यम् - इति च य उपदिशति स नूनं तत्प्रयोजनं स्वयम् अनुभूतवान् इत्येव श्लिष्यते । अतोऽत्र केवलनाममात्रस्वीकरणापेक्षया सत्यवचाः तपोनित्यः इति च यौगिकशब्दावेतौ इत प्रथमव्याख्यानमेव साधीय इति युज्यते । योगारूढौ वा शब्दौ एतौ स्याताम् । (सच्चिदानन्द)

Here three values are prescribed. $Satyam$ If you think speaking truth is problem, then keep silent. Speaking truth is not compulsory. Avoiding lie is compulsory), $tapah$ and $svadhyaya$ and $pravacana$. $Satya$ by $Rathitarah$. He highlights $satyam$. So his name is $Satyavacah$ or it is his title. $Satyameva\ uttamah\ iti$ we have to add. $Paurusishti$ says $tapah$ is $uttama$ virtue. $Maudgalya$ says third value. Upanishad itself is quoting the opinions of these sages. Upanishad is voting in whose favour? $Svadhyaya$+ That alone is, what was said immediately before. If you have any doubt in my statement, I will repeat again, Sruti says. $Satyam$ etc. the three's repetition is for emphasis.

TENTH ANUVAKA BHASHYAM

त्रिशङ्कोः विज्ञानप्राप्त्यनन्तर-वचनम् (ब्राह्मणवाक्यम्)

मन्त्राम्नायः स्वाध्यायार्थः

५५) 'अहं वृक्षस्य रेरिवा' इति स्वाध्यायार्थो मन्त्राम्नायः। स्वाध्यायश्च विद्योत्पत्तये, प्रकरणाद्। विद्यार्थं हि इदं प्रकरणम्। न च अन्यार्थत्वम् अवगम्यते। स्वाध्यायेन च विशुद्धसत्वस्य विद्योत्पत्तिः अवकल्प्यते।।

आम्नायार्थः - त्रिशङ्कोः ब्रह्मविदः आत्मैकत्वदर्शनम्

५६) **अहं वृक्षस्य** उच्छेद्यात्मकस्य संसार-वृक्षस्य **रेरिवा** प्रेरयिता अन्तर्याम्यात्मना। **कीर्त्तिः** ख्यातिः **गिरेः पृष्ठम् इव** उच्छ्रिता मम। **ऊर्ध्वपवित्रः** ऊर्ध्वं कारणं पवित्रं पावनं ज्ञान-प्रकाश्यं परं[184] ब्रह्म यस्य सर्वात्मनो मम, सोऽहम् ऊर्ध्व-पवित्रः। **वाजिनि इव** वाजवति इव। वाजम् अन्नं तद्वति सवितरि (इव) इत्यर्थः। यथा सवितरि अमृतम् आत्मतत्वं विशुद्धं प्रसिद्धं श्रुति-स्मृति-शतेभ्यः, एवं **स्वमृतं** शोभनं विशुद्धम् आत्मतत्वम् **अस्मि** भवामि। **द्रविणं** धनं **सवर्चसं** दीप्तिमत्। तदेव आत्मतत्वम्। 'अस्मि' इत्यनुवर्तते। ब्रह्म-ज्ञानं वा आत्मतत्व-प्रकाशकत्वात्[185] सवर्चसं द्रविणमिव द्रविणम्, मोक्ष-सुख-हेतुत्वात्। अस्मिन् पक्षे 'प्राप्तं मया' इति अध्याहारः कर्तव्यः। **सुमेधाः** शोभना मेधा सर्वज्ञत्व-लक्षणा[186] यस्य मम, सोऽहं सुमेधाः। संसार-स्थित्युत्पत्त्युपसंहार-कौशल-योगात् सुमेधस्त्वम्। अतः एव **अमृतः** अमरण-धर्मा। **अक्षितः** अक्षीणः अव्ययः। अक्षतो वा[187]। अमृतेन वा उक्षितः सिक्तः। 'अमृतोक्षितोऽहम्' इत्यादि ब्राह्मणम्। **इति** एवं **त्रिशङ्कोः** ऋषेः ब्रह्म-भूतस्य ब्रह्म-विदः **वेदानुवचनं** वेदः वेदनम् आत्मैकत्व-विज्ञानम्, तस्य प्राप्तिम् अनु वचनं वेदानुवचनम्। आत्मनः कृत-कृत्यता-ख्यापनार्थम्। वामदेववत् (ऐ.उप. २.१.५, बृ.उप. १.४.१०) त्रिशङ्कुना आर्षेण दर्शनेन दृष्टः मन्त्राम्नायः आत्मविद्या-प्रकाशकः इत्यर्थः।।

कर्मणः (परम्परया) विद्योत्पत्ति-हेतुत्व-प्रदर्शनम्

५७) अस्य च जपः विद्योत्पत्यर्थः अवगम्यते। 'ऋतं च' इत्यादि कर्मोपन्यासादनन्तरं[188] च वेदानुवचन-पाठाद् एतद् अवगम्यते। एवं श्रौत-स्मार्तेषु नित्येषु कर्मसु युक्तस्य निष्कामस्य, परं ब्रह्म विविदिषोः, आर्षाणि दर्शनानि प्रादुर्भवन्ति आत्मादि-विषयाणि इति।।

(इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषत्-शीक्षावल्ली-भाष्ये दशमोऽनुवाकः)।।

---

184 पा.भे - ऊर्ध्वकारणं पवित्रं पावनं ज्ञान-प्रकाश्यं पवित्रं परमम् इति आनन्दाश्रमः।

185 पा.भे - अमृतत्वप्रकाशकत्वात् इति वा।

186 पा.भे - सर्वज्ञ-लक्षणा इति आनन्दाश्रमः। सार्वज्ञ्यलक्षणा इति क्वचित्। सर्वज्ञ्यलक्षणा इति वा।

187 पा.भे - उक्षितो वा अमृतेन वा उक्षितः सिक्तः इति आनन्दाश्रमः।

188 पा.भे - धर्मोपन्यासादनन्तरमिति वा।

TENTH ANUVAKA

त्रिशङ्कोरार्षदर्शनम्

अहं वृक्षस्य रेरिवा । कीर्त्तिः पृष्ठं गिरेरिव । ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि । द्रविणँ सवर्चसम् । सुमेधा अमृतोक्षितः । इति त्रिशङ्कोर्वेदानुवचनम् ।

अहम् - I am; वृक्षस्य - of the tree (of universe); रेरिवा - the sustainer; । कीर्त्तिः - My fame; पृष्ठं गिरेः - the peak of a mountain; इव - is as high as; ऊर्ध्वपवित्रः - I am absolutely pure; वाजिनि इव - like the effulgence in the sun; स्वमृतम् - the auspicious and immortal (consciousness); अस्मि - I am; सवर्चसम् द्रविणम् - I am the truth which is the most effulgent wealth; सुमेधाः - I am endowed with the most auspicious wisdom; अमृत-उक्षितः - I am free from death and decay; इति - thus; त्रिशङ्कोः - by Sage Trisanku; वेदानुवचनम् - is the declaration after the attainment of knowledge;

The following is the declaration after the attainment of knowledge by sage Trisanku - I am the sustainer of the tree (of universe); My fame is as high as the peak of a mountain. I am absolutely pure; I am the auspicious and immortal (consciousness) like the effulgence in the sun; I am the truth which is the most effulgent wealth I am endowed with the most auspicious wisdom; I am free from death and decay.

मन्त्राम्नायः जपार्थः

अहं वृक्षस्य रेरिवा इति (ननु अहं वृक्षस्य इत्यादिमन्त्रपाठः किमर्थः इत्याकाङ्क्षायामाह - स्वाध्यायार्थो इति । जपार्थः इत्यर्थः) स्वाध्यायार्थो (जपार्थः इत्यर्थः) मन्त्राम्नायः। (ननु तज्जपस्य क्वोपयोगः। तत्राह - स्वाध्यायश्च इति) स्वाध्यायश्च विद्योत्पत्तये, प्रकरणात् (उभयाकाङ्क्षा प्रकरणम्। नष्टाश्वदग्धरथन्याय)। (प्रकरणादिति हेतुं विवृणोति - विद्यार्थं हि इति। प्रकरणस्य संहितोपनिषद्-गतमन्त्रब्राह्मणजातस्य विद्याप्रयोजनकत्वात् इत्यर्थः। ब्रह्मविद्यासन्निधौ पाठादिति भावः।) विद्यार्थं (सच्चिदानन्द - न केवलं स्वाध्यायादिकर्मविधानार्थम्) हि इदं प्रकरणम्। (अहं वृक्षस्य इत्यादि-मन्त्राम्नायस्य कर्मशेषत्वशङ्कां निराकरोति - न च इति। तदवगमकश्रुतिलिङ्गादेः अदर्शनादिति भावः) न च अन्यार्थत्वम् (सच्चिदानन्द - अन्यत्र विनियोजकप्रमाणान्तरेऽसति प्रकरणानुसरणमेव न्याय्यम्) अवगम्यते। (स्वाध्यायः विद्योत्पत्तये भवति इति उक्तम्। तत्र विवक्षितं द्वारं समर्पयति - स्वाध्यायेन इति। जपादिरूपस्य धर्मस्य पापक्षयरूपशुद्धिद्वारा विद्योत्पत्तिहेतुत्वम् तपसा कल्मषं हन्ति इत्यादिशास्त्रसिद्धमिति विशेषसूचनार्थः चकारः) स्वाध्यायेन च विशुद्धसत्वस्य विद्योत्पत्तिः अवकल्पते (सच्चिदानन्द - विशुद्धसत्वस्य उपासनम् आशुफलं ददाति, ज्ञानं वा उत्पद्यते इति उपपद्यते इत्यर्थः)।

The Vedic mantra beginning with aham vrkshasya reriva is intended for recitation. And from the context it is known that the recitation is for the purpose of knowledge to take place. The purpose of this section is indeed for expounding knowledge. No other purpose is known here. Moreover, it is considered that knowledge arises in one whose mind is purified by recitation.

THE PURPOSE OF THE MANTRA

This particular section of mantra is for *japa* or recitation. *Japa* is for the dawn or rise of knowledge. Earlier for getting *medha*. Now for gaining knowledge. So it is very important.

How do you say so? It is context of *vidya*. It is not for enhancing the *karmaphala*. Karma sesha makes karma completes and makes the result complete. The meaning itself means *brahmavidya*. This mantra seems to be unconnected. So *Bhashyakara* connects. The *japa* removes papas. *Visuddham sattvam antahkaranam yasya. Trisanku* gives his vision after *jnanam*. Not *Trisanku* hanging. He is *maharshi*. When did he give? Immediately after knowledge. How do you know? *Upanisahd* tells at the end. *Anu* indicates after and *veda* indicates knowledge. The content of this mantra is *Aham brahmasmi* alone. Brahman being *adhishthana* for *jagat*, a *jnani* also can say I am basis for universe. So it is within quotation.

त्रिशङ्कोः आत्मदर्शनम्

अहं (साक्षात्कृतब्रह्मतत्वस्त्रिशङ्कुनामा ऋषिः अहं शब्दार्थः) वृक्षस्य (वृश्च्यत तत्वज्ञानेन उच्छिद्यते इति वृक्षः) उच्छेद्यात्मकस्य (उच्छेद्यस्वभावस्य इत्यर्थः) (सच्चिदानन्द - ओव्रश्चू च्छेदने इति तौदादिकधातोः उत्पन्नः वृक्षशब्दः उच्छेद्यात्मकत्वं संसारवृक्षस्य सूचयति इति भावः) संसारवृक्षस्य (विद्याप्रतिपादके मन्त्रे प्रसिद्धवृक्षग्रहण-अयोगात् संसार एव उच्छेद्यस्वभावत्व-साम्याद् वृक्षशब्देन गृह्यत इति भावः) रेरिवा प्रेरयिता (जगदात्मकस्य संसारवृक्षस्य प्रेरयिता परमेश्वरः एव, न ब्रह्मविद् इति तत्राह - अन्तर्यामी इति। ब्रह्मविदः सर्वात्मकत्वादिति भावः) अन्तर्याम्यात्मना (सच्चिदानन्द - अन्तर्यामिसन्निधिमात्रेण जगद्विपरिवर्तते गी.भा ९.१०) (मणिप्रभा - विषयवैराग्यरूपशस्त्रेण छेत्ता)। (तस्माद् मदीया) कीर्त्तिः (मेरोः शृङ्गमिव मम ब्रह्मविदः कीर्त्तिः प्रसिद्धिः स्वर्गलोकव्यापिनी इत्यर्थः।) ख्यातिः (दृष्टान्तः) गिरेः पृष्ठम् इव (यथा पर्वतस्योपरिभागः अत्यन्त उन्नतः तथा) उच्छ्रिता मम। (मणिप्रभा - अत्यन्तोच्छ्रिता सती देवलोकेष्वपि प्रसरति ततो देवा अपि मदीयं पुरुषार्थं विहन्तुं न क्षमन्ते। तथा च श्रूयते - "तस्य ह न देवाश्च नाभूत्या ईशत" इति।)

As the inner self I am the prompter of the tree of the world that is subject to felling. My fame is as high as the peak of a mountain.

THE MANTRA IS AN EXPRESSION OF FULFILLMENT ON SELF-KNOWLEDGE

The tree is *samsara*-tree. One in *Katha* and *Gita* 15. HG is trunk; the various *lokas* are branches. *Jiva* is bird and *sukha-duhkha* are fruits and so on. *Vrksha* derived from *vrasc. Vrscanat vrkshah*. 1) *Samsara* also can be felled like tree. 2) The tree can perpetuate its existence like *samsara*. 3) The root is not seen but inferred and so too Brahman is not seen because it is observer's *svarupa*. The word *reriva* means the supporter, the life giver. *Sankara* says *prerayita*, *adhishthana* of *samsara* tree. It can be *nasayita* of *samsara* tree also, but not good meaning in the context. As the *caitanyatma*, I am supporter. *Trisanku* says that supporter is me. *Mayyeva sakalam jatam*+ I am Brahman. So I can say I am the *mulam*. *Urdhavam* is Brahman. So *Brahmamulam* is this *samsara* tree. How can he say so. The technical point is the whole universe is *adhyasta* on me. The world being *mithya*. The analogy is only figurative. You should not imagine I am the root underneath. The world is supported by me, the *adhishthanam*. Like waker for the dream world. This is not arrogance. Owning up a fact is called wisdom. What about *dasa-bhava* in *bhakti* literature. I am like grass and mud etc. You are great. *Bhakta's* wailing and *jnani's* roaring. *Bhakta* is identified with body/mind. As a physical personality, I am a speck of dust born of earth. I am insignificant. It is out of *ajnanam* only. *Jnani* can never say I am insignificant. *Srishtah* and *srashta* in two *avasthas*. Why it is a fact. It is not my feeling. It is revealed by Sruti, not as a statement but as the *anubhava* of a *rishi*.

What is my fame or glory? It is as high as the Everest peak. It is limitless *ityarthah*. The glory belongs to *adhishthanam*. Minus *adhishthanam*, there is no glory. My fame has reached even the heavens and so *devas* cannot do any *pratibandha* to me. Wherever there is fame, it is my fame only.

(उपरिभागवाचिना ऊर्ध्वशब्देन संसारमण्डलादुपरि वर्तमानं जगत्कारणत्वेन उपलक्षितं ब्रह्म लक्ष्यते इत्याशयेन आह - ऊर्ध्वम् कारणम् इति। वस्तुतः संसारास्पृष्टमिति यावत्।) ऊर्ध्वम् कारणं[१८९] (उत्कृष्टं वा) (अत एव आह - पवित्रमिति) पवित्रं पावनं[१९०] (ननु एवंभूतमपि ब्रह्म सर्वप्रामिसाधारणमेव, वस्तुत एकात्मकत्वात् सर्वप्राणिनामिति, तत्राह - ज्ञानप्रकाश्यम् इति। अन्येषां ज्ञानाभावादिति भावः।) ज्ञानप्रकाश्यं परं ब्रह्म (ब्रह्म इत्यनन्तरं स्वरूपभूतमिति शेषः) यस्य सर्वात्मनो मम, सोऽहमूर्ध्वपवित्रः (काठक २.३.१ गीता १५.१)। वाजिनि इव वाजवति इव, वाजमन्नम् (कर्मफलरूपं वस्वादिदेवभोग्यम् अमृतम् अन्नम्। तद्वत्त्वं आदित्यस्य मधुविद्यायां छां ३.१,२ प्रसिद्धम् इति बोध्यम्।), तद्वति सवितरि इत्यर्थः (वाजी सूर्यः)। यथा सवितरि अमृतम् आत्मतत्वं विशुद्धं प्रसिद्धं श्रुतिस्मृतिशतेभ्यः (श्रुतयः बृ ५.५.३ तै.ना १४ स्मृतिः गीता ८.४) (यथा सवितरि श्रुतिस्मृतिशतेभ्यः विशुद्धम् अमृतम् आत्मतत्वं प्रसिद्धं एवं मय्यपि पुरुषे श्रुतिस्मृतिशतेभ्यः एव विशुद्धम् आत्मतत्वं प्रसिद्धं अस्ति। इत्थम् उभयत्र प्रसिद्धम् आत्मतत्वं स्वमृतशब्दितम् अस्मि इत्यर्थः। तथा च श्रुतयः - "स यश्चायं पुरुषे यश्चासावादित्ये स एकः" इत्याद्याः स्मृतयश्च - "आदित्ये शुद्धममृतम् आत्मतत्वं यथा स्थितम्। विद्याधिकारिणि तथा पुरुषेऽपि तदस्ति भोः" इत्याद्याः द्रष्टव्याः)। एवं स्वमृतं (मणिप्रभा - सुष्ठु सर्वोत्तमम् अमृतम् आत्मतत्वम्) शोभनं विशुद्धम् आत्मतत्वम् अस्मि भवामि।

> I am the self of all who is Brahman, the cause of everything and absolutely pure, revealed by knowledge. Vaja means food. One who is endowed with food is Vaji, i.e., the sun. Just as the reality that is self which obtains in the sun is pure, so too, I am the pure self and this fact is well-known as revealed in hundreds of srutis and smritis.

Urdhvam is explained as *karanam*. It is beyond the sphere of objectification. My purity is highest. It is absolute purity. Because it *jnanaprakasyam*. *Svamrtam* means immortal. Like *isvarasvarupam*, *jivasvarupam* also is auspicious and immortal. This *isvara* is often represented by the sun god. *Dhyeyas sada svatrumandala+ Isvara* is worshipped in sun. I represent *jiva*. My knowledge is: both *caitanyam* are one and the same. There is a mantra in *sandhayvandanam*. *asavadityo+* Here also *sayascayam purushe+ vajam* means *annam*. Here it is energy. Or it is *hetu* for production of *annam*. One who has energy is sun. Just as *caitanyam* is *suddham* and *amritam* in sun, I am also same. Sun is *virat*. Sun has no dot of darkness or black spot. Similarly there is np trace of ignorance in me.

(लौकिकस्य रत्नादिकं धनम्, ब्रह्मविदः तु निरतिशयानन्दम् आत्मतत्वमेव धनम् तच्च स्वप्रकाशत्वाद् दीप्तिमत् इत्यर्थः।) द्रविणं धनं सवर्चसं दीप्तिमत् तदेव आत्मतत्वम्। (साकाङ्क्षत्वाद् आह - अस्मि इति) अस्मि इत्यनुवर्तते। (द्रविणम् सवर्चसम् इत्यस्य अर्थान्तरमाह - ब्रह्मज्ञानं वा इति। ब्रह्मज्ञानं वा द्रविणमिति संबन्धः।)। ब्रह्मज्ञानं वा (ब्रह्मज्ञानस्य सवर्चसत्वे हेतुमाह - अमृतत्वेति अमृतत्वम् ब्रह्म, तदावरणनिवर्तनद्वारा

---

[१८९] कारणमिति - संसारवृक्षस्य इत्युपक्रमाल्लभ्यम्। संसारवृक्षकारणस्यैव ऊर्ध्वशब्देन ऊर्ध्वमूलोऽवाक्शाखः, ऊर्ध्वमूलमधः शाखमिति श्रुतिस्मृत्योर् निर्देशाच्च इति द्रष्टव्यम्। (गोविन्दानन्द)

[१९०] पावनं च ब्रह्मवाक्योत्थ-धीवृत्तौ अभिव्यक्तत्वेन संसारमलनाशकत्वादित्याशयेन आह - ज्ञानप्रकाश्यमिति । तथा चोक्तं वार्त्तिके - पवित्रं भवहानतः इति। (गोविन्दानन्द)

तत्प्रकाशकत्वात्। अहं ब्रह्मास्मि इति व्यवहार्यतापादकत्वात् इत्यर्थः।) अमृतत्व-प्रकाशकत्वात् सवर्चसम्, द्रविणमिव द्रविणम्। मोक्षसुखहेतुत्वात् (प्रकृताभिप्रायं मोक्षग्रहणम्। पुरुषार्थहेतुत्वसाम्याद् द्रविणशब्दः ब्रह्मज्ञाने प्रयुक्तः इत्यर्थः)। (ब्रह्मस्वरूपव्यञ्जकं मुक्तिसाधनभूतं ब्रह्मज्ञानं चेत् सवर्चसं द्रविणम्, तर्हि तदस्मि इति पूर्ववद् अन्वयः न घटते। तत्राह - अस्मिन् पक्षे इति) अस्मिन् पक्षे मया प्राप्तम् इति अध्याहारः कर्तव्यः (सच्चिदानन्द - न तु अस्मि इति अनुवृत्तिः आश्रयणीया)।

I am the wealth that is effulgent, i.e., the reality that is self. That self I am The expression "I am " is to be added at the end. Or, the knowledge of Brahman is effulgent since it reveals the reality of the self. It is called wealth because of its producing absolute happiness that is freedom just as the material wealth does. In this interpretation, "this wealth has been attained by me" is to be supplied at the end (instead of "I am").

There is *drsyam* and *srutam* wealth. Gold etc. is seen and it is *manusham* wealth. From Vedas what you have heard, the *punya*, is *daivam* wealth. So *atmajnanam* is *srutam* wealth. My wealth is *brahmajnanam*. *Dravinam* can mean Brahman itself. *savarcas* is effulgence. I am effulgent Brahman or I have effulgent *brahmajnanam*. I am Brahman in first. In second I have *iti*, we have to supply. That is this shining knowledge was gained by me. Wealth is *sukhahetu*. It gives sense of security. Brahman also *sukhahetu*. i.e., *Moksha-sukha-*(*atma-sukha*)*-hetu*. What is the difference between Brahman and Brahma-knowledge. Brahman is everywhere. Knowledge is not everywhere. Knowledge arises and Brahman is not so. Brahman is *satyam*. *Brahmajnanam* is *mithya*. *Buddhi* itself is *mithya*. *Avidya* itself is *mithya*. It is *vritti rupa*. How can *mithya jnanam* give *moksha*. Bondage is *mithya*. *Mithya jnanam* is enough. *Svapna-daha-nivartanartham*? So both meanings fit in here. Why it is called effulgent? Because it (*jnanam*) destroys the darkness of ignorance. Brahman cannot destroy ignorance? Cannot. Then ignorance will not exist. Because Brahman is everywhere. The very ignorance is supported by Brahman. Brahman is effulgent because it is *svayamprakasarupa*. The essence is I am Brahman which is self effulgent. I have *Brahmajnanam* which destroyed ignorance.

सुमेधाः शोभना (शोभना ब्रह्मज्ञानोपयोगिनी मेधा ग्रन्थतदर्थधारणासामर्थ्यलक्षणा यस्य सोऽहं सुमेधाः इत्यर्थः) मेधा सार्वज्ञ्यलक्षणा (सार्वज्ञ्यलक्षणा वा मेधा यस्य सोऽहं इत्यर्थः) यस्य मम, सोऽहं सुमेधाः। (विदुषः सर्वज्ञत्वलक्षणमेधावत्वं साधयति - संसारेति। संसारः जगत् । जगज्जन्मादिहेतुत्वं च ब्रह्मभूतस्य विदुषः वाजसनेयके श्रूयते बृ. १.४.१५ - अस्माद्ध्येव आत्मनः यद्यत्कामयते तत्तत्सृजते इति। अस्मादित्यस्य साक्षात्कृताद् इत्यर्थः। छान्दोग्येपि श्रूयते - "एवं विजानतः आत्मनः प्राणाः" इत्यादिना। तथा विदुषः सर्वज्ञत्वमपि प्रश्नोपनिषदि श्रूयते - "यः सर्वज्ञः सर्वमेवाविवेश" इति) संसारस्थित्युत्पत्त्युपसंहार-कौशलयोगात् सुमेधस्त्वम् (सच्चिदानन्द - कौशलं चेदं कूटस्थ-चैतन्य-स्वरूपेण स्थितस्यैव मायया संसारस्थित्यादिहेतुत्वम्)। अत एव (जगद्-हेतुत्वादेव इत्यर्थः। जगत्कारणस्य ब्रह्मचैतन्यस्य नित्यत्वात् तद्रूपस्य विदुषो नास्ति मरणम् इत्यर्थः) अमृतः अमरणधर्मा, अक्षितः (क्षि क्षये १. प.प. क्षित, क्षीण) अक्षीणः अव्ययः (अवयव-अपचयः व्ययः। तद्रहितः इत्यर्थः) अक्षतो वा (क्षणु हिंसायाम्) (शस्त्रादिकृतक्षतरहितः इत्यर्थः। निरवयवत्वाद् इति भावः)। (समस्तपदे सति) अमृतेन वा (स्वरूपानन्द-अनुभवेन सदा व्याप्तः इति यावत्।) उक्षितः सिक्तः अमृतोक्षितः अहम्। इति इत्यादि (इति त्रिशङ्कोः वेदानुवचनम् इति वाक्यं ब्राह्मणम् इत्यर्थः) ब्राह्मणम्।

I am sumedha whose knowledge is great, characterised by omniscience. The knowledge is great because it is associated with the skill of sustaining, creating and resolving the world. And therefore, I am endowed with the attribute of immortality

and nonchanging, or non-decay. Or, the word amrtokshitah can mean I am soaked in immortality, for there is a Brahmana text to this effect: "I am soaked in nectar".

Sumedha is I am omniscient. *Medha* is not simple remembering. Remembering what all other persons called names. It is *sobhana*. The knowledge of everything is to know that everything is *mithya*. Knowledge of *karanam*. Details of *mithya* one need not know. Anyone can say I am the author of everything as *brahmarupa*. *Jnani tu atmaiva me matam*. *Amrtokshitah* can have two versions. *Amritah* is immortal. Since I am *layakaranam*, I am not subject to *laya*. *Akshitah* is free from decay, decline. *Akshatah* means not hurt or destroyed. If one word, then *ukshitah* means sprinkled by *amrtena*, by immortality. I am liquid or liquefied *ananda*. No more crystallisation. I am drenched or soaked in immortality. *Iti* indicates the end of quotation. This is *brahmanopanishad*

इति एवं त्रिशङ्कोः ऋषेः ब्रह्मभूतस्य (सच्चिदानन्द - कर्मानुष्ठानात् चित्तशुद्धिमवाप्य ब्रह्मज्ञानद्वारा ब्रह्मभूतस्य।) ब्रह्मविदः वेदः वेदनम् आत्मैकत्वविज्ञानं तस्य प्राप्तिम् अनु वचनं वेदानुवचनम्। (मणिप्रभा -आत्मप्राप्त्यनन्तरं वचनं कथनम् अनुकथनम्)। आत्मनः कृतकृत्यताख्यापनार्थं (यथा वामदेवस्य कृतकृत्यताख्यापनार्थम् {तद्धैतत् पश्यन् ऋषिः वामदेवः प्रतिपेदे} अहं मनुरभवम् इत्यादिवचनम्, तथा त्रिशङ्कोरपि वेदानुवचनं तत्ख्यापनार्थम्। तत्ख्यापनं च मुमुक्षूणां कृतकृत्यतासंपादके ब्रह्मविचारे प्रवृत्यर्थमिति बोध्यम्। वामदेववत् (ऐ.२.१.४ बृ१.४.१०) (पूर्वम् अहं वृक्षस्य इति मन्त्रस्य विद्याप्रयोजकप्रकरणमध्यपठितत्वाद् विद्या शेषत्वमुक्तम्। इदानीं लिङ्गादपि तस्य तच्छेषत्वं वक्तुं शक्यते इत्याशयेन विवक्षितं मन्त्रार्थं कथयति - त्रिशङ्कुना इति) त्रिशङ्कुना आर्षेण (तपः प्रभावजनितेन इत्यर्थः) दर्शनेन दृष्टः मन्त्राम्नायः आत्मविद्याप्रकाशकः इत्यर्थः।

Thus was the declaration of Sage Trisanku, a seer who had become Brahman through knowledge, after the attainment of knowledge of the nondual self. This statement of the sage was for the sake of revealing his sense of absolute accomplishment, just like Vamadeva (Ai. 2.5). The idea is that the Vedic mantra seen by Sage Trisanku through his Vedic wisdom reveals the knowledge of the self.

This is the statement of *Trisanku* who has in the form of Brahman. Did he undergo any snowballing. It is to know Brahman. So *atmaekatva vijananam*. It reveals the accomplishment of what is to be accomplished. All that is to be done is done at one stroke. Like *Vamadeva* who said I was *Manu* etc All that existed before is also me. This mantra is seen by this *rishi*. *Arsha* means revelation. *Tapah prabhava*. There is analysis here. Not Vedanta *vicara* chapter. It will be done in 2nd chapter. So this mantra is not for discussion. Just keep repeating even if you don't understand. What is the use of *japa*. It creates *samskara*. It is useful for *atmajnanam*. We had opposite *samskaras* in karma and *upasana*. We have to preserve the "I". "I" have to be saved. You cannot brand I as useless. Mistakes can be corrected.

कर्मणः (परम्परया) ज्ञानहेतुत्वम्

(मन्त्रस्य विद्याप्रकाशकत्वे फलितमाह - अस्य च इति)। अस्य च (विद्याप्रकशनसामर्थ्यरूपाल्लिङ्गाच्च इति चकारार्थः) जपः विद्योत्पत्यर्थः अवगम्यते। (पूर्वानुवाके कर्माणि उपन्यस्य अनन्तरमेव ऋषेः आत्म-

विषयदर्शन-उपन्यासे श्रुतेः कोऽभिप्रायः इत्याकाङ्क्षायामाह - ऋतमित्यादिना) (आ.गिरि - [१९१]अहं वृक्षस्य रेरिवा इति मन्त्रस्य ऋषिः त्रिशङ्कुः पङ्क्तिश्छन्दः परमात्मा देवता। ब्रह्मविद्यार्थे जपे विनियोगः। न केवलमस्य जपो विद्यार्थः, पूर्वोक्तानि कर्माण्यपि इत्याह - ऋतम् इत्यादिना) (मणिप्रभा - इति विद्योत्पत्यर्थे अस्य मन्त्रस्य जपः कर्तव्यः इति भावः)। ऋतं च इत्यादि कर्मोपासनादनन्तरं च (चकारः अवधारणार्थः) वेदानुवचन-पाठादेतद् अवगम्यते - एवं श्रौतस्मार्तेषु नित्येषु कर्मसु युक्तस्य (सकामस्य पितृलोकप्राप्तिरेव कर्मणा पितृलोकः इति श्रुतेः नात्मदर्शनमित्याशयेन आह - निष्कामस्य इति) निष्कामस्य परं (सांसारिकफलेषु निःस्पृहस्यापि विद्याम् अकामयमानस्य न विद्योत्पत्तिः किन्तु प्रत्यवायनिवृत्तिमात्रमित्याशयेन आह - ब्रह्म इति) ब्रह्म विविदिषोः (नित्यनैमित्तिककर्मस्वपि तपसा कल्मषं हन्ति इत्यादौ तपस्त्वप्रसिद्धेः तज्जन्यानामपि दर्शनानाम् आर्षत्वमुक्तमिति वक्तव्यम्।) आर्षदर्शनानि प्रादुर्भवन्ति आत्मादिविषयाणि इति।

> And it can be comprehended that the recitation of this mantra is meant to give rise to knowledge. From the fact that the declaration of the seer (after the attainment of knowledge) has been introduced after the section dealing with karma and *upasana* beginning from “rtam ca”, it is evident that - for him who engages himself in the daily duties enjoined by srutis and smritis devoid of any hankering and who has the desire to know the supreme Brahman, the visions of the seers on the subject of the self etc. reveals itself

[१९१] अविदित्वा ऋषिं छन्दो दैवतं योगमेव च। योध्यापयेद् जपेद्वापि पापीयाञ्जायते तु सः। इत स्मरणाद् ऋष्यादिकं दर्शयति - अहमित्यादिना । योगऋ प्रकृतिप्रत्ययसंबन्धः। ऋषिरिति - यस्य वाक्यं स ऋषिः । या तेनोच्यते सा देवता । यदक्षरपरिमाणं तच्छन्दः । इति सर्वानुक्रमणी। पङ्क्तिश्छन्दः इति - अस्य पञ्चपादत्वादिति भावः। यद्यपि अष्टाक्षराः पञ्चपादा यस्याः सा पङ्क्तिरुच्यते। इन्द्रे महाय वावृधे इत्थाहि सोम इन्महे । इति सर्वानुक्रणीव्याख्याने अस्या अष्टाक्षरपादत्वमुक्तं तथापि तत्रैव पङ्क्तिभेदानां बहुधा उक्तत्वेन विषमाक्षरपादत्वमपि न विरुध्यते इति अवधेयम् ।

सत्यादिकर्त्तव्यतोपदेशस्य प्रयोजनम्

५८) 'वेदमनूच्य' इत्येवमादि-कर्त्तव्यतोपदेशारम्भः[१९२] प्राग्ब्रह्म-विज्ञानाद् नियमेन कर्त्तव्यानि श्रौत-स्मार्त्त-कर्माणि इत्येवमर्थः। अनुशासन-श्रुतेः पुरुष-संस्कारार्थत्वात्। संस्कृतस्य हि विशुद्ध-सत्वस्य आत्मज्ञानम् अञ्जसा एव उत्पद्यते। "तपसा कल्मषं हन्ति विद्ययाऽमृतमश्नुते (मनु.स्मृ. १२.१०४)" इति हि[१९३] स्मृतिः। वक्ष्यति च "तपसा ब्रह्म विजिज्ञासस्व (तै.उप. ३.२)" इति। अतो विद्योत्पत्त्यर्थमनुष्ठेयानि कर्माणि। 'अनुशास्ति' इति अनुशासन-शब्दात्। अनुशासनातिक्रमे हि दोषोत्पत्तिः। प्रागुपन्यासाच्च कर्मणाम्। केवल-ब्रह्म-विद्यारम्भाच्च पूर्वं कर्माण्युपन्यस्तानि। उदितायां च विद्यायाम्[१९४] "अभयं प्रतिष्ठां विन्दते (तै.उप. २.७)", "न बिभेति कुतश्चन (तै.उप २.९)", "किमहं साधु नाकरवम् (तै.उप. २.९)" इत्येवमादिना कर्म-नैष्किंचन्यं दर्शयिष्यति इत्यतः अवगम्यते पूर्वोपचित-दुरित-क्षय-द्वारेण विद्योत्पत्त्यर्थानि कर्माणीति। मन्त्र-वर्णाच्च "अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते (ईश.उप. ११)" इति।।

कर्मोपदेशावृत्तेः तात्पर्यम्

५९) ऋतादीनां पूर्वत्रोपदेशः आनर्थक्य-परिहारार्थः। इह तु ज्ञानोत्पत्त्यर्थत्वात् कर्त्तव्यता-नियमार्थः।।

शिष्यं प्रति आचार्यस्य अनुशासनम्

अनुष्ठेयानां सामान्यवचनम्

६०) **वेदम् अनूच्य** अध्याप्य **आचार्यः अन्तेवासिनं** शिष्यम् **अनुशास्ति** ग्रन्थग्रहणाद् अनु पश्चात् शास्ति तदर्थं ग्राहयति इत्यर्थः। अतोऽवगम्यते अधीत-वेदस्य धर्म-जिज्ञासामकृत्वा गुरुकुलान्न समावर्त्तितव्यमिति। "बुद्ध्वा कर्माणि कुर्वीत[१९५] (आप.ध.सूत्र २.२१.५)" इति स्मृतेः च। कथमनुशास्ति इति? आह - **सत्यं वद** यथा-प्रमाणावगतं वक्तव्यं तद्वद। तद्वद् **धर्मं चर**। धर्मः इत्यनुष्ठेयानां सामान्य-वचनम्। सत्यादि-विशेष-निर्देशात्। **स्वाध्यायाद्** अध्ययनात् **मा प्रमदः** प्रमादं मा कार्षीः। **आचार्याय** आचार्यार्थं **प्रियम्** इष्टं **धनम् आहृत्य** आनीय दत्त्वा विद्या-निष्क्रयार्थम्, आचार्येण च अनुज्ञातोऽनुरूपान् दारान् आहृत्य **प्रजा-तन्तुं** प्रजा-संतानं **मा व्यवच्छेत्सीः** प्रजा-संततेर्विच्छित्तिः न कर्त्तव्या। अनुत्पद्यमानेऽपि पुत्रे पुत्र-काम्यादि-कर्मणा तदुत्पत्तौ यत्नः कर्त्तव्यः इत्यभिप्रायः। प्रजा-प्रजन[१९६]-प्रजाति-त्रय-निर्देश-सामर्थ्यात्। अन्यथा 'प्रजनष्ठ' इति एतदेकमेव अवक्ष्यत्।

अनुष्ठेयानां विशेषनिर्देशः

---

[192] पा.भे - इत्येवमादि-कर्त्तव्योपदेशारम्भः इति।

[193] पा.भे - इति स्मृतिः इति आनन्दाश्रमः।

[194] पा.भे - ब्रह्मविद्यायाम् इति।

[195] पा.भे - बुद्ध्वा कर्माणि चारभेत् इति आनन्दाश्रमः।

[196] पा.भे - प्रजननेति आनन्दाश्रमः।

६१) **सत्याद् न प्रमदितव्यं** प्रमादो न कर्त्तव्यः। सत्याच्च प्रमदनम् अनृत-प्रसङ्गः। प्रमाद-शब्द-सामर्थ्याद् विस्मृत्यापि अनृतं न वक्तव्यम् इत्यर्थः[१९७]। अन्यथा असत्य-वदन-प्रतिषेधः एव स्यात्। **धर्माद् न प्रमदितव्यम्**। धर्म-शब्दस्य अनुष्ठेय-विषयत्वात्[१९८] अननुष्ठानं प्रमादः। स न कर्त्तव्यः। अनुष्ठातव्यः एव धर्मः इति यावत्। एवं[१९९] **कुशलाद्** आत्मरक्षणार्थात् कर्मणः **न प्रमदितव्यम्**। भूतिः विभूतिः तस्यै **भूत्यै** भूत्यर्थाद् मङ्गलार्थात्[२००] कर्मणः **न प्रमदितव्यम्**। **स्वाध्याय-प्रवचनाभ्यां न प्रमदितव्यम्**। स्वाध्यायः अध्ययनम्, प्रवचनम् अध्यापनम्; ताभ्यां न प्रमदितव्यम्[२०१]। ते हि नियमेन कर्त्तव्ये इत्यर्थः। तथा **देव-पितृ-कार्याभ्यां न प्रमदितव्यम्**। दैव-पित्र्ये कर्मणी कर्त्तव्ये। मातृ-देवः माता देवो यस्य सः त्वं मातृ-देवो भव स्याः। एवं पितृ-देवः, आचार्य-देवः, अतिथि-देवः भव। देवतावद् उपास्या एते इत्यर्थः।

अनिन्दितकर्मणः कर्त्तव्यत्वम्

६२) **यानि** अपि च अन्यानि **अनवद्यानि** अनिन्दितानि शिष्टाचार-लक्षणानि **कर्माणि**। **तानि सेवितव्यानि** कर्त्तव्यानि त्वया। **नो** अकर्त्तव्यानि **इतराणि** सावद्यानि शिष्ट-कृतान्यपि। **यानि** अस्माकम् आचार्याणां **सुचरितानि** शोभन-चरितानि आम्नायाद्यविरुद्धानि **तानि** एव **त्वया उपास्यानि** अदृष्टार्थानि अनुष्ठेयानि। नियमेन कर्त्तव्यानि इति यावत्। **नो इतराणि** विपरीतानि, आचार्य-कृतान्यपि।।

गुरुजनेषु कर्त्तव्य-नियमः

६३) **ये के च** अविशेषिताः[२०२] आचार्यत्वादि-धर्मैः **अस्मद्** अस्मत्तः **श्रेयांसः** प्रशस्यतराः ते च **ब्राह्मणाः** न क्षत्रियादयः। **तेषाम् आसनेन** आसन-दानादिना **त्वया प्रश्वसितव्यं** प्रश्वसनं प्रश्वासः श्रमापनयः। तेषां श्रमः त्वया अपनेतव्यः इत्यर्थः। तेषां वा[२०३] आसने गोष्ठीनिमित्ते समुदिते तेषु न प्रश्वसितव्यम्, प्रश्वासोऽपि न कर्त्तव्यः। केवलं तदुक्त-सार-ग्राहिणा भवितव्यम्।।

दानविषये भावनानियमः

६४) किञ्च यत्किञ्चिद् **देयं** तत् **श्रद्धया** एव दातव्यम्। **अश्रद्धया अदेयम्** न दातव्यम्। **श्रिया** विभूत्या **देयम्**। **ह्रिया** लज्जया **देयम्**। **भिया** च भयेन देयम्। **संविदा** च। संविन्मित्रादिकार्यम्[२०४]।।

---

[197] पा.भे - अनृतवदनविषये दोषश्रुतेष्ट्या। "योनृतं वदति समूलो वा एष परिशुष्यति" इति। "न सत्यात् परमो धर्मो नानृतात्पातकं परम्" इति स्मृतेः। इत्यधिकं क्वचित्।

[198] पा.भे - अनुष्ठेय-विशेष-विषयत्वात् इति।

[199] पा.भे - धर्म इति यावत्। एवम् - इति नास्ति क्वचित्।

[200] पा.भे - मङ्गलयुक्तात् इति आनन्दाश्रमः।

[201] पा.भे - स्वाध्यायः अध्ययनम्, प्रवचनम् अध्यापनम्; ताभ्यां न प्रमदितव्यम् - इति क्वचित् न।

[202] पा.भे - विशेषिताः इति आनन्दाश्रमः।

[203] पा.भे - च इति आनन्दाश्रमः।

[204] पा.भे - मैत्र्यादिकार्येण देयम् इति।

अनुष्ठानविषयक-संशये शिष्टाचारः प्रमामम्

६५) **अथ** एवं वर्त्तमानस्य **यदि** कदाचित् **ते** तव श्रौते स्मार्त्ते वा कर्मणि वृत्ते **वा** आचार-लक्षणे **विचिकित्सा** संशयः **स्याद्** भवेत्। **ये तत्र** तस्मिन् देशे काले वा **ब्राह्मणाः** तत्र कर्मादौ 'युक्ताः' इति व्यवहितेन संबन्धः कर्त्तव्यः। **संमर्शिनः** विचार-क्षमाः। **युक्ताः** अभियुक्ताः कर्मणि वृत्ते वा **आयुक्ताः** अपर-प्रयुक्ताः। **अलूक्षाः** अरूक्षाः अक्रूर-मतयः। **धर्म-कामाः** अदृष्टार्थिनः। अकामहताः इत्येतत्। **स्युः** भवेयुः। **ते** ब्राह्मणाः **यथा** येन प्रकारेण **तत्र** तस्मिन् कर्मणि वृत्ते वा **वर्तेरन् तथा** त्वमपि **वर्तेथाः**। **अथ अभ्याख्यातेषु**। अभ्याख्याताः अभ्युक्ताः, दोषेण संदिह्यमानेन संयोजिताः केनचित्। तेषु च यथोक्तं सर्वम् उपनयेद् 'ये तत्र' इत्यादि।।

उपदेशोपसंहारः

६६) **एषः आदेशः** विधिः **एषः उपदेशः** पुत्रादिभ्यः पित्रादीनाम्। **एषा वेदोपनिषद्** वेद-रहस्यम्, वेदार्थः इत्येतत्। **एतत्** एव **अनुशासनम्** ईश्वर-वचनम् आदेश-वाच्यस्य[२०५] विधेः उक्तत्वात्। सर्वेषां वा प्रमाण-भूतानाम् अनुशासनमेतत्। यस्मादेवम्, तस्माद् **एवं** यथोक्तं सर्वम् **उपासितव्यं** कर्त्तव्यम्। **एवम् उ च एतद् उपास्यम्** उपास्यमेव चैतत्, नानुपास्यम् इत्यादरार्थं पुनर्वचनम्।।

[205] पा.भे - आदेश-वाक्यस्य इति आनन्दाश्रमः।

ELEVENTH ANUVAKA

विद्योत्पत्त्यर्थम् अनुष्ठेयानि कर्माणि

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति । सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् । १ । देवपितृकार्याभ्यां न प्रमदितव्यम् । मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव ।

वेदमनूच्य - having taught the Vedic chanting; आचार्यः - the teacher; अन्तेवासिनम् - the residential students thus; अनुशास्ति - instructs; सत्यं वद - speak the truth; धर्मं चर - follow dharma; स्वाध्यायाद् - from the study of scriptures; मा प्रमदः - may you not fail; आचार्याय - to the teacher; प्रियं धनम् - the desired wealth; आहृत्य - after offering; प्रजातन्तुं - the family lineage; मा व्यवच्छेत्सीः - may you not break; सत्याद् - from the truth; न प्रमदितव्यम् - may you not swerve; धर्माद् - from dharma; न प्रमदितव्यम् - may you not swerve; कुशलाद् - to you own well being; न प्रमदितव्यम् - may you not be indifferent; भूत्यै - towards material prosperity; न प्रमदितव्यम् - may you not be indifferent; स्वाध्यायप्रवचनाभ्यां - from the study and propagation of scriptures; न प्रमदितव्यम् - may you not swerve; देवपितृकार्याभ्यां - from the worship of gods and forefathers; न प्रमदितव्यम् - may you not swerve; मातृदेवो भव - may your mother be a god to you; पितृदेवो भव - may your father be a good to you; आचार्यदेवो भव - may your teacher be a god to you; अतिथिदेवो भव - may your guest be a god to you.

Having taught the Vedic chanting the teacher instructs the residential students thus - Speak the truth. Follow dharma May you not fail from the study of scriptures. After offering the desired wealth to the teacher may you not break the family lineage. May you not swerve from the truth. May you not swerve from dharma. May you not be indifferent to your own well being. May you not be indifferent towards material prosperity. My you not swerve from the study and propagation of scriptures. May you not swerve from the worship of gods and forefathers. May your mother be a god to you. May your father be a good to you. May your teacher be a god to you. May your guest be a god to you.

सत्यादिकर्त्तव्य-उपदेशप्रयोजनम्

(उत्तरानुवाके कर्मणां कर्त्तव्यता किमर्थमुपदिश्यते इत्याकाङ्क्षायामाह - वेद इत्यादिना)। वेदमनूच्य इत्येवमादि कर्त्तव्यता-उपदेशारम्भः प्राग्ब्रह्मविज्ञानाद् नियमेन कर्त्तव्यानि श्रौतस्मार्त्तानि कर्माणि इत्येवमर्थः

(ज्ञानात्पूर्वं कर्मणां ज्ञानार्थिना अवश्यं कर्त्तव्यत्वे हेतुमाह - पुरुषेति)। पुरुषसंस्कारार्थत्वात् (सच्चिदानन्द - अनुशास्ति इति विद्याप्रकरणे विधानात् मुमुक्षोः संस्कारार्थत्वं कर्मणाम् अवगम्यते।)। (संस्कारस्वरूपं कथयन्संस्कारद्वारा तेषां ब्रह्मविज्ञानसाधनत्वमाह - संस्कृतस्य हि इति । सत्वस्यान्तःकरणस्य विशिष्टा या शुद्धिः सैव संस्कार इति भावः)। संस्कृतस्य हि विशुद्धसत्वस्य आत्मविज्ञानम् अञ्जसा (झटिति-सपदि-इत्यादि पर्यायः - अमरः) एव (अप्रतिबन्धेन एव इत्यर्थः) उत्पद्यते। (पापरूपस्य चित्तमालिन्यस्य ज्ञानोत्पत्तिप्रतिबन्धकत्वात् शुद्धिद्वारा कर्मणां विद्योदयहेतुत्वे हि-शब्दसूचितं मानमाह - तपसेति। तपसा कर्मणा कल्मषनिवृत्तौ विद्या भवति, तथा विद्यया अमृतमश्नुते इति स्मृत्यर्थः। (पूर्वार्धम् - तपो विद्या च विप्रस्य निःश्रेयस्करं परम्।) "तपसा कल्मषं हन्ति विद्यया अमृतमश्नुते" (मनु १२.१०४) इति हि स्मृतिः (इति स्मृतेः इत्यर्थः) (सच्चिदानन्द - कर्मणां संस्कारद्वारा विद्योत्पत्त्यर्थम् उक्तस्मृतेः अवगम्यते इत्यभिप्रायः)। (ननु कर्मभिः विशुद्दसत्वस्य अपि तत्वचिन्तां विना कथम् आत्मविज्ञानमञ्जसा एव उत्पद्येत। तत्राह - वक्ष्यति च इति। तत्वचिन्तामपि विद्यासाधनत्वेन श्रुतिः वक्ष्यति इत्यर्थः। श्रुतौ तपःशब्दस्तत्वविचारपर इत्येतदग्रे स्फुटीकरिष्यते।) वक्ष्यति च "तपसा ब्रह्म विजिज्ञासस्व[२०६]" (तै ३.२) इति। (उपसंहरति - अत इति। पुरुषसंस्कारद्वारा कर्मणां विद्यासाधनत्वादित्यर्थः।) अतो विद्योत्पत्त्यर्थमनुष्ठेयानि कर्माणि। अनुशास्ति (शासु अनुशिष्टौ अदादि प.प.) इति (ननु उपदिशति इति अनुक्त्वा राजेव अनुशास्ति इति किमर्थं वदति श्रुतिः इत्याशङ्क्य गुरूपदेशातिक्रमे महाननर्थो भवेदिति सूचनार्थमित्याह - अनुशासनशब्दादिति। तदिक्रमे दोषो भवति इति गम्यते इति शेषः) अनुशासनशब्दात् (तत्रोपपत्तिमाह - अनुशासनेति । लोके राजानुशासन-अतिक्रमे दोषोत्पत्ति प्रसिद्धेः इति हि-शब्दार्थः) अनुशासन-अतिक्रमे हि दोषोत्पत्तिः (सच्चिदानन्द - अतो नियमेन कर्त्तव्यानि)।

> The enjoinment of duties in the section beginning with vedamanucy is meant to point out that the duties mentioned in the srutis and smritis are to be practised regularly. This is so because, the sruti that enjoins duties after the study of the Vedas aims at creating proper mental impressions in a person and the knowledge of the self takes place instantly in the case of one who has proper tendencies and whose mind is purified. Accordingly is the Smriti, "One destroys impurities through austerity and by knowledge one gains immortality." And the Unpanishad will say later, "may you know Brahman through austerity" Hence karmas have to be done for the sake of dawn of knowledge. The expression instructs in "he instructs after the study" implies undesirable results in transgression of the instructions.

(ननु यथा ज्ञानात्पूर्वं कर्माणि ज्ञानार्थं कर्त्तव्यानि तथा ज्ञानोदयानन्तरमपि मुक्त्यर्थं तानि कर्त्तव्यानि, ज्ञानकर्मसमुच्चयस्य एव मुक्तिसाधनत्वात्। तथा च स्मृतिः - तत्प्राप्तिहेतुर्विज्ञानं कर्म चोक्तं महामुने इति। नेत्याह- प्रागिति। च शब्दः शङ्कानिरासार्थः। कर्मणां विद्यारम्भात् प्रागुपन्यासाद् हेतोः विद्योदयानन्तरं न तान्यनुष्ठेयानि इत्यर्थः)। (आ.गिरि - विद्योत्पत्त्यर्थं नित्यनैमित्तिकानि अवश्यानुष्ठेयानि इत्येको नियमो उक्तः। प्रागेव च अनुष्ठेयानि इति नियमान्तरमाह - प्रागिति) प्रागुपन्यासाच्च कर्मणाम्, केवलब्रह्मविद्यारम्भाच्च (केवलेति। ब्रह्मविदाप्नोति परम् इत्यत्र परप्राप्तिसाधनत्वेन विद्यामात्रारम्भाच्च हेतोः न विद्योदयानन्तरं तान्यनुष्ठेयानि इत्यर्थः। (प्रागुपन्यासं विवृणोति - पूर्वमिति। ब्रह्मविदाप्नोति परम् इति विद्यारम्भात् पूर्वं संहितोपनिषदि एव ऋतं च इत्यादौ उपन्यस्तानि इत्यर्थः।) पूर्वं कर्माण्युपन्यस्तानि। (विद्योदयानन्तरम् एव मुक्तिलाभ-श्रवणात् तदनन्तरं कर्मणां नैष्फल्यश्रवणाच्च न मुक्तिसाधनत्वं कर्मणामित्याशयेन आह - उदितायां च इति। यदा ब्रह्मणि अभयं यथा भवति तथा प्रतिष्ठामात्मभावं विद्यया विन्दते तदा एव अभयं गतः भवति। ब्रह्मणः स्वरूपभूतमानन्दं विद्वान्न बिभेति कुतश्चन भयहेत्वविद्याया

[२०६] भृगुवल्ल्यां तु भाष्ये तपःशब्दो बाह्यान्तःकरणसमाधानार्थकत्वेन व्याख्यातः । तच्च समाधानं स्वधर्माचरणेनैव सम्यग् अनुष्ठितेन सिध्यति इत्यभिप्रायेण स्यात् तत्वाक्य-उदाहरणमत्र । (सच्चिदानन्द)

विद्योदयकाले एव निवृत्तत्वादित्यर्थः)। उदितायां च (त्वर्थे चः) ब्रह्मविद्यायाम् "अभयं प्रतिष्ठां विन्दते" (तै २.७) "न बिभेति कुतश्चन" (तै २.९), "किमह (विदुषः साधुकर्म-अकरण-प्रयुक्त-संताप-अभावोक्त्या तं प्रति कर्मणामाकिंचन्यं फलाभावः प्रतीयते इत्यर्थः) साधु नाकरवम्" (तै २.९) इत्यादिना कर्मनैष्किंचन्यं (चन चित् इति निपातौ किम्-शब्देन तदुत्पन्न-कदा,क्व.कुतः कथम् इत्यादिभिः च अनिश्चितार्थे प्रयुज्येते) दर्शयिष्यति। (समुच्चयस्य श्रुतिबाह्यत्वमुसंहरति - अत इति। प्रागुपन्यासादि हेतोः इत्यर्थः)। अतः अवगम्यते[२०७] - पूर्वोपचितदुरितक्षयद्वारेण विद्योत्पत्त्यर्थानि (विद्योत्पत्त्यर्थानि एव न मुक्त्यर्थानि इति गम्यते इत्यर्थः) कर्माणि इति। (इतश्च दुरितक्षयद्वारा विद्योत्पत्त्यर्थानि एव इत्याह - मन्त्रेति। अविद्यया कर्मणा मृत्युं पाप्मानं तीर्त्वा इति कर्मणां दुरितक्षयफलकत्वप्रतिपादनपूर्वकं विद्यामात्रस्य मुक्तिहेतुत्वप्रतिपादकमन्त्रवर्णाच्च इत्यर्थः। एवं च सति तत्प्राप्तिहेतुरपि स्मृतिवचनं क्रमसमुच्चयपरम्, न यौगपद्येन विद्याकर्मणोः समुच्चयपरमिति मन्तव्यम्)। मन्त्रवर्णाच्च "अविद्यया (अविद्यापूर्वकत्वात् कर्म अविद्येति उच्यते) मृत्युं तीर्त्वा विद्यया अमृतमश्नुते" इति (ईश. ११)।

द्विःकर्मोपदेशप्रयोजनम्

(आ.गिरि - ऋतं च स्वाध्यायप्रवचने च इत्यादिना पूर्वत्र कर्मानुष्ठानमुक्तमेवातः पौनरुक्त्यं (इत्याशङ्क्याह - ऋतादीनामिति) (पौनरुक्त्यं परिहरति - ऋतादीनामिति। कर्मणां विद्याफले स्वाराज्ये अनुपयोगमाशङ्क्य तत्रोपयोग-कथनाभिप्रायेण पूर्वत्रोपदेशः इत्यर्थः।) ऋतादीनां पूर्वत्र उपदेशः आनर्थक्यपरिहारार्थः (सच्चिदानन्द - अपरविद्यासहकारित्वेनापि सार्थक्यं वक्तुं ऋतं च इत्यादि-उपदेशः इत्यर्थः)। इह तु ज्ञानोत्पत्ति-अर्थत्वात् कर्त्तव्यता-नियमार्थः (सच्चिदानन्द - इह पुनः विद्यायाः उत्पत्त्यर्थं नियमेन कर्त्तव्यानि कर्माणि इति उपदिश्यन्ते। न तु विद्यासहकारित्वेन। विद्यायाः अविधेयत्वात्, विद्याफलस्य च असाध्यत्वात् विद्याकर्मणोः विरोधाच्च इत्यर्थः। छा. भा ८.१५.१, शू.भा ३.४.१३, ३.४.१६)।

> This becomes evident from the mention of karmas first/ Before beginning only the knowledge of Brahman, the karmas have been dealt. Sruti will show the futility of karma at the dawn f knowledge, in such passages as " (When the enlightened one) gets established in fearless Brahman..", ""he never gets afraid of anything:, "Why did I not do good karma". Hence it is known that karmas are meant for the arisal of knowledge through elimination of papas gathered earlier. And this borne out by the Vedic text: Transcending the death through karmas, one gains immortality through meditation." The instruction of rtam etc. is to indicate the absence of uselessness of them and the present instruction is for making an imperative rule about their performance, they being instrumental in the dawn of knowledge.

KARMA NECESSARY FOR KNOWLEDGE

Now in this section some more duties and values are prescribed. Again to indicate that they are very very important to get the preparation for *atma-jnanam*. When are these duties and values are taught? In the tradition, in *brahmacarya asrama* these are taught. First he is taught the chanting of Vedas. This is called *veda-adhyayanam*. He does not learn the meaning of the Vedas. *Byhearting* is useful for easily analysing the meaning. Thorough awareness of which is said where is necessary for thorough analysis. Six *lingas* are used for ascertaining the meaning. So what is said in *upakrama* and *upasamhara*, what is often repeated etc. we have to know. Analysis requires getting *byheart*. For approaching Brahma-*jnanam*, Upanishads must be studied first. If lawyer has to use all arguments, he must know

[२०७] विद्योत्पत्त्यर्थमेव, न तु फलप्राप्तौ विद्यासहकारित्वेनापि इत्येतत् कथमवगम्यते इत्यत आह - उदितायामिति । (सच्चिदानन्द)

his *sastra* thoroughly *byhearted*. Veda *sabda* itself has a purificatory power. It can create such an atmosphere that it can create *vaidika samskara*. That is the belief of Mahesh Yogi. Veda *ghosha* they prescribe. There is *kshema* there where there is Veda *ghosha*. It even helps in health by appropriate *calanam* of *nadis*. Then comes the Veda *mimasa* or analysis of Vedas. It is of the first portion, not the end portion., That is preserved for later pursuit if *vairagym* is there. Then he will know what are the duties of various *asramas* and what is the ultimate goal etc. He will marry for *artha* and *kama*. *Dharma sastra* says that it is not the goal. *Artha* and *kama* will come and go. If they don't go you will go. So they are *anityam*. *Dharma* and *moksha* is *nityam*. Importance of *dharma* has to be known for right selection of everything in life including wife.

Here in this section the teacher teaches the student. It is valedictory. Brahmavidya is going to come. For that the student is prepared through *karma-anushthanam*. Karma is meant for *samskara*. Then only knowledge is born without obstruction. You have to process the *antahkaranam* for the purity. One who has got the Sanskrit knowledge. *Tapas* has got many meanings. *Tapas* here is performing *karmas* enjoined. It is called *aradupakarakam*. Karma is indirectly connected. (See *tippani*). If *sakama*, you get *brahmaloka* by karma and *upasana*. But we don't know how much to do karma and *upasanam*. Whether we have done enough for the result. etc. It is like you don't know how much to set for the other team in the one-day. It is better to chase. So here *nishkamatvam* in doing karma is required for getting knowledge right now. For *vidya prapti*, you go to teacher. You have everything. But still it does not take place. Because one more thing is required for *vidya utpatti*. Seeds can be thrown. But to sprout it has to have right soil. The words to go home, the place must be ready. The *Sarasvati* will not enter where there is even a small dirt. She wears white sari. Not one dot anywhere. White is snow white. The home should be clean. If it is not clean, she walks out. *Utpatti* requires removal of *pratibandha* like *raga dveshas*. *Anusasti iti* it is said. The force in the word is because there is freedom. Where there is freedom, there can be abuse or freedom not to do. So we have to say, you have to do. If you do, then the desire to know has to arise. In such a mind free from raga, and the giving alone is there, the desire has to arise as a rule. *Anusasanam* is mandate. If one transgresses, then there is papa. So Sruti has to command. If I simply say, you may do, then in all probability you will not do. If I say you should do, then there is the expectation in you that there will be undesirable consequence if not done. So that command is there which shows, these duties have to be done. So *doshautpatti* will not be felt if not mandated. If you don't do what is to be done, you will be doing something what is not to be done. So it causes *dosha*. It is like mandate. Guru only does *adesa*. Raja commands.

That the *karmas* have been taught at first before *brahmavidya* of next chapter also indicates that they are for the arisal of knowledge. Further *vidya* alone is going to be started thereafter without any karma in association. That by *vidya* alone he gains *moksha*. So there is no karma-*anushthana* there either during or after. Why not after *vidya*? No Sruti points out absence of karma thereafter. Quotes. *Akincitkaram* means it does not do any addition. When the knowledge has taken place, he gets *nishtha* in Brahman which is free from fear. There is no other thing. Guilt does not haunt him anymore in the karma *vishaya*. I did the wrong is a fact. I did not do the right is also a fact. How can it go. It will never go. Whatever you do it will remain. All *prayascitta* will give some good sense and create *punya*. That *drshta phalam* is centred on *kartta* and it will not go. But you can knock of *kartta*. It is just

like waking up. You had so much guilt in dream. On waking the *kartta* resolves and so sense also. Anyhow you did not do to begin with. So this shows karma *abhava* for him. Karma does no *atisaya* . So karma is useless. Hence karma are for *vidya* through elimination of papa and gaining the grace of *Paramesvara*. Grace is always there. We have to remove the cover. Like spring is underneath. You have to only clear the ground. mantra here is for citing the role of karma. *Avidya purvaktvat karmanah* it is *avidya*. You have to look upon yourself as *karta* which you can do only through ignorance. *Vidya* is *upasana* there. *Amrtam* is *apekshika amrtam. Mrtyu* is *papa*. The quotation is only for *avidyaya+* section, not *vidyaya+* .

Earlier it was told *rtam ca+* etc. They were intended to show karma has no uselessness. That sense was removed. Here they are presented as means to be done. All these are essence of *Vedapurva bhaga, Puranas* and *itihasas. Puranas* and *Itihasas* dramatise the *dharmas* and show their *kartavyam*. *Rama* did *Sandhyavandana* getting up in the morning whether he is in the forest or ruling the kingdom, when said, it indicates the importance of the karma to be done by us also.

सत्यादीनि अनुष्ठेयानि

वेदम् (सच्चिदानन्द - वेदमित्येकवचने न निर्भरः। एकं स्वशाखामात्रं द्वौ त्रीन् चतुरो वा साङ्गोपाङ्गान् इत्यर्थः द्रष्टव्यः) अनूच्य (मणिप्रभा - उपनयनपूर्वकम्) अध्याप्य आचार्यः अन्तेवासिनम् (अन्ते विद्यामध्येतुम् अध्यापकसमीपे वसति इति अन्त+ वस्+ णिनि शयवासवासिषु अकालात् ६.३.१८ अकालवाचिनः सप्तम्या अलुक् वा शयादिषु उत्तरपदेषु) शिष्यम् अनुशास्ति (अनुशब्दार्थमाह - ग्रन्थेति) (आ.गिरि - विचारम् अकृत्वा गुरुकुलान्न निवर्त्तितव्यम् किन्तु अध्ययनविधेः अर्थावबोधनद्वारेण पुरुषार्थपर्यवसायितासिद्ध्यर्थम् अक्षरग्रहणानन्तरम् अर्थावबोधे प्रयतितव्यमित्याह - ग्रन्थेति) ग्रन्थग्रहणात् अनु पश्चात् शास्ति तदर्थं ग्राहयति इत्यर्थः। (वेदमध्याप्य अनन्तरमेव तदर्थमपि उपदिशति इति वदन्त्याः श्रुतेः तात्पर्यमाह - अत इति।) अतोऽवगम्यते अधीतवेदस्य (सच्चिदानन्द - अत्र तृतीयान्तेनैव भाव्यमिति भाति) धर्म-जिज्ञासाम् (धर्मजिज्ञासा कर्मविचारः) (विचारम्) अकृत्वा गुरुकुलान्न समावर्त्तितव्यमिति। (इतश्च धर्मजिज्ञासां कृत्त्वा एव गुरुकुलान्निवर्त्तितव्यमित्याह - बुद्ध्वेति। न च वेदाध्ययनानन्तरम् आचार्येण अनुज्ञातः दारानाहृत्य मीमांसया कर्मावबोधं संपादयतु, तदा तत्संपादनेऽपि न बुद्ध्वा इति स्मृतिविरोधः इति वाच्यम्। दारासंग्रहानन्तरं नित्यनैमित्तिक-अनुष्ठान-अवश्यंभावेन पुनस्तस्य गुरुकुल-वास-असम्भवात्। अतः प्रागेव कर्मावबोधः संपादनीयः इति भावः।) (वेदार्थं) "बुद्ध्वा कर्माणि कुर्वीत" इति स्मृतेः (आपस्तम्ब २.२१.५) च।

> After having taught the Vedas, the teacher instructs the student i.e., after his study of the text makes him understand the meaning of it. From this it is implied that a student who has studies the Vedas should not leave the teacher's place without having inquired into the karmas. Thus is a smriti: One should begin the performance of karmas after knowing them.

कथमनुशास्ति इत्याह - सत्यं वद (मणिप्रभा -सअहिंसासत्यमस्तेयम् इत्यादिशास्त्रप्रमाण) यथा-प्रमाण-अवगतं (यथाप्रमाणावगतमपि परस्य अहितं न वाच्यमित्याह - वक्तव्यं चेति। वचनार्हमित्यर्थः। तदाह भगवान् - "अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् इति । स्वाध्यायाभ्यसनं चैव") वक्तव्यं च वद। तद्वत् धर्मं (मणिप्रभा - चोदनालक्षणोऽर्थो धर्मः इति जैमिनिनोक्तम्) चर। धर्म इत्यनुष्ठेयानां सामान्यवचनम् (अनुष्ठेय-सामान्य-वाचकमपि धर्मपदं सत्यादिरूपधर्मविशेष-निर्देशसंनिधानात् तदरिक्त-अनुष्ठेयपरम् इत्यर्थः।) (सच्चिदानन्द - सत्यादीनामपि अनुष्ठेयत्वेनैव उपदेशात्, विशेषेण अनिर्दिष्ट-अनुष्ठेय-सामान्यम् इह धर्मशब्देन उच्यते इति गम्यते इति

अभिप्रायः)। सत्यादि-विशेष-निर्देशात्। स्वाध्यायाद् अध्ययनाद् (अध्ययनेन गृहीतस्य स्वाध्यायस्य प्रमादः विस्मरणम्, तन्मा कुरु इत्यर्थः। "ब्रह्मोज्झे मे किल्बिषम्" इति मन्त्रवर्णेन "ब्रह्महत्यासमं ज्ञेयमधीतस्य विनाशनम्" इति स्मरणेन च वेदविस्मरणे प्रत्यवाय-अवगमात् । मे मम किल्बिषं ब्रह्मोज्झे - उज्झ् तयागे ६ प.प. - वेद-विस्मरणवति पुरुषे गच्छतु इति मन्त्रार्थः।) मा प्रमदः (मद हर्षे ४ प.प प्रमद् to be careless / negligent) प्रमादं मा कार्षीः। आचार्याय आचार्यार्थं प्रियं इष्टं धनमाहृत्य आनीय दत्त्वा विद्यानिष्क्रयार्थम् आचार्येण च अनुज्ञातः अनुरूपान् दारान् (पु.लि शब्दः नित्यबहुवचनान्तः) (कुलानुरूपाम् अभिमतां कन्याम्) आहृत्य प्रजातन्तुं प्रजासंतानं (मणिप्रभा - पुत्रादिसंततिविस्तारम्) मा व्यवच्छेत्सीः (छिदिर् द्वैधीकरणे ७ वृद्धि-अभावः आर्षः)। प्रजासंततेः विच्छित्तिः न कर्त्तव्या। (ननु न कर्त्तव्या इति कथम्। संततिप्राप्तेः दैवाधीनत्वाद् इत्याशङ्क्याह - अनुद्पद्यमानेऽपि इति।) अनुद्पद्यमानेऽपि पुत्रे पुत्रकाम्यादिकर्मणा तदुत्पत्तौ यत्नः कर्त्तव्यः इत्यभिप्रायः। (इतश्च एवमेव श्रुतेः अभिप्रायः इत्याह - प्रजेति। ऋतं च इत्यनुवाके प्रजा च स्वाध्यायप्रवचने च। प्रजनश्च च स्वाध्यायप्रवचने च। प्रजातिश्च स्वाध्यायप्रवचने च इति संततिविषये एव प्रजादित्रयनिर्देशबलाच्च इत्यर्थः।) प्रजा-प्रजनन-प्रजातिनिर्देशसामर्थ्यात्। अन्यथा (सच्चिदानन्द - केवललौकिकप्रयत्नस्य एव विवक्षितत्वे) (गोविन्दानन्द - दाराहरणमात्रतात्पर्यकत्वे) (श्रुतेः संतत्यर्थयत्ने तात्पर्य-अभावे इत्यर्थः। ऋतुकाल-गमनाभावे प्रत्यवायस्मरणात् तावन्मात्रमेव श्रुतिः अवक्ष्यद् इत्यर्थः। न च श्रुत्या तात्पर्येण संततिः संपादनीया इति किमर्थमुच्यते इति वाच्यम्। पितृऋणस्य परलोकप्राप्तिसाधनत्वात्। तथा च श्रुतिः - नापुत्रस्य लोकोऽस्ति इति। न केवलं पितृऋणं परलोकप्रतिबन्धकम् किं तु मोक्षस्यापि। तथा च मनुः ऋणानि त्रीणि अपाकृत्य मनो मोक्षे निवेशयेत् अनपाकृत्य चैतानि मोक्षमिच्छन् व्रजत्यधः इति। तथा च मुमुक्षुणापि संततियत्नः कर्त्तव्यः इति।) प्रजनश्च इत्येतत् एकमेव अवक्ष्यत् (सच्चिदानन्द - ऋतं च इत्यनुवाके इति शेषः)।

> How does he instruct? The answer is -
> Speak the truth. Speak that which is in accordance with the knowledge gained from a means of knowledge as obtained in it and which is fit to be spoken. Similarly practise dharma. Since truth etc. are specifically stated, dharma here is general duties that are to be practised. Don't deviate from study. Having brought and offered the wealth desired by the teacher in return for the knowledge and having taken a suitable bride with the permission of the teacher do not break the line of progeny. The idea is that even if s son is not born, effort should be made to beget one through the rituals like putresti. This becomes evident form the mention of three factors viz., son, procreation and getting a grandson. Otherwise, the word 'procreation' alone would have been stated.

He teaches to *antevasi*. *Gurukulasya ante samipe vasati iti antevasi*. He is *brahmacari*. *Sasti* means commands. This is the difference between *purva* and *uttara bhaga*. Here there is something to understand, nothing to be done. *Karttavyam nasti*. *Purve, jnatavyam, tad-anantaram karttavyam*. *Satyam* is not only for knowing. But for doing. Puja is not only for knowing, but doing. So Sruti commands. *Vicara* is in *brahmacaryasrama* and *sanyasa*, *purva* in the first and *uttara* in the last. In between *ashramas* for practice. This is the pattern. So after study, the teacher *vedartham bodhayati*. Being upanishad, the teacher gives the salient features only. Hence it is clear that student is not sent without giving him the knowledge of *purvabhaga*. It is called *karmajnanam*. Why not later? Let me have break. It does not work. (see *tika*).

DUTIES BRIEFLY STATED

Satyam vada includes all values. *Ahimsa, satyam, asteyam, aparigraha* etc. *tatha pramanena avagatam tatha vada.* All that you know you need not say and you are not required to say. Because it should be *priyam* and *hitam*. *Vaktavyam* indicates these. This is interpretation. *Satyam vada* is rule. *Vaktavyam* is *apavada*. The emphasis here is not speaking the truth. If you are speaking, speak the truth. Otherwise keep quiet. So the emphasis is in not speaking untruth. This is called *parisamkhya vidhi*. You may have a lot to speak about truth. You need speak all of them.

Dharma is all duties prescribed in the scriptures. *Vihita-karmas*. Duties to scriptures, deities, ancestors, fellow beings, fellow creatures. If every one does his duty, everybody else gets their rights. Like one's right is anther's duty. *Dharma* is meant for harmony. *Dharanat dharma*. That which maintains social harmony , at all levels from family onwards. Not doing *adharma* is also a duty. *Vihita-karanam* and *nishiddha-akaranam*. *Athato dharma jijnasa* and *adharma jijnasa*. *Cara* means pursue. *Dharma* means *samanya dharma*. *Dharma* includes *satya*. Since *satya* etc is specifically stated, then *dharma* means all *samanya* values and *karmas*. It is universal term. Anything not said and to be followed by you should come under *dharma*. Like don't do *himsa*.

DUTIES NEVER TO BE NEGLECTED

Svadhyayat ma+ One has to keep reciting daily. Don't be indifferent. He has to remember what he has studied. Forgotten knowledge is equivalent to ignorance alone. They use to *byheart* dictionaries. *Sutras*. It is excellent method of education. Un-understood it is there. Later understood. So daily *svadhyaya* is prescribed. So for this purpose, begin teaching. It is an ideal *sadhana*. There is a special ritual called *brahmayajna*. From the daily duty of reciting and teaching don't slip.

Now what he should do, after *gurukulavasa*. He does a ritual *samavartanam*. It is ending the study officially. It literally means returning. *Upananyanam* is beginning. At that time, he should be clear about what he wants to do further. One should not remain without being in an *ashrama*. He becomes *avaidika* otherwise. They insist on this because, suppose in this ritual, if he does not marry and not take to *sannyasa*, he has already concluded *brahmacarya asrama*, he is in *anasrami* and the wrong in this is that all duties are prescribed according to ashram. He will not have the guidance of Veda. He goes outside the purview of Veda, therefore. So at the time of *samavattanam*, he fixes the marriage. In the marriage there is a function known as *kasi yatra* where the bridegroom requested by girl's father not to take to *sanyasa asrama* and instead take charge of his daughter. That pattern is prescribed here.

He should give *gurudakshina* to the teacher. *Dhanam* can be anything. Whichever is needed by the *acarya*. Not send three water buffaloes. Or two elephants. what he can manage or what is useful. Why offer? First is one should not get anything free. Creation survives by giving and taking. If there is only one way traffic, then the world will be in trouble. If you work and you don't eat, you are in trouble. Working is expending energy. Eating is taking energy. If you eat only but not work, then also problem. The law of nature is this. At the some time, the giver should not expect. The taker must know the duty and give. *Sishya* is told by the Vedas, not by the *acarya*, to give. It is an expression of gratitude. *Vidya* cannot be sold. Nor food can be sold. What is he going to do? He is going to maintain the same place. From where does he get the money? From the king who tests his knowledge and gives gift to the

student for giving to the *acarya*. *tamadhvare visvajiti khitisam nissesha-visranita-kosha-jatam (srana dane curadi) upattavidyo gurudakshinarthi kautsah prapede (prapa* - reached) *varatantusishyah. (Raghuvamsa)*. In *Katha* we see. Old cows he kept. Sastra says *sarvavedhasam dadau*. Here also he comes to wash his feet with mud pot left behind. *(sa mrnmaye vitahiranmayatvat patre nidhayarghyam anarghasilah. Srutaprkasam yasasa prakasah pratyutjagama* (welcomed) *atithimatitheyah.* (R.V 5.1 and 2) *Atithishu sadhuh*). Then he should take permission from guru and marry. We see in the invitations "with the blessings of so and so *acarya*' ,,, and then he should not break the family lineage. *Tantu* means string. *Tantu* here is *vistara*. The flow should not be broken. The string of family. *Anurupan daran*. *Dara* is masculine gender. Compatibility is *anurupa*. This is *utsarga vidhi*. How can one follow this *vidhi*, because it is in the hands of *Isvara*. Therefore, earn the grace by invoking him through *karmas*. This is indicated by three words in the previous section as *praja*, *prajanana* and *prajati*.

सत्याद् न प्रमदितव्यम् प्रमादो न कर्त्तव्यः। (ननु सत्यात् प्रमादनिषेधवचनस्य यदि सत्यमेव वक्तव्यमित्यर्थः विवक्षितः तदा सत्यं वद इत्यनेन पौनरुक्त्यं स्याद् इत्याशङ्क्य आह - सत्याच्च इति। च-शब्दः शङ्कानिरासार्थः।) सत्याच्च प्रमदनम् अनृतप्रसङ्गः। (ननु यदि अत्र अनृतवदननिषेधः विवक्षितः तर्हि अनृतं न वक्तव्यमिति अनुक्त्वा प्रमादशब्दप्रयोगे कोऽभिप्रायः श्रुतेः इत्याशङ्क्य आह - प्रमादेति। अनृतवदनविषये विस्मृत्य अनृतवदने अपि दोषाधिक्यमेव "समूलो वा एष परिशुष्यति योऽनृतमभिवदति" इति श्रुतेः। {न सत्यात् परमो धर्मः} "नानृतात् पातकं किंचित्" इति स्मृतेश्च। तस्मादनृतवर्जने सदा जागरूकेण एव भवितव्यमिति भावः।) प्रमादशब्दसामर्थ्याद् विस्मृत्यापि (मणिप्रभा - आलस्यादिकारणाद् वा धर्मनिषये) अनृतं न वक्तव्यम् इत्यर्थः। अन्यथा (विस्मृत्य अनृतवदने अपि दोषातिशय-अभावे सति इत्यर्थः। असत्येति च्छेदः।) असत्यवदनप्रतिषेध एव स्यात्। धर्माद् न प्रमदितव्यम्। धर्मशब्दस्य अनुष्ठेय-विशेष-विषयत्वाद् अननुष्ठानं (अनुष्ठेयस्वरूपस्य धर्मस्य आलस्यादिकृतम् अननुष्ठानं प्रमादः इत्यर्थः।) प्रमादः। स न कर्त्तव्यः। अनुष्ठातव्यः एव (धर्म इति शेषः)। कुशलाद् आत्मरक्षणार्थात् (शरीररक्षणार्थात् चिकित्सारूपाद् इत्यर्थः।) कर्मणः न प्रमदितव्यम्। भूतिः विभूतिः तस्यै भूत्यै[२०८] (पञ्चम्यर्थे प्रयोगः) भूत्यर्थाद् मङ्गलार्थात् (वायव्यं श्वेतमालभेत इत्यादौ विहिताद् वैदिकात् लौकिकात् प्रतिग्रहादेश्च इत्यर्थः।) कर्मणः न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्। ते हि (सच्चिदानन्द - तद्धि तपः इति अवधारणस्मरणार्थः हि शब्दः) नियमेन कर्त्तव्ये इत्यर्थः। देवपितृकार्याभ्यां न प्रमदितव्यम् (देवकार्यं यागादि पितृकार्यं श्राद्धादि इति विभागः।)। दैवपित्र्ये कर्मणी कर्त्तव्ये।

There should be negligence with reference to truth. The deviation from truth amounts to falsehood. So from the force of the word pramada it follows that untruth should not be told even though forgetfulness. Otherwise there would have been a mere prohibition of speaking untruth. Do not deviate from dharma. The word dharma being a subject matter to be practised, non performance of it is deviation. That is, religious karmas have to be practised. So also, do not neglect from actions meant for one's own protection. Bhuti means welfare. Do not neglect from actions meant for welfare or prosperity. Svadhayya means study and pravaca means teaching. Do not neglect them. The idea is that hey should be practised daily. Similarly, there should be no deviation

[२०८] भूति शब्दस्य भस्मार्थत्वं बोधायनेन उक्तम्। अथातो द्विजातीनां त्रिपुण्ड्रधारणविधिं व्याख्यास्यामः । भूत्यै न प्रमदितव्यमिति विज्ञायते । (बो.गृ) (शास्त्रि)

from duties towards the gods and manes meaning the duties towards the gods and manes should necessarily be performed.

One should not be indifferent to *satyam*. Slipping away from truth is opening for untruth. Even in forgetfulness one should not tell lie. Otherwise negation alone would be there. That is not enough. *Satyam* has to be spoken, by saying so it is implied in this way. (There are two negatives - *prasajya* where emphasis is in *nishedha* and it is *kevala nishedha* (and negation is of *kriya*) while in *paryudasa* it is in *vidhi* and it should be some thing of the same category negated. (and negation is of *uttarapada*). So *na pramditavyam* , in this alone emphasis. By talking lie, the subtle personality is affected. Split is created within. The spiritual loss is greater than material benefit. *Vyavaharika satyam* has to be there to gain the *paramarthika satyam*. One should not neglect one's *dharma*. *Svadharme+* .

One should not neglect one's well-being. If there is a disease, one should take to treatment. Don't think *Bhagavan* will take care of you. When you do what you have to do, then he takes care. Only if I am well physically, then only I can practise *dharma*. Body is also a *sadhanam*. In *sannyasa* he does not care, because he does not require *cittasuddhi*. For *sannyasa* it does not apply. The earlier two are all. *Bhuti* is also for *grahastha*. There are physical means (treatment and accepting gifts) and superphysical means for health (*Taittiriya Samhita* 2.3.11) and wealth (*Tai Smahita* 2.1.1) . Superphysical means are rituals for long life and health as well as gaining wealth. One should take to them where necessary.

One should not neglect prosperity, which is necessary wealth. *Mangalam* is *Lakshmi*. You have to take care of it. Don't leave to father in law. Don't say I don't have time because I am engaged in *agnihotra*. So please help for my livelihood. That you have to do. It is like I am breathing, so help me *iti*. May you not give up *svadhyaya* and *pravacana*. It will remind you all the time the ultimate end in life and that it is like railway bogie. You have to get down one day. Again and again emphasised. All *devatas* are giving whatever is required in our life and so appreciate that. *Devan bhavayata+ yo bhunkte stena+* So you have to do daily worship to them. *Pitru karya* also expression of gratitude.Gratitude is a matured value. *sraddhaya hutam* is *sraddham*. Lord does not require our food. It is my duty to offer *naivedyam*. So too *pitrus*.

मातृदेवः माता देवो यस्य सः त्वं मातृदेवो भव स्याः भव। एवं पितृदेवः आचार्यदेवः अतिथिदेवः भव। (मात्रादीनां वस्तुतो देवत्वाभावाद् आह - देवतावदिति।) देवतावद् उपास्याः एते इत्यर्थः।

May you become one for whom mother is a deity. Similarly you become one for whom father, teacher and guests are gods. The idea is that they are should be worshipped as deities.

PERSONS TO BE WORSHIPPED AS GODS

You have the same *buddhi* which you have in *devas* etc similarly in mother have the same *buddhi*. Don't call mummy. Don't call father hallo daddy. So it is not substitution for *devatas*. Mother is *pratyaksha devata* like sun. All these people have earned that position. Having brought up them, she has undertaken so much *pathya*. She restrained from things for your sake. With continuous concern, she has brought up until marriage. Father is also a party of

this worry. Here there is no condition as to what kind of father etc have to be worshipped. Duty means unconditional. Otherwise it becomes business. If son takes care it is *prarabdha*. But expecting that I don't do my duty. Three things are rare. A son who will protect the father, wife who has only husband's care and a friend who helps in need are by good *prarabdha*. *Dasaratha* who had four sons, had none of them at the time of death. So too *acarya*. When they cannot handle him they send to boarding school. He also earned. Parents give birth to this uncultured animalistic personality where as *acarya* gives birth to cultured educated *brahmana* person. He is also therefore *janaka* of *vijnana sarira*. *(Gayatri* is mother here*)*. In *Katha* we saw three ideal relationships make an ideal person. *Trinaciketas tribhiretya sandhim*. (father, mother and teacher) *Atithi* walks in. He gets *devatvam*. He is *vaisvanarah*. (*Katha*) That is the beauty because we don't know who has come. Stories are there. He can be a *jnani*. You may be telling *bhagavan*, go. go. Even *Yama* was frightened. Indians are hospitable they say, because of this value in the families. Without your will. If something happens it is god's will. When a guest comes it is like that. So *atithi* is sent by god.

यान्यनवद्यानि कर्माणि । तानि सेवितव्यानि । नो इतराणि । यान्यस्माकं सुचरितानि । तानि त्वयोपास्यानि । २ । नो इतराणि । ये के चास्मच्छ्रेयांसो ब्राह्मणाः । तेषां त्वयासनेन प्रश्वसितव्यम् ।

यानि अनवद्यानि - which are not unbecoming; कर्माणि - actions; तानि - those; सेवितव्यानि should be followed; नो इतराणि - not the others; यानि अस्माकम्- of ours; सुचरितानि - which are noble; तानि - those actions; त्वया - by you; उपास्यानि - should be followed; नो इतराणि - not the others; च - and; अस्मत् श्रेयांसः - superior to us; ये के ब्राह्मणाः - who are cultured people; तेषां - those; त्वया - by you; आसनेन - by offering a seat प्रश्वसितव्यम् - should be enabled to remove their weariness

> Those actions which are not unbecoming should be followed, not the others. Those actions of ours which are noble should be followed by you, not others. Those who are cultured people and superior to us should be enabled to remove their weariness by your offering a seat.

(श्रौतस्मार्त्तकर्मजातम् उपदिश्य आचारप्रमाणकानि कर्माणि विशेषोक्तिपूर्वकम् उपदिशति - यान्यपि चेति) यानि अपि च (अपि च यानि इति योजना) अन्यानि अनवद्यानि (वद्यः वदनार्हः अवद्यः निन्दितः अनवद्यः) अनिन्दितानि शिष्टाचारलक्षणानि कर्माणि। तानि सेवितव्यानि कर्त्तव्यानि त्वया। नो अकर्त्तव्यानि इतराणि सावद्यानि शिष्टकृतान्यपि (सच्चिदानन्द - विस्मृत्या इति शेषः। न हि शिष्टाः सावद्यं कर्म ज्ञात्वा कुर्युः अथवा विशिष्टसंनिवेशे महावीर्यैः कृतान्यपि शिष्टाचारत्वेन स्वीकृत्य नानुकरणीयानि इत्यर्थः। यथा जामदग्न्यः पितुराज्ञया स्वजननीं जघान, शुनःशेफो मातापित्रोः अभिप्रायं बुद्ध्वा जननीजनकौ तत्याज - इत्यादीनि कर्माणि नानुकरणीयानि इत्यर्थः)। (आचार्यकृतानां कर्मणां साकल्येन उपादेयत्वमिति विशेषमाशङ्क्य आह - यान्यस्माकम् इति) यानि अस्माकम् आचार्याणां सुचरितानि शोभनचरितानि आम्नायादि-अविरुद्धानि (आङ् + म्ना १.प.प. to rpeat/remember + धञ् or युक्) (मणिप्रभा - अभयं सत्त्वसंशुद्धिः इत्यादीनि - भ.गी १६) तानि एव त्वया उपास्यानि अदृष्टार्थानि अनुष्ठेयानि नियमेन कर्त्तव्यानि

इत्येतत्। नो इतराणि विपरीतानि (शापप्रदानादीनि इत्यर्थः) आचार्यकृतान्यपि (शास्त्रनिषिद्धत्वेन अवगतान्यपि सदाचारत्वेन न स्वीकर्त्तव्यानि इत्यर्थः) (मणिप्रभा - आचार्याणां कृतार्थत्वेन सावद्यकर्माचरणे प्रत्यवाय-अभावात्। तव अकृतार्थत्वात् तथा त्वया न कर्त्तव्यानि)। ये के च [२०९]अविशेषिताः आचार्यत्वादिधर्मैः (आदिपदं मातृत्व-पितृत्वादिसंग्रहार्थम्। आचार्यादिभिन्नाः इत्यर्थः) अस्मत् अस्मत्तः श्रेयांसः प्रशस्यतराः (सगुणनिर्गुणब्रह्मनिष्ठादियुक्ताः इत्यर्थः) (सच्चिदानन्द - शास्त्र-अध्ययनादिना इति शेषः) ते च ब्राह्मणाः (ब्रह्म वेदम् अधीते अध्यापयति वा परं बरह्म जानाति वा ब्रह्मणः अपत्यं) (श्रुतस्य ब्राह्मण्यस्य अविवक्षायां कारणाभावं मत्त्वा आह - न क्षत्रियेति) न क्षत्रियादयः। तेषां आसनेन आसनादिना (शुश्रूषान्नपानादिसंग्रहार्थम् आदिपदम्।) त्वया प्रश्वसितव्यम् प्रश्वसनं प्रश्वासः श्रमापनयः। तेषां श्रमाः त्वया अपनेतव्याः इत्यर्थः (सच्चिदानन्द - तृतीयामादाय प्रथमं व्याख्यानम्)। तेषां वा आसने गोष्ठीनिमित्ते (शास्त्रार्थनिर्णयाय क्रियमाणो व्यवहारोऽत्र गोष्ठी, {सभा संलापयोः स्त्रिया इति मेदिनी} सा निमित्तमुद्देश्यतया कारणं यस्य समुदितस्य समुदायस्य तस्मिन् इत्यर्थः।) समुदिते (सति), (तन्निकटे) न प्रश्वसितव्यम् प्रश्वासः अपि न कर्त्तव्यः (किमु वक्तव्यं पंडितंमन्यतया विस्रम्भेण वार्त्तादिकं न कार्यमिति भावः।)। (तर्हि तेषां समुदिते गत्वा किं कर्त्तव्यं मया इत्याशङ्क्य आह - केवलमिति) केवलं तदुक्तसारग्राहिणा (तूष्णीम्) भवितव्यम् (सच्चिदानन्द - तेषाम् आस्थायिकायां सत्यां संभ्रमात् किञ्चिदपि न वक्तव्यम् इत्यर्थः। एतञ्च आसने न प्रश्वसितव्यम् इति सप्तमीपाठम् आसनशब्दस्य गृहीत्वा)।

Moreover, those activities that are free of blemish, that are adopted by good people, are to be resorted to by you, not any other acts that are censured, even though they may be followed by good people. Only those noble deeds of our teachers that are not against the Vedic scriptures are to be performed by you to gain unseen results. The idea is that they are to be undertaken by you and not others opposed to the Vedas even if they are undertaken by teachers. The fatigue of those who are more cultured than us and who may not hold any position such as being the teacher and who are brahmins, not kshatriyas, should be removed by you by offering seat etc. . Prasvasanam means taking sway the weariness. Or even deep breathing should not be done by you in front of them when they are assembled for discussion of scriptures. You should just remain grasping the essence of what they discuss.

HOW FAR TO OBSERVE VEDIC DUTIES AND ORTHODOX CUSTOM

To know *dharma-adharma* there are three sources. *Vedokhilo dharma mulam smriti* (based on Vedas) and *sishtacaras*. Each preceding one supercedes the succeeding one. Obeying father and killing mother are involved in *Parasurama's* case. Contradictory part we ignore. Since three sources are there, there may arise confusion regarding what to do and what not to do. So it is said Veda is original *pramanam* and the other two are to be accepted only if they not contradicted by Veda. If Vedanta says *Jnanat mukti* and *Bhagavatam* says *Bhaktya mukti*, then we have to go by Vedanta and explain *Bhagavata* in keeping with Veda. So *anavadyam* means *dosharahitam*. It is *Vedanishiddhatvam*. Veda has to decide *dosha*. Veda mentions some *karmas* which Veda herself prohibits later. *Syenayaga* mentioned for *satruvadha*. They are meant for doing *himsa* to others. They are called *abhicarika karmas*. Since it results in papa, he will go to hell or suffer in this life itself. Like medicines which are very good but terrible side effect. Like radiotherapy/chaemo therapy. for cancer. These *karmas* also one should avoid. These *yagas* are mentioned for the sake of

[२०९] ये के च विशेषिताः इति तु फ्रशस्यतराः इत्यस्यैव व्याख्यानं भविष्यति आचार्यत्वादिधर्मैः विशेषिताः इति । (गोविन्दानन्द)

those who have *rakshasic dsvabhava*. They will turn to Veda only when there are such *karmas*. Sooner they will change their way by their *sraddha* in Veda. Like *kamya karmas*. So Veda, being mother, addresses even those who have basic tendencies and very low people. Cater and rope in. Show carrot and draw. Same rule applies to teacher's way of life also. Because he is exposed to a teacher. Teacher is also a human being and may have certain weaknesses. I take what is good and don't look into what is not good. *Sraddha* will be the first casualty. It does not mean teacher can do anything and teacher others not to do. Teacher should also be aware that he is being followed.

Various *karmas*, not mentioned here, *karmas* that characterise proper conduct, those *karmas* that are pursued by people who are well informed, they have to be done by you. *na u* means definitely no other *karmas* which are blemishful. *Visvamitra* gave *sapa*, curse. So if they can give, why not I do. That only points that he got angry and why not I. Angry man will always be angry man. You have to look into it. *Visvamitra* also has to look into himself. One has to pay attention. It does not give sanction. Now positively he says. Do all good actions like *istapurta* etc. which you need not do but which enhances your *punya* and brings out the growth in the person, you do them. Be aggressively good. They are done by *acaryas*.

CONDUCT TOWARDS A WISE PERSON OR DHARMIC (CULTURED) PERSON

Brahma/Veda parayanah Brahmanah. Or one who has Brahmajnanam. Dharmic peron is not jnani but not vice versa. Who is not *kshatriya* etc because a *brahmana* can salute his parents, teacher and other *brahmnas*. B.Sc is not M.Sc whereas M.Sc is B.Sc. If there are any brahmanas who are superior to us, you should welcome them and worship them. You should relieve their tiredness. How? By providing asana. Asanena. Give water if thirsty and massage the legs if tired. In the other asane. After wards, when they are seated in their asana, you should not even breathe. (Don't do anything out of tune there). What to mention that you should not talk. You have to listen. Make use of the occasion to learn. Written words do not convey as spoken words. They go to satsanga. Then asks questions in such a way that they talk 45 minutes what all they know. We should be clear about what we are going to ask. Or people talk among themselves and leave the jnani aside.

श्रद्धया देयम् । अश्रद्धयादेयम् । श्रिया देयम् । ह्रिया देयम् । भिया देयम् । संविदा देयम् ।

श्रद्धया - with respect (for the receiver); देयम् - charity should be given; अश्रद्धया - with disrespect; अदेयम् - charity should not be given; श्रिया - in plenty in keeping with one's wealth; देयम् - charity should be given; ह्रिया - with modesty; देयम् - charity should be given; भिया - with concern (for others); देयम् - charity should be given; संविदा - with understanding;देयम् - charity should be given.

> Charity should be given with respect (for the receiver). Charity should not be given with disrespect. Charity should be given in plenty in keeping with one's wealth. Charity should be given with modesty. Charity should be given with concern (for others). Charity should be given with understanding.

किं च यत्किंचिद् देयम् तत् श्रद्धयैव (अवर्जनीयतया प्राप्तेषु अपात्रेषु अपि इत्यर्थः। तदुक्तं वार्तिके - श्रद्धयैव च दातव्यम् अश्रद्धाभाजनेष्वपि इति।) (आस्तिक्यबुद्ध्या) दातव्यम्। अश्रद्धया अदेयम् न दातव्यम् ("अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्। असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह" इति भगवतोक्तत्वात् इति भावः।) (शास्त्रि - अश्रद्धया अपि देयमिति सायणः। सात्विकदानफलाभावेऽपि राजसतामसदानफलसम्भवादिति भावः। श्रिया देयम् ह्रिया देयम् इत्यादौ अश्रिया अदेयम् अह्रिया अदेयम् इत्यपि बोध्यम् - एकत्र उक्तस्य उपलक्षणत्वात्। (स्वविभूत्यनुसारेण देयमित्याह - श्रियेति) श्रिया विभूत्या देयम्। ह्रिया (बहु ददतापि मया कियद्दीयते इति लज्जावता दातव्यमित्याह - लज्जयेति) लज्जया देयम्। (परलोकभयेन देयमित्याह - भियेति) भिया च (शास्त्रभिया वा) संविदा च संविन्मित्रादिकार्यम् (मित्रसुहृदादेर्यत्कार्यं तेनापि निमित्तेन देयमित्यर्थः)।

Further whatever is meant to be given that should be given with faith. It should not be given with distrust. It should be given in plenty. It should be given with humility. It should also be given with concern and in friendliness.

VALUE OF DANAM, CHARITY

Danam is very much highlighted all over. It has an important role in the spiritual life of s *sadhaka*. 1) The expansion of mind. I identify with others. I can happily give only when I identify with others. So I expand more with every *danam*. Is it not identification a problem? Identification is not a problem, if you identify with the whole world. Total identification is *Isvara* and total non-identification is Brahman. Partial is problem. Division comes. *Ayam nijah paro veti ganana laghu cetasam. udaracaritanam hi vasudeiva kutumbakam*. Short-sighted people decide everything into two. For convenience it is okay. Not with any commitment. You get rid of this by *danam*. Possession contracts the mind. 2) *Moksha* requires *tyaga*. Buddha is never remembered as prince. But only as renunciate. Gandhi/Motilal Nehru. *Danam* is a training for this. Giving, one becomes superior. As receiver, even *Bhagavan* became small, *vamana*. Cloud because it gives, it is up. Ocean though vast, is down because it receive.

How to give *danam*? It shoold be *sattvika danam* as mentioned in 17th chapter of Gita. But *Sruti* comes down and even says give rajasic *danam* or tamasic *danam* to begin with. 1) With *sraddha* one should give. That this *danam* will bless me. elevate me, purify me *iti*. Materially it makes me poor. But spiritually it makes me richer. That *sraddha* must be there. A giver will not suffer. But I don't expect that I will be helped later and give. Sometimes you cannot avoid. Still, with *sraddha*, with prayer give. Without *sraddha* don't give. Even if you have no *sraddha*, still give. It is *rajasa danam* all right. Sooner it will become *sattvika danam* later. *Gita (17th* chapter*) datavyamiti + yattu pratupakarartham*. Give according to your ability and generously part with. If there are two minds, vote for the higher option. Feel that I am not able to give more. Give with humility. Don't take an arrogant attitude. That I got an opportunity to give, feel like that. He already feels small. Don't make him feel small thereby. Remove his low feeling. With fear you give that let him not refuse to take. Whether I am wounding or not, whether it is sufficient or not etc. With knowledge you give (knowledge of the *patra, kala* and *desa*). Swamiji likes *danam* and he does it. He enjoys *Karna's* giving. This is all *sattvika danam* is about. *Rajas* for name and fame and *tamasa* for hurting others.

अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् । ३ । ये तत्र ब्राह्मणाः संमर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्मकामाः स्युः । यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथाः । अथाभ्याख्यातेषु । ये तत्र ब्राह्मणाः संमर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्मकामाः स्युः। यथा ते तेषु वर्तेरन्। तथा तेषु वर्तेथाः । एष आदेशः । एष उपदेशः । एषा वेदोपनिषद्। एतदनुशासनम् । एवमुपासितव्यम् । एवमु चैतदुपास्यम् ।४।

अथ यदि - suppose; ते - for you; कर्मविचिकित्सा वा - doubt regarding a course of action; वृत्तविचिकित्सा - a doubt regarding the conduct in life; वा - or; स्यात् - - there is; तत्र - in that place; ब्राह्मणाः - cultured people; ये संमर्शिनः - who are discriminative; युक्ताः - experienced; आयुक्ताः - impartial; अलूक्षाः - considerate; धर्मकामाः - and committed to dharma; स्युः - there would be; यथा ते वर्तेरन् - as those (cultured people) would act; तत्र - in that situation; तथा - in such a manner; तत्र - in that situation; वर्तेथाः - may you act; अथ - suppose there is a doubt regarding your conduct अभ्याख्यातेषु - with respect to the accused people; तत्र - in that place; ब्राह्मणाः - cultured people; ये संमर्शिनः - who are discriminative; युक्ताः - experienced; आयुक्ताः - impartial; अलूक्षाः - considerate; धर्मकामाः - and committed to dharma; स्युः - there would be; यथा ते वर्तेरन् - as those (cultured people) would conduct themselves; तेषु - with respect to them; तथा - in such a manner; तेषु - with respect to them; वर्तेथाः - may you conduct yourself; एषः आदेशः - this is the injunction (of sruti). एषः उपदेशः - this is the instruction of Smriti; एषा वेदोपनिषद् - this is the essence of the Vedas; एतद् अनुशासनम् - this is the commandment (of the Lord); एवम् - in this manner; उपासितव्यम् - the life should be led; एवम् उ च एतद् - in this manner alone; उपास्यम् - the life should be led.

Suppose there is doubt regarding a course of action or a doubt regarding the conduct in life for you. There would be cultured people in that place who are discriminative, experienced, impartial, considerate and committed to dharma. May you act in that situation in such a manner as those (cultured people) would act in that situation. Suppose there is a doubt regarding your conduct with respect to the accused people. There would be cultured people in that place who are discriminative, experienced, impartial, considerate and committed to dharma. May you conduct yourself with respect to them in such a manner as those (cultured people) would conduct themselves with respect to them. This is the injunction of sruti. This is the instruction of Smriti. This is the essence of the Vedas. This is the commandment of the Lord. The life should be led in this manner alone.

अनुष्ठानविषयकसंशये शिष्टाचारः प्रमामम्

अथ एवं वर्त्तमानस्य यदि कदाचित् ते तव श्रौते स्मार्त्ते वा कर्मणि वृत्ते वा आचारलक्षणे विचिकित्सा संशयः (मणिप्रभा - विरुद्धार्थकवचनद्वयेन विप्रतिपत्तिदर्शितः संशयः तथा हि - तावदग्निहोत्रादिके

श्रौते कर्मणि “उदिते जुहोति”, “अनुदिते जुहोति” इति वाक्यद्वयं विरुद्धार्थं श्रुतवतः इदं कर्त्तव्यं न वा इति आकारकः सन्देहः स्यात्। Here one has to follow one's dharmasutra as followed in the tradition। तथा सन्ध्यावन्दनादिके च स्मार्त्ते कर्मणि संध्यादेवता पुरुषमूर्त्तिः स्त्रीमूर्त्तिः वा इति वचनद्वयेन सन्दहः स्यात्। कुलपरम्परागते लौकिके आचारे तत्रापि मातुलसुताविवाहे मांसभक्षणादिके च विप्रतिपत्तिदर्शनाद् एवमाचरणीयं न वा इत्याकारकः सन्देहो स्यात्।) स्यात् भवेत्। ये तत्र तस्मिन् दशे काले वा ब्राह्मणाः तत्र कर्मादौ (देशाद्यर्थकस्य तत्रशब्दस्य युक्ताः इत्यनेन अन्वयः उक्तः कस्मिन् विषये युक्ताः इत्याकाङ्क्षायां कर्मादौ इति उक्तमिति विवेचनीयम्।) युक्ताः इति व्यवहितेन संबन्धः कर्त्तव्यः। संमर्शिनः विचारक्षमाः। युक्ताः अभियुक्ताः (कर्मादौ अभियोगः विधिवत् तदनुष्ठानम् अनुष्ठेयार्थनिर्णयस्य संमर्शिनः इत्यनेन लब्धत्वादिति मन्तव्यम्।)। कर्मणि वृत्ते वा आयुक्ताः (सच्चिदानन्द - अयुक्ताः इत्यस्य रूपान्तरम्) अपरप्रयुक्ताः (स्वतन्त्राः इत्यर्थः)। अलूक्षाः अरूक्षाः अक्रूरमतयः। धर्मकामाः (धर्ममेव कामयन्ते न तु लाभपूजादिकम्) अदृष्टार्थिनः अकामहताः (लाभपूजादिकामोपहताः न भवन्ति इत्यर्थः) इत्येतत्। ते (मणिप्रभा - उक्ताः संमर्शादिपञ्चविशेषणविशिष्टाः) यथा तत्र तस्मिन् कर्मणि वृत्ते वा वर्तेरन् (वृतु वर्त्तने १.आ.पद वि.लिङ्)। तथा त्वमपि (उदितहोमादिविषये संदेहे सति स्वस्ववंशस्थितानाम् एतादृशानाम् आचाराद् व्यवस्थां निश्चित्य तथा वर्थेताः इत्यर्थः।) वर्तेथाः। अथ अभ्याख्यातेषु, अभ्याख्याताः अभ्युक्ताः दोषेण संदिह्यमानेन संयोजिताः केनचित् (स्वर्णस्तेयादि-रूपेण इत्यर्थः। संदिह्यमानेन इति विशेषणात् पातकित्वेन निश्चितानाम् अभ्याख्यातपदेन ग्रहणं नास्तीति गम्यते तेषाम् असंव्यवहार्यत्व निश्चयेन तद्विषये विचाराप्रसक्तेः इति मत्वा तद्व्यावृत्तिः कृता इति मन्तव्यम्।) तेषु (पातकित्व-संशयास्पदेषु पुरुषेषु) यथोक्तं सर्वम् (यथोक्तं तस्मिन्देशे काले वा इत्यादिकं सर्वम्) उपनयेत् (उपनयेद् योजयेद् इत्यर्थः)। (एवं ये तत्र इत्यादिवाक्यजातस्य तात्पर्यमुक्त्वा अक्षरार्थकथनप्रसक्तौ आह - ये तत्रेत्यादि इति। ये तत्रेत्यादि-वाक्यजातं पूर्वेण ये तत्रेत्यादिवाक्यजातेन समानार्थम्, अतो न पृथग्व्याख्येयम् इत्यर्थः) ये तत्र इत्यादि समानम् (सच्चिदान्द - तेषु च संदिह्यमानदोषेण संयोजितेषु ये तत्र अभियुक्ताः अपरप्रयुक्ताः अक्रूरमतयः केवलं धर्मदृष्टयः ब्रह्मणाः स्युः ते यथा वर्त्तेरन् त्वमपि तथैव वर्तेथाः इति इत्यर्थः) ।

> When you are engaged thus (in your life) suppose there is doubt at any time in your mind with reference to the duties ordained by the Vedas and dharmasastras or with reference to conduct of customary behaviour, then you should conduct yourself in that manner in the manner in which with regard to that duty or conduct, those brahmanas who may be there - who are adept in discrimination, who are adept in duties and customs, who are independent who are not cruel or not crooked in disposition, who are desirous of virtuous life - may behave at that time or place. The word tatra karmadau should go with the distant word yukta. Then, with regard to those who are accused of some doubtful guilt by someone else, you should apply all that has been said beginning from ye tatra.

What should we do when we have a conflict or doubt called *vicikitsa* (In *Katha* it came). In what? In karma - a doubt regarding what I have to do or what I should not do, a doubt regarding how I should behave, towards certain type of people which will be said later. Normally you will find in *dharmasastra* all topics of *karma* and *vrittam* are discussed. In the Veda most of the ideas were discussed. *Smriti* also clarifies every details and systematically present them. From birth to death it has all possible situations and they have been clearly said in the *smriti*. In addition to that, in *itihasas* and *puranas* various stories have been presented and in which all *dharmasankatams* come to various characters. They cover all human problems . If you take *Ramayanam*, how husband treat wife, father-son, every aspect is brought to light. *Mahabharata* still richer in this respect. Normally we have

that situation in one place or other. If guru himself joins opposite party, it is really a *dharmasankata* for *Arjuna*. It is opposed to *acaryadevo bhava*. It is cleared in *Gita*, that if *dharma* question comes, you can fight even if it involves *acarya*, nothing wrong in it. We should respect *acaryas*, but vote for *dharma*. *Dharma* is important. Persons will die but *dharma* stays for ever.

Sometimes as the society is changing, new and new situations arising. In those days they cannot go beyond few miles. Now people are settled in USA. Because of absence of *varnadharma*, there is confusion of duties. No *gurukulavasa* these days. Situations can be infinite. Life is not static, it is dynamic. A lot of water flows under the bridge. If you don't change people will change and leave you alone. Vedas cannot exhaust all of them. Vedas can only give salient features of *dharma* and the spirit behind *dharma* and also some situations. They cannot exhaust all possible situations. What does scriptures expect us to do? After studying the scriptures well and having analysed various situations, the rules and exceptions, we have to imbibe the spirit of *dharma* and once the principle of *dharma* is understood and once we have followed *dharma* sufficiently for long time, we develop a *dharma* consciousness. This is called *sastra* conscience. One who follows sastric way of life for 12 years will get it. It is *dharmavasana*. It becomes a *pramana*. I understand no *dharma* is absolute (Brahman alone is absolute). Every *dharma* has to be interpreted. *Pitruvakya paripalanam* is followed by *Rama* whereas *Prahlada* did not obey. He was responsible for his destruction. *pitrudeva bhava* is violated. So there is no mechanical following. So there are possibilities of confusion. *Ahimsa* and war are opposed to each other. So we have to see the spirit behind every *dharma*. *Dharma* is glorified in Vedas. About the same *dharma* we have *sarvadharman* + *Kumbhakarna* and *Vibhishana* both are glorified for different values. *Vibhishana* did a *tyaga* of one *dharma* but for *mokshartham* you can do, *isvarartham* you can do. Otherwise it will be diplomacy of shifting camps. Thus our mind gets the ability to guide us in any situation. *satam hi sandeha padeshu vastushu pramanam antahkarana prvrittayah. (Kalidas*). This is the only method to solve conflicts. So convention is there of marrying uncle's daughter. Elsewhere it is not there. What should you do when you travel in train. How can you do *agnihotra* in the train. If muslim, no problem. *Grhya sutras* will not tell you. So here is an amendment to the constitution provided. It is all very important vakya. Vedas say.

Swamiji gives the example of driving. When you learn driving, they give the principles of driving. They give a test in which a few traffic situations are simulated. How to back the car etc. Ask you to follow. Can the institute bring out all possible traffic situations. It is not possible. But over a period of time you develop driving consciousness and you get the answer on the spot. Till I develop that consciousness what should I do? We have the answer here. In every society there will be some people who have followed *dharma* and have the dharmic consciousness. They know what to do in any situation. You go to them. According to tradition *upanishad* should not be taught to ladies. I don't know. But Swamiji has lived *sastra*, so what he follows, we can safely follow. *Sanyasi* cannot cross the see. But Swamiji is the example for us to follow. He has the vision of *dharma*. Vedas did not contemplate such a situation. So you follow such people.

Brahmanah means one who studies and practices Veda. What type they are? *Sammarsinah* - who are having the capacity to analyse the *sastras* and see the spirit of it. *Yuktah - tatra yuktah. Kutra? Karmani vrtte va.* He must be in the same field. *Dese*

kale va iti one is enough *va* being there. When we talk of dharmic consciousness, he may be a *jnani* or may not be. The conflict is not *atma-anatma vishaya*, but we need only *dharma-adharma kusalah* only. They must be independent. Not like ministers. *Alukshah* - who are free from anger, who are accommodative. Only then they can appreciate the other person's situations. *Dharma-kamah* - who are interested in *dharma*. *Sraddha* in *papa*. Committed to *dharma*. No *artha kama* considerations are there. *Dharma* is difficult only when *arhta kama* are important. *Svadharme nidhanam sreyah*. Such people in what manner they act, you also act in the same manner.

Now the doubt regarding conduct. *Abhyakhyatah* means those who have been accused by the society. Boycotted by the society. How are you going to relate to them? If he invites for a programme, should I go or not. Observe what the previously mentioned people do, you also do. So *sishtacara* is *pramanam*. One who is living in the same situation. etc. *Abhyakhyana* is *mithya aropa* or accusation is not proved. Hee not *tatra*, but *teshu*. For example, if there is one in the village who is drunkard, others boycotted and you also follow.

Suppose there is not such a person, or he is not around, what should we do. Our aim is *dharma*. So keep that as motive. I tell the Lord that I have performed to the best of my understanding. I will accept whatever *phalam iti*. If you still commit error, no problem. Do the best and leave the rest.

उपसंहारः

(उक्तानुशासनम् उपसंहरति - एष इत्यादिना) एषः (सत्यं वद इत्यादिग्रन्थसंदर्भः एतच्छब्दार्थः) आदेशः विधिः (मणिप्रभा - एषः सत्यं वद इत्यारभ्य तथा तेषु वर्त्तेथाः इत्यन्तवाक्यसन्दर्भः आदेशः श्रौतः विधिः यथा राजा स्वभृत्यम् आदिशति तथा वैदिकः विधिः अनुष्ठातारम् आदिशति)। एषः उपदेशः पुत्रादिभ्यः (पुत्रादिभ्यः शुकादिभ्यः पित्रादीनां व्यासादीनां य उपदेशः इतिहासादौ प्रसिद्धः सोऽपि एष एव इत्यर्थः अयमेवार्थः इतिहासादौ उक्तः इति भावः) पित्रादीनाम् (मणिप्रभा - एषः सत्यं वदेत्यादिः उपदेशः स्मार्त्तः विधिः)। एषा वेदोपनिषद् (कर्मकाण्डस्य कृत्स्नस्यापि अत्रैव तात्पर्यमिति वक्तुमेषा वेदोपनिषदिति वाक्यम्। तद्व्याचष्टे - वेदरहस्यमिति। एषा वेदोपनिषदित्यत्र एतच्छब्दः प्रकृतकर्मसंहतिपरः) वेदरहस्यम्, वेदार्थः (सच्चिदानन्द - वेदोपदिष्टार्थसारः इत्यर्थः) (मणिप्रभा - एषा सत्यम वदेत्याद्युक्तिः वेदे विधिमन्त्रार्थवादराशिरूपे उपनिषत् सारभागः) इत्येतत्। एतद् एव (सच्चिदानन्द - एतच्छब्द-अभ्यासलब्धम् अवधारणम्) अनुशासनम् ईश्वरवचनम् ("श्रुतिस्मृती ममैवाज्ञे" इति स्मरणादिति भावः)। (ननु अनुशासनं विधिरिति कुतो नोच्यते तत्राह - आदेशेति । आदेशपदेन विधेः उक्ततया पौनरुक्त्यापत्तेः इति भावः) आदेशवाच्यस्य (गोविन्दानन्द - विध्यर्थकस्य वचनमात्रपरत्वे गमकमाह - आदेशवाच्यस्य इति। आदेशपद-वाच्यस्य इति यावत्) विधेः उक्तत्वात् (सच्चिदानन्द - एष आदेश इति वाक्येन विधेः उक्तत्वात् अपुनरुक्तायै ईश्वरवचनम् इति अनुशासनशब्दः व्याख्येयः इत्यर्थः)। (अनुशासनपदस्य अर्थान्तरमाह - सर्वेषां वा इति) सर्वेषां वा प्रमाणभूतानाम् (गोविन्दानन्द - प्रमाणानाम् इति यावत्) अनुशासनमेतत् (गोविन्दानन्द - तैः अविरिद्धत्वाद् एतस्य इति भावः)। यस्मादेवम्, तस्मात् एवं यथोक्तं सर्वम् उपासितव्यम् कर्त्तव्यम्। एवमु च एतद् उपास्यम् उपास्यमेव चैतत् नानुपास्यम् इत्यादरार्थं (यथोक्तकर्मानुष्ठाने यत्नाधिक्यसिद्ध्यर्थम् इत्यर्थः) पुनर्वचनम्।

This is the injunction. This is the advice to sons and the rest by fathers and others. This is the secret of the Vedas, that is to say, the essence of the Vedas. This is , indeed, the commandment of God, since the word adesa has already been mentioned which means

> injunction. Or, this is the advice of all those who are considered to be authoritative. Because it is so, therefore, all that is said above should be followed with commitment. Thus it should alone be followed with commitment. The repetition of thus it should be followed with commitment is meant to show reverence for the teaching that one should not neglect their performance.

This is the $vidhi$. Vedic commandments. Mafia people do this. You make an offer which others cannot refuse. It may not be hitam. But here hitam also. So $upadesa$ it is. The same alone is given by parents etc (elders) to sons (grandsons etc) where there is no commandment but advice. For parents again it is $sruti$. This teaching consists both $srauta$ and $smarta\ vidhi$. ($Sayana$ says) This is the essence of Vedic teaching i.e, $purvabhaga$. This is the commandment of the Lord. Father's advise may be coloured by his own $raga$ and $dvesha$. Here it is not so, because there is no limitation of knowledge. It is $Isvara's$ commandment through Veda. So it should be followed.

श्रेयःसाधनविचारः

विचारविषयः

६७) अत्रैतच्चिन्त्यते विद्या-कर्मणोः विवेकार्थम्। किं १) कर्मभ्यः एव केवलेभ्यः परं श्रेयः, २) उत विद्या-सव्यपेक्षेभ्यः, ३) आहोस्वित् विद्या-कर्मभ्यां संहताभ्याम्, ४) विद्यायाः वा कर्मापेक्षायाः, ५) उत केवलायाः एव विद्यायाः[२१०] इति।।

पूर्वपक्षः १ - केवलकर्मभ्यः परं श्रेयः

६८) तत्र केवलेभ्यः एव कर्मभ्यः स्यात्। समस्त-वेदार्थ-ज्ञानवतः कर्माधिकारात्। "वेदः कृत्स्नः अधिगन्तव्यः सरहस्यो द्विजन्मना (मनु.स्मृ. २.१६५)" इति स्मरणात्। अधिगमश्च सहोपनिषदर्थेन आत्मज्ञानादिना। "विद्वान् यजते", "विद्वान् याजयति" इति च विदुषः एव कर्मण्यधिकारः प्रदर्श्यते सर्वत्र। "ज्ञात्वा चानुष्ठानम्" इति च। कृत्स्नश्च वेदः कर्मार्थः इति हि मन्यन्ते केचित्। कर्मभ्यश्चेत् परं श्रेयः नावाप्यते, वेदोऽनर्थकः स्यात्।।

सिद्धान्तः - केवलकर्मभ्यः न परं श्रेयः

६९) न। नित्यत्वाद् मोक्षस्य। नित्यो हि मोक्षः इष्यते। कर्म-कार्यस्यानित्यत्वं प्रसिद्धं लोके। कर्मभ्यश्चेत् श्रेयः, अनित्यं स्यात्। तच्च अनिष्टम्। "तद्यथा इह कर्मचितो लोकः क्षीयते" (छा.उप. ८.१.६) इति न्यायानुगृहीत-श्रुति-विरोधात्। ननु[२११] काम्य-प्रतिषिद्धयोरनारम्भात्, आरब्धस्य च कर्मणः उपभोगेन क्षयात्, नित्यानुष्ठानाच्च प्रत्यवायानुपपत्तेः[२१२], ज्ञान-निरपेक्षः एव मोक्षः इति चेत्। तच्च न। शेष-कर्म-सम्भवात् तन्निमित्त-शरीरान्तरोत्पत्तिः प्राप्नोति इति प्रत्युक्तम् (भाष्य.भागः ४)। कर्म-शेषस्य च नित्यानुष्ठानेन अविरोधात् क्षयानुपपत्तिरिति च।

यच्चोक्तं 'समस्त-वेदार्थ-ज्ञानवतः कर्माधिकारात्' इत्यादि, तच्च न। श्रुत-ज्ञान-व्यतिरेकाद् उपासनस्य। श्रुत-ज्ञान-मात्रेण हि कर्मणि अधिक्रियते, नोपासनमपेक्षते[२१३]। उपासनं च श्रुत-ज्ञानादर्थान्तरं विधीयते मोक्ष-फलम्। अर्थान्तर-प्रसिद्धिश्च[२१४] स्यात्। "श्रोतव्यः (बृ.उप २.४.५)" इत्युक्त्वा तद्व्यतिरेकेण "मन्तव्यो निदिध्यासितव्यः (बृ.उप २.४.५)" इति यत्नान्तर-विधानात्। मनन-निदिध्यासनयोः च प्रसिद्धं श्रवण-ज्ञानादर्थान्तरत्वम्।।

पूर्वपक्षः २ - विद्यासव्यपेक्ष-कर्मभ्यः परं श्रेयः

७०) एवं तर्हि विद्या-सव्यपेक्षेभ्यः कर्मभ्यः स्याद् मोक्षः। विद्या-सहितानां च कर्मणां भवेत् कार्यान्तरारम्भ-सामर्थ्यम्। यथा स्वतो मरण-ज्वरादि-कार्यारम्भ-सामर्थ्यानामपि विष-दध्यादीनां मन्त्र-शर्करादि-संयुक्तानां कार्यान्तरारम्भ-सामर्थ्यम्। एवं विद्या-सहितैः कर्मभिः मोक्षः आरभ्यते इति चेत्।।

---

[210] पा.भे - विद्यया वा कर्मापेक्षया, ५) उत केवलया एव विद्यया इति।

[211] पा.भे - विरोधात्। काम्य-प्रतिषिद्धयोरनारम्भाद् इति आनन्दाश्रमः।

[212] पा.भे - नित्यानुष्ठानाच्च, ज्ञाननिरपेक्षः इति आनन्दाश्रमः।

[213] पा.भे - नोपासनज्ञानमपेक्षते इति।

[214] पा.भे - उपासनं च श्रुत-ज्ञानादर्थान्तरं विधीयते। मोक्ष-फलम् अर्थान्तर-प्रसिद्धं च स्याद् इति आनन्दाश्रमः।

सिद्धान्तः - विद्यासव्यपेक्ष-कर्मभ्यः अपि न परं श्रेयः

७१) न। आरभ्यस्यानित्यत्वादिति उक्तो दोषः (भाष्य.भागः ८)। वचनाद् आरभ्योऽपि नित्यः एवेति चेत्। न। ज्ञापकत्वाद् वचनस्य। वचनं नाम यथा-भूतस्यार्थस्य ज्ञापकम्, न अविद्यमानस्य कर्तृ[२१५]। न हि वचन-शतेनापि नित्यम् आरभ्यते। आरब्धं वा अविनाशि भवेत्।।

पूर्वपक्षः ३ - विद्याकर्मणोः समप्राधान्येन समुच्चितयोः मोक्षहेतुता इति तस्य निरासश्च

७२) एतेन विद्या-कर्मणोः संहतयोः मोक्षारम्भकत्वं प्रत्युक्तम्। विद्या-कर्मणी मोक्ष-प्रतिबन्ध-हेतु-निवर्त्तके इति चेत्। न। कर्मणः फलान्तर-दर्शनात्। उत्पत्ति-संस्कार-विकाराप्तयो हि फलं कर्मणो दृश्यते। उत्पत्यादि-फल-विपरीतश्च मोक्षः।।

मोक्षः आप्यः न

७३) गतिश्रुतेः आप्यः इति चेत्। "सूर्यद्वारेण (ते विरजाः प्रयान्ति) (मु.उप. १.२.११)" "तयोर्ध्वमायन् (अमृतत्वमेति) (कठ.उप. २.३.१६, छा.उप. ८.६.६)" इत्येवमादि-गति-श्रुतिभ्यः प्राप्यो मोक्षः इति चेत्। न। सर्वगतत्वात्, गन्तृभिश्च अनन्यत्वात्। आकाशादिकारणत्वात् सर्वगतं ब्रह्म। ब्रह्माव्यतिरिक्ताश्च सर्वे विज्ञानात्मनः। अतो नाप्यो मोक्षः। गन्तुः अन्यत् विभिन्नदेशं च भवति[२१६] गन्तव्यम्। न हि येनैव अव्यतिरिक्तं यत् तत्तेनैव गम्यते। तदनन्यत्वप्रसिद्धिश्च[२१७] "तत्सृष्ट्वा तदेवानुप्राविशत्" (तै.उप. २.६) "क्षेत्रज्ञं चापि मां विद्धि (भ.गी १३.२)" इत्येवमादि-श्रुति-स्मृति-शतेभ्यः।।

गत्यैश्वर्यादिश्रुतेः कार्यब्रह्मविषयत्वम्

७४) गत्यैश्वर्यादि-श्रुति-विरोधः इति चेत्। अथापि स्यात्, यद्यप्राप्यः मोक्षः, तदा गतिश्रुतीनाम् "स एकधा (छा.उप. ७.२६.२)" "स यदि पितृ-लोक-कामः भवति (छा.उप. ८.२.१)" "स्त्रीभिर्वा यानैर्वा (छा.उप. ८.१२.३)" इत्यादि-श्रुतीनां च कोपः स्याद् इति चेत्।

न। कार्य-ब्रह्म-विषयत्वात् तासाम्। कार्ये हि ब्रह्मणि स्त्र्यादयः स्युः, न कारणे। "एकमेवाद्वितीयम् (छा.उप. ६.२.१)", "यत्र नान्यत् पश्यति (छा.उप. ७.२४.१)" "तत्केन कं पश्येत् (बृ.उप. २.४.१४, ४.५.१५)" इत्यादि-श्रुतिभ्यः।।

मिथो विरोधाद् ज्ञानकर्मसमुच्चय एव अनुपपन्नः

७५) विरोधाच्च विद्या-कर्मणोः समुच्चयानुपपत्तिः। प्रविलीन-कर्त्रादि-कारक-विशेष-तत्त्व-विषया हि विद्या तद्विपरीत-कारक-साध्येन कर्मणा विरुध्यते। न हि, एकं वस्तु परमार्थतः कर्तृत्वादि[२१८]-विशेषवत् तच्छून्यं चेति उभयथा द्रष्टुं शक्यते। अवश्यं हि अन्यतरद् मिथ्या स्यात्। अन्यतरस्य च मिथ्यात्व-प्रसङ्गे युक्तं यत्स्वाभाविकाज्ञान-विषयस्य द्वैतस्य मिथ्यात्वम् -

---

[215] पा.भे - वचनं नाम यथा-भूतस्यार्थस्य ज्ञापकम्, विद्यमानस्य कर्तृ इति आनन्दाश्रमः।

[216] पा.भे - विभिन्नं देशं प्रति भवति इति आनन्दाश्रमः।

[217] पा.भे - तदनन्यत्वप्रसिद्धेश्च इति आनन्दाश्रमः।

[218] पा.भे - कर्त्रादि-विशेषवद् इति आनन्दाश्रमः।

"यत्र हि द्वैतमिव भवति (बृ.उप. २.४.१४)", "मृत्योः स मृत्युमाप्नोति (कठ.उप. २.१.१०)", "अथ यत्र अन्यत् पश्यति तदल्पम् (छा.उप. ७.२४.१)", "अन्योऽसावन्योऽहमस्मि (इति न स वेद) (बृ.उप. १.४.१०)", "उदरमन्तरं कुरुते अथ तस्य भयं भवति (तै.उप. २.७)" इत्यादि-श्रुति-शतेभ्यः। सत्यत्वं च एकत्वस्य - "एकधैवानुद्रष्टव्यम् (बृ.उप. ४.४.२०)", "एकमेवाद्वितीयम् (छा.उप. ६.२.१)", "ब्रह्मैवेदं सर्वम् (नृ.उत्तर.ता.उप. ७)", "आत्मैवेदं सर्वम् (छा.उप. ७.२५.२)" इत्यादि-श्रुति-शतेभ्यः। न च संप्रदानादि-कारक-भेदादर्शने कर्म उपपद्यते। अन्यत्व-दर्शनापवादाद्य विद्या-विषये सहस्रशः श्रूयन्ते। अतो विरोधो विद्या-कर्मणोः। अतश्च समुच्चयानुपपत्तिः। तत्र यदुक्तं संहताभ्यां विद्या-कर्मभ्यां मोक्षः इति, अनुपपन्नं तत्[२१९]।।

निर्विशेष-ब्रह्मोपदेशे कर्मविधिश्रुतीनाम् विरोधः इति आक्षेपः

७६) विहितत्वात् कर्मणां श्रुति-विरोधः इति चेत्। यदि उपमृद्य कर्त्रादि-कारक-विशेषम् आत्मैकत्व-विज्ञानं विधीयते सर्पादि-भ्रान्ति-विज्ञानोपमर्दक-रज्ज्वादि-विषय-विज्ञानवत्, तर्हि प्राप्तः कर्म-विधि-श्रुतीनां निर्विषयत्वाद् विरोधः। विहितानि च कर्माणि। स च विरोधो न युक्तः, प्रमाणत्वात् श्रुतीनाम्, इति चेत्।।

निर्विशेष-ब्रह्मोपदेशे कर्मविधिश्रुतीनाम् अविरोध इत्युत्तरम्

७७) न। पुरुषार्थोपदेश-परत्वात् श्रुतीनाम्। विद्योपदेश-परा तावत् श्रुतिः संसारात् पुरुषः मोक्षयितव्यः इति, संसारहेतोः अविद्यायाः विद्यया निवृत्तिः कर्त्तव्या इति, विद्या-प्रकाशकत्वेन प्रवृत्ता इति न विरोधः।

एवमपि कर्त्रादि-कारक-सद्भाव-प्रतिपादन-परं शास्त्रं विरुध्यते एव इति चेत्। न। यथा-प्राप्तमेव कारकास्तित्वम् उपादाय उपात्त-दुरित-क्षयार्थं कर्माणि विदधत् शास्त्रं मुमुक्षूणाम्, फलार्थिनां च फल-साधनम्, न कारकास्तित्वे व्याप्रियते। उपचित-दुरित-प्रतिबन्धस्य हि विद्योत्पत्तिः नावकल्पते। तत्क्षये च विद्योत्पत्तिः स्यात्। ततश्च अविद्या-निवृत्तिः, ततः आत्यन्तिकः संसारोपरमः।।

कर्मणः काममूलत्वादपि विद्याकर्मणोः विरोधः

७८) अपि च, अनात्मदर्शिनो हि अनात्मविषयः कामः। कामयमानश्च करोति कर्माणि। ततः तत्फलोपभोगाय शरीरद्युपादान-लक्षणः संसारः। तद्व्यतिरेकेण, आत्मैकत्व-दर्शिनः विषयाभावात् कामानुपपत्तिः। आत्मनि च अनन्यत्वात् कामानुपपत्तौ स्वात्मन्यवस्थानं मोक्षः इति। अतोऽपि विद्याकर्मणोः विरोधः।।

पूर्वपक्षः ४ - कर्मोपसर्जनविद्यायाः मोक्षः इति

तस्य निरासश्च

७९) विरोधादेव च विद्या मोक्षं प्रति न कर्माण्यपेक्षते।।

विद्या स्वोत्पत्तौ कर्माणि अपेक्षते एव

---

[219] पा.भे - तत्र यदुक्तं संहताभ्यां विद्या-कर्मभ्यां मोक्षः इति, एतद् अनुपपन्नं इति, तदयुक्तम् - इति क्वचित्।।

८०) स्वात्म-लाभे तु पूर्वोपचित-दुरित-प्रतिबन्धापनयन-द्वारेण विद्या-हेतुत्वं प्रतिपद्यन्ते कर्माणि नित्यानि इति। अतः एव अस्मिन् प्रकरणे उपन्यस्तानि कर्माणि इति अवोचाम (भाष्य.भागः ५८)। एवं च अविरोधः कर्म-विधि-श्रुतीनाम्। अतः केवलायाः एव विद्यायाः परं श्रेयः इति सिद्धम्।।

कर्मानेकत्वात् विद्या गार्हस्थ्यकर्माणि एव अपेक्षते इति नियमो न

पूर्वपक्षः

८१) एवं तर्हि आश्रमान्तरानुपपत्तिः, कर्म-निमित्तत्वाद् विद्योत्पत्तेः। गार्हस्थ्ये च[२२०] विहितानि कर्माणि इति ऐकाश्रम्यम् एव। अतश्च यावज्जीवादि-श्रुतयः अनुकूलतराः[२२१] स्युः।

सिद्धान्तः

८२) न। कर्मानेकत्वात्। न हि अग्निहोत्रदीन्येव कर्माणि। ब्रह्मचर्यं, तपः, सत्य-वचनं, शमः, दमः, अहिंसा - इत्येवमादीन्यपि कर्माणि इतराश्रम-प्रसिद्धानि विद्योत्पत्तौ साधकतमानि असंकीर्णत्वात्[२२२] विद्यन्ते ध्यान-धारणादि-लक्षणानि च। वक्ष्यति च - "तपसा ब्रह्म विजिज्ञासस्व (तै.उप. ३.२)" इति ।।

जन्मान्तर-कृत-कर्मभ्यश्च प्रागपि गार्हस्थ्याद् विद्योत्पत्ति-संभवात्। कर्मार्थत्वाच्च गार्हस्थ्य-प्रतिपत्तेः, कर्म-साध्यायां च विद्यायां सत्यां गार्हस्थ्य-प्रतिपत्तिः अनर्थिकैव। लोकार्थत्वाच्च पुत्रादीनाम्। पुत्रादि-साध्येभ्यश्च "अयं लोकः", "पितृ-लोकः", "देव-लोकः" (बृ.उप. १.५.१६) - इत्येतेभ्यः व्यावृत्त-कामस्य, नित्य-सिद्धात्मलोक-दर्शिनः, कर्मणि प्रयोजनमपश्यतः, कथं प्रवृत्तिः उपपद्यते? प्रतिपन्न-गार्हस्थ्यस्यापि विद्योत्पत्तौ विद्या-परिपाकाद् विरक्तस्य कर्मसु प्रयोजनमपश्यतः कर्मभ्यो निवृत्तिरेव स्यात्। "प्रव्रजिष्यन् वा अरे अहमस्मात् स्थानाद् अस्मि (बृ.उप. ४.५.२)" इत्येवमादि-श्रुति-लिङ्ग-दर्शनात्।।

कर्म प्रति श्रुतेः यत्नाधिक्य-विचारः

पूर्वपक्षः

८३) कर्म प्रति श्रुतेः यत्नाधिक्य-दर्शनाद् अयुक्तमिति चेत्। अग्नि-होत्रादि-कर्म प्रति श्रुतेः अधिको यत्नः। महांश्च कर्मण्यायासः। अनेकसाधन-साध्यत्वाद् अग्निहोत्रादीनाम्। तपोब्रह्मचर्यादीनां च इतराश्रम-कर्मणां गार्हस्थ्येपि समानत्वाद्, अल्प-साधनापेक्षत्वात् च इतरेषां, न युक्तः तुल्यवद्विकल्पः आश्रमिभिः तस्य इति चेत्।

सिद्धान्तः

८४) न। जन्मान्तर-कृतानुग्रहात्। यदुक्तं कर्मणि श्रुतेः अधिको यत्नः इत्यादि, नासौ दोषः। यतो जन्मान्तर-कृतमपि अग्निहोत्रादि-लक्षणं कर्म ब्रह्मचर्यादि-लक्षणं च अनुग्राहकं भवति विद्योत्पत्तिं प्रति। येन च जन्मना[२२३] एव विरक्ताः दृश्यन्ते केचित्। केचित्तु कर्मसु प्रवृत्ताः

---

[220] पा.भे - गृहस्थस्य एव विहितानि इति।

[221] पा.भे - अनुकूलतराः। इति आनन्दाश्रमः।

[222] पा.भे - असंकीर्णाः इति।

[223] पा.भे - ये जन्मना इति आनन्दाश्रमः।

अविरक्ताः विद्याविद्वेषिणः। तस्माद् जन्मान्तर-कृत-संस्कारेभ्यः विरक्तानाम् आश्रमान्तर-प्रतिपत्तिरेव[२२४] इष्यते।।

कर्मफल-बाहुल्याच्च। पुत्र-स्वर्ग-ब्रह्मवर्चसादि-लक्षणस्य कर्म-फलस्य असंख्येयत्वात्, तत्प्रति च पुरुषाणां काम-बाहुल्यात्, तदर्थः श्रुतेः अधिको यत्नः कर्मसु उपपद्यते। आशिषां बाहुल्य-दर्शनात् - 'इदं मे स्याद्', 'इदं मे स्यात्' इति।

उपायत्वाच्च। उपाय-भूतानि हि कर्माणि विद्यां प्रति इत्यवोचाम (भाष्य.भागः ७७)। उपाये च अधिको यत्नः कर्त्तव्यः, न उपेये।।

विद्यां प्रति श्रवणादीनां साक्षाद् साधनत्वम्

पूर्वपक्षः

८५) कर्म-निमित्तत्वाद् विद्यायाः, यत्नान्तरानर्थक्यमिति चेत्। कर्मभ्यः एव पूर्वोपचित-दुरित-प्रतिबन्ध-क्षयादेव विद्या उत्पद्यते चेत्, कर्मभ्यः पृथग् उपनिषच्छ्रवणादि-यत्नः अनर्थकः इति चेत्।

सिद्धान्तः

८६) न। नियमाभावाद्। न हि, प्रतिबन्ध-क्षयादेव विद्या उत्पद्यते, न तु ईश्वर-प्रसाद-तपोध्यानाद्यनुष्ठानाद् इति नियमः अस्ति। अहिंसा-ब्रह्मचर्यादीनां च विद्यां प्रति उपकारकत्वात्। साक्षादेव च कारणत्वात् श्रवण-मनन-निदिध्यासनानाम्।

उपसंहारः

८७) अतः सिद्धानि आश्रमान्तराणि। सर्वेषां च अधिकारः विद्यायाम्। परं च श्रेयः केवलायाः विद्यायाः एवेति सिद्धम्।।

(इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषत्-शीक्षावल्ली-भाष्ये एकादशोऽनुवाकः)।।

[224] पा.भे - प्राप्तिरेव इति।

विचारभाष्य

विचारविषयः

(आद्यवादे केवलायाः विद्यायाः मुक्तिसाधनत्वं साधितमपि विशिष्य समुच्चयनिराकरणेन पुनः साधयितुं चिन्तामुपक्रमते - अत्रैतदिति। विद्याकर्मणोः फलभेदज्ञानार्थम् एतद् वक्ष्यमाणं वस्तु चिन्त्यते इत्यर्थः) अत्रैतच्चिन्त्यते विद्याकर्मणोः विवेकार्थम् - किं कर्मभ्यः एव (एवकारस्य व्याख्यानम् - केवलेभ्यः इति) केवलेभ्यः परं श्रेयः उत विद्यासव्यपेक्षेभ्यः (विद्या परब्रह्मविद्या उपसर्जनतया तत्सापेक्षेभ्यः इत्यर्थः) (सच्चिदानन्द - प्रधानभूतेभ्यः कर्मभ्यः अङ्गभूतविद्यासहितेभ्यः)। (विद्याकर्मणोः समप्राधान्यपक्षमाह - आहोस्विदिति) आहोस्विद् विद्याकर्मभ्यां संहताभ्यां (विद्याप्राधान्यकोटिमाह - विद्यया इति) विद्यया वा कर्मापेक्षया (सच्चिदानन्द - प्रधानभूतायाः विद्यायाः कर्मसहितायाः) (सिद्धान्तकोटिमाह - उतेति) उत केवलयैव विद्यया (सच्चिदानन्द - इतरनिरपेक्षायाः) इति ।

> Here for the sake of distinct understanding between karma and knowledge this is being considered here as to whether the ultimate goal of moksha is achieved from mere actions alone or from actions aided by knowledge or from a combination of karma and knowledge on equal footing or from knowledge aided by actions or from mere knowledge.

Here, after the karma mention, before the beginning of the knowledge (where what is is unfolded), this analysis is undertaken. In the introduction it has been done to some extent. There karma was analysed alone as means. But here the combination is discussed in more detail. Five options are there. 1) Pure karma alone 2) *Vidya* with the help of karma. 3) *Vidya* and karma together contribute 4) Karma with the support of *vidya*. 5) Knowledge alone. It is highly fast moving *bhashya*. *cinta* here is analysis. Whether *vidya* will *moksha* or karma or their combination *iti*. Why this *vicara*? With reference to *moksha*, we have these *vikalpas*. *Savyapeksha* is dependence. *Ahosvit* is big word meaning or. Like *anyatarasyam*. *Anga-angi-bhava* between them with either one as *angi*. Or both are *angi*.

केवलकर्मभ्यः न विःश्रेयसम्

पूर्वपक्ष

(सच्चिदानन्द - यद्यपि अवतररणिकाभाष्ये केवलकर्मणः विद्यासहितकर्मणश्च निःश्रेयसहेतुत्वं निराकृत्य विद्यया कर्मोपादानहेतुपरिहारादेव मोक्ष इति प्रतिष्ठापितम्। तथापि शीक्षावल्ल्यां बहुशो विद्याविधानात् विज्ञानात्स्वाराज्य-प्राप्तिश्रवणात् ऋतं च, धर्मं चर इत्यादिना भूयो भूयः कर्मविधानाच्च केवला विद्या नालं परप्राप्तये इति शङ्का स्यात् कस्यचित् इति इह पुनरपि वितत्य चिन्त्यते।) (पूर्वपक्षमाह - तत्रेति। वेदमनूच्य इत्यादौ श्रुतेः कर्मसु अत्यन्त-आदरदर्शनात्. कर्मणैव हि संसिद्धिम् आस्थिता जनकादयः इति भगवद्वचनदर्शनाच्च कर्मभ्यः एव परं श्रेयः। न च विद्यावैयर्थ्यं शङ्नीयम्, तस्याः कर्मशेषत्व-अभ्युपगमात्, तत्फलवचनस्य अतः एव अर्थवादत्वान्न तद्विरोधोऽपि इति भावः।) तत्र केवलेभ्यः एव कर्मभ्यः स्यात् (आ.गिरि - भूतं भव्याय उपदिश्यते इति न्यायेन **{**गोविन्दानन्द - सिद्धं साध्याय उपदिश्यते यथा होमाय दधि दध्ना जुहुयादिति इत्यर्थः**}** आत्मज्ञानस्यापि कर्मकर्तृसंस्कारतया **{**गोविन्दानन्द - कर्मकर्तुः संस्कारतया इति पाठः**}** कर्मविधिशेषत्वात् श्रुतस्यापि फलस्य **{**गोविन्दानन्द - स्वार्थशून्यत्वात्**}** अर्थवादमात्रत्वात् कर्मभ्यः एव परं श्रेयः इति पूर्वपक्षः।)। (उपनिषज्जन्यायाः विद्यायाः कर्मशेषत्वे हेतुमाह - समस्तेति) समस्त-वेदार्थज्ञानवतः कर्माधिकारात् (सू.भा ३.४.६)। (समस्तवेदार्थज्ञानवतः कर्माधिकारे मानमाह - वेदेति) "वेदः कृत्स्नः अधिगन्तव्यः सरहस्यो द्विजन्मना" (मनु २.१६५) इति स्मरणात् (सच्चिदानन्द - न केवलं छान्दोग्यादि ८.१५.१ श्रुतयः स्मृतयश्च एवं वदन्ति इति भावः)। (सच्चिदानन्द- ननु स्मृतौ

रहस्याधिगममात्रमुदितं नात्मज्ञानमपि इति शङ्कायामाह - अधिगमश्च इति)। (समस्तवेदार्थज्ञानवतः कर्माधिकारे अपि उपनिषदर्थज्ञानस्य कर्माङ्गत्वे किमायातम्। तत्राह - अधिगमश्च इति। सरहस्य इति विशेषणाद् उपनिषत्प्रयोजनभूतेन आत्मविज्ञानेन सहैव वेदार्थावगमो गुरुकुले संपादनीयः इति स्मृत्यर्थोऽवगम्यते तथा च कर्मकाण्डार्थज्ञानवद् वेदान्तार्थज्ञानस्यापि कर्माङ्गत्वम् आयाति इति भावः।) अधिगमश्च सहोपनिषदर्थेन आत्मज्ञानादिना। (आत्मविद्यायाः कर्माङ्गत्वे हेत्वन्तरमाह - विद्वानिति। सर्वत्र वेदे विद्वान् यजते विद्वान् याजयति इति समस्तवेदार्थज्ञानरूपविद्यावतः एव यतः अधिकारः प्रदर्श्यते ततः अपि आत्मज्ञानस्य कर्मशेषत्वम् इत्यर्थः) । **"**विद्वान् यजते**" "**विद्वान् याजयति**"** इति च विदुषः एव कर्मणि अधिकारः प्रदर्श्यते सर्वत्र (सच्चिदानन्द - कर्मप्रस्तावे तत्र तत्र एवं श्रूयते। तच्च गमकं कर्मणा सकलवेदार्थज्ञानम् अपेक्षितम् इत्यत्र। आत्मज्ञानमपि कर्तृसंस्कारकतया अपेक्ष्यते इति भावः)। (समस्तवेदार्थ-ज्ञानवतः कर्माधिकारे स्मृत्यन्तरमाह - ज्ञात्वेति) **"**ज्ञात्वा अनुष्ठानम्**"** इति च (ज्ञात्वा अनुष्ठानम् इति स्मृत्या च विदुषः एव कर्मणि अधिकारः प्रदर्श्यते इति योजना)। (एवम् औपनिषदात्मज्ञानस्य तत्फलवचनस्य च कर्मशेषत्वप्रदर्शनेन कृत्स्नस्य वेदस्य कर्मपरत्वम् उक्तम्। तत्र जैमिनि-शबरस्वामिसंमतिमाह - कृत्स्नश्च इति। तदुक्तं जैमिनिना - आम्नायस्य क्रियार्थत्वात् इति। शबरस्वामिना चोक्तम् - दृष्टो हि तस्यार्थः कर्मावबोधनम् इति। तस्य वेदस्यार्थः प्रयजनम्।) कृत्स्नश्च वेदः कर्मार्थः इति हि मन्यन्ते केचित्। (एवं कर्मणामेव मुक्तिहेतुत्वं प्रसाध्य विपक्षे दण्डमाह - कर्मभ्यश्चेति) कर्मभ्यः चेत् परं श्रेयः नाप्यते वेदः अनर्थकः (सच्चिदानन्द - व्यर्थः एव स्यात्। अर्थान्तराभावाद् वेदस्य इत्यर्थः) स्यात् (परमपुरुषार्थपर्यवसायी न स्यात् । न च इष्टापत्तिः. अध्ययनविधिविरोधप्रसङ्गात्। अध्ययनविधिना हि समस्तस्य वेदस्य अभ्युदयनिःश्रेयसफलवदर्थावबोधपरत्वम् आपादितम्। तस्मात् कर्ममात्रसाध्यो मोक्षः इति स्वीकर्त्तव्यमिति स्थितम्।)।

> Objection (first opponent): With reference to that, moksha must result from mere actions alone, because the one who is endowed with the knowledge of the meaning of the entire Vedas alone is fit for the performance of actions. This is supported by the smriti, " The entire Vedas together with their secrets must be studied by a twice born, viz., by a brahmin." And this must be along with the study of the meaning of the upanisahds which consists of self knowledge. The competence in actions is stated everywhere for a man of wisdom alone in such terms as "A man of wisdom performs ritual", "A man of wisdom officiates in ritual". And there is further text saying," After knowing there is performance". Some consider that the entire Veda is meant for doing karma. Then, Vedas would become redundant if the ultimate good, viz., moksha is not obtained from actions.

There, first by karma alone *paksha* is taken. Why karma alone is enough? Because it is said, one who has knowledge of entire Veda alone is eligible for karma. Entire Veda means Upanishad also included. The *smriti* here is supportive of *Svadhyaya vidhi*. They say, you should later learn the meaning also. Secret is *atma vastu*. It is *rahasyam* because it is not known though right now there. *Dvijanma* is birds and reptiles. One who is initiated into the study of Vedas. After study including *upanishads*, you should do *karmas*. (*purvapaksha* remember). Veda is meant for giving the knowledge of karmas. Sabara says so. Why do you include Upanishad here. *Samasta* should be minus *upanishad*. But for him, *moksha* if not by karma, then Veda is useless. If *kena* one page will give *moksha*, Veda is not *purushartha upakari*.

सिद्धान्त

(तत्र केवलकर्मजन्यः मोक्षः इति पक्षं निराकरोति - न इत्यादिना)। न नित्यत्वान्मोक्षस्य। नित्यो हि (मोक्षस्य नित्यत्वे न स पुनरावर्त्तते इति श्रुतिप्रसिद्धिद्योतनार्थो हि शब्दः) मोक्षः इष्यते। (कर्मकार्यस्यापि तस्य नित्यत्वं किं न स्याद् इत्याशङ्क्य आह - कर्मकार्यस्य इति) कर्मकार्यस्य चानित्यत्वं प्रसिद्धं लोके। (ततः किम्। तत्राह - कर्मभ्यश्चेति) कर्मभ्यः चेत् श्रेयः अनित्यं स्यात् (अनित्यमिति च्छेदः)। (अनित्यत्वे इष्टापत्तिं वारयति - तच्चेति। मुक्तस्यापि पुनः संसारप्रसङ्गादिति भावः) तच्च अनिष्टम्। "तद्यथा इह कर्मचितो लोकः क्षीयते" (छा.८.१.६) इति {यत्कृतकं तदनित्यमिति} न्यायानुगृहीत श्रुतिविरोधात्। (एतद्वाक्यं नास्ति वा। नान्वेति च पूर्ववाक्येन अञ्जसा। न हि श्रुतिविरोधात् अनिष्टत्वं साध्यते अनित्यत्वं वा इति। अथवा न च आरभ्योऽपि नित्यः स्यादिति शङ्कनीयम् इत्यर्थकं वाक्यमेतस्मात् प्राक् स्थितं त्रुटितं स्यादिति कल्पनीयम् ।)

No. For, moksha is not subject to time. It is desired by all that moksha is timeless. It is well known in the world that a result of action is not permanent (i.e., is in time). If moksha were to be accepted as resulting from actions, it would become impermanent. That is not desired as it is opposed to the Sruti statement ,"As the result of action becomes exhausted in this world, so too in the other world result acquired through virtue, gets exhausted."

Moksha is *nitya*. It should not be produced. What is produced cannot be *nitya*. I was *mukta* for three years you cannot say. After wards I was bound *iti*. Eternal is not hanging around for long time. It is timelessness. *Moksha* is identical with whatever is eternal. That is self. That *moksha* gianed by the self. If so, self is limited. It becomes free with the addition of what is produced. The addition will go in time. So It has to be identical with self. In the world it is very well known that a product is impermanent. Because it is born of action. It was not there before in this form. Now there. Again it will not be there because it came in time. I don't know this you cannot say. Where is your great grand father. You cannot say *moksha* let it be *anityam*. It is not desired. It is not acceptable to any one.

(पूर्ववादी प्राकारान्तरेण मोक्षस्य विद्यानैरपेक्ष्यं शङ्कते - काम्येति। मुमुक्षुणा जन्मप्रायणयोरन्तराले सर्वात्मना काम्यनिषिद्धयोरनारम्भान्न तस्य तन्निमित्ता भाविजन्मप्राप्तिः, पूर्वजन्मसु संचितस्य कर्माशयस्य सर्वस्यैव वर्त्तमान-देहारम्भकत्व-अभ्युपगमेन आरबधफलस्य तस्य कर्मणः उपभोगेन क्षयात् न तन्निमित्ता च भाविजन्मप्राप्तिः। नित्य-नैमित्तिकानां साकल्येन अनुष्ठानात् प्रत्यवाय-अनुत्पत्तौ प्रत्यवायनिमित्ता च न जन्मप्राप्तिः, न च अन्यद् जन्मनिमित्तम् अस्ति। तस्माद् विद्यानपेक्षो मोक्ष इत्यर्थः।) काम्यप्रतिषिद्धयोरनारम्भात्, आरब्धस्य च कर्मणः उपभोगेन क्षयात् नित्यानुष्ठानाच्च प्रत्यवायानुपपत्तेः ज्ञाननिरपेक्षः एव मोक्ष इति चेत्।

Objection: Suppose we say that moksha, without being dependent on knowledge, results from the non-performance of desire-prompted and prohibited actions and exhausting the actions by undergoing the experience of their results and performance of obligatory duties that would make it untenable for negative resells to arise.

No. You have not understood what I say. I don't really say it is produced. What is *moksha*? Not coming back. *na sa punaravritti*. After death business. All religions are like this. After death I will not come back. How? I have a plan. We have seen in the introduction. I don't do *kamya karmas* like *vayavya karma*. For wealth sake it is karma. Prohibited actions like *himsam na kuryat iti*. So I don't produce *karmaphalams* or papa in respect of both of them. They are the reason for taking another birth. *Prarabdha* karma I will exhaust by experiencing. I will not commit suicide. Because that will leave some residual *karmas*. What ever I have to do *karmas* daily or on occasions, Then no *pratyavaya*. Where is *jnanam* here? The only effort is in doing the *nityakarma*.

(निराकरोति - तच्च नेति। मुमुक्षोः वर्त्तमानदेहारम्भसमये कानिचिदेव कर्माणि वर्त्तमानदेहामारभन्ते न सर्वाणि स्वर्गनरकमनुष्यादिविरुद्धफलानां कर्मणाम् एकदेहारम्भकत्व-असम्भवात्। अतः शेषकर्मसम्भवात्तदपि मतं न सम्भवति इत्यर्थः) तच्च न। शेषकर्मसम्भवात् (ननु शेषकर्मसम्भवे अपि यथावर्णितचरितस्य मुमुक्षोः ज्ञाननिरपेक्ष एव जन्माभावलक्षणो मोक्षः सिध्यति इति मतं कुतो न सम्भवति। तत्राह - तन्निमित्तेति। शेषकर्मनिमित्तेत्यर्थः) तन्निमित्ता शरीरान्तरोत्पत्तिः प्राप्नोति इति प्रत्युक्तम् (आद्यवादे इति शेषः)। (ननु अस्तु शेषकर्मसम्भवः, तथापि तस्य नित्यानुष्ठानेन नाशसम्भवाद् न तन्निमित्ता शरीरोत्पत्तिः इति तन्न। नित्यानुष्ठानेन दुरितस्य क्षयसम्भवेपि न सुकृतस्य तेन क्षयः सम्भवति। नित्यानुष्ठान-संचितसुकृतयोः उभयोः अपि शुद्धिरूपत्वेन विरोधाभावात्। अतः संचितसुकृतनिमित्ता शरीरोत्पत्तिः अपरिहार्या इति मत्वा आह - कर्मशेषस्य इति) कर्मशेषस्य च नित्यानुष्ठानेन अविरोधात् क्षयानुपपत्तिः इति च (इति च आद्यवादे नित्यानुष्ठानस्य सुकृतक्षयहेतुत्वं प्रत्युक्तम् इत्यर्थः। अतो ज्ञानं विना सञ्चितकर्मक्षय-असम्भवात् ज्ञानापेक्षः एव मोक्षः, न तन्निरपेक्षः इति भावः)।

Answer: It is not so. For, this was refuted by us earlier by saying that there is the possibility of residual actions and consequently there arises the taking up another body on account of those karmas and the untenability of exhausting the residual karmas through the performance of obligatory duties as they are not opposed to the latter.

It is not possible. There will be some *sesha* karma in your model. The *jiva* survives death. It attracts *punya* and papa in human life (where freewill is there). How many lives you had before. Endless. Even if you get one human life after one million times of other *yonis*, still it will be infinite because cycles are infinite. So lot of *punya* and papa in account. They are various. One type of papa requires one body. So you cannot exhaust all those *karmas* in one body. Particular time and place and particular culture - all these are special. Only certain types of *karmas* can be fulfilled. *Sesha* is there. Darwin's evolution has nothing to do with *jiva*, it pertains only to body. *Sesha* karma also infinite. By doing *nitya* karma, I will neutralise the *sesha karmas* - this is not possible. You are changing your stand if you say they produce result. Even accepting that, it won't neutralise *punya*. So *punya* will be there. More over said that *karmya* cannot be avoided. *Pratishiddha* also one will do. So the plan goes fut.

(उपनिषदर्थज्ञानस्यापि कर्मशेषत्वात् कर्मसाध्य एव मोक्ष इत्युक्तमनूद्य निराकरोति - यच्चेति) यच्चोक्तं समस्त-वेदार्थज्ञानवतः कर्माधिकारादित्यादि (आ.गिरि - यद्यपि अध्ययनविधिप्रयुक्त्या कृत्स्नः वेदार्थः एकेन विचारितव्यः तथापि अध्ययनविधौ प्रतिवाक्याध्ययनं प्रतिवाक्यार्थविचारं च व्यापारभेदात् तत्प्रयुक्त्या अभ्युदयकामस्य कर्मोपयोगिवाक्यार्थज्ञानवत्वमात्रेण कर्मणि अधिकारसम्भवाद् ब्रह्मसाक्षात्कारस्य तत्र अनुपयोगित्वात् न समस्तवेदार्थज्ञानवतः कर्माधिकारे प्रमाणमस्ति इत्याह - तच्च नेति) तच्च न। श्रुतज्ञान-व्यतिरेकाद् उपासनस्य[२२५] (गुरुकुले वेदान्तजनितं ज्ञानं श्रुतज्ञानम्। तस्य कर्मशेषत्वेऽपि तदरिक्त-उपासनस्य मोक्षसाधनस्य सत्त्वाद् न कर्मसाध्यः मोक्षः इत्यर्थः)। (ननु वेदः कृत्स्नः अधिगन्तव्यः इति वचनाद्यथा श्रुतज्ञानं कर्माधिकारि-

[२२५] अनेन उपनिषदर्थः अपि समावर्त्तनात्पूर्वं श्रोतव्यः स्वाध्यायविधेः अर्थावबोधपर्यन्तत्वात् उपनिषदामपि स्वाध्याय-अन्तःपातात् । ततश्च गृहस्थानां वेदान्तविचारे अधिकारः अत्र भाष्यकारैः एव स्पष्टम् अभिहितः । मननदिध्यासनयोस्तु सन्यासिनामेव अधिकारः इति च । इदं मीमांसकम्मतेनोक्तम् ? वस्तुतस्तु स्वाध्यायविधेः अक्षरग्रहणान्तत्वमेव अर्थविचारस्तु क्रतुविधिप्रयुक्तः । तत्र च शमादिषट्कान्तर्गत-उपरतेः संन्यासरूपत्वात् सन्यासिनामेव वेदान्तश्रवणे अधिकारः इति उक्तं भवति। अस्मिन् पक्षे गृहस्थानां वेदान्तविचारे अधिकारः कथमिति चेत् आचार्यैः विधुराधिकरणे विधुराणां "प्रतिषेधाभावमात्रेणापि अर्थिनम् अधिकरोति श्रवणादिषु" इति उक्तत्वात् सर्वेषां गृहिणां तत्राधिकारः सम्भवति । (शास्त्रि)

विशेषणतया कर्मशेषस्तथा मननाद्यात्मकमपि तच्छेषोऽस्त्विति शङ्कां वारयति - श्रुतेति।) श्रुतज्ञानमात्रेण हि कर्मणि अधिक्रियते (आ.गिरि - श्रुताद् गुरुकुले विचारिताद् वाक्यात् कर्मानुष्ठान-उपयोगि यज्ज्ञानं तावन्मात्रेण कर्मणि अधिक्रियते न ब्रह्मसाक्षात्कारफलम् उपासनम् अपेक्षते व्यतिरेक-आभावादित्यर्थः[२२६]) (मात्रपदव्यवच्छेद्यमाह - नोपासनेति। मानाभावादिति शेषः) नोपासनमपेक्षते। (ननु श्रुतज्ञानादर्थान्तरभूतम् उपासनं वेदान्तेषु मोक्षफलकत्वेन न क्वापि विधीयते अतो नोपासनसाध्यः मोक्षः इति वदन्तं प्रति आह - उपासनं चेति। मन्तव्यो निदिध्यासितव्यः इति उपासनविधानानन्तरम् उपसंहारे एतावदरे खलु अमृतत्वम् इति श्रवणाद् अमृतत्वसाधनतया तत्रोपासनविधिः प्रतीयते इति भावः) (आ.गिरि - अध्ययनविधिव्यापार-उपरमे अनुष्ठेयं तथाभूतं ब्रह्मोपासनमेव नास्ति इति न वक्तव्यम् इत्याह - उपासनं चेति। एतच्च कर्ममीमांसान्याय-अङ्गीकारमात्रेण[२२७] उक्तम्। वस्तुतस्तु श्रोतव्यविधिप्रयुक्तः एव उपनिषद्विचार-आरम्भः भिन्नाधिकारः। कर्मकाण्डविचारोऽपि उत्तरविधिप्रयुक्तः[२२८] एव इति प्रकटार्थे[२२९] प्रतिष्ठितम्।) उपासनं च श्रुतज्ञानादर्थान्तरं विधीयते मोक्ष-फलम्। (ननु मननादिरूपम् उपासनमपि श्रुतज्ञानान्न अतिरिच्यते ब्रह्मप्रत्ययत्वाविशेषादिति। नेत्याह - अर्थान्तरेति। मननिदिध्यासनयोः ब्रह्मप्रत्ययत्वेऽपि श्रुतज्ञानादर्थान्तरत्वं प्रसिद्धमेव भवति तयोर्विजातीयत्वात् पृथग्विधानाच्च इत्यर्थः।) अर्थान्तरप्रसिद्धिश्च स्यात्। (एतदेव विवृणोति - श्रोतव्येति) "श्रोतव्यः" इत्युक्त्वा तद्व्यतिरेकेण "मन्तव्यो निदिध्यासितव्यः" (बृ.उप २.४.५) इति यत्नान्तरविधानात् (सच्चिदानन्द - यदा उपासनमेव श्रुतज्ञानादर्थान्तरम् किमु वक्तव्यं तत्फलं दर्शनं नापेक्षितं कर्माधिकारे इति इति भावः) मनन-निदिध्यासनयोः च (चकारः अवधारणार्थः सन् प्रसिद्धपदेन संबध्यते।) प्रसिद्धं श्रवण-ज्ञानादर्थान्तरत्वम्। (वस्तुतस्तु श्रुत-ज्ञानस्यापि नास्ति कर्मशेषत्वे मानम्। न च अध्ययनविधि-बलात्कुरुकुले सपादितसमस्तवेदार्थज्ञानमध्यपातिनः तस्यापि कर्मज्ञानवत्कर्माङ्गत्वं प्रतीयत इत्युक्तमिति वाच्यम्। अध्ययनविधेः अक्षरावाप्तिमात्रफलकत्वेन अर्थावबोधपर्यन्तत्व-असिद्धेः। न च तथा सति विचार-विध्यभावात् पूर्वोत्तर-मीमांसयोः अप्रवृत्तिप्रसङ्गः इति वाच्यम्। अर्थज्ञानं विना अनुष्ठान-असंभवेन तत्तत्क्रतुविधिभिरेव पूर्वमीमांसा-प्रवृत्त्युपपत्तेः। उत्तरमीमांसाप्रवृत्तेः श्रोतव्यविधिप्रयुक्तत्वस्य ब्रह्मजिज्ञासासूत्रे स्फुटत्वात्। विद्वान् यजते इति वचनस्य कर्मकाण्ड-गतस्य प्रकृततत्तत्कर्मविद्वत्तामात्रपरतवेन आत्मविद्वत्तापरत्व-अभावात्। आत्मज्ञानस्य कर्मानुष्ठान-प्रतिकूलतायाः वक्ष्यमाणत्वेन तच्छेषत्वानुपपत्तेः च। आम्नायस्य क्रियार्थत्वात् इत्यादिवृद्धवचनजातस्य कर्मविचार-प्रकरणगतत्वेन कर्मकाण्डमात्रविषयतायाः समन्वयसूत्रे स्पष्टत्वाच्च। तस्मात् श्रुतज्ञानमपि न कर्मशेषः। अत एव आत्मज्ञानफलश्रवणम् अर्थवाद इति शङ्कापि निरालम्बना इति बोध्यम्।) (सच्चिदानन्द - एतच्च आत्मवाक्यश्रवणं कर्माधिकार-अङ्गम् इति अभ्युपगम्य उक्तम्। वस्तुतस्तु आत्मज्ञानार्थं विहितस्य श्रवणस्यैव कर्माधिकार-कारणत्वं न युक्तम् तत्र अनुपयोगात्।)

As to what has been said that there is competence of performing the actions only for the one who has the knowledge of the meaning of the entire Vedas, that is also not right (which implies that moksha is the result of action). for, meditation (which is another factor) is different from what is known through hearing. One becomes qualified to perform actions by the mere gaining of knowledge on hearing the meaning of the Vedas without any dependence on meditation. Meditation is something enjoined apart from the knowledge of the meaning of the Vedas gained through hearing. And this meditation has moksha as its result and is well known as different form mere Vedic study. Moreover, after having said, "The self has to be seen", the Sruti enjoins something different form this that ," it has to be thought of and contemplated upon.".

---

[२२६] उपासना-अभावे विचार-अभावरूप-व्यतिरेक-अभावात्। (शास्त्रि)

[२२७] कर्ममीमांसकानामेव एतन्मतम्। यत्कृत्स्नवेदविचारः स्वाध्यायविधिप्रयुक्तः एव इति तदङ्गीकारमात्रेण इत्यर्थ-। (गोविन्दानन्द)

[२२८] स्वाध्यायविधिकल्प्यः धर्मविचारविधिरेव तत्र उत्तरविधिरिति भावः ।

[२२९] प्रकटार्थः शारीरकभाष्यव्याख्यानभेदः । (गोव्दानन्द)

And this reflection and contemplation are well known to be different form the knowledge acquired through hearing.

What has been said about *vidvan* has *adhikara* in karma, it is said: *sruta jnanam* may be there by listening to *sastra*. You have knowledge of recipe. Afterwards you have to do it. Here also, in addition to *sutajnanam*, *upasanam* also there. But that is not necessary for performing *karmas*. No mentation is there in doing *nityakarmas*. But *nididhyasana vidhi* is mentioned. So *krtsnavedajanam* does not cover *atmajanam*. You are not required to do *mananm* and *nididhyasana* before doing *karmas*. Another *vidhi* is *nididhyasana vidhi*. It is a thing to be understood. *Upanishad jnanam* is general knowledge. A pandit also will chant *Taittiriyopanishad*. That general knowledge is not enough for *atmajnanam*. So in your contention, there should not have been any *vidhi* after gaining entire knowledge of Veda and you do *karmas*. But something is enjoined later having *moksha* as result. If *karma* alone is means, *Sruti* will not enjoin *manana* etc. *Manana* is removing doubts. What for *mananam*? It is to understand Brahman. That is what I say.

द्वितीय-पूर्वपक्ष

विद्यासव्यपेक्ष-कर्मभ्यः अपि न मोक्षः

(इत्थं केवलकर्मभ्यः परं श्रेयः इति पक्षं निरस्य कर्मप्रधानं विद्या च उपसर्जनम् इति समुच्चयपक्षम् उत्थापयति - एवं तर्हि इति)। एवं तर्हि विद्यासव्यपेक्षेभ्यः कर्मभ्यः स्यान्मोक्षः (ननु नित्यस्य मोक्षस्य कर्मारभ्यत्वं न संभवति, कार्यस्य अनित्यत्वनियमादिति उक्ते कथं तस्य विद्यासहितकर्मकार्यत्व-शङ्का। तत्राह - विद्यासहितानां च इति। च-शब्दः शङ्कानिरासार्थः। विद्यालक्षणसहकारिमहिम्ना नित्यस्यापि आरम्भः संभवति इति भावः) विद्यासहितानां च कर्मणां भवेत् कार्यान्तर-आरम्भसामर्थ्यम् (कार्यान्तरेति नित्यकार्येत्यर्थः)। (सहकारिसामर्थ्यात् कार्यवैचित्र्यमात्रे दृष्टान्तमाह - यथेति। यथा स्वतो मरणरूपकार्यारन्भसामर्थ्यवतः अपि विषस्य मन्त्रयुक्तस्य पुष्टिरूपकार्यान्तर-आरम्भसामर्थ्यम्, यथा वा दध्नः समयविशेषे ज्वररूपकार्यारन्भसामर्थ्यवतः अपि तदा गुडशर्करादिसंयुक्तस्य तस्य तृप्तिमात्र-आरम्भसामर्थ्यम्,, यथा वा वेत्रबीजस्य दावदग्धस्य कदल्यारम्भसामर्थ्यम् एवं प्रकृते अपि इत्यर्थः।) यथा स्वतो मरणज्वरादि-कार्यारम्भ-समर्थानामपि विषदध्यादीनां मन्त्रशर्करादि-संयुक्तानां कार्यान्तर-आरम्भसामर्थ्यम् (सच्चिदानन्द - अन्यत्रापि आनीतः अयं दृष्टान्तः । सू.भा ४.१.१६, बृ.भा ३.३. अव)। एवं विद्यासहितैः कर्मभिः मोक्षः आरभ्यते इति चेत्।

If that is so, then freedom will result from actions aided by knowledge. Actions as associated with knowledge has the ability to bring about a different kind of result. Just as, though poison, curd etc. by themselves are capable of causing such results as death, fever etc. can bring about different kinds of results when mixed with sacred chants, sugar etc., similarly, freedom is brought about by actions in association with knowledge.

If this is so, that is *mananam* and *nididhyasanam* being there for removing the doubts and errors, *vidya* is involved. *Atmajnanam* is there. Ok. Then, *moksha* be out of karma as primary factor with *vidya* as secondary factor. *Mananam* implies *vidya* which is an aid only. Pure karma cannot produce. Ok. *Vidya's* contribution is the reason for this. Combination has the capacity like green betel leaves, while lime and brown supari. In cooking also we see. Another type of result is *moksha*. *Visham* means potassium cyanide. Curd being cold, may cause fever at some periods. Mantra chanting will change the effect of poison. In Punjab you always get luzzi added with sugar. The result of combination is not death etc. But different.

The love for doing is so much because by nature he is extrovert. *Parang pasyati*. By nature we are committed to doing something and he wants sanction of Sruti for the same. We don't understand here that what is involved here is infinite. The logic applicable to achieve a finite result is not applicable in infinite. one plus one is two. But one plus infinite is infinite. Action gives a small result. A lot of actions means lot of results, but never infinite. It is a different turf. Because what is at stake is infinite.

समाधानम्

न। (अस्तु सहकारिवैचित्र्यात् कार्यवैचित्र्यम्। तावता आरभ्यस्यापि मोक्षस्य अनित्यत्वप्सङ्गदोषे किमागतमिति दूषयति - नारभ्यस्य इति। यत्कृतकं तदनित्यम् इति न्यायविरोधान्नित्यस्य आरम्भो न संभवति इत्यर्थः) आरभ्यस्य अनित्यत्वादिति उक्तो दोषः।

No. For, it has already been said that what ever is started is not permanent.

The argument is same. I was free for sometime you have to say. I had total freedom for few days. It can only be coma. Started means *anitya*. Whatever is born in time will end in time because time itself has an end as evidenced by absence of time in sleep etc. It was already pointed out.

आक्षेपः

(न स पुनरावर्त्तते छा. ८.१५.१ इति वचनाद् आरभ्यस्यापि मोक्षस्य नित्यत्वम् अविरुद्धम् इति शङ्कते - वचनादिति) वचनाद् आरभ्यः अपि नित्यः एवेति चेत्।

Suppose, on the strength of the Sruti statement (that he does not return Ch.8.15.1), moksha that is started also is permanent.

I don't bother about it. Sruti tells. So if I do *vidya sahita karma*, I will get a place from which there is no return. There is a rule. *na atibharah no buddheh. (nah asmakam buddheh) sastram cet tat param bahvet*. *Sastram tat paraam* (any *phala param*) *cet,* then *na atibharah asti asmakam buddheh*. Don't question. Sastra says you will go to heavens. It is *nitya*. It is not in our range of thinking. So *vacanat* it is eternal though *karmakarya*. Sruti knows better. It is after death *moksha*. We cannot think about it. Sruti alone can say. So believe. in it. *Arabhyah* is important.

समाधानम्

(वचनस्य अनधिगत-योग्यार्थ-ज्ञापकत्वेन पदार्थयोग्यता-अनाधायकत्वाद् न वचनबलाद् आरभ्यस्य नित्यत्वं सिध्यति इति दूषयति - न इति।)। न। ज्ञापकत्वाद् वचनस्य (आ.गिरि - न स पुनरावर्त्तते इति वचनाद् आरभ्यः अपि मोक्षः नित्यः इति न शक्यं वक्तुम्। प्रसिद्धपदार्थयोग्यत्वम् उपादाय वचनस्य संसर्गज्ञापकत्वात् । न च आरभ्यस्य नित्यत्वे योग्यत्वं प्रसिद्धम्। अन्यथा (योग्यता-उत्पातकत्वे। अप्रसिद्धयोगयताकल्पकत्वे वा इति कै.टिप्पण्यत्र) वचनस्य कारकत्वप्रसङ्गात्। अन्धो मणिम् अविन्दत् - तै. आरण्यक १.११.११ - इत्यादिष्वपि योग्यताकल्पनप्रसङ्गात् (यथाश्रुतार्थ-उपपत्तये इत्यादिः इति कै.टिप्पणम् अत्र) इत्याह - न ज्ञापकत्वात् इति) (सच्चिदानन्द - वचनं ज्ञापकमेव न कारकमिति - प्र. ६.२, बृ.भा २.१.२०, ३.९ उपसंहार, ४.३.२३)। (संग्रहवाक्यं विवृणोति - वचनं नाम इति) वचनं नाम यथाभूतस्य अर्थस्य ज्ञापकम् (ननु वचनमेव आरभ्यस्य मोक्षस्य नित्यत्वं प्रति योग्यताम् अविद्यमानामपि आधाय पश्चाद् नित्यत्वं तस्य ज्ञापयति इति। न इत्याह - न अविद्यमानस्य इति) न अविद्यमानस्य कर्तृ। (कुतः इत्यतः आह - न हि इति) न हि वचनशतेनापि नित्यम् (आत्मस्वरूपम् इति शेषः) आरभ्यते (हि यस्माद् वचनशतेनापि नित्यस्य आरम्भो लोके न दृश्यते तस्मान्न अविद्यमानस्य कर्त्री इति योजना। अन्यथा "अन्धो

मणिमविन्दत्" इत्यादौ अपि वचनबलादेव योग्यताप्रसङ्गः इति भावः)। आरब्धं वा (घटादि इति शेषः) अविनाशि भवेत्। (सच्चिदानन्द - न हि अयुक्तमपि ज्ञापयेत् वचनम्। अप्रामाण्यप्रसङ्गात्। अतः अनावृत्तिवचनम् अन्यतैव नेयम्।)

No. For, a Vedic sentence is only revealing in nature. A Vedic passage is that which reveals as it is of something that is existing and not that which creates something which doe not exist. Anything that is eternal cannot be begun even by hundreds of texts. What is begun cannot be indestructible.

The *sruti* words only makes you recognise a fact. Sruti cannot make a *karmaphala* into *nitya*. *Na sa punaravritti* is for one who has knowledge. Even if the *sruti* says, we cannot accept it. What is *vacana*? It enables you to recognise an object as it is. It can only reveal an object. It cannot even make you do things. If words make you do, then every one should be doing *agnihotra*. But not so Why? He does not like to do. *Vidhi* is there. *Ling lot tavyam* are commands. *yaja, yajeta, yajya,* etc. These suffixes are used. It only reveals that it is something desirable for you to do. If you don't do, you will incur *anishtaphalam* by your doing wrong things. So Veda is not cause for creating a *vastu* that is not there. *na hi agama satamapi ghatam patayitum isate*. It cannot say something which is against what is known through the known means of knowledge. Does it not contradict my perception of duality. No Sruti does not say there is no duality. Perception of object does not establish duality. You see an object in dream and it does not mean duality. It is a conclusion. Therefore, perception is not contradicted by *sastra*. It says something more. Something basic. It is not gained by your means of knowledge. If anybody were to say, it is begun and eternal, it is contradiction. What was, is and will ever be is eternal. Timelessness alone is eternity. *Vacanam* must be *yogyam*. You can make a clean sentence. An elephant entered into my right ears. It is a clean sentence. I did not commit any mistake. Just because it is clean sentence, it cannot be accepted. It has no *yogyata*. Sruti also should say things that are tenable. So there is no eternal heaven. Eternal heaven should be that which is right now available. Two things here. A eternal cannot begun nor what is begun cannot be free from loss.

तृतीयपूर्वपक्षनिरासः

विद्याकर्मणोः समप्राधान्येन समुच्चितयोरपि न मोक्षहेतुता

(सम-समुच्चय-पक्षमपि अतिदेशेन निराकरोति - एतेन इति) एतेन (अनित्यत्वप्रसङ्गेन इत्यर्थः) विद्याकर्मणोः संहतयोः मोक्षारम्भकत्वं प्रत्युक्तम्।

By this, the view that actions and knowledge in combination have the result of producing moksha is also negated.

By one stroke all combination *pakshas* are answered.

आक्षेपः

(प्रतीचः ब्रह्मत्वरूपमोक्षस्य नित्यत्वेन समुच्चय-अजन्यत्वेऽपि तदवरक-अविद्यानिवृत्तिहेतुत्वमेव समुच्चयस्य अस्तु इति शङ्कते - विद्याकर्मणी इति।) विद्याकर्मणी मोक्षप्रतिबन्धहेतुनिवर्त्तके इति चेत् (सच्चिदानन्द - तथा च नानित्यत्वं मोक्षस्य प्रसज्जति इति भावः) (**आ.गिरि** - मोक्षस्य प्रतिबन्धे हेतुः अविद्या-अधर्मादिः तन्निवर्त्तके विद्याकर्मणी न स्वरूप-उत्पादके। ततः स्वरूपावस्थानस्य नित्यत्वम्। **{**गोविन्दानन्द - ननु एवमपि प्रतिबन्धनिवृत्तेरेव जन्यत्वेन

अनित्यत्वात् पुनः प्रतिबन्धे बन्धसम्भवादेव अनित्यत्वं तदवस्थमेव मोक्षस्य प्रसज्येत इत्याशङ्क्याह - प्रध्वंसस्य इति} प्रध्वंसस्य च कृतकस्यापि नित्यत्वं सिद्धम् इत्यर्थः। भिद्यते हृदयग्रन्थिः इत्यादिश्रुतेः)।

Suppose, knowledge and action are the remover of the cause of obstacles to moksha.

We don't say karma produces *moksha*. *Moksha* exists. It is of the very nature of one who gets *moksha*. Then alone it can be eternal. Otherwise it being gained by him will be non-eternal. Then if I don't see that fact, there is an obstruction. That obstruction is removed by karma and knowledge. Whatever be that obstruction, whether *avidya* or papas.

समाधानम्

(आ.गिरि - केवलविद्यासाध्यैव अविद्यानिवृत्तिः[२३०]। न तत्र विद्यायाः सहकार्यपेक्षा। कर्मफलं तु अन्यदेव प्रसिद्धम् इत्याह - न कर्मणः इति) (आवरणरूपप्रतिबन्धहेतोः अविद्यायाः निवृत्तौ विद्यामात्रस्य एव अपेक्षितत्वेन कर्मणः अनपेक्षितत्वाद् न समुच्चयाधीना मुक्तिरिति मत्वा आह - नेति।) न। (कर्मणाम् अविद्यानिवृत्त्यपेक्षया फलान्तरस्यैव प्रसिद्धत्वाच्च न प्रतिबन्धहेतुनिवृत्तौ कर्मापेक्षा इत्याह - कर्मणः इति) कर्मणः फलान्तरदर्शनात्। (तदेव विवृणोति - उत्पत्तीति) उत्पत्तिसंस्कारविकाराप्तयो[२३१] (उत्पत्तिः पुरोडाशादेः, संस्कारः व्रीह्यादेः, विकारः सोमस्य-अभिषवलक्षणः, आप्तिः पयसः, {आ.गिरि - आप्तिः, वेदस्य} इत्येवं कर्मणः फलं प्रसिद्धम् इत्यर्थः) हि फलं कर्मणो दृश्यते। (ननु यदि अविद्यानिवृत्तौ न कर्मापेक्षा कर्मफलं च उत्पत्त्यादिकमेव तर्हि ब्रह्मस्वरूपमोक्षस्य एव उत्पत्त्यादि-अन्यतमत्वम् अस्तु। न इत्याह - उत्पत्त्यादिफलविपरीतश्च इति। ब्रह्मस्वरूपस्य तु मोक्षस्य अनादित्वाद् अनाधेय-अतिशयत्वाद् अविकार्यत्वाद् नित्याप्तत्वाच्च कर्मफलवैपरीत्यम्। एतेषां हेतूनां श्रुतिसिद्धत्वाच्च न असिद्धिशङ्का कार्या इति भावः) उत्पत्त्यादिफलविपरीतश्च मोक्षः (सच्चिदानन्द - नित्यसिद्धत्वात्, मोक्षोत्पत्त्यादिप्रतिपादकप्रमाण-अभावाच्च इति भावः।)।

No. For, it is seen that actions give rise to different kind of results. It is indeed seen that production, purification, modification and acquisition are the results of action. Moksha is something opposed to results such as production etc.

Karma has its own result. It is unopposed to *pratibandha*. It does not have the status of being the cause of eliminating the *pratibandha*. What removes *avidya* is *vidya* alone. There are only four types of results. *Purodasa* you have to produce by action. Not produce but cleanse like washing the dishes. There is some *atisaya*. Polishing your shoes. It is another result through karma. You make curds from milk or butter from curds or lumps all over the body through the fat. Another action does this result. Yet another result of action is reaching. You don't produce Haridwar or cleanse Haridwar nor modify Haridwar when you reach there.. Similarly Heaven. You do some karma and gain *punya* for reaching Heaven. All right. Let *moksha* also be one of them. *Atma* is already there. You have to clean the *atma*. When your mind is clean, *Atma* will show itself. When the mind is unclean, where is *atma*? It is covered by dirt of negative thoughts. *Atma* is subject to become affected by what happens in your head. So *moksha* cannot be one of these results.

Moksha is identical to *atma*. The word *moksha* is used only with reference to the bondage. What is already there cannot be created. Even *Bhagavan* cannot give a head over your shoulder. Why? One already has. Inside he can give. He will say I will try. So it is not *utpadya*. *Atma* is *nityasuddha*. It is not sullied by anything. We are not modifying it. It has

---

[२३०] एतेन अविद्या एव मोक्षप्रतिबन्धिका न तु अधर्मादिः तस्य विद्योदयमात्र प्रतिबन्धकत्वात् इति ध्वन्यते इति अवधेयम्। (गोविन्दानन्द)

[२३१] उत्पत्त्यादिचतुष्टयमेव कर्मकार्यमिति न्यायः भाष्यान्तरे अपि आनीतः (सू.भा १.१.४ बृ.भा ३.३ अव) (सच्चिदानन्द)

no form. Nor you can reach it. It is you. No fifth type of karmaphala. So karma is not required.

आक्षेपः

(प्रत्यगात्मतया नित्यप्राप्तस्यापि ब्रह्मणो गतिश्रुतिमवलम्ब्य प्राप्यत्वम् आशङ्कते - गतीति) गतिश्रुतेः आप्यः इति चेत् (आ.गिरि - अर्चिरादिगतिश्रवणाद् ब्रह्माण्डाद् बहिः स्थितब्रह्मप्राप्तिः मोक्षः ततो नित्याप्तत्वम् असिद्धम् इत्यर्थः)। (सच्चिदानन्द - संग्रहशङ्काग्रन्थस्य विवरणं क्रियते - सूर्येति) (विवृण्वन् गतिश्रुतीः उदाहरति - सूर्येति) "सूर्यद्वारेण ते विरजाः (विरजाः निष्कल्मषाः ब्रह्मविदः इत्यर्थः) प्रयान्ति" (मु.उप १.२.११) "तयोर्ध्वमायन् (सुषुम्नाख्यया नाड्या इत्यर्थः) अमृतत्वमेति" (क.उप २.३.१६ छा.उप ८.६.६) इत्येवमादि-गतिश्रुतिभ्यः (आदिपदात् तेऽर्चिषमभिसम्भवन्ति इत्यादिश्रुतयो गृह्यन्ते।) प्राप्यो मोक्षः इति चेत्।

> Moksha is something attainable in as much as Vedas say of path (to reach). From the Vedic statements that talk of path such as "They who are free from papas proceed through the path of sun", "Rising up through sushumna nadi, they reach the realms of immortality", moksha is something to be acquired.

Why not it be *apya* based on *sruti vakya*? It is called *gatisruti.* After death you reach a place. *Kramamukti* you get in *Brahmaloka*. No, there too only by knowledge alone. *Moksha* is not created here. It is *siddhavishaya* but away from me. So it is *apya*. Those who due to *punya visesha* go there through *suklagati.* The *jiva* ejecting itself out of the body through that *nadi* gains *moksha*. Eternal heaven is this *apekshika amrtatvam*. (If he comes back).

समाधानम्

(आ.गिरि - गत्वा प्राप्तिः किं संयोगलक्षणा तादात्म्यलक्षणा वा नोभयथा अपि इत्याह - न सर्वगतेति) (गतिश्रुतीनाम् अन्यविषयत्वम् अभिप्रेत्य परब्रह्मणो गतिप्राप्यत्वं निराकरोति - न सर्वगतत्वात् इति। लोके गन्तुः सकाशादन्यस्य परिच्छिन्नस्य च प्राप्यता प्रसिद्धा। ब्रह्मणस्तु तदुभय-अभावाद् न प्राप्या इत्यर्थः।)। न। सर्वगतत्वात् गन्तृभिश्च अनन्यत्वात्। (सर्वगतत्वं साधयति - आकाशादीति) आकाशादि-कारणत्वात् (सच्चिदानन्द - संग्रहवाक्यं विवृणोति आकाशादिकारणत्वात् इत्यादिना इत्येवमादिश्रुतिस्मृतिशतेभ्यः इत्यन्तेन। कालाकाशयोरपि कारणत्वात् तद्ब्रह्म न कालादिना व्यवहितमिति भावः। सू.भा १.१.४, ४.३.१४) सर्वगतं ब्रह्म। (ब्रह्मणो गन्तृभिर्जीवैरभिन्नत्वं विवृणोति - ब्रह्मेति) ब्रह्म-अव्यतिरिक्ताश्च (चकारोऽवधारणार्थः) सर्वे विज्ञानात्मनः। तेन (सर्वगतत्वादिना इत्यर्थः) नाप्यो मोक्षः। (ननु यदि सर्वगतं गन्तुरनन्यच्च न प्राप्यम्, तर्हि कीदृशं गन्तव्यम्। तत्राह - गन्तुरिति) (सच्चिदानन्द - प्राप्यत्वे हेतुद्वयम् उपन्यस्तम् सर्वगतत्वम् अनन्यत्वं च। तत्र सर्वगतत्वम् उपपाद्य अनन्यत्वम् उपपादयितुम् आरभते - गन्तुः इत्यादिना। चैत्रादन्यः विभिन्नदेशःच ग्रामः, ब्रह्म तु विज्ञानात्मनः नान्यत्। विभिन्नदेशं वा। सू.भा ४.३.१४। एकदेशस्थयोर् न परस्परप्राप्यत्वं यथा द्रव्यगुणयोः) गन्तुः अन्यद् विभिन्नदेशं च भवति गन्तव्यम्। (अनन्यस्य गन्तव्यत्व-अभावम् अनुभवेन साधयति - न हि इति) न हि येनैव अव्यतिरिक्तं यत् तत्तेन गम्यते। (गन्तृभिरनन्यत्वं साधयति - तदिति। तस्य ब्रह्मणो गन्तृभिरनन्यत्वं च श्रुत्यादिभ्यः सिध्यति इत्यर्थः) (सच्चिदानन्द - अनन्यत्वसिद्धिरेव कथम् इत्यत आह - तदनन्यत्वप्रसिद्धिश्च इति) तदनन्यत्वप्रसिद्धिश्च "तत्सृष्ट्वा तदेवानुप्राविशत्" (तै २.६.१) "क्षेत्रज्ञं {यः इदं शरीरं आपादतलमस्तकं ज्ञानेन विषयीकरोति तम्} चापि मां {परमेश्वरम्} विद्धि" (भ.गी १३.०२) इत्येवमादि-श्रुति-स्मृतिशतेभ्यः (ब्रह्मण एव जीवभावेन प्रवेशश्रवणात् क्षेत्रज्ञस्य जीवस्य ब्रह्मत्वश्रवणाच्च इत्यर्थः। अहं ब्रह्म इत्यादिश्रुतयः, आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति इत्यादिस्मृतयश्च आदिपदग्राह्याः विवक्षिताः)।

It is not so because moksha (which is identical with Brahman) is all pervasive and non-separate from the one who travels. Brahman is all pervasive because it is the (material) cause of everything beginning from space. All jivas are non-separate from Brahman. Hence moksha is not a reachable result.. A place to be reached is different from the traveller and is towards a place away from him. It is not that a place that is non-separate from one is reached by that person indeed. The fact that the jivas are non-separate from Brahman is well known from hundreds of srutis and smritis such as "Having crated it, he entered into it", "Know the jiva to be myself".

What is all pervasive? *Moksha* is not all pervasive. *Moksha* is the *svarupa* of *atma*. At the same time, from different standpoints we say it is freedom, *suddha*, all pervasive etc. Because we have opposite ideas. Since I look upon as *asuddha*. It is not that we go and see and find it suddha. It is all *negations* of whatever we take it to be. It is also non-separate from the goer. When he goes, it is *moksha* going to find out *moksha*. He explains it.

How it is all pervasive? It is such all pervasive that space is pervaded by *atma* but space does not pervade *atma*. Being the cause for *akasa* and time, it is all pervasive. *Karya* is non separate from cause. Without changing, it has become everything. So it is all pervasive. *Apnoti iti atma*. Still, why not I go and get it as they talk of place of *moksha*. They say *kaismoksha*, It is *apekshika*. He won't come back and disturb us. That is the *moksha*. The idea is all papas get destroyed and he goes to *svarga*. *yatra kutra kritam papam*+ The talk of place is only relative. *Sarvagatatvam* is not *apekshikam* but real because the *jivas* are not separate from Brahman. Consciousness being Brahman. For these two reasons, *moksha* is not to be reached.

If there is a place to be reached, it should be other than the goer. Also separate. Like rose is different but I can touch without moving, It is not like that. You take me to myself., you cannot say. This is the rule. *yena* by which place or which object he is non-different, that is not reached. I am talking of *moksha*, you are telling of Brahman. No Brahman and *mosha* are same. The whole thing is in the form of knowledge. For identify of *atma* and Brahman, the evidence is given.

Now we hear of *isvarya sruti*. Those glories can be there for him only if he becomes *Isvara*. Otherwise he cannot have all of them. So you should accept *gati*. He is pushing the same point from an indirect way. *Isvarya sruti* how will you explain.

आक्षेप

(गतिश्रुतीनां गतिं पृच्छति - गत्यैश्वर्यादि इति। यथा ब्रह्मविदो गतिः श्रूयते, तथा तस्य ऐश्वर्यमपि श्रूयते, ब्रह्मणो नित्यप्राप्तत्वाद् यथा तस्य प्राप्यता न संभवति, तथा परब्रह्मविदो मुक्तस्य निरुपाधिकत्वाद् ऐश्वर्यमपि न संभवति। ततश्च तुल्यन्यायतवाद् ऐश्वर्यश्रुतीनामपि गतिप्रश्न इति मन्तव्यम्।) गत्यैश्वर्यादिश्रुतिविरोध इति चेत्। (प्रश्नं प्रपञ्चयति - अथापि इति) (सच्चिदानन्द - गत्यैश्वर्यादि इति संग्रहवाक्यं विवृणोति अथापि इत्यादिना चेत् इत्यन्तेन) अथापि स्यात् यद्यप्राप्यः मोक्षः, गतिश्रुतीनाम् (गतिश्रुतयः पूर्वमुदाहृताः इत्याशयेन ऐश्वर्यश्रुतीः उदाहरति - स एकधा इति) "स एकधा" (छा.उप ७.२६.२) (स एकधा भवति त्रिधा भवति इत्यादिश्रुतिः मुक्तस्य अनेकशरीरयोगं दर्शयति। स यदि पितृलोककामो भवति इत्यादिश्रुतिस्तु मुक्तस्य संकल्पमात्रसमुत्थान् पित्रादिभोगान् दर्शयति। तथा स्त्रीभिर्वा इत्यादिश्रुतिरपि तस्य ऐश्वर्यमावेदयति इत्यर्थः)। "स यदि पितृलोककामः" (छा.उप ८.२.१) "स्त्रीभिर्वा यानैर्वा" (छा.उप ८.१२.३) इत्यादिश्रुतीनां च कोपः स्यात् इति चेत्।

This conclusion is opposed to the Vedic texts that talk about the path (of the departed jiva) and the glories (they gain) etc. To explain it, if moksha is not something attainable,

it will contradict the Vedic text talking about travel (of a jiva after death) as well as such texts (that talk about glories) as “He assumes a single form”, “If he desires to enjoy the world of manes,) the manes get united with him)”, “(Remaining established in his own nature he rejoices) with women or chariots”

You should read those *srutis*. *Isvrasya idam isvare praptam*. The glories of *Isvara* that a *jiva* enjoys - what will happen to them, if *mosha* is not *prapya*. For whom are they mentioned? He goes to *lokas* and enjoys *aisvarya iti* it is said. In *Brahmaloka*, by mere sankalpa he can enjoy whatever he wants. I want to know what is *pitruloka anubhava*, he has got it. yana is ferari. *stri* is celestial ladies. *kopa* is you will be hurting those *srutis*.

समाधानम्

(कार्यं बादरिः इत्यधिकरणन्यायेन तासां श्रुतीनां गतिमाह - न कार्येति)। न। (ननु सगुणब्रह्म-उपासकस्य सत्यलोकस्थकार्यब्रह्मप्राप्तिविषयाः ताः श्रुतयः, न निर्गुणब्रह्मविदः परब्रह्मप्राप्तिविषयाः इत्यत्र कं विनिगमकम् इत्याशङ्क्य आह - कार्ये हि इति। कार्ये हिरण्यगर्भाख्ये ब्रह्मणि प्राप्ते सति तल्लोके स्त्र्यादयः विषयाः सन्ति, न कारणत्व-उपलक्षिते निर्गुणविद्याप्राप्ये विशुद्धे ब्रह्मणि विषयाः सन्ति १) विद्यया अविद्यातत्कार्यजातस्य सर्वस्य निवृत्तत्वात्। २) निर्गुणमुक्तस्य निरुपाधिकत्वेन भोक्तृत्व-अयोगाच्च इत्यर्थः)। कार्यब्रह्मविषयत्वात् तासाम्। कार्ये हि (कार्यब्रह्मलोके स्त्र्यादिविषयाः सन्ति इत्यत्र स यदि स्त्रीलोककामो भवति संकल्पादेव अस्य स्त्रियः समुत्तिष्ठन्ति इत्यादिश्रुतिप्रसिद्धिद्योतनार्थो हि शब्दः।) ब्रह्मणि स्त्र्यादयः स्युः। न कारणे[२३२]। (परममुक्तौ भोगाभावे मानमाह - एकमेवेति। सजातीय-विजातीय-स्वगतभेदरहितं ब्रह्म इत्यर्थः) “एकमेवाद्वितीयम्” (छा.उप ६.२.१), “यत्र नान्यत् पश्यति” (छा. ७.२४.१) (अन्यः अन्यत् पश्यति इत्येवमात्मकं प्रसिद्धं द्वैतं यत्र वस्तुतो नास्ति स भूमा इत्यर्थः) “तत्केन कं पश्येत्” (बृ.उप २.४.१४, ४.५.१५) (तत्तदा विदेहकैवल्यसमये केन करणेन कं विषयं पश्येदित्यर्थः) (सच्चिदानन्द - नास्त्येव कारणत्वोपलक्षितम् अद्वितीयं ब्रह्म इत्याशङ्क्य शुद्धब्रह्मणि प्रमाणमाह - इत्यादिश्रुतिभ्यः इति) इत्यादिश्रुतिभ्यः। (एतेन निर्गुणविद्या-प्रकरणगतानां स एकधा भवति, स्त्रीभिर्वा यानैर्वा इत्यादि-ऐश्वर्यश्रुतीनां सगुण-मुक्त-विषयत्वकल्पनम् अयुक्तमिति शङ्कापि निरस्ता, परममुक्तौ भोग-असम्भवस्य तत्केन कम् इत्यादिश्रुतिसिद्धत्वाद्, मात्रासंसर्गस्त्वस्य भवति इत्यादि-श्रुत्या मुक्तस्य सर्व-उपाधि-अभाव-प्रतिपादनेन विषयभोग-असंभवाच्च। तथा चैश्वर्यश्रुतीनां प्रकरणे निवेशासंभवात् कार्य-ब्रह्मप्राप्तानाम् ऐश्वर्यसम्भवाच्च सामर्थ्यानुसारेण प्रकरणमुल्लङ्घ्य सगुणविद्याशेषत्व-कल्पनद्वारा सगुण-मुक्त-विषयत्वकल्पनम् युक्तमेवेति।)

No. For, these Vedic texts have bearing on Brahman with attributes. (The association of) women etc. can be there only in Brahman with attributes, not in attributeless Brahman, the cause, in keeping with such Vedic texts as “One only without a second”, “Where one does not see anything different”, “Who can see that and with can he see?”

No. Because of *sagunabrahma upasana*, he goes there. The *vishaya* of those *srutis* is *sagunabrahma*. The *aisvarya* that you will enjoy is not *moksha*. They belong to *karyabrahma*. We are talking of *karanabrahma*. We are talking more than that. The *karana* is one with out any differences or divisions. There are srutis for this. “In which state, one does not see something as another”. There is negation of bhogya in previous. In the next

[२३२] एकमेव ब्रह्म कारणं कार्यं चेति द्वेधा स्थितम् उपाधिकत्वात् । कार्यं ब्रह्म, अपरं ब्रह्म, सगुणं ब्रह्म, सविशेषं ब्रह्म - इति पर्यायाः । हिरण्यगर्भस्य एतानि नामानि । एतदेव उपास्यं ब्रह्म सूत्रभाष्ये अर्चिरादिमार्गेण गन्तव्यमिति वर्णितम् । कारणं ब्रह्म, परं ब्रह्म, निर्गुणं ब्रह्म, निर्विशेषं ब्रह्म इत्येतानि मुख्यब्रह्मणो नामानि । तच्च अस्थूलादि-निषेधशब्दैः उपदिश्यते श्रुतिभिः । तत्र च कारणत्वं सापेक्षम् न तु स्वरूपगतम् । यद्यपि प्रजापतिवाक्ये कारणमेव ब्रह्म निर्दिष्टं स्वेन रूपेण अभिनिष्पद्यते (८.१२.३) इति तथापि स्त्रीभिर् वा इत्यादयः सगुणब्रह्मोपासकैः अनुभूयमानाः ब्राह्मलौकिकाः कामाः सर्वात्मभूतेन ज्ञानिना संबध्यन्ते इति आत्मज्ञानस्तुतये तत्र निर्दिष्टाः इति व्याख्येयम् । अन्यथा एकमेवाद्वितीयम् इत्यादितत्परश्रुतिकोपः स्यादिति भावः ।

bhokta negation. If you have got all aisvaryas in those places and you enjoy them there, who goes to all these places. Jiva. So he should be chota. He should be chotivala. Then only he can go. Again there, he has to get up when Brahmaji comes.

ज्ञानकर्मसमुच्चय एव अनुपपन्नः

(इदानीं समुच्चय-असंभवे हेत्वन्तरमाह - विरोधाच्च इति) विरोधाच्च विद्याकर्मणोः समुच्चयानुपपत्तिः। (विरोधमेव प्पञ्चयति - प्रविलीनेति। कर्त्रादिकारकलक्षणाः विशेषाः प्रविलीनाः यस्मिन् ब्रह्मणि तत्तथा निर्विशेषमिति यावत्। तादृशब्रह्मविषया विद्या यथोक्तब्रह्मविपरीतेन कर्त्रादिकारकजातेन साध्यं यत्कर्म तेन विरुध्यते। हि प्रसिद्धमेतद् इत्यर्थः।) प्रविलीनकर्त्रादि-कारकविशेष-तत्वविषया (गोविन्दानन्द - प्रविलीनेति, बाधितेति यावत्) हि विद्या तद्विपरीत-कारकसाध्येन (गोविन्दानन्द - तच्छब्दः प्रविलीनपरामर्शी। तथा च अबाधित-कारक-साध्येन इत्यर्थः) कर्मणा विरुध्यते। (ननु ब्रह्मणो निर्विशेषत्वे सिद्धे तद्विषयविद्यया कर्त्रादिद्वैतबाध-अवश्यंभावात् कर्मानुष्ठानं न संभवति इति विद्याकर्मणोर्विरोधः स्यात्। न तु तत्सिद्धम् इत्याशङ्क्य तस्य निर्विशेषत्वं साधयति - न ह्येकम् इत्यादिना। ब्रह्मणो जगदुपादानत्वश्रुत्यनुरोधेन कर्त्रादिसकलद्वैतास्पदत्वं प्रतीयते। नेति नेति इत्यादिनिषेधश्रुतिभिस्तस्य सर्वविशेषशून्यत्वं च प्रतीयते। न चैकं वस्तु परमार्थत उभयवत्तया प्रमाणतो निश्चेतुं शक्यते इत्यर्थः। तत्र विरोधादिति युक्तिसूचनार्थो हि-शब्दः।) न ह्येकं वस्तु परमार्थतः कर्तृत्वादिविशेषवत् तच्छून्यं चेति उभयथा द्रष्टुं शक्यते। (ततः किम्। तत्राह - अवश्यमिति। लोके पुरोवर्त्तिनि प्रतीतयोः रजतत्वशुक्तित्वयोः विरुद्धयोः अन्यतरस्य मिथ्यात्वदर्शनात् इति हि-शब्दार्थः।) अवश्यं हि अन्यतरन्मिथ्या स्यात् (सच्चिदानन्द - वस्तुनि क्रियासु इव एवं, न एवम् इति विकल्पानुपपत्तेः। सू.भा १.१.२)। (ननु अन्यतरस्य मिथ्यात्व-अवश्यंभावेऽपि ब्रह्मणो निर्विशेषत्वमेव मिथ्यास्तु। तत्राह - अन्यतरस्य इति। स्वाभाविकम् अनादि यदज्ञानं तद्विषयस्य तद्विषयब्रह्मकार्यस्य द्वैतस्य स्वकारण-अज्ञानसहितस्य यन्मिथ्यात्वं तद्युक्तम् इत्यर्थः।) अन्यतरस्य च मिथ्यात्वप्रसङ्गे युक्तं यत्स्वाभाविक-अज्ञानविषयस्य (कार्यस्य) द्वैतस्य मिथ्यात्वम् (सच्चिदानन्द - अज्ञानं हि सर्वस्यापि अविचारितसिद्धम् स्वाभाविकम्। ज्ञानेन तु आगन्तुकेन तन्निबर्हणीयम्। स्वाभाविक-अज्ञानविषयत्वाद् द्वैतस्य मिथ्यात्वं युक्तम्। अत एव उदाहरिष्यमाणाः श्रुतयः युक्त्युपबृंहिताः तदपवदन्ति इति भावः)। (द्वैतमिथ्यात्वे मानमाह - यत्रेति) "यत्र हि द्वैतमिव भवति" (बृ.उप २.०४.१४) (यत्र अविद्याकाले द्वैतशब्दितं जगल्लब्धात्मकं भवति तदा इतरः इतरं पश्यति इति श्रुत्यर्थः। श्रुतौ इवकारः मिथ्यात्ववाची, न सादृश्यवाची, उपमेय-अनुपलम्भाद् इति भावः।), "मृत्योः स मृत्युमाप्नोति" (का. उप २.१.११) (य इह ब्रह्मणि नानाभूतं वस्तुतः कल्पितं जगत् परमार्थं पश्यति, स मृत्योः मरणान्मृत्युं मरणमेव प्राप्नोति इति द्वैतसत्यत्वदर्शिनः अनर्थपरम्पराप्राप्ति-अभिधानादपि तस्य मिथ्यात्वमेव युक्तम् इत्यर्थः), "अथ यत्र अन्यत् पश्यति तदल्पम्" (छा.उप ७.२४.०१) (अथ भूमलक्षणोक्त्यनन्तरं तद्विपरीतस्य अल्पस्य लक्षणमुच्यते भूमलक्षणदार्ढ्याय - यत्र जगति अन्यदन्यः पश्यति तदल्पम्। अतो यत्र दर्शनादिद्वैत-अभावस्तस्य भूमरूपता युक्ता इत्यर्थः। द्वैतस्य अल्पत्वात् स्वप्नद्वैतवन्मिथ्यात्वम् इति भावः।), "अन्योऽसावन्योऽहमस्मि इति न स वेद" (बृ.उप १.४.१०) (यः परमेस्वरम् अन्यः असौ अन्यः अहमस्मि इति चिन्तयति स न परमात्मनस्तत्वं वेद इति श्रुत्या जीवस्य परमात्म-अभेदविरोधि-संसारलक्षणद्वैतस्य मिथ्यात्वम् अवगम्यते इति भावः), "उदरमन्तरं कुरुते अथ तस्य भयं भवति" (तै.२.०७) (यस्तु स्वस्य ईश्वराद् अल्पमपि भेदं पश्यति तस्य तदानीमेव भयं भवति इति श्रुत्या जीवेश्वरभेद-उपलक्षितस्य जगतो मिथ्यात्वं भाति इति भावः), इत्यादिश्रुतिशतेभ्यः ("सर्वं तं परादाद् योऽन्यत्र आत्मनः सर्वं वेद" {बृ.उप ४.५.७ - परादा to oust, to slight} इत्यादिश्रुतिसंग्रहार्थम् आदिपदम्।) (सच्चिदानन्द - सत्यत्वे हि द्वैतस्य नैवं द्वैतदृष्टिः विनिन्द्येत श्रुतिभिः इति भावः)। सत्यत्वं च एकत्वस्य (सच्चिदानन्द - युक्तम्

इत्यनुषज्यते निर्दोषेण वेदेन सावधारणं प्रतिपादितत्वाद् युक्तम् एकत्वस्य नित्यत्वम् इत्यर्थः) (एकत्वशब्दितस्य निर्विशेषब्रह्मणः सत्यत्वं च युक्तमित्यत्र हेतुत्वेन श्रुतीः उदाहरति - एकधैवेति।) "एकधैवानुद्रष्टव्यम्" (बृ.उप ४.४.२०) (एकरूपेण एव ब्रह्म आचार्योपदेशम् अनु साक्षात्कर्त्तव्यम् इत्यर्थः। अत्र एकरूपत्वं निर्विशेषचैतन्यरूपत्वं, प्रज्ञानघन एव इति वाक्यशेषदर्शनादिति भावः), "एकमेवाद्वितीयम्" (छा.उप ६.२.०१), "ब्रह्मैवेदं सर्वम्"[२३३] (ब्रह्मैवेदं सर्वम् इति सामानाधिकरण्यं ब्रह्मव्यतिरेकेण सर्वं वस्तुतो नास्ति। ततश्च ब्रह्म निर्विशेषम् इत्येतद् अभिप्रायकम्। एतद् अभिप्रायकत्वं च अस्य सामानाधिकरण्यस्य भाष्यकारैः द्युभ्वाद्यधिकरणे प्रपञ्चितम् । नेह विस्तरभयात्तल्लिख्यते।) "आत्मैवेदं सर्वम्" (छा.उप ७.२५.२) इत्यादिश्रुतिशतेभ्यः (सर्वमित्यादि-इति-आदिपदेन सत्यं ज्ञानम् अनन्तं ब्रह्म, तत्सत्यमित्याचक्षते, तत्सत्यं स आत्मा, इत्यादिश्रुतयो गृह्यन्ते)। (ननु उक्तरीत्या सर्वस्य दृश्यजातस्य चिदेकरसे ब्रह्मणि अध्यस्ततया सर्वाधिष्ठानभूत-ब्रह्मतत्वविद्यया सर्वस्य द्वैदस्य बाधितत्वाद् वस्तुतो जगद्भेद-अदर्शनेऽपि विदुषः कर्मानुष्ठानं कुतो न संभवति, यतो विद्याकर्मणोर्विरोधो भवेद् इत्याशङ्क्याह - न च इति।) न च संप्रदानादि-कारकभेद-अदर्शने (सच्चिदानन्द - अहमिदं करोमि एतां देवताम् उद्दिश्य एतस्मै फलाय इति हि अनुसंधाय कर्म क्रियते तत्र संप्रदानादिकारकं देवतादि।) (संप्रदानं कर्मणि उद्देश्या देवता। कर्तृकरणादिसंग्रहार्थम् आदिपदम् । स्वप्नवज्जगति मायामात्रत्वनिश्चये सति न प्रवृत्तिः उपपद्यते इति भावः।) कर्म उपपद्यते। (रज्जुतत्वसाक्षात्कारेण रज्जावध्यस्तसर्पस्य इव ब्रह्मतत्वसाक्षात्कारेण ब्रह्मण्यध्यस्तद्वैतस्य उपमर्दे युक्तिसिद्धे श्रुतयोऽपि सन्ति इत्याह - अन्यत्वेति।) अन्यत्वदर्शनापवादश्च (अधिष्ठानयाथात्म्यज्ञानस्य अध्यासनिवर्त्तकत्व-नियमदर्शनरूप-युक्तिसमुच्चयार्थः चकारः। विद्याविषये ब्रह्मणि विद्यासामर्थ्याद् द्वैददर्शनबाधः तत्केन कं पश्येत् इत्यादिश्रुतिषु उपलभ्यते इत्यर्थः। तदुक्तं सूत्रकारेण उपमर्दं च इति । विद्यया कर्मसाधनकारकजातस्य उपमर्दं वाजसनेयिनः आमनन्ति इति सूत्रार्थः।)। विद्याविषये सहस्रः श्रूयते। अतः (कर्मसाधनानां विद्ययोपमर्दितत्वाद् इत्यर्थः।) विरोधो विद्याकर्मणोः। अतश्च (विरोधाच्च इत्यर्थः) (सच्चिदानन्द - अत्र समुच्चयार्थ-असंभवात् च-शब्दस्य एवार्थता स्वीकरणीया। विरोधादेव समुच्चयानुपपत्तौ दूरापास्ता ततो मोक्षसंकथा इति उत्तरवाक्येन संगतिश्च एवं स्यात्।) समुच्चयानुपपत्तिः। (समुच्चयानुपपत्तौ फलितमाह - अत्रेति) अत्र (सच्चिदानन्द - सत्यां चैवं समुच्चय-अनुपपत्तौ) यदुक्तं संहताभ्यां विद्याकर्मभ्यां मोक्षः इति अनुपपन्नं तत्। (मोक्ष इत्यनुपपन्नम् इत्यनन्तरं तदयुक्तम् इत्यपि क्वचित् पाठः दृश्यते। तदानीम् इत्थं योजना - संहताभ्यां विद्याकर्मभ्यां मोक्ष इति कृत्वा केवलविद्यायाः मोक्षहेतुत्वम् अनुपपन्नम् इति यदुक्तं तदयुक्तम् इति)।

The combination of karma and knowledge is not tenable for the reason that they are opposed to each other.. For, knowledge relates to a subject in which there is total resolution of all accessories of action beginning from the agent of action which is opposed to karma that has to be accomplished with those accessories that are opposed to knowledge. It is not possible to see a same thing as endowed in reality with such distinctions as agent etc. as well as free of them. Either of the two has got to be unreal. When there is a context for one of the two to be unreal, it is proper that the duality that is the product of ignorance that exists naturally has got to be unreal. This is due to hundreds of passages of Sruti and Smriti such as "Because when there is duality as it were, (one smells something else, one sees something else)", "He goes from death to death (who sees It as many)", " And that, in which one perceives a second is insignificant.", "While (he does not know) who worships another god thinking He is another and I am another", "For, whenever he makes even the slightest difference, then

[233] This श्रुति is quoted in गीता-भाष्य (13.15) and सूत्रभाष्य (1.4.22). It appears in मुण्डकोपनिषद् with विश्वम् in place of सर्वम् (ब्रह्मैवेदं विश्वम् - मुण्डकोपनिषद् 2.2.11). नृसिंहोत्तर-तापनीय उपनिषद् contains this वाक्य. But not a वाक्य was quoted from this upanishad in the प्रस्थानत्रयभाष्य. (Satcidananda)

> there occurs fear for him." And the oneness is the reality based on the Vedic texts such as, "It has to be known in one form alone", "One without a second", "All this is Brahman alone". "All this is Atma alone". Nor is karma possible in the absence of perception of differences characterised by dative accessory etc. Besides the negation of perception of another thing is heard thousands of times in the context of knowledge. Hence, there is opposition between karma and knowledge and therefore also there is no tenability of combination (of them). This is being so, the statement that moksha results from the combination of karma and knowledge is not proper.

Now, knowledge and action there is opposition. Same single *jiva* cannot have *vidya* and do karma also. You can pursue *vidya* and do karma as yoga. That is okay. You cannot have *vidya* and do karma also. For what you have to do? Karma has its own results. Not only that. There is opposition. You cannot combine light and darkness little bit. In the wake of one the other is not.

What is *vidya*? There is a big adjective for small word. Where the *karaks* are resolved totally - *karakas* such as subject, object etc. No *kriya* without *karaka*. He has freedom to do karma. But when he does karma, then he has all *karaka apeksha* is there. *kena, kasmai*, *kutra* etc. Goes means who goes? *Rama* etc. The knowledge of Brahman is one in which all these peculiar *karakas* are resolved in which. That *tattvam* in which they are resolved is *vishaya* for which knowledge is *brahmavidya*. It stands opposed to karma because karma is achieved only with *karakas*. *Karaka-sadhyam karma. Vidya karakavilina vastu vishayam.*

Let both live together. These are age of coexistence. Sruti says Brahman is cause. It means all *karakas* are involved. *Nishedha srutis* are also there. It is like shop. Whatever you want you take. Why not. There are people like that. Same *vastu*, in reality is possessed of all *karakas* including the doership and at the same time free of them *iti* one cannot see. But we see both in *sruti*. So one must be wrong. One is right. Let *nirguna* become *mithya*. No *savisesham* alone can be *mithya*. If *savisesha* is *satya*, it cannot become *nirvisesha* later. *Savisesha* if true then it becomes real and cannot change. So what ever is taken to be something without enquiry alone is *mithya*. It is uncreated. You find yourself with it. *Dvaita* is duality between *jive-isvara-jagat*. *Dvaitam* is already known to you. *Nishedha* will be only what is *prasakta*. It is not there for you anyway. So there is no need to negate it. Dvaitin has *samsara*. *Vastu* happens to be nondual and so it is presented by negation of dual. All *bheda* has basis in *satyavastu*.

Quotations: Duality is not real because it is as though (*iva*). The result of duality is given as death to death. (*Jagat* is not duality. It starts with you. You take yourself as separate form the world. That is duality. He does not see another as real. *Aram* means *alpam ut* means *api*. *antaram* means *bheda*. Even a fraction of difference seeing so, one meets with fear. I become limited in time and place. Fear of death is natural. It is difficult for people to accept absence of *bheda*. I am only a spark of Brahman.

Now *srutis* are quoted to show *ekatvam* is real. *Dha* is *prakaravaci*. But here in one *rupa*. Because it is seen *nanatvena*. *Badhayam samanadhikaranyam. Idam* is all this *karakabheda*. That is how we see. What is seen by eyes or heard by ears etc. or told by *sastra* as *indra* etc. All these are *dvaitam*. What is perceived by you, inferred by you, imagined by you etc.. known and unknown is *dvaitam*. That *idam* is predicated to Brahman or equated to Brahman. I don't see. Yes when matter is energy *iti* told, you don't see energy.

Whereas matter is seen. One is tangible and the other is not tangible. You learn physics and you will know. Then when you say oh that oh is called enlightenment. Here *idam* has to be seen as *mithya* and Brahman is *satyam*. It is like the person you see is nothing but post. It is not like a *gauna* vakya. You are not accusing him as pillar. He stands like post and does not do anything. Tree will give some shade and fruits. He is not even like that. Like a *musala* he stands. Here is *pramana vakya*. There are robbers on the way you were told. So you see in stump a robber. This *purusha* is post means *purusha* goes away and you see the post. They are not adjectives in the *samanadhikaranyam* like blue pot. Here it is *samanadhikaranya* in a different way. By negation they are in apposition. One is resolved in the other. What is left out is only one after *samanadhihkaranayam*. It goes away in your understanding. Brahman is all this what is for me? Nothing is accomplished by me. No *Atma* is all this. So Brahman is *Atma*.

For what reason you say karma is not possible since even after knowing the *adhishthanam* he can still do. Without seeing any purpose he cannot do any karma. Nor without seeing a deity to whom oblation is to be offered, he cannot do ritual. *Vidvan* can do karma with *badhitavirtti*. That is different matter. Karma does not produce any *atisaya* to *moksha*.. If I am already *purna*, what for is karma. You bring beaten rice and jaggery. I will bring husk. We will mix them and then do phu phu and eat nice. His contribution is that. All forms of duality have been negated with reference to knowledge. So *virodha* is there. So combination is not possible. *Vidya* and karma we cannot tie them together. It is like Gulam Kader and *gokulashtami*. What is the connection between the two.

Points for *virodha* : 1) *Vidya* is *karaka-rahita Brahmavastu vishaya* and *Karma* is *karaka sadhya*. 2) *Vidya* is *avidyavirodhi* and *karma* is *avidyakarya*.. Points for choosing *dvaitamithyavam*: 1) If *karakavisesha vastu* is *satyam moksha* is not possible 2) *Praitshedha* is of *prasaktasya* 3) *Dvaita* is *svabhavapraptam* without *vicara*.

कर्मविधिश्रुतीनां विरोधः इति आक्षेपः

(आ.गिरि - यदि कर्त्रादिकारकभेदस्य सत्यत्व-अंशम् अपबाध्य ब्रह्मज्ञानम् उपदिश्यते तदा मिथ्यार्थत्वात् कर्मविधीनाम् अप्रामाण्यं स्यादित्याह - विहितत्वाद् इति।) (द्वैतस्य मिथ्यात्वे कर्मश्रुतीनां अप्रामाण्यं स्यादिति शङ्कते - विहितत्वाद् इति।) विहितत्वात् कर्मणां श्रुतिविरोधः इति चेत् । (शङ्कां विवृणोति - यदि इति) यदि उपमृद्य (उपमर्दः मिथ्यात्वबोधनम्) (मृद क्षोदे क्र्यादि प.प. to crush/remove) कर्त्रादिकारकविशेषम् आत्मैकत्व-विज्ञानं विधीयते (उपदिश्यते) सर्पादिभ्रान्तिविज्ञान-उपमर्दक-रज्ज्वादिविषयविज्ञानवत् (सर्पादि इति। रज्जौ सर्पः अयमिति भ्रान्तं प्रति मिथ्यैव सर्पः न वस्तुतः सर्पः अस्ति रज्जुरेव एषा इत्यापतेन यथा रज्जुतत्वविषयकं विज्ञानम् उपदिश्यते तथा इत्यर्थः। शुक्यादिसंग्रहार्थं द्वितीयमादिपदम्। प्रथमं तु रजतादिसंग्रहार्थमिति विभागः।) तर्हि प्राप्तः कर्मविधिश्रुतीनां निर्विषयत्वाद् (सत्यविषयरहितत्वाद् इत्यर्थः। कल्पितद्वैतस्य रज्जुसर्पादेरिव कार्य-अक्षमत्वाद् इत्यर्थः।) (सच्चिदानन्द - सति हि कर्त्रादिकारके कर्मविधेर्विषयः संभवति। तदसत्वे तु कर्मवाक्यस्य अप्रामाण्यमेव स्यात्। किञ्च यथा कारकाभावे कर्मकाण्डमप्रामाण्यं भजते, तथा विद्योपदेशश्रुतिरपि। न हि बन्धमोक्षजिज्ञासाजिज्ञास्यादिभेदम् अनभ्युपगम्य तत्प्रवृत्तिर्भवेत् इति पूर्वपक्षिहृदयम्। सू.भा २.१.२०)। विरोधः। (विहितत्वादिति हेतुरपि प्रतिपन्नः इत्याह - विहितानि च इति।) विहितानि च कर्माणि। (कर्मश्रुतिविरोधापादने इष्टापत्तिं वारयति - स च इति। तथा च द्वैत-सापेक्ष-कर्मश्रुतीनाम् अद्वैतब्रह्मबोधकविद्याश्रुतीनां च परस्परविरोधाद् अप्रामाण्यप्रसङ्गः इति भावः।) स च विरोधो न युक्तः। प्रमाणत्वात् श्रुतीनाम् इति चेत्।

On such a conclusion, there would be contradiction of Vedas, since karmas have been enjoined. To explain, if the knowledge of oneness of self is unfolded by resolving all the differences of accessories of action beginning with agent of action, - like even the knowledge of rope etc. that remove the erroneous knowledge of snake etc. - then a contradiction results as the Vedic texts enjoining actions become devoid of scope. Whereas, actions are also enjoined by the Sruti. That contradiction (mentioned above) is not proper, as the Vedas are a valid means of knowledge.

If duality is *mithya*, all *karakas* become *mithya*. *Dvaitam* is *karakas*. Knower, known etc. are *karakas* only. Even for intransitive verbs *karta* is required. If *karakas* are *mithya*. karma is not possible. You have to see Veda as *pramana*. It talks of karma. If karma is not tenable, it becomes a *pramana*. I am asked to do something which is not true. You cannot say half the *sruti* is *pramanam* and the other is not *pramanam*. Half the egg is for hamlet and the other is for hatching. *Prasavaya* and *pacanaya*. That is not possible. There is no half-way home. He will say, I will take *karmakanda* as *pramana* and you have the other half. So there is *apramanya prasakti* now, if I accept what you say. In fact the whole *sruti* becomes invalid. The sage says go and pick up silver and I do and it happens to be shell. He seriously tells. Here it is okay. being a human being. But not with *sruti*. Sruti cannot commit mistake like this. It cannot enjoin actions and then say it is *mithya*.

Vidhiyate means not enjoined. But unfolded. We cannot say knowledge is not taught. A subject matter is taught. How it is unfolded. By resolving. By pointing out the *mithyatvam* of *karakas*. If *sruti* unfolds knowledge like this - like erroneous snake knowledge is removed by rope knowledge - then this contradiction has occurred. What is it? Sruti talks about a lot without any subject matter. You bring a piece of man's horn, rub it on this stone and put on the knee and your knee pain will go away. All *karakas* are there. But one thing is not there. So karma cannot take place. Similarly here, all karma *srutis* will become redundant. When all *karakas* are *mithya*, *sruti* which has nothing else to convey other than karma becomes invalid. *Virodha* is enjoining and calling it *mithya*. *Karmas* enjoined.. So self--contradiction. Sruti being a *pramana*, it cannot contradict.

निरस्तकारकब्रह्मोपदेशे न श्रुतिविरोधः

(आ.गिरि - अध्ययनविधिगृहीतानां श्रुतीनां पुरुषार्थ-उपदर्शकत्वेन प्रामाण्यं वक्तव्यम्। न तु भेदस्य सत्यत्वेन । ततः प्रसिद्धिसिद्धं कारकादिभेदम् अर्थक्रियासमर्थम् आदाय प्रवृत्तानां प्रामाण्यं न विरुध्यते इइत्याह - न पुरुषार्थेति) (विद्याकर्मश्रुतीनां परस्परम् अविरोधेन पुरुषार्थ-उपदेशमात्रे प्रवृत्तत्वात् न अप्रामाण्यप्रसङ्गः इति समाधत्ते - नेत्यादिना।) न। पुरुषार्थ-(उपाय)-उपदेशपरत्वात् श्रुतीनाम्। (सच्चिदानन्द - विद्या हि पुरुषार्थ-उपायः न तु पुरुषार्थः) (तत्र प्रथमं विद्याश्रुतीनां कर्मश्रुत्यविरुद्ध-पुरुषार्थ-उपदेशे प्रवृत्तिं दर्शयति - विद्येति। विद्या-उपदेशपरा तावत् श्रुतिः विद्याप्रकाशकत्वेन प्रवृत्ता इति संबन्धः।) (श्रुतौ विद्यानिरूपणस्य प्रयोजनमाह - संसारहेतोः इति। संसारहेत्वविद्यानिवर्त्तिकां विद्यां प्रकाशयन्त्याः श्रुतेः आशयं दर्शयति - संसारादिति। यथा च मुमुक्षोः मोक्षसाधनविद्यालक्षण-पुरुषार्थ-उपदेशाय प्रवृत्ता विद्याश्रुतिः अतो न वद्याश्रुतेः कर्मश्रुत्या विरोधः इत्यर्थः) विद्योपदेशपरा तावत् श्रुतिः संसारात् पुरुषः मोक्षयितव्यः इति संसारहेतोः अविद्यायाः विद्यया निवृत्तिः कर्त्तव्या इति (अत्र इति-पदानन्तरं कृत्वा इति शेषः) विद्याप्रकाशकत्वेन प्रवृत्ता इति न विरोधः। (इदानीं विद्याश्रुत्यविरुद्ध-पुरुषार्थ-उपदेशपरत्वं कर्मश्रुतीनां आशङ्कापूर्वकं दर्शयति - एवमपि इत्यादिना।) (सच्चिदानन्द - पूर्वपक्षी कारकसद्भावपरं कर्मकाण्डं मन्वानः शङ्कते) एवमपि (एवमपि इत्यस्य विद्याश्रुतेः कर्मश्रुत्या विरोधाभावेऽपि इत्यर्थः) कर्त्रादिकारक-सद्भाव-प्रतिपादनपरं शास्त्रं विरुध्यते एव (द्वैत-सत्यत्व-अपहारिण्याः विद्याश्रुत्याः तत्सत्यत्वपरा कर्मश्रुतिः विरुध्यते एव इति शङ्कार्थः) इति चेत्। (श्रेयः-साधनरूप-पुरुषार्थ-उपदेशपरायाः कर्मश्रुतेः कारकादिद्वैत-अस्तित्वेऽपि तात्पर्य-अभावाद् न विरोधः इति परिहरति - न

यथाप्राप्तमेव इति।) न। यथाप्राप्तमेव (भ्रान्तिप्राप्तमेव इत्यर्थः) (सच्चिदानन्द - लोकतः प्रसिद्धमेव) कारक-अस्तित्वम् उपादाय उपात्तदुरितक्षयार्थं (सच्चिदानन्द - न तु केवलम् अकरणे प्रत्यवायपरिहारार्थम्) कर्माणि विदधत् शास्त्रं मुमुक्षूणां फलार्थिनां च (मुमुक्षूणां दुरितक्षयार्थं कर्माणि विदधत्, फलार्थिनां फलसाधनं कर्माणि विदधत् इति योजना) (फलेति । स्वर्गपश्वादिफलार्थिनां फलसाधनं च विदधत् शास्त्रम् इत्यर्थः) फलसाधनं (विदधत् इत्यनुषज्यते), न कारकास्तित्वे व्याप्रियते (गौरवादिति भावः। न च द्वैतस्य मिथ्यात्वे शुक्तिरूप्यादिवद् अर्थक्रियासामर्थ्य-अभावात् कारकादेः फलसाधनतादिकं न स्याद् इति वाच्यम्। वियदादिप्रपञ्चस्य मिथ्यात्वेऽपि शुक्तिरजतादिवैलक्षण्येन यावत्तत्वज्ञानम् अर्थक्रियासामर्थ्य-अङ्गीकारात्। इदं च आरम्भणाधिकरणौ प्रपञ्चितं तत्रैव अनुसन्धेयमिति भावः।) {पृङ् व्यायामे प्रियते तुदादि आ.पद to be busy, to engage upon}। (ननु मुमुक्षूणां मोक्षसाधनीभूता विद्या शास्त्रेण विधातव्या, न तु दुरितक्षयार्थं कर्माणि, विद्यायां मोक्षे वा उपात्त-दुरितक्षयस्य अनुपयोगात् इत्याशङ्क्याह - उपचितेति) उपचितदुरितप्रतिबन्धस्य हि (प्रतिबन्धवतः पुंसः इत्यर्थः। ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः इत्यादिशास्त्रप्रसिद्धद्योतनार्थः हि-शब्दः) विद्योत्पत्तिः नावकल्पते, तत्क्षये च विद्योत्पत्तिः स्यात्। ततश्च (विद्योतयादित्यर्थः। च-शब्दः विद्यायाः कर्म-असमुच्चित-स्वरूप-कैवल्यार्थः) अविद्यानिवृत्तिः। ततः (तथा च कर्मकाण्डस्य निःश्रेयस-पर्यवसायिनो दुरितक्षयस्य स्वर्गादिफलस्य च साधनत्वेन कर्मणाम् उपदेशे तात्पर्यमिति कर्मश्रुतीनां पुरुषार्थ-उपदेशपरत्वं प्रदर्शितमिति बोध्यम्)। आत्यन्तिकः संसार-उपरमः (सच्चिदानन्द - एवं च परमपुरुषार्थ-उपाय-उपदेशपरत्वं कर्म-काण्डस्यापि उपपद्यते। तदर्थं विहितत्वात्। अमुमुक्षूणां तत्तदाकाङ्क्षितफलदायक-उपाय-उपदेशपरत्वम्। नित्यानि च कर्त्तव्यानि भवन्ति विहितत्वात् इति भावः (सू.भा ३.४.३२)।

> No. The objective of the Vedas is to teach (the means of) the human pursuits. The Srutis has engaged herself in revealing the knowledge, being committed to release the human beings from the life of limitations and through knowledge to remove the ignorance which is the cause of the life of limitation. Hence there is no contradiction.
> But still the scriptures that talk about the existence of accessories of actions such as doer etc. certainly opposed.
> No. The scriptures taking recourse to the existence of accessories that are there naturally, enjoins actions for the purpose of exhausting the accumulated papas, in respect of those who seek freedom and also as means for achieving various ends in respect of those who seek the limited ends and thus it does not engage itself in establishing the existence of accessories of actions. The dawn of knowledge cannot take place for one who has obstacles in the form of accumulated papas. On the elimination of them alone knowledge can arise. Thereby removal of ignorance takes place. From that follows the total elimination of life of limitation.

The *sruti* is committed to revealing something useful to you, something desired by you and which is desirable. That is what it is. It is called *purushartha*. Let us take *moksha* is *purushartha*. I am *mumukshu*. I want *moksha*. Sruti says you are that *moksha*. You are Brahman. To understand what the *sruti* says, you require a certain type of mind for which there is religious life. So *sruti* talks of a religious life of a person which lead you to gin a mind which is capable of knowing this. You have to settle account with *Isvara*. Then only *Isvara* will reveal himself. For this religious life is a must. So *nityanaimittika karmas* are meant for it. So they are *purushartha param* only. Not directly. There is *kramapraratvam* in it. Suppose he is interested in *lokas*. There are three *eshanas* there, *putra, vitta, loka eshanas*. For the one who is interested in any of them or all of them, it does not say *dviata* is *mithya*. At that time, it waits for you to come to the last page. It caters to *purusha's arthas* which are *artha, kama* and *dharma*. There it does not say what you are doing is silly. It requires certain *viveka*. *Parikshay lokan karmacitan+* Then, it says go to teacher. It can not push *moskha* down your throat. Because already *prapta*. It is for recognition. Knowing means preparedness. *Adhikaritiva apeksha* is required. It never comes one day earlier. *Svabhavika ajnanam* is there and they think I am *karta*. It goes with the person. *na buddhibhedam+* Sruti does not do that *bheda*. All right do karma. Do such *karmas* which

will lift you from the *samsara*. Do right *karma iti. Yani anavadyani karmani tani kuru*. It does not say *dvaita* is *satyam*. It does not say so. It does not talk about realities there. It is confined to *purushartha*. You think it is *satyam*. So it goes with you. *Hitaishini* is *sruti*. Sruti that prohibits you from doing something, has again your *hita* only in her mind. It does not want you to occur undesirable result later. Even though *parama-purushartha* is real good for you, it takes a lot of time to ascertain it and see the adjective *parama*. Later you discover that alone is *purushartha*. *Virodha* comes only when Sruti committedly says that *karakas* are *satyam* and that karma is the means for the ultimate end in life. In her vision there is no *tatparya* even when it says. *Karakas* cover the whole world. World is *mithya* for whom it is told. It is told for you. It is not for world's sake. It is to release you from *samsara*. You happen to be caught in mesh. A disease is removed when the cause is removed. *Samsaranivritti* is from *samsarahetunivritti*. If the chain is replaced by gold, it does not give any solution. *Svarga* is like that. So *avidya* has to be removed. It is only by knowledge. All that is there in the book is word. All that is transferred to *buddhi* is *vidya*. So that *vidya-prakaskatvena pavritta*. In bringing this knowledge to light it is committed.

Why then it tells last. Why not in the beginning. Okay I tell you in the beginning. What difference it makes. You will not see through. It is like commercial of shampoo for bald headed person. It makes him angry. The advertisement does not attract him.

Still karma is *virodha* is not answered. Sruti is interested in *purushartha* and *vidya*. Okay. But the sentences of *sastra* that show *karakas* as real, that is set to reveal/establish the existence of *karakas* are contradictory. Here it is *mithyatvapratipadana sastram*. No. *karakas* are already *svabhavapraptam*. As it is available. Sruti talks. When *sruti* talks, this fellow already finds himself a doer. So there is *karmadi karakas* also. Let it be. No they are required for preparing the mind. So for both *mumukshu* and *kamis*, it gives *karmas* as means. So it does not engage itself in establishing or proving the existence of *karakas*. It does not start with the statement *karakas santi*. Only *svargakamo yajeta*. Once you say I am *karta*, all *karakas* come into existence. I am doer. Do what? One by one comes.

Then let karma give *moksha*. No. Only *krama*. *Krama* is different from *samuccaya*. It is for the dawn of the knowledge. That is why *mamopatta*+ But a *vaidika* does not know the meaning. Mechanically he repeats. Then knowledge. Then the resolution of *samsara* is total unlike in sleep or coma or *pralaya*.

कर्मणः काममूलत्वादपि विद्याकर्मणोः विरोधः

(आ.गिरि - पूर्वं सत्यमिथ्याविषयत्वेन विद्याकर्मणोः विरोधमादाय समुच्चयो निरस्तः । इदानीं काम्यकामिविषयत्वेन विरोधमाह - अपि च इति)। (एवं द्वैतमिथ्यात्वसाधनप्रसङ्गप्राप्तं विद्याकर्मश्रुतीनां परस्परविरोधं परिहृत्य प्रकृतायां विद्याकर्मणोः समुच्चय-अनुपपत्तौ प्रकारान्तरेण विरोधं हेतुमाह - अपि च इति।) अपि च[२३४] (विद्यावतः कर्मासंभवं वक्तुं कर्मणः काममूलत्वमाह - अनात्मदर्शिन इति। अनात्मनि देहादौ आत्मत्वदर्शिनः स्वव्यतिरिक्तान् कामयितव्य-पदार्थान् पश्यतः तद्विषयः कामो भवति । हि प्रसिद्धम् इत्यर्थः) अनात्मदर्शिनो ह्यनात्मविषयः (ततः किम्। तत्राह - काम इति। तदुक्तं भगवता व्यासेन - यद्यद्धि कुरुते जन्तुः तत्तत्कामस्य चेष्टितम् इति। कामः। कामयमानश्च करोति कर्माणि। ततः (कर्मणां संसारफलत्वाच्च विदुषः कर्मानुष्ठानं न संभवति इत्याशयेन कर्मफलं दर्शयति - तत्फलेति) तत्फलोपभोगाय शरीरद्युपादानलक्षणः संसारः (कामिनः इति शेषः)। (विद्यावतः तु कामाभावान्न कर्मामुष्ठानमित्याह - तद्व्यतिरेकेण इति। आत्मैकत्वदर्शिनः तु तद्व्यतिरेकेण आत्मैकत्व-

[२३४] न केवलं काकोपमर्दकत्व-कारकापेक्षत्व-स्वरूपाभ्यांविरोधो विद्याकर्मणोः किन्तु वक्ष्यमाणहेतोश्च इत्याह- अपि चेति (सच्चिदानन्द)

व्यतिरेकेण कामयितव्यविषय-अभावात् अनात्मगोचर-कामानुपपत्तिः इत्यर्थः) तद्व्यतिरेकेण आत्मैकत्वदर्शिनः विषयाभावात् कामानुपपत्तिः (सच्चिदानन्द - अनेन कामवैराग्ययोः हेतुता उक्ता कर्मज्ञाने प्रति)। (ननु तर्हि आत्मन्येव कामः अस्तु आनन्दरूपत्वाद् आत्मनः, तथा च तत्कामनया विदुषोऽपि कर्मामुष्ठानं स्यादिति। नेत्याह - आत्मनि चेति। कामस्य आत्म-अन्यविषयत्वाद् आत्मानन्दे च विदुषः अन्यत्वभ्रान्तेः निवृत्तत्वात् आत्मनि काम-अनुपपत्तिः। तदनुपपत्तौ च विदुषो मुक्तिरेव पर्यवस्यति। तथा च मुक्तस्य न कर्मामुष्ठानप्रत्याशा इति भावः) आत्मनि (विषयसप्तमी) च अनन्यत्वात् कामानुपपत्तौ स्वात्मन्यवस्थानं मोक्ष इति (सच्चिदानन्द - एवं च *स्वरूपहेतुफलैः विरोधोविद्याकर्मणोः इति)। (फलितमाह - अतोऽपि इति। विदुषः कामाभावेन कर्मामुष्ठान-असंभवादपि इत्यर्थः) अतोऽपि विद्याकर्मणोः विरोधः (एकदा एकत्र पुरुषे सह अनवस्थानलक्षणः इत्यर्थः। तथा च समुच्चयवादिमते कर्मविद्याश्रुतीनाम् अपि एकदा एकपुरुषविषयत्व-असंभवलक्षणविरोधः अपि तदनिष्टः प्राप्नोति इति भावः)।

*Thus *hetu-phala-svarupa* is pointed out for *karma* and *vidya*.

विषय	काम	वैराग्य	कर्म	ज्ञान
हेतु	अविद्या	विवेकयअनुभव	काम	वैराग्य
फल	संसार	जिज्ञासा	उत्पत्यादि	स्वरूपावस्थानरूपमोक्ष
स्वरूप	विषयासक्ति	विषयविरक्ति	कारकसाध्यत्व	कारकोपमर्दत्व

Further, desire in respect of objects that are not-self can be there only for the one who has identification with the not-self. Desiring, one performs actions. Then, there continues the life of limitation in the form of taking various bodies in order to experience the results of actions. In contrast to this, in respect of him who sees the self as non-dual, there cannot be any desire due to absence of objects of desire nor can there be any desire with reference to oneself due to non-division in the self and hence the abidance in the self that takes place due to absence of desires is the moskha and for this reason also there is contradiction between action and knowledge.

कर्मोपसर्जनपक्षस्य निरासः

(विद्या प्रधानं कर्म च उपसर्जनमिति पक्षोऽपि समप्राधान्यपक्षवद् अतः एव निरस्तः इत्याह - विरोधादेव इति) विरोधादेव च विद्या न मोक्षं प्रति कर्माण्यपेक्षते।

Because of this contradiction itself, knowledge does not depend on actions for achieving moksha.

स्वोत्पत्तौ तु अपेक्षते कर्माणि विद्या

(आ.गिरि - विद्या चेत् कर्माणि स्वफले नापेक्षते विरुद्धत्वात् त्रिदण्डिधर्म इव ऋतुगमनं कथं तर्हि विद्यासंनिधाने कर्मणां पाठ इत्यत आह - स्वात्मलाभे इति) (स्वमते कर्मविद्याश्रुतीनां क्रमसमुच्चयपरत्वेन अविरोधं वक्तुं पूर्वोक्तमर्थं स्मारयति - स्वात्मलाभे इति। स्वात्मलाभे तु स्वोत्पत्तौ तु विद्या कर्माणि अपेक्षते इति योजना।) स्वात्मलाभे तु[२३५] (एतदेव विवृणोति - पूर्वोपचितेति) पूर्वोपचितदुरितप्रतिबन्ध-अपनयनद्वारेण विद्यायाः हेतुत्वं प्रतिपद्यन्ते कर्माणि नित्यानि इति (इति सिद्धान्तः इति शेषः) (सच्चिदानन्द - काम्यानि तु यथोक्तरीत्या विद्याविरोधीनि एव इति त्याज्यानि एव मुमुक्षुणा इति भावः)। (कर्मणां विद्याहेतुत्वे मानमाह - अत एव इति) अत एव (विद्योदय-हेतुत्वादेव इत्यर्थः) अस्मिन् प्रकरणे उपन्यस्तानि कर्माणि इति अवोचाम (अनुवाक ११)। (कर्मणां शुद्धिद्वारा विद्याहेतुत्वे फलितमाह - एवं चेति। एतेन विद्यां चाविद्यां च इति वचनं क्रमसमुच्चय-अभिप्रायम्, उपासनकर्मणोः यौगपद्येन समुच्चय-अभिप्रायं वा भविष्यति। कर्मणैव हि इति वचनमपि कर्मणैव चित्तशुद्ध्यादिक्रमेण मुक्तिं प्राप्ताः इत्यभिप्रायकं भविष्यति। तत्प्राप्तिहेतुर्विज्ञानम् इति वचनमपि क्रमसमुच्चयाभिप्रायमेवेति सूचितमिति ध्येयम्।) एवं च अविरोधः कर्मविधिश्रुतीनाम्। (परमप्रकृतमुपसंहरति - अत इति। मोक्षे केवलकर्म-

[२३५] एवं सर्वथापि कर्मनिरपेक्षता विद्यायः प्इत्येवं प्राप्ते इदमुच्यते विद्योत्पत्ति-हेतुत्वम् अस्त्येव कर्मणामिति । सू.भा ३.४.३३,३५) (सच्चिदानन्द)

साध्यत्वस्य समुच्चयसाध्यत्वस्य च निरस्तत्वाद् इत्यर्थः) अतः केवलायाः एव विद्यायाः परं श्रेयः इति सिद्धम्।

In its arisal, the obligatory duties does gain the status of being the cause for knowledge through the elimination of the obstacles in the form of accumulated papas of the previous lives. For that reason only, actions have been enjoined in this section. This we have said before. Thus there is no contradiction of Vedic section enjoining actions. Thus it is established that moksha is gained only through knowledge alone.

He is doing the last rites for the stand of synthesis of karma and *jnanam*. Further for this reason also there is *virodha*. One who has the notion about the *atma* that is rooted in *anatma*. *Asmatpratyaya* is in body etc. So *atma* as good as body. For him desire is possible because once you have that notion, you are out in the world then the world is divided into two raga and *dvesha vishaya* and *audasinya* the third. Walking on the road, without any plan, you go after something beautiful or shining. All the time looking for what is useful. You look both sides. And you keep switching between the three. What is raga becomes *dvesha* and vice verse. What is useful becomes useless and vice versa. That is all the growth in life. You appropriate them as constituents of yourself. Out of *anatma*, one set of things become *atma* and rest become *anatma*. Then among them are divided into three. You become small and frightened. You require security, things to make yourself pleased etc. Once desires are there, he cannot sit quiet. He does actions. To enjoy the unseen results of those *karmas*, he takes bodies and that is *samsara*. *Adi pada* means getting into the womb of person, then death etc.

Suppose he is *atmadarsi*. Whole thing is myself because the whole things depend on me. Then no *kama* possible. When you commit a small mistake against the infinite, the problems are infinite. So opposed to the *anatmadarsi*, he has no *vishaya* to desire and so no binding desire possible. He can desire for *Atma*. No, *Atma* is *ananya*. You cannot say, Swamiji please give me myself. Brahman can be object of desire. No You are Brahman.. So for this reason, there is no *virodha*. One has desire and so he has to do karma. Another has no desire and so no karma. For *vidya* to come into being, it depends on karma and *moksha* to come into being, no dependence on karma. There too *nityakarma* becomes *hetu* and that too by eliminating the obstacles. Values are also karma because the *karta* is involved. Anything will based is karma. Knowledge requires *pramana*. So it is established Not Tamil kevalam.

विद्यायाः गार्हस्थ्यकर्माणि एव अपेक्षितानि उत्पत्तौ इति न नियमः

(कर्मणां विद्यासाधनत्वनिरूपणम् उपश्रुत्य लब्धावकाशः आश्रमान्तराणि आक्षिपति - एवं तर्हि इति। यदि कर्माणि विद्योत्पत्तौ निमित्तानि तर्हि आश्रमान्तराणां नैष्ठिकवानप्रस्थपारिव्राज्यलक्षणानाम् अनुपपत्तिः अननुष्ठेया स्याद् इत्यर्थः।) एवं तर्हि {यदि दुरितक्षयादेव विद्योत्पत्तिः} आश्रमान्तरानुपपत्तिः कर्मनिमित्तत्वाद् विद्योत्पत्तेः। (विद्योत्पत्तेः कर्मनिमित्तकत्वेऽपि कथम् आश्रमान्तर-अनुपपत्तिः अत आह - गार्हस्थ्ये च इति। गार्हस्थ्ये एव अग्निहोत्रादीनि कर्माणि विहितानि न आश्रमान्तरेषु अतो गार्हस्थ्यम् एकमेवअनुष्ठेयम् इत्यर्थः।) गार्हस्थ्ये च विहितानि कर्माणि इति ऐकाश्रम्यम् एव। (गार्हस्थ्यस्यैव अनुष्ठेयत्वे हेत्वन्तरमाह - अतश्चेति। अत एव अनुकूलतराः भवन्ति इति योजना। आश्रमान्तराणाम् अनुष्ठानपक्षे सर्वेषामधिकारिणां यावज्जीवं कर्मानुष्ठान-अलाभाद् यावज्जीवादिश्रुतयो नानुकूलतराः स्युः इत्यर्थः। आश्रमान्तरानुष्ठानपक्षेऽपि यावज्जीवादिश्रुतयोऽनुकूलाः भवन्ति एव, कर्मणां विद्याहेतुत्वेऽपि विद्याम् अकामयमानैः गृहस्थैः प्रत्यवायपरिहारार्थं यावज्जीवं कर्मणाम् अनुष्ठानात्, इदानीं तु विद्याकामैः अपि विद्योत्पत्तये यावज्जीवं गार्हस्थ्ये एव स्थित्वा कर्माणि अनुष्ठेयानि इति विशेषलाभाद् अनुकूलतराः स्युः इत्युक्तम् इति मन्तव्यम्। आदिपदेन "वीरहा वा एष देवानां योऽग्निम् उद्वासयते" इत्याद्या आश्रमान्तरविषेधश्रुतयः

गृह्यन्ते।) अतश्च { ऐकाश्रम्य-अङ्गीकाराच्च } यावज्जीवादिश्रुतयः { यावज्जीवश्रुतिः बह्वृचब्राह्मणे पठ्यते } अनुकूलतराः स्युः। (अत्र किम् आश्रमान्तराणां अविहितत्वाद् अननुष्ठेयत्वम्। किं वा तेषां प्रतिषेधात् । अथ वा तेषु विद्याहेतुकर्माभावात्। न आद्यः । श्रुतिस्मृत्योः आश्रमान्तराणां विधिदर्शनात्। न द्वितीयः। निषेधश्रुतेः यावज्जीवादिश्रुतेः च अविरक्तविषयतया संकोच-उपपत्तेः। अन्यथा सांसारिकफलाद्विरक्तस्य यदहरेव विरजेत् इत्यादि-संन्यासविधिविरोधप्रसङ्गात्। न तृतीयः इत्याह - न। कर्मानेकत्वात् इति। विद्याहेतुभूतानां कर्मणां नानाविधत्वाद् आश्रमान्तरेष्वपि सन्त्येव विद्यासाधनानि कर्माणि। अतो नाश्रमान्तर-अनुपपत्तिः इत्यर्थः।)। न। कर्मानेकत्वात्। (ननु यानि गार्हस्थ्ये विहितानि तान्येव कर्माणि न आश्रमान्तरेषु विहितानि ब्रह्मचर्यादीनि इत्याशङ्क्य आह - न हि इति। न हि अग्निहोत्रादीनि एव कर्माणि किं तु ब्रह्मचर्यादीनि अपि कर्माणि भवन्त्येव अनुष्ठेयत्व-अविशेषात् इत्यर्थः।) न हि अग्निहोत्रदीन्येव कर्माणि। (तान्येव आश्रमान्तरेषु श्रुत्यादिसिद्धानि कर्माणि प्रपञ्चयन् विद्योत्पत्तिं प्रति तेषां गार्हस्थ्ये विहितकर्मभ्यः सकाशाद् अतिशयं दर्शयति - ब्रह्मचर्यं तप इत्यादिना) ब्रह्मचर्यं तपः सत्यवचनं (छा.,तै.,मुं - इत्याद्युपनिषत्सु) शमः दमः (बृहदारण्यके ४.४.२३) अहिंसा (छान्दोग्ये ८.१५.१) इत्येवमादीन्यपि कर्माणि इतराश्रमप्रसिद्धानि (सू.भा३.४.१९-२०) विद्योत्पत्तौ साधकतमानि (अन्तरङ्गानि। यमप्रधानत्वात्) असंकीर्णानि (हिंसा-अनृतवचनादिदोषैः असंकीर्णानि इत्यर्थः) (सच्चिदानन्द - यद्यपि गृहस्थानामपि ब्रह्मचर्यादीनि सन्ति तथापि तानि ऋतौ भार्यागमनं इत्येवमादिभिः सङ्कीर्णानि। असङ्कीर्णानि तु इतराश्रमकर्मणा इति संपन्नतराणि तानि साधनानि मोक्षं प्रति) विद्यन्ते ध्यानधारणादिलक्षणानि च (सच्चिदानन्द - ध्यानादयस्तु गार्हस्थ्यकर्मरहितानामेव विहितानि इति तेषां पृथग्ग्रहणम् - गी.भा.६. अवतरणिका)। (आश्रमान्तरस्थानां चित्तैकाग्र्य-तत्वविचारादिकर्मणां विद्यासाधनत्वे मानमाह - वक्ष्यति च इति। सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम्। इत्यादिश्रुतिसंग्रहार्थः चकारः।) वक्ष्यति च - "तपसा ब्रह्म विजिज्ञासस्व" इति (तै.३.२) (तत्र हि अग्निहोत्रादिकर्मव्यतिरिक्तं तपः मनआद्यैकाग्र्यलक्षणं ब्रह्मज्ञानसाधवत्वेन उपदिष्टमिति भावः)।

> If this is so, then there arises the untenability of the other stages of life in as much as knowledge arises due to actions. Actions are enjoined in the householder's life. Hence there can be only one stage of life. From this, the Vedic texts that talk of life-long performance of actions would stand in agreement.
> No. for, there are manifold karmas. Not that agnihotra etc. are alone karmas. There exist such karmas as celibacy, austerity, speaking truth, mastery of mind, mastery over the sense organs, and non-injury which are well known in other stages of life besides practices such as meditation and concentration and which are most suited as means for the knowledge to arise due to their being not mixed up. It will be told here itself later, "Desire to know Brahman through a life of austerity.

Now you yourself told karma is necessary for *vidya*. So Sruti also says. *Kurvan eva+ yavajjivam agnihotram juhuyat. Agnohotradi karma* requires *grhastasrama. Brahmacarya-asrama* is preparation for marriage. In no other *asrama* it is possible to do karma like *agnihotra*. So they are not there. *Naishthika* is *nityabrahmacari*. He cannot become *vanaprastha*. He can only become *vanaraprastha*. *Sanyasa* he can take. If he does not take, then it is only *brahmacarya asrama* like *Bhishma*. So there is only one *asrama*. (What we say is all *asramas* are for preparing to become *sanyasi*. Everyone wants to be free only. Nobody wants load. Like you don't carry holdall to say in five star hotel. *Manushyasya tatparya* is *nivritti* alone. None wants any emotional or physical dependence on anybody or anything. But people depend because they don't have any other go. *Sanyasa* is everyone's goal. That is the best retirement plan one can have. Retirement in life is plan of

sanyasa only. All that you require is two roti. There is no need for insecurity. That freedom from insecurity is best plan. It is *sanyasa*. The *pruvapakshi* continues that only when *ekasrama* is there, the *srutis* that talk of karma for lifetime will become supportive. (The real meaning is if you don't take *sanyasa* then keep doing karma)

The answer is: Do you mean that there is no other *asrama* enjoined in Sruti etc. Or they are prohibited or negated positively. Both are not right. There is *sruti* enjoining *sanyasa*. There is no prohibition. The only objection can be that there are no *karmas* there. But it is not so. Karma is not one type. It is manifold. Any karma can be replaced. End is same. One will do *agnihotra*. Some do *puja*. Some *japa*. Some *kirtanam*. Some charity. All religions can be accommodated. here. Lord can be called alla or father in heaven. Even though he may not like to be called alla. All are prayers. There *moksha* view is dismissible. *Agnihotra* alone is not karma. *Brahmacarya* is life of study and discipline. It is karma because there is *karta*. *Sama* means agitation, pain etc dealing with them is *sama* and it is karma. *Ahimsa* is value for another life or for their pain. One has to be very alert in life for this purpose. They are the most suitable means. *Asankirna* and therefore the best. Further there are some exclusive *sadhanas*. *Dharana* is the capacity to keep the mind in a given track for a length time, holding an object in view. You don't miss the continuity. There is will here also. Concentration is something to be cultivated. Even in *vyavahara* it is to be practised. *Dhyanam* is mental action centred on *isvara*. Mental puja also *dhyana*. *Dhyeyam cet sagunam brahma*. In fact it has to be done. Even in *karmas* it is there. In every chanting, you have a *dhyanam*. *Ahimsa* you are not doing. You do himsa. Not doing it, in that there is *sankalpa* to be made and it is will-based. That is karma. *Bhashyakara* says *agnihotra* is not the only karma. Sruti is going to say Know Brahman by *tapas*. *Vicara* will exclude other types of values. So Sruti does not use *vicara*. In *tapas*, all are included. If *nityakarma* etc. all values are there, they also have to be done. *tapa* is all inclusive. Whole life is *tapas*. I am doing *Brahmavicara*. So I don't pray. It does not work. We have to win the grace of the Lord. *Isvara's anugraha* is always available Because you are breathing. You have to tap. There is nothing else more effective than the grace. Techniques will only help to certain extent

(इतश्च कर्मणां विद्यासाधनत्वेऽपि न गार्हस्थ्यम् आवश्यिकम्, अतो नैकाश्रम्यनिर्बन्धः इत्याशयेन आह - जन्मान्तरेति। केषांचिज्जन्मान्तरकृतकर्मभ्यः एव दारसंग्रहात् प्रागपि विद्योदयसंभवात् {वामदेवादीनामिव} तेषां गार्हस्थ्यप्राप्तिः अनर्थिका)। जन्मान्तरकृतकर्मभ्यश्च प्रागपि गार्हस्थ्याद् विद्योत्पत्तिसंभवात् (सच्चिदानन्द - अत एव ब्रह्मचर्यादेव प्रव्रजेद् इत्यादि जाबालश्रुतौ पठ्यते)। (ननु उत्पन्नविद्यानामपि गार्हस्थ्यप्राप्तिः अस्तु। न इत्याह - कर्मार्थत्वाच्च इति। जाया मे स्याद् अथ प्रजायेय अथ वित्तं मे स्याद् अथ कर्म कुर्वीय इत्यादिश्रुतिपर्यालोचनया गार्हस्थ्यप्राप्तेः कर्मानुष्ठानार्थत्वस्य एव अवगमात् कर्मफलभूतायां विद्यायां सिद्धायां तत्प्राप्तिः अनर्थिका एव इत्यर्थः।) कर्मार्थत्वाच्च {ज्ञानकारणकर्मार्थत्वादित्यर्थः} गार्हस्थ्यप्रतिपत्तेः कर्मसाध्यायां च (कर्मभिः साधनीयायाम् इत्यर्थः। चकारो विदुषः कर्म-असम्भव-सूचनार्थः।) विद्यायां सत्यां गार्हस्थ्यप्रतिपत्तिः अनर्थिकैव (सच्चिदानन्द - मुमुक्षूणामेव अत्र प्रकृतत्वाद् ब्रह्मचर्याश्रमे एव उत्पन्नज्ञानानां गार्हस्थ्यप्रतिपत्तिः व्यर्था इति नापेक्षिता इति वाक्यार्थः)। (सर्वेषां गार्हस्थ्यनिर्बन्धाभावे हेत्वन्तरमाह - लोकार्थत्वाच्च इति) (आ.गिरि - कामिनां गार्हस्थ्य-अनुष्ठेयत्वेऽपि न सर्वैः अनुष्ठेयत्वम् इत्यत्र हेत्वन्तरमाह - लोकार्थत्वाच्च इत्यादिना) लोकार्थत्वाच्च पुत्रादीनाम्। (ननु पुत्र-कर्म-अपरविद्यानां गार्हस्थ्ये संपादनीयानां लोकत्रयार्थत्वेऽपि जन्मान्तरकृतकर्मभिः उत्पन्नविद्येन पुंसा गार्हस्थ्यं प्राप्तव्यमेव तस्यापि लोकार्थत्वाद् इति। न इत्याह - पुत्रादि इति। "अयं लोकः पुत्रेणैव जय्यः कर्मणा

पितृलोकः विद्यया देवलोकः" इति श्रुत्या पृथिवीलोकादीनां पुत्रादिसाध्यत्वम् अवगम्यते। एतेभ्यश्च पुत्रादिसाध्येभ्यः लोकेभ्यः व्यावृत्तकामत्वाद् न तस्य आत्मदर्शिनः कर्मानुष्ठान-उपयोगिनि गार्हस्थ्ये प्रवृत्तिः उपपद्यते। नित्यसिद्ध आत्मैव लोकनं लोकः इति व्युत्पत्या लोकः लोकनं आत्मचैतन्यम्। इदं च नित्यसिद्धात्मलोकदर्शित्वं व्यावृत्तकामत्वे हेतुतया उपात्तम्। तदुक्तं भगवता - "रसोऽप्यस्य परं दृष्ट्वा निवर्तते" इति। रसो रागः। एवं ब्रह्मचर्याश्रमे एव उत्पन्नविद्यानां न गार्हस्थ्यम् अपेक्षितम् इत्युक्तम्) पुत्रादि-साध्येभ्यश्च "अयं लोकः" "पितृलोकः" "देवलोकः" (बृ.उप १.५.१६) इत्येतेभ्यः व्यावृत्तकामस्य नित्यसिद्धात्मलोक-दर्शिनः (बृ.उप ४.४.२२) कर्मणि प्रयोजनमपश्यतः कथं प्रवृत्तिः उपपद्यते? (सच्चिदानन्द - मनुष्यादिलोकसाधने पुत्रकर्मादौ प्रयोजनं न पश्यति तत्रैव प्रवर्तते च - इति हि विप्रतिषिद्धम्)।

> Also, even before entering the householder's life, on account of the actions done in the previous lives, knowledge can arise and since taking to the householder's life is meant for performance of actions, when the knowledge that is achieved through action, has already taken place, taking to householder's life is meaningless.
> Besides the means such as son etc. are meant for attaining worlds. How can there be engagement in actions for the one who has come out of the ends such as this world, the world of manes, and the heavens that are achieved through son etc. and who has gained the vision of the self, and hence who does not see any utility in actions.

You had enough marriages before. So you need not marry now. So many *janmas* have gone before. You might have done *karmas* like *agnihotra* before. People who perform those *agnihotras* need not be *mumukshus*. They may be the worst people in terms of values. On the other hand, a *mumukshu* may have the right tendencies and *jijnasa* to know though in *brahmacaryasrama*. We see prodigies in childhood. *Grhastasrama* is for doing karma to get knowledge. But this fellow had got it. So why does he need *grhastasrama*. So *Bhashyakara* is defending his own life style.

You cannot say still for him *grhastasrama* is necessary for son, wealth, etc. There are *srutis* which show them as necessary like "*jaya me syat* etc" No *putra, karma* and *upasana* for gaining this world and other worlds. He has his own *loka*. It is not to be gained. It is *nityasiddha*.

(इदानीं गृहस्थस्य सतो विद्योदयेऽपि गार्हस्थ्यपरित्याग एव न्याय्य इत्याह - प्रतिपन्नेति) प्रतिपन्नगार्हस्थ्यस्यापि विद्योत्पत्तौ परिपाकाद् विरक्तस्य (विद्यायाः परिपाकः प्रतिबन्धराहित्यम्। अप्रतिबन्ध-आत्मविद्याबलेन कर्मफलेभ्यो नितरां विरक्तस्य इत्यर्थः।) कर्मसु प्रयोजनमपश्यतः कर्मभ्यो निवृत्तिरेव (विधिना कर्मपरित्यागरूपसंन्यास एव स्याद् इत्यर्थः) स्यात् (सच्चिदानन्द - विक्षेपहेत्वभावे ऐकात्म्ये एव अवस्थानं विद्यायाः परिपाकः। तस्मिन् निष्पन्ने कर्मभ्यो निवृत्तिरेव स्यादित्यर्थः। अथवा विद्यापरिपाकात् इति विद्यापरिपाकहेतोः इत्यर्थः तदर्थम् इति यावत्। विद्यापरिपाकार्थं कर्मभ्यो निवृत्तिरेव स्यात् इति संबन्धः। कर्मसंन्यासस्य विद्यापरिपाक-अङ्गत्वम् उक्तम्। सू.भा ३.४.२० गी.भा.१८.५५) "प्रव्रजिष्यन् वा अरे अहमस्मात् स्थानाद् अस्मि" (बृ.उप ४.५.२) इत्येवमादि (अरे मैत्रेयी, अस्मात् प्रत्यक्षात् स्थानाद् गार्हस्थ्यात् प्रव्रजिष्यन् एव अस्मि त्यक्त्वा इदं गार्हस्त्यं पारिव्राज्यं करिष्यन् अस्मि इति प्रतिज्ञापूर्वकं याज्ञवल्क्यः प्रवव्राज इति विदुषो याज्ञवल्क्यस्य पारिव्राज्ये प्रवृत्तिदर्शनात् लिङ्गाद् इत्यर्थः। एवमादि इति आदिपदेन आत्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाः च वित्तैषणायाः च लोकैषणायाः च व्युत्थाय अथ ब्रह्मचर्यं चरन्ति इत्यादीनि श्रुतिलिङ्गानि गृह्यन्ते।) श्रुतिलिङ्गदर्शनात् (सच्चिदानन्द - विदुषो गृहस्थस्यापि कर्मभ्यो निवृत्तिरेव इत्यत्र लिङ्गमिदमिति भावः)।

> Even with respect to one who has taken to householder's life, there will be withdrawal from actions due to not seeing any utility in actions for the one in whom knowledge

arises and there is dispassion due to the clarity of the vision. This is in accordance with the Vedic statements that are indicative of this such as ,"I am gong to get out this householder's life becoming a mendicant.

It is true with reference to *grhastha* also. He becomes *virakta* when he also gains knowledge. *n tu raktah*. He also has to take to *sanyasa* straightaway (not even to *vanaprastha*). *Yajnavalkya* has done this. He is *karmasu virakta*. He calls his two wives and partitions the wealth. He tells *Maitreyi* (*Atma va are drshtavyah* etc. *atmanastu kamaya*), "I remain with an intention to renounce from this *asrama*, after all his knowledge. She asks does this wealth give what you are going to seek after giving up. No. Then why you are giving it to me. She asks him to teach. *Vyuthaya bhikshacaryam caranti* shows *sanyasrama*. *Sruti* has *sanyasa-asrama* as means for *moskha*.

कर्मणि श्रुतेः यत्नाधिक्ये कारणम्

(आ.गिरि - गार्हस्थ्यस्य अनावश्यकत्वेन वैकल्पिकम् अनुष्ठानम् उक्तम्। तत्र अतुल्यबलत्वेन विकल्पम् आक्षिपति - कर्म प्रति इति) (न कर्मानेकत्वाद् इत्यादिना कर्मणां विद्यासाधनत्वेऽपि यथा विद्याकामेन गार्हस्थ्यम् अनुष्ठातुं शक्यते तथैव आश्रमान्तराण्यपि यथा रुच्यनुष्ठातुं शक्यन्ते, तेषु अपि विद्यासाधनकर्मणां सत्त्वात्। तथा च वचनम् तस्य आश्रमविकल्पम् एके समामनन्ति इति। अत्र च वचने तच्छब्दः ब्रह्मचारिपरः। अनन्तरं च जन्मान्तरकृतेत्यादिना विदुषः पारिव्राज्यमेवेत्युक्तम्। इत्थं गार्हस्थ्यस्य अनावश्यिकत्वाद् आश्रमाणां वैकल्पिकम् अनुष्ठानम् उक्तम् आक्षिपति - कर्मप्रति इति। श्रुतेः अग्निहोत्रादिकर्मसु तात्पर्य-अतिशयवत्त्वाद् अग्निहोत्रादिधर्मयुक्तं गार्हस्थ्यं प्रबलम्, अतोऽतुल्यत्वाद् गार्हस्थ्य-अनधिकृत-विषयम् आश्रमान्तरविधानम् इत्यर्थः।) कर्मप्रति श्रुतेः यत्नाधिक्यदर्शनाद् अयुक्तमिति चेत्। (आक्षेपं विवृणोति - अग्निहोत्रादि इति) अग्निहोत्रादिकर्म प्रति श्रुतेः अधिको यत्नः (तात्पर्य-अतिशयः। एष आदेश इत्यादिवचनपर्यालोचनया श्रुतेः यत्नाधिक्य-अवगमाद् इति भावः)। (गार्हस्थ्यस्य प्राबल्ये हेत्वन्तरमाह - महांश्च इति) महांश्च कर्मण्यायासः अनेकसाधनसाध्यत्वाद् अग्निहोत्रादीनाम्। (इतश्च तस्य प्राबल्यम् इत्याह - तपोब्रह्मचर्यादीनाम् इति। यानि च आश्रमान्तरस्थानि कर्माणि तान्यपि यथासंभवं गृहस्थानां सन्त्येव। परं तु अग्निहोत्रादीनि अधिकानि। तथा च गार्हस्थ्यस्य धर्मबाहुल्यात् प्राबल्यम् इत्यर्थः) तपोब्रह्मचर्यादीनां च इतराश्रमकर्मणां गार्हस्थ्येपि समानत्वाद् (इतराश्रमकर्मणाम् आयास-आधिक्य-अभावे हेतुमाह - अनन्येति। ऋत्विग्वित्तादिसाधन-अनपेक्षत्वाद् इत्यर्थः।) अनन्यसाधनापेक्षत्वात् (पा.भेद - अल्प-साधनापेक्षत्वात्) च इतरेषां न युक्तः तुल्यवद्विकल्प आश्रमिभिः तस्य (गृहस्थस्य इत्यर्थः) इति चेत् (आश्रमिभिः तस्य तुल्यवद्विकल्पः न युक्तः)।

This is not proper, since there is a lot of effort on the part of the Sruti towards actions.. There is more effort on the part of the sruti in laying down the actions such as agnihotra etc. and there is great effort on the part of the performer of them due to agnihotra etc. being accomplished through (the collection of) many things. The actions of other stages of life such as austerity, celibacy etc. are equally applicable in the househlder's life and since their practice is least dependent on any thing else, it is not proper to consider the householder's life as an equal alternative with other stages of life.

Sruti's tatparya seems to be in karma. You cannot compare this *asrama* with other *asramas*. Because the *karmas* in here are enjoined with great effort. On the part of Sruti the effort is more. The volume tells volumes about the karma. Tirelessly it talks about. Take *agnihotra*. More exertion is seen by *sruti*. Lot of pains to describe the *karmas*. My effort also is my effort. One who does it, you have to see. Getting up early you have to do - *udite juhuyat. Unudite juhuyat*. (In your sutra if there is such a provision). Number of means you have to collect. Fire has to be not from gas stove. *Samidh* you have to collect. Ghee you

have to prepare. Not from the tin. *Ajyena* not daldaya. Again, you talk about *tapas* etc. They are in *grhasthasrama* also. He also has to talk *satyam* plus *agnihotra*. So there is more karma there. In other *asramas*. those *tapas* etc. are not dependent on any other *sadhanas* like even a penny you don't need. So they are less in terms of greatness. So a comparison with other *asramas* in equal footing is not right. How can you therefore substitute *karmas* of *grhasthasrama* with *karmas* of other *asramas*. We accept *agnihotradi karma* cannot be substituted. But what has to be accomplished by the performance of *angihotradi karma*, how can you say he has not accomplished. He must have done in the previous *janma*.

(यत्नाधिक्य-आयासबाहुल्य-धर्मबाहुल्यनाम् अन्यथासिद्धत्वाद् गार्हस्थ्यप्राबल्यप्रयोजकत्वम् असिद्धम् इति मन्वानः कर्मफलभूतायां विद्यायां, विरक्तौ वा लब्धायां पुनः कर्मानुष्ठान-एकप्रयोजने गार्हस्थ्ये प्रवृत्तिः विफला इति परिहरति - नेति।) न। जन्मान्तरकृतानुग्रहात्। (आ.गिरि - कर्मणि यत्नाधिक्यस्य अन्यथासिद्धत्वाद् विकल्पविघातकत्वं न संभवति इत्यर्थः)। (संग्रहवाक्यं विवृणोति - यदुक्तमिति) यदुक्तं कर्मणि श्रुतेः अधिको यत्नः इत्यादि नासौ दोषः (सच्चिदानन्द - असौ = इतराश्रमिणां गार्हस्थ्येन तुल्यवद्विकल्पः, न दोषः)। यतो जन्मान्तर-कृतमपि अग्निहोत्रादिलक्षणं कर्म ब्रह्मचर्यादिलक्षणं च (आश्रमानन्तरलक्षणम् इति शेषः) अनुग्राहकं भवति विद्योत्पत्तिं प्रति। (जन्मान्तरकृतशुभाशुभकर्मणाम् अस्मिन् जन्मनि स्वफलोत्पादकत्वे लिङ्गमाह - येनेति) येन (सच्चिदानन्द - येन अनुग्राहकब्रह्मचर्यादिबलेन इत्यर्थः।) जन्मना एव विरक्ताः दृश्यन्ते केचित्। केचित्तु कर्मसु प्रवृत्ताः (कर्मसु प्रवृत्तौ हेतुं सूचयति - अविरक्ताः इति) अविरक्ताः (अत एव आह - विद्या-विद्वेषिणः इति) विद्याविद्वेषिणः (तादृश-अनुग्राहकविरहाद् इति शेषः)। तस्माज्जन्मान्तरकृतसंस्कारेभ्यः विरक्तानाम् आश्रमान्तरप्रतिपत्तिरेव (पा.भेद - प्राप्तिरेव) इष्यते (विद्यायाः सांसारिकभोग-विरोधित्वात् तत्र रागिणां वैमुख्यं युक्तम्। इदं च वैमुख्यम् अशूभकर्मफलम् अनर्थपरम्परावहत्वात्। येन जन्मना एव वैराग्यादिकं केषांचिद् दृश्यते तेन जन्मान्तरकृतम् अपि अनुग्राहकं भवति। यतो जन्मान्तरकृतम् अपि अनुग्राहकं भवति तस्माज्जन्मान्तर-कृतकर्मजनितसंस्कारेभ्यः विरक्तानां उत्पन्नविद्यानां अनुत्पन्नविद्यानां च पारिव्राज्य-प्राप्तिरेव इष्यते न गार्हस्थ्यप्राप्तिः। कर्मप्रयोजनस्य सिद्धत्वाद् इत्यर्थः।) (सच्चिदानन्द - न तु कर्मप्रधानं गार्हस्थ्यम्। जन्मान्तरकृत-कर्मसंस्कृत-अन्तःकरणानां कर्मभिः प्रयोजन-अभावात्।)।

> No. for, there is the grace arising from the performance of actions of previous lives. With respect to what has been said that there is more effort on the part of the Sruti regarding actions, it is not a defect. This is because agnihotra etc. as well as celibacy etc. performed in the previous lives, become a blessing factor towards arisal of knowledge. Due to this fact, some people are seen born dispasisonate. Some other people engaged in duties are seen not having any detachment and averse to knowledge. Therefore taking to other stages of life alone is desired for those who have dispassion due to the good effect of the actions done in the past lives.

Because of the blessings of the *karmas* done in the previous birth. This fellow has *vairgya* shows those *karmas* have already blessed. He explains. The effort is more in karma, you say. It is not problem. The karma done in the previous life also like *agnihotra* etc. as well as his *asramantara karmas* like *brahmacarya* etc. in this life - they become blessing with reference to rise of knowledge. That particular frame of mind conducive for this pursuit, the desire to gain knowledge, the *pravrtiti* to gain knowledge etc. and the possession of receptacles for knowledge. Because of this, they are seen dispassionate. They are not interested in what others are interested. Whereas some others. though engaged in *karmas* like *agnihotra* etc., they are seen as one not having any kind of *vairagya*. They are greedy. Not only that, they become haters of *vidya*, *sanyasa* etc. So there is no rule here of any kind that *karmas* have to be done in the *grhasthasrama* alone in this life. *Karmas* might have been done before if you see *vairagya*. The disposition points out to that. There are two types of *punya*. One which gives *artha*, *kama*. Another is for spiritual growth. That is *samskara*

or disposition. From the *punyas* gathered in the previous *janma*, they have no desire. For them *asramantara* alone is suitbale.

(सच्चिदानन्द - कर्मसु यत्नाधिक्यं श्रुतेः न आश्रमान्तरविकल्प-आश्रयणबाधकम् इत्युक्तम्। जन्मान्तरकृतस्यापि कर्मणो विद्योत्पत्तिं प्रति अनुग्राहकत्वम् आश्रित्य। अविरक्त-विद्याविद्वेषि-विषयत्वसंभवाद् यत्नाधिक्यस्य इति। इदानीम् एतज्जन्मकृतकर्मणाम् एव अनुग्राहकत्वे अङ्गीकृतेऽपि यत्नाधिक्यस्य अन्यथासिद्धत्वात्, न तद्विकल्पविघातकम् इति उपपादयन् आह - कर्मफलबाहुल्याच्च)। (इदानीं यत्नाधिक्यादेः अन्यथासिद्धिमाह - कर्मफलबाहुल्याच्च इति। यद्वा जन्मान्तरकृत-अनुग्रहाद् इत्यनेन जन्मान्तरकृतानाम् अपि अग्निहोत्रादीनां यतो विद्यां प्रति अनुग्राहकत्वम् अतोऽग्निहोत्रादि कर्मसु श्रुतेः यत्नाधिक्यादिकम् उपपद्यते इति यत्नाधिक्यादेः अन्यथासिद्धौ एको हेतुः उक्तः। हेत्वन्तरमाह - कर्मफलबाहुल्याच्च इति।) कर्मफलबाहुल्याच्च। पुत्र-स्वर्ग-ब्रह्मवर्चसादि-लक्षणस्य (सच्चिदानन्द - यत्नाधिक्यम् उक्तं किं काम्यकर्मविषयम् आहोस्विद् नित्यकर्मविषयम् इति विकल्प्य आद्यं प्रत्याह - फलस्य असंख्येयत्वात्, आशिषां बाहुल्याच्च, इति) कर्मफलस्य असंख्येयत्वात् तत्प्रति च पुरुषाणां कामबाहुल्यात् तदर्थं श्रुतेः अधिको यत्नः कर्मसु उपपद्यते, (कामबाहुल्याद् इत्युक्तम् अनुभवेन साधयति - आशिषामिति। अभ्युदयफलानाम् असंख्येयत्वादेव तत्साधन-कर्मानुष्ठान-उपयोगिनि गृहस्थाश्रमे कर्मबाहुल्यं कर्मणामायासबाहुल्यं च इति भावः) आशिषां बाहुल्यदर्शनात् - "इदं मे स्याद्" "इदं मे स्याद्" इति।

> Owing to the results of actions being many and variegated. There are countless fruits such as son, heaven, brilliance etc. for actions The desires towards these results of actions are also infinite. Hence it is proper that Sruti's efforts towards actions for that purpose is justified. The countlessness of human being's desire is seen in experience from the expression. " Let this be mine. Let this be mine."

You said volume argument. Even *Brhadaranyaka* is nothing with reference to *karmakanda*. It does not mean anything. The ends in view as a result of karma are infinite. They are manifold. So *kamas* are many. Son, heaven, brilliance (then rain cattle etc.) are numerous. You cannot count. Fingers are not enough. Even toes you include not enough. Desires for these end are many. Whatever I see, I want. naturally *karmas* are many because Sruti gives you means for gaining them which are not known to you. They remove the obstacles in your getting them.

(सच्चिदानन्द - द्वितीयं कल्पं प्रत्याह - उपायत्वाच्च इति) (अग्निहोत्रादीनां विद्यां प्रति उपायत्वाच्च तत्र यत्नाधिक्यादिकम् इति अन्यथासिद्धौ हेत्वन्तरमाह - उपायत्वाच्च इति) उपायत्वाच्च। उपायभूतानि हि कर्माणि विद्यां प्रति इत्यवोचाम। उपाये (उपेयं फलम्) च अधिको यत्नः कर्त्तव्यः, न उपेये (सच्चिदानन्द - अतश्च कर्मसु यत्नाधिक्यं युक्तम् इत्यभिप्रायः) (तथा च गार्हस्थ्यप्राबल्ये मानाभावाद्, आश्रमान्तरस्थकर्मणां विद्यां प्रति साधकतमत्वेन, आश्रमान्तराणामेव प्राबल्यसंभवाच्च, विरक्तानां कर्मानुष्ठानसामर्थ्ये सत्यपि पारिव्राज्यमेव युक्तमिति भावः।)

> And also since actions are means. We have told that actions are indeed means towards knowledge. There is more effort towards the means and not towards the end.

Brahman is *upeya*. *Upayas* are many here also. *Samadamadi iti*. But with reference to any given end also. Say I want to make a cloth. It is *upeya*. But *upayas* are many. Take one laddu. How many *upayas*. With reference to *upaya* there is more effort. Not in *upeya*.

श्रवणादीनां साक्षाद् विद्यासाधनत्वम्

(आ.गिरि - इदानीं गृहस्थाश्रमकर्मणां बहिरङ्गत्वं संन्यासाश्रमकर्मणां तु अन्तरङ्गविद्यासाधनत्वम् इति विशेषं दर्शयितुं चोद्यम् उद्भावयति - कर्मेति) (पूर्वं स्वात्मलाभे तु इत्यादौ अग्निहोत्रादिकर्मणां प्रतिबन्धकदुरितक्षयद्वारा विद्याहेतुत्वम् उक्तम्। तदुपश्रुत्य शङ्कते - कर्मनिमित्तत्वादिति।)। कर्मनिमित्तत्वाद् विद्यायाः यत्नान्तरम् आनर्थक्यम् इति चेत्। (किं तद् यत्नान्तरम् इत्याकाङ्क्षायां संग्रहं विवृणोति - कर्मभ्य एव इति) कर्मभ्यः एव (सच्चिदानन्द - न तु उपायान्तरेण इति पूर्वपक्षिणोऽभिनिवेशः) पूर्वोपचित-दुरितप्रतिबन्धक्षयाद् विद्या उद्पद्यते चेत् कर्मभ्यः पृथग् उपनिषच्छ्रवणादियत्नः अनर्थकः इति चेत्।

> Since actions are the means for the arisal of knowledge, other efforts are meaningless. If it is accepted that knowledge arises due to elimination of obstacles in the form of papas gathered in the past lives by performance of duties, then efforts like listening to scriptures etc. distinct form duties is useless.

Karma is *nimitta* for *vidya*, you say. So you don't require another *yatna* like taking to *sama* etc. *sanyasa* and resorting to *sravana* etc. for *moksha*. *Isvara anugraha* can be attained in many different ways. Karma alone will eliminate all papas and since by *svadhyaya vidhi* he has studied Vedas and so again *sravana* is not necessary. Knowledge will take place. We are talking to *Vaidika*. So other than karma, going to teacher etc. are not necessary.

(श्रवणादिवैयर्थ्यं परिहरति - न इति। ईश्वरप्रसादपदेन तद्धेतुभूत-उपनिषच्छ्रवणादियत्नो लक्ष्यते, ईश्वरप्रसादस्य अननुष्ठेयत्त्वात् श्रवणादियत्नस्य प्रकृतत्वाच्च। तथा च लोके कर्मकृतात्प्रतिबन्धशक्षयादेव विद्या जायते न तु श्रवणादि-अनुष्ठानाद् इति नियमो नास्ति, नास्माभिः तथा अभ्युपगम्यते च इत्यर्थः।) न। नियमाभावाद्। न हि प्रतिबन्धक्षयादेव विद्या उद्पद्यते, न तु ईश्वरप्रसादतपोध्यानादि-अनुष्ठानाद् इति नियमः अस्ति (सच्चिदानन्द - ईश्वरप्रसादः सर्वत्र साधनानां फलदायकः। विशिष्य च अज्ञाननाशक-ज्ञानोत्पत्तौ (गी.भा १०.११) कारणम्। कर्म तु इहजन्मकृतं जन्मान्तरकृतं वा दुरितक्षयद्वारा तत्र कारणम्। अहिंसादयः च अधर्मादिपरिहारेण ज्ञानोत्पत्तौ ज्ञानपरिपाककारणत्वेन ज्ञाननिष्ठायां वा कारणम्।)। (कुत इत्यत आह - अहिंसेति। संन्यासाश्रमकर्मणाम् अहिंसादीनामपि विद्यां प्रति अन्तरङ्गसाधनत्वेन तैः विना कर्मभिः क्षीणपापस्यापि विद्योदय-असंभवाद् इत्यर्थः।) अहिंसाब्रह्मचर्यादीनां च विद्यां प्रति उपकारकत्वात्, (सच्चिदानन्द - अन्तरङ्गसाधनत्वात् इत्यर्थः)। (अहिंसाद्यपेक्षया अपि श्रवणादौ विशेषमभिप्रेत्य आह - साक्षादेवेति। प्रमाणाद्यसंभावनादिलक्षणदृष्ट-प्रतिबन्धनिरासेन विद्यासाधनत्वात् श्रवणादेः आवश्यकता इत्यर्थः) साक्षादेव च (सच्चिदानन्द - न तु कर्मादिवत् परम्परया इत्यर्थः) कारणत्वात् श्रवणमननिदिध्यासनानाम्[२३६]। (उपसंहरति - अत इति। विहितत्व-अविशेषाद् इत्युक्तेः इति अतःशब्दार्थः।) अतः (सच्चिदानन्द - कर्मभ्यः एव केवलम्, उपासनारूपविद्यासहितेभ्यः वा तेभ्यः निश्रेयस-असिद्धेः दुरितप्रतिबन्धक्षयेण विद्योत्पत्तिद्वारा तेषां मोक्षसाधनत्वात्, विद्यायाः च ईश्वरप्रसादादिभ्यः अपि उत्पत्युपपत्तेः, अहिंसादीनां च आश्रमान्तरेषु संपन्नतरत्वात् तेषां अन्तरङ्गसाधनत्वाच्च विद्यां प्रति - इति अतः शब्दार्थः) सिद्धानि आश्रमान्तराणि। सर्वेषां[२३७] (आश्रमिणाम्। मनुष्याणां इत्यर्थः) च अधिकारः (विद्यासाधनकर्मसु सर्वेषाम् आश्रमिणाम् अधिकारः सिद्धः इत्यर्थः) विद्यायाम्। (समुच्चयनिराकरणफलम् उपसंहृतमपि पुनः उपसंहरति

---

[२३६] ज्ञानसाधनानां तारतम्यं - द्रष्टव्यम् बृ.भा १.४.२, गी.भा १०.१०, १०.११, १८.४५, सू.भा ३.४.५१ ४.१.१८

[२३७] द्रष्टव्यम् सू.भा ३.४.२०, मुं.भा अव, गी.भा १८.४५

चिन्तासमाप्तिद्योतनार्थम् - परं श्रेयः इति) परं श्रेयः केवलायाः विद्यायाः (विद्यायाः इति पञ्चमी) एवेति सिद्धम् ।।

No. There is no restrictive rule about it. There is certainly no rule that knowledge arises from the mere elimination of the obstructions alone and not from the grace of the Lord or the practice of austerity, meditation etc.; for non-injury, celibacy etc. are aids towards knowledge. and listening to scriptures, logically analysing and contemplating upon the teaching are the direct means for it. Thus is established the other stages of life and the right to knowledge for people of all stages of life and it is also established that moksha is through knowledge alone.

Agnihotra etc. are able to eliminate obstacles and thereby knowledge takes place - thus there is no rule. *Isvaraprasada* can also be *hetu* for getting the preparedness of mind. *Isvaraprsada* enables *tapas* and *dhyana* etc. *Ahimsa* is the *lakshana* of *sanyasa asramam*. *Naishthika-brahmcarya asrama* etc are also conducive *asramas* for *vidya*. *Sakshat karanam* is *sravana* etc. You cannot avoid it. *Sakshat karanatvam* is *pramanatvam*, being *pramana*. Direct cause for any knowledge is only *pramana*. You cannot circumvent them. So all *asramis* have right to study Vedanta. All human beings have right to this knowledge. The only qualification is head must be over the shoulder. It should not be lost in the stomach. Those who have *viveka*. Otherwise Lord would have reversed the whole process. *Tiryak* in Sanskrit is animal. Meaning head, stomach and neck are in one line horizontally. Head is for survival. But survival is not living. It is being alert to realities. So two things are established. One is *asramantara* is established. The other is *kevala vidya* is *moksha sadhanam*. It is knowledge of free *atma* and not freed *atma*. You are freed. Because there is sense of bondage for you.

TWELFTH ANUVAKA

शान्तिपाठः

शन्नो मित्रः शं वरुणः । शन्नो भवत्वर्यमा । शन्न इन्द्रो बृहस्पतिः । शन्नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्मावादिषम् । ऋतमवादिषम् । सत्यमवादिषम् । तन्मामावीत् । तद्वक्तारमावीत् । आवीन्माम् । आवीद्वक्तारम् । ॐ शान्तिः शान्तिः शान्तिः ।।

शम् - be one who blesses; नः - to us; मित्रः - Mitra; शं - be one who blesses; वरुणः - Varuna; शम् भवतु - be one who blesses; नः - to us; अर्यमा - Aryama; शम् - be one who blesses; नः - to us; इन्द्रः - Indra; बृहस्पतिः - Brhaspati; शम् - be one who blesses; नः - to us; विष्णुः - Visnu; उरुक्रमः - one who has long strides; नमः - surrender; ब्रह्मणे - to Brahman (in the form of Hiranyagarbha); नमः - surrender; ते - to you; वायो - Oh Lord Vayu; त्वम् - you; एव - alone; प्रत्यक्षम् - perceptible; ब्रह्म - Brahman; असि - are; त्वाम् - you; एव - only; प्रत्यक्षम् - perceptible; ब्रह्म अवादिषम् - I declared; ऋतम् - the right understanding; अवादिषम् - I declared (you); सत्यम् - spoken truth; अवादिषम् - I declared (you); तत् - that (Brahman); माम् - me: आवीत् - protected; तत् - that (Brahman); वक्तारम् - the teacher; आवीत् - protected; आवीत् - protected; माम् - me; आवीत् - protected; वक्तारम् - the teacher; ॐ - Lord; शान्तिः - let there be peace; शान्तिः - let there be peace; शान्तिः - let there be peace.

"Let Mitra be the one who blesses us (be the source of happiness). Let Varuna bless us. Let Aryama do good to us. Let Indra bless us. Let Brhaspati do good to us. Let Visnu - one with long strides, bless us. I surrender to Brahman (in the form of Hiranyagarbha). Oh Lord Vayu, I surrender to you. You are the perceptible Brahman. I declared you alone as perceptible Brahman. I declared you to be the right understanding (which is in keeping with the sastra). I declared you to be spoken truth. He (Brahman in the form of prana) protected me (when I was gaining the knowledge). He protected the teacher. He protected me (at the time of gaining the result of the knowledge). He protected the teacher. Let there be peace."

(इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्पादपूज्यपाद-शिष्यश्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषच्छीक्षाध्याय-भाष्ये द्वादशोऽनुवाकः)

(ननु शं नो मित्रः इत्यादिशान्तेः आदौ एव पठितत्वाद् इदानीं पुनः किमर्थं पठ्यते? तत्राह - शं नो मित्र इत्याद्यतीतेति। संहितोपनिषदि अतीतानां विद्यानां प्राप्तौ ये उपसर्गाः विघ्नाः तेषाम् उपशमनाय शं नो मित्रः इत्याद्याः शान्तिः आदौ पठिता इत्यर्थः।) शं नो मित्र इत्याद्यतीतविद्याप्राप्त्युपसर्ग-प्रशमनार्था शान्तिः पठिता। (पुनः पाठः उत्तरार्थः इत्याह - इदनीमिति।)। (यद्यपि पुनः पाठस्यापि पूर्वशेषत्वमेव प्रतीयते आवीन्माम् इत्यादिलिङ्गात्, तथापि अतीतविद्योपसर्गप्रशमनरूपस्य प्रार्थनाप्रयोजनस्य सिद्धत्वाद्, उपक्रमे शं नो भवत्वर्यमा इति प्रार्थनालिङ्गाच्च पुनः पाठस्य उत्तरविद्याशेषत्वम् उक्तमिति मन्तव्यम्। तथा च तन्मामावीत् इत्यादौ तत् वाय्वाख्यमपरं ब्रह्म माम् अपरविद्यार्थिनम् आवीद् अरक्षद् इदानीं परविद्यार्थिनं माम् अवतु इत्यादिप्रकारेण परब्रह्मविद्याशेषत्व-अनुगुणम् उपपादनं

कर्त्तव्यम् इति भावः।) इदानीं तु वक्ष्यमाणब्रह्मविद्या-प्राप्त्युपसर्ग-प्रशमनार्था शान्तिः पठ्यते - शं नो मित्र इति, स ह नाववतु इति च।

(There is another version like *sanno mitra* is read at the end of the *Sikshavalli* in the same form as at the beginning and the revised version is read at the beginning of the second *valli* alongwith *sahananvavatu*). Previously one *santi*. Why again another *santi*. What is wrong in praying again. But in *sastra* why? Earlier it was for warding off / resolving obstructions. It is not to eliminate prefix. Any obstacle is *upasarga*. To eliminate the obstacles in the performance of *upasanas* was taught/chanted. Now this is meant for elimination of obstacles in the study of the *brahmavidya* that is to follow. In everything there is *upasarga*. For any *dhatu* there can be *upasarga*. *Upasarga* changes the meaning. *hru dhatu hara* is garland. *prahara* is beating. The obstacles spoil the action.

Summary

This *upanishad* is divided into three chapters *Sikshavalli, Brahmavalli* and *Bhrguvalli* - named after the beginning of each chapter. The first chapter deals with *uapsanas* and *karmas* which are preparatory steps for the knowledge of Brahman. The main topic of Brahmavidya (knowledge of Brahman) is discussed in the second chapter.)

After peace invocation (section 1) the teacher begins with a brief introduction to *siksha*, the science of phonetics or pronunciation. Since the revelation of truth is through words, one should have correct understanding of every letter and its pronunciation. Hence the teacher says that one should know all the factors necessary for right pronunciation (section 2).

The third section deals with *Smahitopasana* - mediation on the conjunction of Vedic letters. The student is used to Vedic chanting and his mind is soaked in Vedic sounds. Hence they can form ideal symbols of *upasana*. Here the teacher gives an *upasana* on various *devatas*, keeping he conjunction of letters as the symbols i.e., locus. This is an *upasana* with five subsidiary *upasanas* connected with various aspects of creation. Each subsidiary *upasana* involves mediation on four *devatas*. (For details see the chart 1). The whole scheme is considered as one *upasana* in which twenty *devatas* are meditated upon. Hence this is as good as an *upasana* on *Hiranyagarbha*, the total.

These are called great conjunctions. One who meditates thus is blessed with progeny, cattle, food etc. (while living) and heavens (after death). (section 3)

Next, we get a prayer for intelligence. The prayer is addressed to the Lord in the form of Omkara. Moreover the student prays for healthy body and senses so that he can discover his immortal nature. This is followed by a prayer for wealth. This is to be done in the form of *homa*. Through this, one seeks prosperity in the form of cattle, sheep, clothes etc. This is to serve the society either in *grahasthasramam* or *sanyasasrama*. Again with an intention to become a great teacher to maintain the tradition, the student seeks the Lord's blessings so that many students may come to him from various directions with discipline and sincerity. The final prayer to the Lord is Let me purify myself in you and let us merge. Oh Lord May you reveal yourself into me and merge in me. (section 4)

Vyahirti Upasana is the next one. The four *Vyahritis - Bhuh, Bhuvah, Suvah and Mahah* - serve as symbols for meditating on various *devatas*. This is a group of four subsidiary *upasanas* and each one of them relate to four *devatas* with various aspects of creation. (For details see the chart 2) These four subsidiary *upasanas* consisting of 16 *devatas* form one single *upasana* and it is as good as the *upasana* on *Hiranyagarbha*, the total. This is to be supplemented with the following *upasana* given in next *anuvaka*. (section 5)

In the sixth section we have *Hiranyagarbha upasana*. Here the mind is to be taken as the locus of *upasana*. This is to be done along with the previous *upasana*. Through this, one attains oneness with *Hiranyagarbha*. After dropping the body, the *upasaka* travels through the *sushumna nadi*, emerging through the top of the head, he attains oneness with *Agni Vayu, Aditya* and ultimately with *Hiranyagarbha*. Enjoying lordship over all, he attains the greatest peace and joy. Even gods bring offerings to him. This is the highest glory that one can attain through the *upasana* (section 6)

Now follows the *pankta-brahma-upasana*. The entire universe is divided into six groups of five factors each. Each group is known as a *pankta* (group of five) Of these, three are a t the objective level and three are at the subjective level. (For details see chart 3). One should meditate upon the first three as identical with the second. This is also another type of *Hiranyagarbha-upasana* only. The result is also the same viz., oneness with *Hiranyagarbha*.(section 7)

The following section (8) deals with *Omkara-upasana*. *Omkara* should be meditated upon as Brahman. Through this also, one attains the state of *Hiranyagarbha*. The Upanishad talks about the glory of *Omkara* in the following portion. In all rituals, *Omkara* is uttered during Vedic chanting, offering of oblations etc., The very beginning of Vedic studies is with *Omkara*. Its utterance makes all pursuits holy and fruitful. (section 8)

Having elaborately dealt with various *upasanas*, the Upanishad emphasizes the importance of karma in the next section. The study of scriptures, righteousness, truthfulness, austerity, sense control, mind-control, worship, hospitality, service to humanity, maintenance of the family-lineage etc. should be followed. Of them, truthfulness, austerity and study of scriptures and its teaching are considered to be important. (section 9)

Then follows a mantra for *japa*. This is the declaration of sage *Trisanku* after recognising his true nature. The repetition of the mantra prepares the mind for the discovery of its meaning. (section 10).

The last section happens to be in the form of instructions from a teacher to his students. The importance of truthfulness, righteousness, scriptural study, respect to parents, teachers and guests are emphasised here. One should follow the way of life led by noble ones. Charity must be given and that too with right attitude. In situations of conflict one should follow the path of cultured people who are facing the same or similar situations. This is the injunction of the scriptures. One should follow this for the well-being of all. (section 11)

If these *upasanas* and *karmas* are done without desire for material ends, they prepare the mind for Brahmavidya disused in the next chapter.

Chart No 1

	Adhiloka	*Adhijautisha*	*Adhividya*	*Adhipraja*	*Adhyatma*
Former Letter	Earth	Fire	Teacher	Mother	Lower Jaw
Later Letter	Heavens	Sun	Student	Father	Upper Jaw
Junction	Intermediary Space	Water	Knowledge	Progeny	Speech
Link	Air	Lightning	Teaching	Procreation	Tongue

Chart 2

Vyahriti	*Loka-upasana*	*Deva-upasana*	Veda-*upasana*	*Prana-upasana*
Bhuh	Earth	Fire	*Rg*	*Prana*
Bhuvah	Intermediary Space	Air	*Sama*	*Apana*
Suvah	Heavens	Sun	*Yajus*	*Vyana*
Mahah	Sun	Moon	*Omkara*	Food

Chart 3

Loka-panktam	*Deva-panktam*	*Bhuta-panktam*
Earth	Fire	Water
Intermediary Space	Air	Herbs
Heavens	Sun	Trees
Quarters	Moon	Space
Intermediary Quarters	Stars	*Virat*

Vayu-panktam	*Indriya-panktam*	*Dhatu-panktam*
Prana	Eyes	Inner
Vyana	Ears	Flesh
Apana	Mind	Muscle
Udana	Speech	Bone
Samana	Outer-skin	Marrow

TAITTIRIYA UPANISHAD

FIRST ANUVAKA

शान्तिपाठः

शन्नो मित्रः शं वरुणः। शन्नो भवत्वर्यमा। शन्न इन्द्रो बृहस्पतिः। शन्नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम्।

ॐ शान्तिः शान्तिः शान्तिः ।।

SECOND ANUVAKA

शीक्षाध्यायः

शीक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा बलम्। साम सन्तानः। इत्युक्तः शीक्षाध्यायः।

THIRD ANUVAKA

संहितोपासना

सह नौ यशः। सह नौ ब्रह्मवर्चसम्। अथातः संहितायाः उपनिषदं व्याख्यास्यामः। पञ्चस्वधिकरणेषु। अधिलोकमधिज्यौतिषमधिविद्य-मधिप्रजमध्यात्मम्। ता महा-संहिता इत्याचक्षते। अथाधिलोकम्। पृथिवी पूर्वरूपम्। द्यौरुत्तररूपम्। आकाशः सन्धिः । १ । वायुः सन्धानम्। इत्यधिलोकम्। अथाधिज्यौतिषम्। अग्निः पूर्वरूपम्। आदित्य उत्तररूपम्। आपः सन्धिः। वैद्युतः सन्धानम्। इत्यधि-ज्यौतिषम्। अथाधिविद्यम्। आचार्यः पूर्वरूपम्। अन्तेवास्युत्तररूपम्। विद्या सन्धिः। प्रवचनं सन्धानम्। इत्यधिविद्यम्। अथाधिप्रजम्। माता पूर्वरूपम्। पितोत्तररूपम्। प्रजा सन्धिः। प्रजननं सन्धानम्। इत्यधिप्रजम्। ३ । अथाध्यात्मम्। अधराहनुः पूर्वरूपम्। उत्तराहनुरुत्तररूपम्। वाक् सन्धिः। जिह्वा सन्धानम्। इत्यध्यात्मम्। इतीमा महासंहिताः। य एवमेता महासंहिता व्याख्याता वेद। संधीयते प्रजया पशुभिः। ब्रह्मवर्चसेनान्नाद्येन सुवर्ग्येण लोकेन।।

FOURTH ANUVAKA

विविध-जप-होम-मन्त्राः

यश्छन्दसामृषभो विश्वरूपः। छन्दोभ्योऽध्यमृतात् संबभूव। स मेन्द्रो मेधया स्पृणोतु। अमृतस्य देव धारणो भूयासम्। १ । शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरि विश्रुवम्। ब्रह्मणः कोशोऽसि मेधया पिहितः। श्रुतं मे गोपाय। २ । आवहन्ती वितन्वाना। कुर्वाणा चीरमात्मनः। वासांसि मम गावश्च। अन्नपाने च सर्वदा। ततो मे श्रियमावह। लोमशां पशुभिः सह स्वाहा। ३ आमायन्तु ब्रह्मचारिणः स्वाहा। विमायन्तु ब्रह्मचारिणः स्वाहा। प्रमायन्तु ब्रह्मचारिणः स्वाहा। दमायन्तु ब्रह्मचारिणः स्वाहा। शमायन्तु ब्रह्मचारिणः स्वाहा। यशो जनेऽसानि स्वाहा। श्रेयान् वस्यसोऽनि स्वाहा। तं त्वा भग प्रविशानि स्वाहा। स मा भग प्रविश स्वाहा। तस्मिन्त्सहस्रशाखे। निभगाहं त्वयि मृजे स्वाहा। यथापः प्रवता यन्ति। यथा मासा अहर्जरम्। एवं मां ब्रह्मचारिणः। धातरायन्तु सर्वतः स्वाहा। प्रतिवेशोऽसि प्र मा भाहि प्र मा पद्यस्व।

FIFTH ANUVAKA

व्याहृत्यात्ब्रह्मोपासना

भूर्भुवस्सुवरिति वा एतास्तिस्रो व्याहृतयः। तासामु ह स्मै तां चतुर्थीम्। माहाचमस्यः प्रवेदयते। मह इति। तद् ब्रह्म। स आत्मा। अङ्गान्यन्या देवताः। भूरिति वा अयं लोकः। भुव इत्यन्तरिक्षम्। सुवरित्यसौ लोकः। मह इत्यादित्यः। आदित्येन वाव सर्वे लोका महीयन्ते । भूरिति वा अग्निः। भुव इति वायुः। सुवरित्यादित्यः। मह इति चन्द्रमाः। चन्द्रमसा वाव सर्वाणि ज्योतींषि महीयन्ते। भूरिति वा ऋचः। भुव इति सामानि। सुवरिति यजूंषि। मह इति ब्रह्म। ब्रह्मणा वाव सर्वे वेदा महीयन्ते। भूरिति वै प्राणः। भुव इत्यपानः। सुवरिति व्यानः। मह इत्यन्नम्। अन्नेन वाव सर्वे प्राणा महीयन्ते। ता वा एताश्चतस्रश्चतुर्धा। चतस्रश्चतस्रो व्याहृतयः। ता यो वेद। स वेद ब्रह्म। सर्वेऽस्मै देवा बलिमावहन्ति।

SIXTH ANUVAKA

महोब्रह्मोपासने स्थानादि

स य एषोऽन्तर्हृदय आकाशः। तस्मिन्नयं पुरुषो मनोमयः। अमृतो हिरण्मयः। अन्तरेण तालुके। य एष स्तन इवावलम्बते। सेन्द्रयोनिः। यत्रासौ केशान्तो विवर्त्तते। व्यपोह्य शीर्षकपाले। भूरित्यग्नौ प्रतितिष्ठति। भुव इति वायौ। १ । सुवरित्यादित्ये। मह इति ब्रह्मणि । आप्नोति स्वाराज्यम्। आप्नोति मनसस्पतिम्। वाक्पतिश्चक्षुष्पतिः। श्रोत्रपतिर्विज्ञानपतिः। एतत्ततो भवति। आकाशशरीरं ब्रह्म। सत्यात्म प्राणारामं मन आनन्दम्। शान्तिसमृद्धममृतम् । इति प्राचीनयोग्योपास्स्व।

SEVENTH ANUVAKA

पाङ्क्तब्रह्म-उपासना

पृथिव्यन्तरिक्षं द्यौर्दिशोवान्तरदिशाः। अग्निर्वायुरादित्यश्चन्द्रमा नक्षत्राणि। आप ओषधयो वनस्पतय आकाश आत्मा। इत्यधिभूतम्। अथाध्यात्मम्। प्राणो व्यानोऽपान उदानः समानः। चक्षुः श्रोत्रं मनो वाक् त्वक्। चर्म मांसंस्नावास्थि मज्जा। एतदधिविधाय ऋषिरवोचत्। पाङ्क्तं वा इदं सर्वम्। पाङ्क्तेनैव पाङ्क्तं स्पृणोतीति।

EIGHTH ANUVAKA

ओङ्कारोपासनम्

ओमिति ब्रह्म। ओमितीदं सर्वम्। ओमित्येतदनुकृति ह स्म वा अप्यो श्रावयेत्याश्रावयन्ति। ओमिति सामानि गायन्ति। ओंशोमिति शस्त्राणि शंसन्ति। ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति । ओमिति ब्रह्मा प्रसौति। ओमित्यग्नि-होत्रमनुजानाति। ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति। ब्रह्मैवोपाप्नोति।

NINETH ANUVAKA

कर्मणां पुरुषार्थसाधनम्

ऋतं च स्वाध्यायप्रवचने च। सत्यं च स्वाध्यायप्रवचने च। तपश्च स्वाध्यायप्रवचने च। दमश्च स्वाध्यायप्रवचने च। शमश्च स्वाध्यायप्रवचने च। अग्नयश्च स्वाध्यायप्रवचने च। अग्निहोत्रं च स्वाध्यायप्रवचने च। अतिथयश्च स्वाध्याय-प्रवचने च। मानुषं च स्वाध्यायप्रवचने च। प्रजा च स्वाध्यायप्रवचने च। प्रजनश्च च स्वाध्यायप्रवचने च।

प्रजातिश्च स्वाध्यायप्रवचने च। सत्यमिति सत्यवचा राथीतरः। तप इति तपोनित्यः पौरुशिष्टिः। स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः। तद्धि तपस्तद्धि तपः।

TENTH ANUVAKA

त्रिशङ्कोरार्षदर्शनम्

अहं वृक्षस्य रेरिवा। कीर्तिः पृष्ठं गिरेरिव। ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि। द्रविणँ सवर्चसम्। सुमेधा अमृतोक्षितः। इति त्रिशङ्कोर्वेदानुवचनम्।

ELEVENTH ANUVAKA

विद्योत्पत्त्यर्थम् अनुष्ठेयानि कर्माणि

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्। १ । देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि। तानि सेवितव्यानि। नो इतराणि। यान्यस्माकं सुचरितानि। तानि त्वयोपास्यानि। २ । नो इतराणि। ये के चास्मच्छ्रेयांसो ब्राह्मणाः। तेषां त्वयासनेन प्रश्वसितव्यम्। श्रद्धया देयम्। अश्रद्धयादेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्। अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्। ३ । ये तत्र ब्राह्मणाः संमर्शिनः। युक्ता आयुक्ताः। अलूक्षा धर्मकामाः स्युः। यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथाः। अथाभ्याख्यातेषु। ये तत्र ब्राह्मणाः संमर्शिनः। युक्ता आयुक्ताः। अलूक्षा धर्मकामाः स्युः। यथा ते तेषु वर्तेरन्। तथा तेषु वर्तेथाः। एष आदेशः। एष उपदेशः। एषा वेदोपनिषद्। एतदनुशासनम्। एवमुपासितव्यम्। एवमु चैतदुपास्यम्। ४ ।

TWELFTH ANUVAKA

शान्तिपाठः

शन्नो मित्रः शं वरुणः। शन्नो भवत्वर्यमा। शन्न इन्द्रो बृहस्पतिः। शन्नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्मावादिषम्। ऋतमवादिषम्

। सत्यमवादिषम्। तन्मामावीत्। तद्वक्तारमावीत्। आवीन्माम्। आवीद्वक्तारम्। $ शान्तिः शान्तिः शान्तिः ।।

TAITTIRIYA UPANISHAD BHASHYAM

FIRST ANUVAKA

शान्तिपाठः

देवताप्रार्थनम्

शं सुखं प्राणवृत्तेः अहश्चाभिमानी देवदात्मा **मित्रः नः** अस्माकं भवतु। तथैव अपानवृत्तेः रात्रेश्चाभिमानी **वरुणः** । चक्षुषि आदित्ये च **अर्यमा** । बले **इन्द्रः** । वाचि बुद्धौ च **बृहस्पतिः** । **विष्णुः उरुक्रमः** विस्तीर्णक्रमः पादयोरभिमानी। एवमाद्या अध्यात्मदेवताः **शं नः**। भवतु इति सर्वत्र अनुषङ्गः। तासु हि सुखकृत्सु विद्याश्रवणधारणविनियोग-आदयः अप्रतिबन्धेन भविष्यन्ति इति तत्सुखकृत्वं प्रार्थ्यते - शन्नो भवतु इति।

अपरब्रह्मसितुतिः

ब्रह्मविविदुषुणा नमस्कारब्रह्मवदनक्रिये वायुविषये ब्रह्मविद्योपसर्गशान्त्यर्थं क्रियेते सर्वक्रियाफलानां तदधीनत्वात् ब्रह्म वायुः। तस्मै **ब्रह्मणे नमः** प्रह्वीभावं करोमि। **नमः ते** तुभ्यं हे **वायो** नमस्करोमि इति परोक्षप्रत्यक्षाभ्यां वायुरेव अभिधीयते। किं च त्वमेव चक्षुराद्यपेक्षया बाह्यं संनिकृष्टमव्यवहितं **प्रत्यक्षं ब्रह्मासि** यस्मात्, तस्मात् **त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि**। ऋतं यथा शास्त्रं यथाकर्त्तव्यं बुद्धौ सुपरिनिश्चितमर्थं त्वदधीनत्वात् त्वां **वदिष्यामि**। सत्यं इति स एव वाक्कायाभ्यां संपाद्यमानः सोऽपि त्वदधीनः एव संपाद्यते इति त्वामेव सत्यं **वदिष्यामि**। **तत्** सर्वात्मकं वाग्व्याख्यं ब्रह्म मया एवं स्तुतं सत् विद्यार्थिनं **माम् अवतु** विद्यासंयोजनेन। **तद्** एव ब्रह्म **वक्तारम्** आचार्यं च वक्तृत्वसामर्थ्य-संयोजनेन **अवतु**। **अवतु माम्** । **अवतु वक्तारम्** इति पुनर्वचनम् आदरार्थम् ।

शान्त्यभिधानत्रयस्य प्रयोजनम्

शान्तिः शान्तिः शान्तिः इति त्रिर्वचनम् आध्यात्मिक-आधिभौतिक-आधिदैनिकानां विद्या-प्राप्त्युपसर्गाणां प्रशमनार्थम् ।

(इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्पादपूज्यपाद-शिष्यश्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषच्छीक्षाध्याय-भाष्ये प्रथमोऽनुवाकः)

मङ्गलाचरणम्

यस्माज्जातं जगत्सर्वं यस्मिन्नेव प्रलीयते ।
येनेदं धार्यते चैव तस्मै ज्ञानात्मने नमः ।। १
यैरिमे गुरुभिः पूर्वं पदवाक्यप्रमाणतः ।
व्याख्याताः सर्ववेदान्तास्तान्नित्यं प्रणतोस्म्यहम् ।। २
तैत्तिरीयकसारस्य मयाचार्यप्रसादतः ।
विस्पष्टार्थरुचीनां हि व्याख्येयं संप्रणीयते ।। ३

INTRODUCTORY BHASHYA

ग्रन्थसम्बन्धः

नित्यानि अधिगतानि कर्माणि उपात्तदुरितक्षयार्थानि काम्यानि च फलार्थिनां पूर्वस्मिन्ग्रन्थे। इदानीं कर्मोपादानहेतुपरिहाराय ब्रह्मविद्या प्रस्तूयते। कर्महेतुः कामः स्यात्, प्रवर्त्तकत्वात्। आप्तकामानां हि कामाभावे स्वात्मन्यवस्थानात् प्रवृत्यनुपपत्तिः आत्मकामत्वे च आप्त-कामता आत्मा च ब्रह्म तद्विदो हि

परप्राप्तिं वक्ष्यति। अविद्यानिवृत्तौ स्वात्मन्यवस्थानं परप्राप्तिः। "अभयं प्रतिष्ठां विन्दते - तै २.७" "एतमानन्दमयमात्मानमुपसङ्क्रामति - तै २.८" इत्यादिश्रुतेः।

कर्ममीमांसकानां पूर्वपक्षः -

कर्ममात्राद् मोक्षः

पूर्वपक्षः - १

काम्यप्रतिषिद्धयोः अनारम्भात् आरब्ध-फलयोश्च उपभोगेन क्षयात् नित्यानुष्ठानेन च प्रत्यवाय-अभावात् अयत्नतः एव स्वात्मन्यवस्थानं मोक्षः। अथवा, निरतिशयायाः प्रीतेः स्वर्गशब्दवाच्यायाः कर्महेतुत्वात् कर्मभ्यः एव मोक्ष इति चेत्।

पूर्वपक्षः - २

अथवा, निरतिशयायाः प्रीतेः स्वर्गशब्दवाच्यायाः कर्महेतुत्वात् कर्मभ्यः एव मोक्ष इति चेत् ।

सिद्धान्तः - कर्ममात्रान्न मोक्षः

अशेषकर्मक्षपण-असम्भवः

प्रथम-पूर्वपक्षस्य उत्तरः

न; कर्मानेकत्वात्। अनेकानि हि आरब्धफलानि अनारब्धफलानि च, अनेक-जन्मान्तर-कृतानि, विरुद्धफलानि कर्माणि संभवन्ति। अतः तेषु अनारब्धफलानामेकस्मिन्नेव जन्मनि उपभोगेन क्षयासंभवात् शेष-कर्मनिमित्त-शरीरारम्भ-उपपत्तिः। कर्मशेष-सद्भाव-सिद्धिश्च "तद्य इह रमणीयचरणाः" - छा. ५-१०-७ "ततः शेषेण" गौ.धर्म. २.२९ - इत्यादिश्रुतिस्मृतिशतेभ्यश्च ।

नित्यकर्मभिः अनारब्धकर्मक्षपण-असम्भवः

इष्टानिष्टफलानाम् अनारब्धानां क्षयार्थानि नित्यानि इति चेत्, न; अकरणे प्रत्यवायश्रवणात् (पा.भे प्रत्यवाय-शब्दो ह्यनिष्टविषयः is extra)। नित्याकरणनिमित्तस्य प्रत्यवायस्य असुखरूपस्य आगामिनः परिहारार्थानि नित्यानि इति अभ्युपगमात्, न अनारब्धफल-कर्मक्षयार्थानि। यदि नाम अनारब्ध-फलकर्म-क्षयार्थानि नित्यानि तथापि अशुद्धमेव क्षपयेयुः, न शुद्धम्, विरोधाभावात् । न हि इष्टफलस्य कर्मणः शुद्ध-रूपत्वान्नित्यैर्विरोधः उपपद्यते । शुद्धाशुद्धयोर्हि विरोधो युक्तः ।

विद्यां विना कामक्षय-असम्भवाच्च न सर्वकर्मक्षयः -

न च कर्महेतूनां कामानां ज्ञानाभावे निवृत्यसम्भवात् अशेषकर्मक्षय-उपपत्तिः। अनात्मविदो हि कामः न आत्मविदः, (पा.भे- अनात्मफल) फलविषयत्वात् स्वात्मनि च कामानुपपत्तिः, नित्यप्राप्तत्वात्। स्वस्य अयमात्मा (पा.भे- स्वयं च आत्मा) परं ब्रह्म इत्युक्तम् ।

नित्य-अकरणस्य प्रत्यवायजनकत्वमपि न तर्कसहम्

नित्यानां च अकरणमभावः, ततः प्रत्यवाय-अनुपपत्तिः। इति अतः पूर्वोपचित-दुरितेभ्यः प्राप्यमाणायाः प्रत्यवाय-क्रियायाः नित्याकरणं लक्षणमिति शतृप्रत्ययस्य नानुपपत्तिः - "अकुर्वन् विहितं कर्म" इति, अन्यथा हि अभावाद् भावोद्पत्तिः इति सर्वप्रमाणव्याकोपः इत्यतः मुमुक्षोः अयत्नतः स्वात्मन्यवस्थानम् इति अनुपपन्नम्।

आरभ्यस्य स्वर्गस्य न मोक्षत्वम्

यच्चोक्तं निरतिशयप्रीतेः स्वर्गशब्दवाच्यायाः कर्मनिमित्तत्वात् कर्मभ्यः एव मोक्षः इति, तन्न। नित्यत्वाद् मोक्षस्य। न हि नित्यं किंचिदारभ्यते लोके, यदारब्धं तदनित्यमिति। अतो न कर्मारभ्यः मोक्षः।

विद्यासहितकर्मभ्योऽपि न मोक्षः आरभ्यत्वात् तस्य

विद्यासहितानां कर्मणां नित्य-आरम्भसामर्थ्यमिति चेत्, न विरोधात्। नित्यं च आरभ्यते इति विरुद्धम् ।

मोक्षस्य भावरूपत्वाद् अभावदृष्टान्तो न युक्तः

यद्विनष्टं तदेव नोत्पद्यते इति प्रध्वंसाभाववन्नित्यः अपि मोक्षः आरभ्यते एव इति चेत्, न। प्रध्वंसाभावोऽप्यारभ्यते इति न सम्भवति। अभावस्य विशेष-अभावाद्, विकल्पमात्रमेतत्। भाव-प्रतियोगी ह्यभावः। यथा ह्यभिन्नोऽपि भावो घटपटादिभिर्विशेष्यते भिन्न इव घटभावः पटभाव इति, एवं निर्विशेषोप्यभावः क्रियागुणयोगाद् द्रव्यादिवद् विकल्प्यते। न ह्यभावः उत्पलादिवद् विशेषणसह-भावी विशेषणवत्वे भाव एव स्यात् ।

कर्तृनित्यत्वादपि न मोक्षनित्यत्वम्

विद्याकर्मकर्त्तुः नित्यत्वात् विद्याकर्मसंतानजनितमोक्षस्य नित्यत्वमिति चेत्, गङ्गाश्रोतोवत्, न। कर्त्तृत्वस्य दुःखस्वरूपत्वात् कर्त्तृत्व-उपरमे च मोक्षविच्छेदात् ।

अविद्यानिवृत्यर्थम् उपनिषदारम्भणीया

तस्माद् अविद्यादि-कर्म-उपादान-हेतु-निवृत्तौ स्वात्मन्यवस्थानं मोक्षः। स्वयं चात्मा ब्रह्म। तद्विज्ञानाद् अविद्यानिवृत्तिः इति। अतः ब्रह्मविद्यार्था उपनिषदारभ्यते।

उपनिषद्-शब्दनिर्वचनम्

उपनिषदिति विद्या उच्यते, तच्छीलिनां गर्भजन्मजरादि-निशातनात् तदवसादनाद्वा, ब्रह्मणो वा उपनिगमयितृत्वात् उप निषण्णं वा अस्यां परं श्रेयः इति। तदर्थत्वाद् ग्रन्थः अपि उपनिषत्।

SECOND ANUVAKA

शीक्षाध्यायः

सम्बन्ध-भाष्य

अर्थज्ञानप्रधानत्वाद् उपनिषदः ग्रन्थपाठे यत्नोपरमः मा भूद् इति शीक्षाध्यायः आरभ्यते ।

शीक्षाध्याय भाष्य

शिक्षा शिक्ष्यते अनयेति वर्णाद्युच्चारण-लक्षणम्। शिक्ष्यन्ते इति वा शिक्षाः वर्णादयः । शिक्षैव शीक्षा। दैर्घ्यं छान्दसम्। तां शीक्षां व्याख्यास्यामः विस्पष्टम् आसमन्तात् कथयिष्यामः, चक्षिङः ख्याञादिष्टस्य व्याङ्पूर्वस्य व्यक्तवाक्कर्मण एतद्रूपम्। तत्र वर्णः अकारादिः। स्वरः उदात्तादिः। मात्राः ह्रस्वाद्याः। बलं प्रयत्नविशेषः। साम वर्णानां मध्यमवृत्त्या। उच्चारणं समता। संतानः संततिः, संहिता इत्यर्थः। एष शिक्षितव्योऽर्थः शीक्षा यस्मिन्नध्याये सोऽयं शीक्षाध्यायः इति एवम् उक्तः उदितः। उक्तः इति उपसंहारार्थः।

THIRD ANUVAKA

संहितोपासना

उपासनाफल-आशीर्वचनम्

अधुना संहिता-उपनिषदुच्यते। तत्र संहितादि-उपनिषत्परिज्ञाननिमित्तं यत् यशः प्राप्यते, तत् नौ आवयोः शिष्याचार्ययोः सह एव अस्तु। तन्निमित्तं च यत् ब्रह्मवर्चसं तेजः तच्च सह एव अस्तु इति, शिष्य-वचनम् आशीः। शिष्यस्य हि अकृतार्थत्वात् प्रार्थना उपपद्यते। न आचार्यस्य, कृतार्थत्वात्। कृतार्थो हि आचार्यो नाम भवति।

संहितोपासनाप्रकाराः

अथ अनन्तरम् अध्ययन-लक्षण-विधानस्य पूर्ववृत्तस्य, अतः यतः अत्यर्थं ग्रन्थभाविता बुद्धिः न शक्यते सहसा अर्थज्ञानविषये अवतारयितुमित्यतः, संहितायाः उपनिषदं संहिताविषयं दर्शनम् इत्येतत्, ग्रन्थसंनिकृष्टामेव व्याख्यास्यामः। पञ्चसु अधिकरणेषु आश्रयेषु ज्ञानविषयेषु इत्यर्थः। कानि तानि इत्यतः

आह - अधिलोकम् लोकेष्वधि यद्दर्शनम्, तदधिलोकम्. तथा अधिज्यौतिषम् अधिविद्यम्, अधिप्रजम् अध्यात्मम् इति ताः एताः पञ्चविषया उपनिषदः, लोकादिमहावस्तुविषयत्वात् संहिताविषयत्वाच्च महत्यश्च ताः संहिताश्च महासंहिताः इति आचक्षते कथयन्ति वेदविदः।

उपासनाक्रमः

अथ तासां यथोपन्यस्तानां मध्ये अधिलोकं दर्शनमुच्यते। दर्शनक्रमविषयाः अथ शब्दाः (पा.भेद - दर्शनक्रमविवक्षार्थः अथ शब्दः)। पृथिवी पूर्वरूपम्। पूर्वो वर्णः पूर्वरूपम् संहितायाः पूर्ववर्णे पृथिवीदृष्टिः कर्त्तव्या इत्युक्तं भवति। तथा द्यौः उत्तररूपम्। आकाशः अन्तरिक्षलोकः सन्धिः मध्यं पूर्वोत्तररूपयोः। सन्धीयेते अस्मिन् पूर्वोत्तररूपे इति। वायुः सन्धानम् सन्धीयते अनेन इति सन्धानम्। इति अधिलोकं दर्शनम् उक्तम्। अथाधिज्यौतिषम् इत्यादि समानम् ।

संहितोपासनाफलम्

इतीमा इति उक्ताः उपप्रदर्श्यन्ते। यः कश्चित् एवम् एताः महासंहिताः व्याख्याताः वेद उपास्ते। वेद इति उपासनं स्यात्, विज्ञानाधिकारात्, "इति प्राचीनयोग्योपास्व" इति च वचनात्। उपासनं च यथाशास्त्रं तुल्यप्रत्ययसंततिः असंकीर्णा च अतत्प्रत्ययैः शास्त्रोक्त-आलम्बन-विषया च। प्रसिद्धश्च उपासनशब्दार्थः लोके "गुरुमुपास्ते" "राजानमुपास्ते" इति। यो हि गुर्वादीन् संततमुपचरति सः उपास्ते इत्युच्यते। स च फलमाप्नोति उपासनस्य। अतोऽत्रापि य एवं वेद संधीयते प्रजादिभिः स्वर्गान्तैः। प्रजादिफलं प्राप्नोति इत्यर्थः।

FOURTH ANUVAKA

विविध-जप-होम-मन्त्राः

उत्तरग्रन्थसम्बन्धः

"यश्छन्दसाम्" इति मेधाकामस्य श्रीकामस्य च तत्प्राप्तिसाधनजपहोमौ उच्येते। "स मेन्द्रो मेधया स्पृणोतु", "ततो मे श्रियमावह", इति च लिङ्गदर्शनात् ।

मेधाप्रार्थना

यः छन्दसां वेदानाम् ऋषभ इव ऋषभः, प्राधान्यात्, विश्वरूपः सर्वरूपः, सर्ववाग्व्याप्तेः "तद्यथा शङ्कुना"- छा.उप २.२३.३ इति श्रुत्यन्तरात्। अत एव ऋषभत्वमोङ्कारस्य। ओङ्कारो ह्यत्र उपास्यः इति ऋषभादिशब्दैः स्तुतिः न्याय्या एव ओङ्कारस्य। छन्दोभ्यः वेदेभ्यः वेदा ह्यमृतम् तस्माद् अमृताद् अधिसम्बभूव, लोक-देव-वेद-व्याहृतिभ्यः सारिष्ठं जिघृक्षोः प्रजापतेः तपस्यतः ओङ्कारः सारिष्ठत्वेन प्रत्यभादित्यर्थः। न हि नित्यस्य ओङ्कारस्य अञ्जसा एव उत्पत्तिः अवकल्पते। स एवंभूतः ओङ्कारः इन्द्रः सर्वकामेशः परमेश्वरः मा मां मेधया प्रज्ञया स्पृणोतु प्रीणयतु बलयतु वा प्रज्ञाबलं हि प्रार्थ्यते। अमृतस्य अमृतत्वहेतुभूतस्य ब्रह्मज्ञानस्य, तदधिकारात्, हे देव, धारणः धारयिता भूयासं भवेयम् ।

कार्यकरणयोग्यताप्रार्थनम्

किं च शरीरं मे मम विचर्षणं विचक्षणं योग्यमित्येतत्, भूयादिति पुरुषविपरिणामः। जिह्वा मे मधुमत्तमा मधुमती अतिशयेन मधुरभाषिणी इत्यर्थः। कर्णाभ्यां श्रोत्राभ्यां भूरि बहु विश्रुवं व्यश्रवम्, श्रोता भूयासम् इत्यर्थः। आत्मज्ञानयोग्यः कार्यकरणसंघातः अस्तु इति वाक्यार्थः मेधा च तदर्थमेव हि प्रार्थ्यते।

ज्ञानार्थं प्रार्थना

ब्रह्मणः परमात्मनः कोशः असि, असेरिव उपलब्ध्यधिष्ठानत्वात्। त्वं हि ब्रह्मणः प्रतीकम्, त्वयि ब्रह्म उपलभ्यते। मेधया लौकिकप्रज्ञया पिहितः आच्छादितः स त्वं सामान्यप्रज्ञैः अविदिततत्वः इत्यर्थः। श्रुतं श्रवणपूर्वकमात्मज्ञानादिकं विज्ञानं मे गोपाय रक्ष तत्प्राप्त्यविस्मरणादिना। जपार्था एते मन्त्रा मेधाकामस्य

।

श्रीकामस्य होममन्त्राः

होमार्थाः तु अधुना श्रीकामस्य मन्त्रा उच्यन्ते - आवहन्ती आनयन्ती वितन्वाना विस्तारयन्ती तनोतेः तत्कर्मत्वात् कुर्वाणा निर्वर्तयन्ती अचीरम् अचिरम् क्षिप्रमेव, चिरं वा कुर्वाणा आत्मनः मम। किमित्याह - वासांसि वस्त्राणि मम, गावश्च गाश्च इति यावत्, अन्नपाने च सर्वदा। एवमादीनि कुर्वाणा श्रीर्या ताम्। ततः मेधानिर्वर्त्तनात् परम् आवह आनय अमेधसो हि श्रीः अनर्थाय एव इति। किं विशिष्टां च। लोमशां अजाव्यादियुक्ताम् अन्यैश्च पशुभिः सह युक्ताम् आवह इति। अधिकाराद् ओङ्कार एव संबोध्यते। स्वाहाकारो होमार्थ-मन्त्रान्त-ज्ञापनार्थः।

शिष्यागमनार्थं मन्त्राः

आ मा यन्तु आ यन्तु मामिति व्यवहितेन सम्बन्धः ब्रह्मचारिणः। विमायन्तु। प्रमायन्तु। दमायन्तु। शमायन्तु इत्यादि। यशो यशस्वी जने जनेषु असानि भवानि। श्रेयान् प्रशस्यतरः। वस्यसः वसीयसः वसुमत्तराद्वा तेषु मध्ये श्रेयान् असानि इत्यर्थः।

जीवेश्वरैक्यप्रार्थना

किं च, तं ब्रह्मणः कोशभूतं त्वा त्वां हे भग! भगवन्! पूजावन्! प्रविशानि। प्रविश्य च अनन्यः त्वदात्मा एव भवानि इत्यर्थः। सः त्वमपि मा मां भग प्रविश। आवयोरेकत्वमेव अस्तु।

प्रार्थनोपसंहारः

तस्मिन् त्वयि सहस्रशाखे बहुभेदे निमृजे शोधयामि अहं पापकृत्याम्। यथा आपः प्रवता प्रवणता निम्नवता देशेन यन्ति गच्छन्ति। यथा च मासाः अहर्जरम् संवत्सरो अहर्जरः। अहोभिः परिवर्त्तमानः लोकान् जरयति इति । अहानि वा अस्मिन् जीर्यन्ति अन्तर्भवन्ति इति अहर्जरः। तं यथा मासाः यन्ति एवं मां ब्रह्मचारिणः हे धातः! सर्वस्य विधातः! माम् आयन्तु आगच्छन्तु सर्वतः सर्वदिग्भ्यः। प्रतिवेशः श्रमापनयनस्थानम् आसन्नं गृहमित्यर्थः, एवं त्वं प्रतिवेश इव त्वच्छीलिनां सर्वपापदुःख-अपनयनस्थानम् असि। अतो मा मां प्रति प्रभाहि प्रकाशय आत्मानम्। प्र मा पद्यस्व प्रपद्यस्व च माम्। रसविद्धमिव लोहं त्वन्मयं त्वदात्मानं कुरु इत्यर्थः। श्रीकामः अस्मिन् विद्याप्रकरणे अभिधीयमानः धनार्थः। धनं च कर्मार्थम्। कर्म च उपात्तदुरितक्षयार्थम्। तत्क्षये हि विद्या प्रकाशते। तथा च स्मृतिः "ज्ञानमुत्पद्यते पुंसः क्षयात् पापस्य कर्मणः। यथादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि" इति (महाभारत शा. २०४-८)

FIFTH ANUVAKA

व्याहृत्यात्मब्रह्मोपासना

अनुवाकसंबन्धः

संहिताविषयम् उपासनमुक्तम्। तदनु मेधाकामस्य श्रीकामस्य च अनुक्रान्ताः मन्त्राः। ते च पारम्पर्येण विद्या-उपयोगार्थाः एव। अनन्तरं व्याहृत्यात्मनः ब्रह्मणः अन्तरुपासनं स्वाराज्यफलं प्रस्तूयते।

चतस्रः व्याहृतयः

भूर्भुवस्सुवरिति। इति इति उक्तप्रदर्शनार्थः। एतास्तिस्रो इति प्रदर्शितानां परामर्शार्थः। परामृष्टाः स्मार्यन्ते वै इत्यनेन। तिस्रः एताः प्रसिद्धाः व्याहृतयः स्मार्यन्ते तावत्। तासाम् इयं चतुर्थी व्याहृतिः मह इति। ताम् एतां चतुर्थीं महाचमसस्य अपत्यं माहाचमस्यः प्रवेदयते। उ ह स्म इत्येषां वृत्त-अनुकथनार्थत्वात् विदितवान् ददर्श इत्यर्थः। माहाचमस्यग्रहणम् आर्ष-अनुस्मरणार्थम्, ऋष्यनुस्मरणमपि उपासनाङ्गमिति गम्यते इह उपदेशात् ।

मह इति व्याहृतेः प्राधान्यम्

येयं माहाचमस्येन दृष्टा व्याहृतिः मह इति, तत् ब्रह्म महद्धि किल ब्रह्म। महती च व्याहृतिः। किं पुनस्तत्? स आत्मा । आप्नोतेः व्याप्तिकर्मणः आत्मा। इतराश्च व्याहृतयः लोकाः देवाः वेदाः प्राणाश्च मह इत्यनेन व्याहृत्यात्मना आदित्यचन्द्रब्रह्मान्नभूतेन व्याप्यन्ते यतः, अतः अङ्गानि अवयवाः अन्या देवताः । देवताग्रहणमुपलक्षणार्थं लोकादीनाम् ।

चतसृणां व्याहृतीनां प्रत्येकं चतुष्प्रकारत्वम्

मह इत्येतस्य व्याहृत्यात्मनो देवा लोकादयश्च सर्वे अवयवभूताः। यतः आह आदित्यादिभिः लोकादयो महीयन्ते इति आत्मना ह्यङ्गानि महीयन्ते। महनं वृद्धिः उपचयः। महीयन्ते वर्धन्ते इत्यर्थः। अयं लोकः अग्निः, ऋग्वेदः, प्राणः, इति प्रथमा व्याहृतिः, भूरिति। एवमुत्तरा एकैकशः चतुर्धा भवन्ति। मह इति ब्रह्म। ब्रह्म इति ओङ्कारः, शब्दाधिकारे अन्यस्य असम्भवात्। उक्तार्थमन्यत्।

चतसृणां व्याहृतीनां प्रत्येकं चतुष्प्रकारत्वम्

ता वा एताश्चतस्रश्चतुर्धा इति। ता वै एताः भूर्भुवस्सुवर्महः इति चतस्रः एकैकशः चतुर्धा चतुःप्रकाराः। धा-शब्दः प्रकारवचनः। चतस्रश्चतस्रः सत्यः चतुर्धा भवन्ति इत्यर्थः। तासां यथाक्लृप्तानां पुनरुपदेशः तथैव उपासन-नियमार्थः।

व्याहृत्युपासनं वक्ष्यमाणविशेषणसहितम् एकमेव

ताः यथोक्ताः व्याहृतीः यः वेद स वेद विजानाति। किम्। ब्रह्म। ननु "तद् ब्रह्म स आत्मा" इति ज्ञाते ब्रह्मणि न वक्तव्यम् अविज्ञातवत् "स वेद ब्रह्म" इति। न। तद्विशेषविवक्षुत्वाद् अदोषः। सत्यम् विज्ञातं चतुर्थव्याहृत्यात्मा ब्रह्मेति। न तु तद्विशेषः, हृदयान्तरुपलभ्यत्व-मनोमयत्वादिः शान्ति-समृद्धमित्येवमन्तः विशेषणविशेष्यरूपः धर्मपूगः, विज्ञायते इति। तद्विवक्षु हि शास्त्रम् अविज्ञातमिव ब्रह्म मत्वा "स वेद ब्रह्म" इत्याह । अतो न दोषः । यो हि वक्ष्यमाणेन धर्मपूगेन विशिष्टं ब्रह्म वेद स वेद ब्रह्म इत्यभिप्रायः। अतो वक्ष्यमाण-अनुवाकेन एकवाक्यता अस्य। उभयोर्ह्यनुवाकयोरेकम् उपासनम्। लिङ्गाच्च "भूरित्यग्नौ प्रतितिष्ठति" इत्यादिकं लिङ्गम् उपासनैकत्वे। विधायकाभावाच्च। न हि "वेद", "उपासीत", इति वा विधायकः कश्चिच्छब्दः अस्ति व्याहृत्यनुवाके। "ता यो वेद" इति तु वक्ष्यमाणार्थत्वाद् न उपासना-भेदकः। वक्ष्यमाणार्थत्वं च "तद्विशेष-विवक्षुत्वाद्" इत्यादिना उक्तम्।

अङ्गोपासनाफलम्

सर्वे देवाः अस्मै एवं विदुषे अङ्गभूताः आवहन्ति आनयन्ति बलिम्। स्वाराज्यप्राप्तौ सत्यामित्यर्थः।

SIXTH ANUVAKA

महोब्रह्मोपासने स्थानादि

सम्बन्धभाष्य

भूर्भुवःसुवःस्वरूपा मह इत्येतस्य व्याहृत्यात्मनो ब्रह्मणोऽङ्गान्यन्या देवता इत्युक्तम्। यस्य ता अङ्गभूताः तस्य एतस्य ब्रह्मणः साक्षादुपलब्ध्यर्थम् उपासनार्थं च हृदयाकाशः स्थानमुच्यते, सालग्राम इव विष्णोः, तस्मिन् हि तद्ब्रह्म उपास्यमानं मनोमयत्वादिधर्मविशिष्टं साक्षादुपलभ्यते, पाणाविव आमलकम्। मार्गश्च सर्वात्मभाव-प्रतिपत्तये वक्तव्यः इत्यनुवाकः आरभ्यते।

व्याहृत्यात्मनो ब्रह्मण- उपलब्धिस्थानम् विशेषणानि च

स इति व्युत्क्रम्य अयं पुरुषः इत्यनेन संबध्यते । य एषः अन्तर्हृदये हृदयस्यान्तः। हृदयमिति पुण्डरीक-आकारो मांसपिण्डः प्राणायतनः अनेकनाडीसुषिरः ऊर्ध्वनालः अधोमुखः विशस्यमाने पशौ प्रसिद्धः उपलभ्यते। तस्य अन्तः य एष आकाशः प्रसिद्ध एव करकाकाशवत्। तस्मिन् सः अयं पुरुषः, पुरि

शयनात्, पूर्णत्वात्, पूर्णा वा भूरादयः लोकाः येनेति, पुरुषः। मनोमयः मनो ज्ञानं मनुतेर्ज्ञानकर्मणः, तन्मयः तत्प्रायः तदुपलभ्यत्वात्। मनुते अनेन इति वा मनः अन्तःकरणम् तदभिमानी तन्मयः। तल्लिङ्गो वा। अमृतः अमरणधर्मा। हिरण्मयः ज्योतिर्मयः।

उपासकस्य ब्रह्मप्राप्तये नाडीमार्गः

तस्यैवंलक्षणस्य हृदयाकाशे साक्षात्कृतस्य विदुषः आत्मभूतस्य इन्द्ररूपस्य ईदृशस्वरूपप्रतिपत्तये मार्गः अभिधीयते - सुषुम्ना नाडी योगशास्त्रेषु प्रसिद्धा। सा च अन्तरेण मध्ये तालुके तालुकयोः गता। यः च एषः तालुकयोर्मध्ये स्तन इव अवलम्बते मांसखण्डः तस्य च अन्तरेण इत्येतत्। यत्र च केशान्तः केशानामन्तः अवसानं मूलं विवर्त्तते विभागेन वर्त्तते मूर्धप्रदेशः इत्यर्थः। तं देशं प्राप्यमाणा तेन अन्तरेण व्यपोह्य विभज्य विदार्य शीर्षकपाले शिरःकपाले निर्गता या सा इन्द्रयोनिः। इन्द्रस्य ब्रह्मणः योनिः मार्गः स्वरूपप्रतिपत्तिद्वारम् इत्यर्थः।

उपासनाफलम्

तया एवं विद्वान् मनोमयात्मदर्शी मूर्ध्नो विनिष्क्रम्य अस्य लोकस्य अधिष्ठाता भूरिति व्याहृतिरूपो योऽग्निः महतो ब्रह्मणोऽङ्गभूतः तस्मिन् अग्नौ प्रतितिष्ठति अग्न्यात्मना इमं लोकं व्याप्नोति इत्यर्थः। तथा भुव इति द्वितीयव्याहृत्यात्मनि वायौ प्रतितिष्ठति इत्यनुवर्त्तते। सुवरिति तृतीयव्याहृत्यात्मनि आदित्ये। मह इति अङ्गिनि चतुर्थव्याहृत्यात्मनि ब्रह्मणि प्रतितिष्ठति इति। तेषु आत्मभावेन स्थित्वा, आप्नोति ब्रह्मभूतः स्वाराज्यं स्वराड्भावं स्वयमेव राजा अधिपतिः भवति अङ्गभूतानां देवतानां, यथा ब्रह्म, देवाश्च सर्वे अस्मै अङ्गिने बलिमावहन्ति अङ्गभूताः यथा ब्रह्मणे। आप्नोति मनसस्पतिम्। सर्वेषां हि मनसां पतिः सर्वात्मकत्वाद् ब्रह्मणः सर्वैः हि मनोभिः तद् मनुते। किं च वाक्पतिः। सर्वासां वाचां पतिर्भवति। तथैव चक्षुष्पतिः चक्षुषां पतिः। श्रोत्राणां च विज्ञानानां च पतिः सर्वात्मकत्वात्। सर्वप्राणिनां करणैः तद्वान् भवति इत्यर्थः।

मनोमयात्मनो विशेषणान्तराणि

किं च ततः अपि अधिकतरम् एतद् भवति। किं तत्? उच्यत्। आकाशशरीरं। आकाशः शरीरमस्य आकाशवद्वा सूक्ष्मं शरीरमस्य इत्याकाशशरीरम्। किं तत्?। प्रकृतं ब्रह्म। सत्यात्म। सत्यं मूर्तामूर्तम् अवितथं स्वरूपं वा आत्मा स्वभावः यस्य तदिदं सत्यात्म। प्राणारामम्। प्राणेषु आरमणम् आक्रीडा यस्य तत्प्राणारामम्। प्राणानां वा आरामः यस्मिन् तत्प्राणारामम्। मनआनन्दम्। आनन्दभूतं सुखकृदेव यस्य मनः तन्मनआनन्दम्। शान्तिसमृद्धम्। शान्तिः उपशमः शान्तिश्च तत्समृद्धं च शान्तिसमृद्धम्। शान्त्या वा समृद्धवदुपलभ्यते इति शान्तिसमृद्धम्। अमृतम् अमरणधर्मः। एतच्च अधिकतरविशेषणं तत्रैव मनोमयः इत्यादौ द्रष्टव्यम्।

उपासनोपदेशविधिः उपसंहारश्च

इति एवं मनोमयत्वादिधर्मैः विशिष्टं यथोक्तं ब्रह्म हे प्राचीनयोग्य उपास्स्व इति आचार्यवचनोक्तिः आदरार्था। उक्त एव उपासनशब्दार्थः।

SEVENTH ANUVAKA

पाङ्क्तब्रह्म-उपासना

अनुवाकविषयः

यदेतद्-व्याहृत्यात्मकं ब्रह्मोपासनमुक्तं तस्यैव इदानीं पृथिव्यादिपाङ्क्तस्वरूपेण उपासनमुच्यते। पञ्च-संख्यायोगात् पङ्क्तिच्छन्दःसंपत्तिः। ततः पाङ्क्त्वं सर्वस्य पाङ्क्तश्च यज्ञः। "पञ्चाक्षरा पङ्क्तिः" (पा.भेद - पञ्चपदा पङ्क्तिः) तै.सं १.५.२, "पाङ्क्तो यज्ञः" बृ.उप १.४.१७ इति श्रुतेः। यत्सर्वं

लोकाद्यात्मान्तं च पाङ्क्तं परिकल्पयति। तेन यज्ञेन परिकल्पितेन पाङ्क्तात्मकं प्रजापतिमभिसंपद्यते तत्कथं पाङ्क्तमिदं सर्व इत्यत आह - ।

बाह्यपाङ्क्तत्रयम्

पृथिवी अन्तरिक्षं द्यौः दिशः अवान्तरदिशाः इति लोकपाङ्क्तम्। अग्निः वायुः आदित्यश्चन्द्रमा नक्षत्राणि इति देवतापाङ्क्तम्। आपः ओषधयो वनस्पतयः आकाशः आत्मा इति भूतपाङ्क्तम्। आत्मेति विराड् भूताधिकारात्। इत्यधिभूतम् इति अधिलोक-अधिदैवतपाङ्क्तद्वय-उपलक्षणार्थम्। लोकदेवता-पाङ्क्तयोश्चाभिहितत्वात्।

आध्यात्मिकपाङ्क्तत्रयम्

अथ अनन्तरम् अध्यात्मं पाङ्क्तत्रयम् उच्यते। प्राणादि वायुपाङ्क्तम्। चक्षुरादि-इन्द्रियपाङ्क्तम्। चर्मादि धातुपाङ्क्तम्।

पाङ्क्तोपासनफलम्

एतावद्धीदं सर्वमध्यात्मम् बाह्यं च पाङ्क्तमेव इति। एतद् एवम् अधिविधाय परिकल्प्य ऋषिः वेदः एतद्दर्शनसंपन्नो वा कश्चिदृषिः अवोचत् उक्तवान्। किमित्याह - पाङ्क्तं वा इदं सर्वम्। पाङ्क्तेनैव आध्यात्मिकेन संख्यासामान्यात् पाङ्क्तं बाह्यं स्पृणोति बलयति पूरयति। एकात्मतया उपलभते इति। एतद् एवं पाङ्क्तम् इदं सर्वम् इति यो वेद स प्रजापत्यात्मा एव भवति इत्यर्थः।

EIGHTH ANUVAKA

ओङ्कारोपासनम्

संबन्ध-भाष्य - अनुवाकविषयः

व्याहृत्यात्मनो ब्रह्मण उपासनमुक्तम्। अनन्तरं च पाङ्क्तस्वरूपेण तस्यैव उपासनमुक्तम्। इदानीं सर्वोपासन-अङ्गभूतस्य ओङ्कारस्य उपासनं विधित्स्यते, परापरब्रह्मदृष्ट्या हि उपास्यमानः ओङ्कारः, शब्दमात्रोपि परापरब्रह्मप्राप्तिसाधनं भवति। स हि आलम्बनं ब्रह्मणः परस्यापरस्य च प्रतिमेव विष्णोः। एतेनैवायतनेन एकतरमन्वेति (प्र.उ. ५.२) इति श्रुतेः।

ओङ्कारोपासनाविधिः

ओमिति । इति-शब्दः स्वरूप-परिच्छेदार्थः । ओम् इत्येतत् शब्दरूपं ब्रह्म इति मनसा धारयेत्। यतः ओमितीदं सर्वम् । सर्वं हि शब्दस्वरूपम् ओङ्कारेण व्याप्तम्। "तद्यथा शङ्कुना" इति श्रुत्यन्तरात् छा.२.२३.३। अभिधानतन्त्रं हि अभिधेयम् इति, अतः इदं सर्वमोङ्कार इत्युच्यते।

ओङ्कारस्तुतिः

ओङ्कारस्तुत्यर्थम् उत्तरो ग्रन्थः उपास्यत्वात्तस्य। ओमित्येतद् अनुकृतिः अनुकरणम्, "करोमि" "यास्यामि" वा इति कृतम् उक्तम् ओमिति अनुकरोत्यन्यः, अतः ओङ्कारः अनुकृतिः। ह स्म वै इति प्रसिद्ध-अवद्योतकाः। प्रसिद्धं हि ओङ्कारस्य अनुकृतित्वम्। अपि च, "ओ श्रावय" इति प्रैषपूर्वकम् आश्रावयन्ति प्रतिश्रावयन्ति। तथा ओमिति सामानि गायन्ति सामगाः। ओं शोमिति शस्त्राणि शंसन्ति शस्त्रशंसितारोऽपि। तथा ओमिति अध्वर्युः प्रतिगरं प्रतिगृणाति । ओमिति ब्रह्मा प्रसौति अनुजानाति। ओमिति अग्निहोत्रम् अनुजानाति "जुहोमि" इत्युक्ते "ओम्" इत्येव अनुज्ञां प्रयच्छति। ओमिति एव ब्राह्मणः प्रवक्ष्यन् प्रवचनं करिष्यन् अध्येष्यमाणः ओमित्येव आह। ओमिति प्रतिपद्यते अध्येतुम् इत्यर्थः। ब्रह्म वेदम् उपाप्नवानि उपाप्नुयाम् ग्रहीष्यामि इति, उपाप्नोत्येव ब्रह्म। अथवा ब्रह्म परमात्मानम् उपाप्नवानि इति आत्मानं प्रवक्ष्यन् प्रापयिषयन् ओमित्येव आह। स च तेन ओङ्कारेण ब्रह्म (उपाप्नोति)

प्राप्नोति एव। ओङ्कारपूर्वप्रवृत्तानां क्रियाणां फलवत्वं यस्मात् तस्माद् ओङ्कारं ब्रह्म इति उपासीत इति वाक्यार्थः।

NINETH ANUVAKA

कर्मणां पुरुषार्थसाधनम्

अनुवाकविषयः

विज्ञानादेवाप्नोति स्वाराज्यम् इति उक्तत्वात् श्रौतस्मार्तानां कर्मणाम् आनर्थक्यं प्राप्तम् इति अतः तद् मा प्रापद् इति कर्मणां पुरुषार्थं प्रति साधनत्वप्रदर्शनार्थमिह उपन्यासः।

मुमुक्षुणा अवश्यानुष्ठेयानि कर्माणि

ऋतम् इति व्याख्यातम्। स्वाध्यायः अध्ययनम्। प्रवचनम् अध्यापनम् ब्रह्मयज्ञो वा। एतानि ऋतादीनि अनुष्ठेयानि इति वाक्यशेषः। सत्यं च सत्यवचनम्, यथाव्याख्यातार्थं वा। तपः कृच्छ्रादि। दमः बाह्य-करण-उपशमः। शमः अन्तःकरण-उपशमः। अग्नयश्च आधातव्याः। अग्निहोत्रं च होतव्यम्। अतिथयश्च पूज्याः। मानुषम् इति लौकिकः संव्यवहारः। तच्च यथाप्राप्तम् अनुष्ठेयम्। प्रजाश्च उत्पाद्याः। प्रजनः प्रजननम्। ऋतौ भार्यागनमम् इत्यर्थः। प्रजातिः पौत्रोत्पत्तिः, पुत्रो निवेशयितव्यः इत्येतत्।

स्वाध्यायप्रवचनयोः प्राधान्यम्

सर्वैः एतैः कर्मभिः युक्तस्यापि स्वध्यायप्रवचने यत्नतः अनुष्ठेये इत्येवमर्थं सर्वेण सह स्वध्याय-प्रवचनग्रहणम्। स्वाध्याय-अधीनं हि अर्थज्ञानम्। अर्थज्ञानायत्तं च परं श्रेयः। प्रवचनं च तदविस्मरणार्थं धर्मवृद्ध्यर्थं च। अतः स्वध्यायप्रवचनयोः आदरः कार्यः। सत्यमिति सत्यमेव अनुष्ठेयमिति सत्यवचाः सत्यमेव वचः यस्य सोऽयं सत्यवचाः, नाम वा तत् तस्य। राथीतरः रथीतरगोत्रः राथीतरः आचार्यः मन्यते। तप इति तप एव कर्तव्यमिति तपोनित्यः तपसि नित्यः तपःपरः तपोनित्य इति वा नाम, पौरुशिष्टिः पुरुशिष्टस्य अपत्यं पौरुशिष्टिः आचार्यः मन्यते। स्वाध्यायप्रवचने एव अनुष्ठेये इति नाको नामतः मुद्गलस्य अपत्यं मौद्गल्यः आचार्यः मन्यते। तद्धि तपस्तद्धि तपः । यस्मात् स्वाध्यायप्रवचने एव तपः तस्मात् ते एव अनुष्ठेये इति। उक्तानामपि सत्यतपःस्वाध्यायप्रवचनानां पुनर् ग्रहणम् आदरार्थम् ।

TENTH ANUVAKA

त्रिशङ्कोरार्षदर्शनम्

मन्त्राम्नायः जपार्थः

अहं वृक्षस्य रेरिवा इति स्वाध्यायार्थो मन्त्राम्नायः। स्वाध्यायश्च विद्योत्पत्तये, प्रकरणात्। विद्यार्थं हि इदं प्रकरणम्। न च अन्यार्थत्वम् अवगम्यते। स्वाध्यायेन च विशुद्धसत्वस्य विद्योत्पत्तिः अवकल्पते ।

त्रिशङ्कोः आत्मदर्शनम्

अहं वृक्षस्य उच्छेद्यात्मकस्य संसारवृक्षस्य रेरिवा प्रेरयिता अन्तर्याम्यात्मना। कीर्त्तिः ख्यातिः गिरेः पृष्ठम् इव उच्छ्रिता मम। ऊर्ध्वम् कारणं पवित्रं पावनं ज्ञानप्रकाश्यं परं ब्रह्म यस्य सर्वात्मनो मम, सोऽहमूर्ध्वपवित्रः। वाजिनि इव वाजवति इव, वाजमन्नम् तद्वति सवितरि इत्यर्थः। यथा सवितरि अमृतम् आत्मतत्वं विशुद्धं प्रसिद्धं श्रुतिस्मृतिशतेभ्यः, एवं स्वमृतं शोभनं विशुद्धम् आत्मतत्वम् अस्मि भवामि। द्रविणं धनं सवर्चसं दीप्तिमत् तदेव आत्मतत्वम्। अस्मि इत्यनुवर्तते। ब्रह्मज्ञानं वा अमृतत्व-प्रकाशकत्वात् सवर्चसम्, द्रविणमिव द्रविणम्, मोक्षसुखहेतुत्वात्। अस्मिन् पक्षे मया प्राप्तम् इति

अध्याहारः कर्तव्यः। सुमेधाः शोभना मेधा सार्वज्ञ्यलक्षणा यस्य मम, सोऽहं सुमेधाः। संसार-स्थित्युत्पत्त्युपसंहार-कौशलयोगात् सुमेधस्त्वम्। अत एव अमृतः अमरणधर्मा, अक्षितः अक्षीणः अव्ययः, अक्षतो वा, अमृतेन वा उक्षितः सिक्तः अमृतोक्षितः अहम्। इति इत्यादि ब्राह्मणम्। इति एवं त्रिशङ्कोः ऋषेः ब्रह्मभूतस्य ब्रह्मविदः वेदः वेदनम् आत्मैकत्वविज्ञानं, तस्य प्राप्तिम् अनु वचनं वेदानुवचनम्, आत्मनः कृतकृत्यताख्यापनार्थम्, वामदेववत् (ऐ.२.१.४ बृ.उप १.४.१०)। त्रिशङ्कुना आर्षेण दर्शनेन दृष्टः मन्त्राम्नायः आत्मविद्याप्रकाशकः इत्यर्थः।

कर्मणः (परम्परया) ज्ञानहेतुत्वम्

अस्य च जपः विद्योत्पत्यर्थः अवगम्यते। ऋतं च इत्यादि कर्मोपासनादनन्तरं च वेदानुवचन-पाठादेतद् अवगम्यते - एवं श्रौतस्मार्तेषु नित्येषु कर्मसु युक्तस्य निष्कामस्य परं ब्रह्म विविदिषोः आर्षदर्शनानि प्रादुर्भवन्ति आत्मादिविषयाणि इति।

ELEVENTH ANUVAKA

विद्योत्पत्त्यर्थमनुष्ठेयानि कर्माणि

सत्यादिकर्त्तव्य-उपदेशप्रयोजनम्

वेदमनूच्य इत्येवमादि कर्त्तव्यता-उपदेशारम्भः प्राग्ब्रह्मविज्ञानाद् नियमेन कर्त्तव्यानि श्रौतस्मार्त्तानि कर्माणि इत्येवमर्थः। पुरुषसंस्कारार्थत्वात्। संस्कृतस्य हि विशुद्धसत्वस्य आत्मविज्ञानम् अञ्जसा एव उत्पद्यते। "तपसा कल्मषं हन्ति विद्यया अमृतमश्नुते" (मनु १२.१०४) इति हि स्मृतिः। वक्ष्यति च "तपसा ब्रह्म विजिज्ञासस्व" (तै ३.२) इति। अतो विद्योत्पत्त्यर्थमनुष्ठेयानि कर्माणि। अनुशास्ति इति अनुशासनशब्दात्। अनुशासन-अतिक्रमे हि दोषोत्पत्तिः। प्रागुपन्यासाच्च कर्मणाम्, केवल-ब्रह्मविद्यारम्भाच्च पूर्वं कर्माण्युपन्यस्तानि। उदितायां च ब्रह्मविद्यायाम् "अभयं प्रतिष्ठां विन्दते" (तै २.७) "न बिभेति कुतश्चन" (तै २.९), "किमहं साधु नाकरवम्" (तै २.९) इत्यादिना कर्मनैष्किंचन्यं दर्शयिष्यति। अतः अवगम्यते - पूर्वोपचितदुरितक्षयद्वारेण विद्योत्पत्त्यर्थानि। मन्त्रवर्णाच्च, "अविद्यया मृत्युं तीर्त्वा विद्यया अमृतमश्नुते" इति (ईश. ११)।

द्विःकर्मोपदेशप्रयोजनम्

ऋतादीनां पूर्वत्र उपदेशः आनर्थक्यपरिहारार्थः । इह तु ज्ञानोत्पत्ति-अर्थत्वात् कर्त्तव्यता-नियमार्थः ।

सत्यादीनि अनुष्ठेयानि

वेदम् अनूच्य अध्याप्य आचार्यः अन्तेवासिनम् शिष्यम् अनुशास्ति ग्रन्थग्रहणात् अनु पश्चात् शास्ति तदर्थं ग्राहयति इत्यर्थः। अतोऽवगम्यते अधीतवेदस्य धर्म-जिज्ञासाम् अकृत्वा गुरुकुलान्न समावर्त्तितव्यमिति। "बुद्ध्वा कर्माणि कुर्वीत" इति (आपस्तम्ब २.२१.५) स्मृतेः च। कथमनुशास्ति इत्याह - सत्यं वद यथा-प्रमाण-अवगतं वक्तव्यं च वद। तद्वत् धर्मं चर। धर्म इत्यनुष्ठेयानां सामान्यवचनम्। सत्यादि-विशेष-निर्देशात्। स्वाध्यायाद् अध्ययनाद् मा प्रमदः प्रमादं मा कार्षीः। आचार्याय आचार्यार्थं प्रियं इष्टं धनमाहृत्य आनीय दत्त्वा विद्यानिष्क्रयार्थम् आचार्येण च अनुज्ञातः अनुरूपान् दारान् आहृत्य प्रजातन्तुं प्रजासंतानं मा व्यवच्छेत्सीः प्रजासंततेः विच्छित्तिः न कर्त्तव्या अनुद्पद्यमानेऽपि पुत्रे पुत्रकाम्यादिकर्मणा तदुत्पत्तौ यत्नः कर्त्तव्यः इत्यभिप्रायः। प्रजा-प्रजनन-प्रजातिनिर्देशसामर्थ्यात्। अन्यथा प्रजनश्च इत्येतत् एकमेव अवक्ष्यत्। सत्याद् न प्रमदितव्यम् प्रमादो न कर्त्तव्यः। सत्याच्च प्रमदनम् अनृतप्रसङ्गः। प्रमादशब्दसामर्थ्याद् विस्मृत्यापि अनृतं न वक्तव्यम् इत्यर्थः। अन्यथा असत्यवदनप्रतिषेध एव स्यात्। धर्माद् न प्रमदितव्यम्। धर्मशब्दस्य अनुष्ठेय-विशेष-विषयत्वाद् अननुष्ठानं प्रमादः। स न कर्त्तव्यः। अनुष्ठातव्यः एव। कुशलाद् आत्मरक्षणार्थात् कर्मणः न

प्रमदितव्यम्। भूतिः विभूतिः तस्यै भूत्यै भूत्यर्थाद् मङ्गलार्थात् कर्मणः न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्। ते हि नियमेन कर्त्तव्ये इत्यर्थः। देवपितृकार्याभ्यां न प्रमदितव्यम्। दैवपित्र्ये कर्मणी कर्त्तव्ये। मातृदेवः माता देवो यस्य सः त्वं मातृदेवो भव स्याः भव। एवं पितृदेवः आचार्यदेवः अतिथिदेवः भव। देवतावद् उपास्याः एते इत्यर्थः। यानि अपि च अन्यानि अनवद्यानि अनिन्दितानि शिष्टाचारलक्षणानि कर्माणि। तानि सेवितव्यानि कर्त्तव्यानि त्वया। नो अकर्त्तव्यानि इतराणि सावद्यानि शिष्टकृतान्यपि। यानि अस्माकम् आचार्याणां सुचरितानि शोभनचरितानि आम्नायाद्यविरुद्धानि तानि एव त्वया उपास्यानि अदृष्टार्थानि अनुष्ठेयानि नियमेन कर्त्तव्यानि इत्येतत्। नो इतराणि विपरीतानि ।

गुरुजनेषु कर्त्तव्यम्

ये के च अविशेषिताः आचार्यत्वादिधर्मैः अस्मत् अस्मत्तः श्रेयांसः प्रशस्यतराः ते च ब्राह्मणाः न क्षत्रियादयः। तेषां आसनेन आसनादिना त्वया प्रश्वसितव्यम् प्रश्वसनं प्रश्वासः श्रमापनयः। तेषां श्रमाः त्वया अपनेतव्याः इत्यर्थः। तेषां वा आसने गोष्ठीनिमित्ते समुदिते न प्रश्वसितव्यम् प्रश्वासः अपि न कर्त्तव्यः, केवलं तदुक्तसारग्राहिणा भवितव्यम्।

दानस्य अवश्यकर्त्तव्यता

किं च यत्किंचिद् देयम् तत् श्रद्धयैव दातव्यम्। अश्रद्धया अदेयम् न दातव्यम्। श्रिया विभूत्या देयम्। ह्रिया लज्जया देयम्। भिया च संविदा च संविन्मित्रादिकार्यम्।

अनुष्ठानविषयकसंशये शिष्टाचारः प्रमामम्

अथ एवं वर्त्तमानस्य यदि कदाचित् ते तव श्रौते स्मार्त्ते वा कर्मणि वृत्ते वा आचारलक्षणे विचिकित्सा संशयः स्यात् भवेत्। ये तत्र तस्मिन् दशे काले वा ब्राह्मणाः तत्र कर्मादौ युक्ताः इति व्यवहितेन संबन्धः कर्त्तव्यः। संमर्शिनः विचारक्षमाः। युक्ताः अभियुक्ताः कर्मणि वृत्ते वा आयुक्ताः अपरप्रयुक्ताः। अलूक्षाः अरूक्षाः अक्रूरमतयः। धर्मकामाः अदृष्टार्थिनः अकामहताः इत्येतत्। ते यथा तत्र तस्मिन् कर्मणि वृत्ते वा वर्तेरन्। तथा त्वमपि वर्तेथाः। अथ अभ्याख्यातेषु, अभ्याख्याताः अभ्युक्ताः दोषेण संदिह्यमानेन संयोजिताः केनचित्, तेषु यथोक्तं सर्वम् उपनयेत्। ये तत्र इत्यादि समानम्।

एषः आदेशः विधिः। एषः उपदेशः पुत्रादिभ्यः पित्रादीनाम्। एषा वेदोपनिषद् वेदरहस्यम्, वेदार्थः इत्येतत्। एतद् एव अनुशासनम् ईश्वरवचनम्, आदेशवाच्यस्य विधेः उक्तत्वात्, सर्वेषां वा प्रमाण-भूतानाम् अनुशासनमेतत् । यस्मादेवम्, तस्मात् एवं यथोक्तं सर्वम् उपासितव्यम् कर्त्तव्यम् । एवमु च एतद् उपास्यम् उपास्यमेव चैतत्, नानुपास्यम् इत्यादरार्थं पुनर्वचनम् ।

विचारविषयः

अत्रैतच्चिन्त्यते विद्याकर्मणोः विवेकार्थम् - किं कर्मभ्यः एव केवलेभ्यः परं श्रेयः उत विद्यासव्यपेक्षेभ्यः आहोस्विद् विद्याकर्मभ्यां संहताभ्यां विद्यया वा कर्मापेक्षया उत केवलयैव विद्यया इति ।

केवलकर्मभ्यः न विःश्रेयसम्

पूर्वपक्ष

तत्र केवलेभ्यः एव कर्मभ्यः स्यात् समस्त-वेदार्थज्ञानवतः कर्माधिकारात्। “वेदः कृत्स्नः अधिगन्तव्यः सरहस्यो द्विजन्मना” (मनु २.१६५) इति स्मरणात्। अधिगमश्च सहोपनिषदर्थेन आत्मज्ञानादिना। “विद्वान् यजते” “विद्वान् याजयति” इति च विदुषः एव कर्मणि अधिकारः प्रदर्श्यते सर्वत्र। ज्ञात्वा अनुष्ठानम् इति च। कृत्स्नश्च वेदः कर्मार्थः इति हि मन्यन्ते केचित्। कर्मभ्यः चेत् परं श्रेयः नाप्यते वेदः अनर्थकः स्यात्।

सिद्धान्त

न नित्यत्वान्मोक्षस्य। नित्यो हि मोक्षः इष्यते। कर्मकार्यस्य चानित्यत्वं प्रसिद्धं लोके। कर्मभ्यः चेत् श्रेयः अनित्यं स्यात् तच्च अनिष्टम्। "तद्यथा इह कर्मचितो लोकः क्षीयते" (छा.८.१.६) इति न्यायानुगृहीत श्रुतिविरोधात्। काम्यप्रतिषिद्धयोरनारम्भात्, आरब्धस्य च कर्मणः उपभोगेन क्षयात् नित्यानुष्ठानाच्च प्रत्यवायानुपपत्तेः ज्ञाननिरपेक्षः एव मोक्ष इति चेत्, तच्च न। शेषकर्मसम्भवात् तन्निमित्ता शरीरान्तरोत्पत्तिः प्राप्नोति इति प्रत्युक्तम्। कर्मशेषस्य च नित्यानुष्ठानेन अविरोधात् क्षयानुपपत्तिरिति च ।

यच्चोक्तं समस्तवेदार्थज्ञानवतः कर्माधिकारादित्यादि, तच्च न। श्रुतज्ञान-व्यतिरेकाद् उपासनस्य। श्रुतज्ञानमात्रेण हि कर्मणि अधिक्रियते, नोपासनमपेक्षते। उपासनं च श्रुतज्ञानादर्थान्तरं विधीयते मोक्ष-फलम्। अर्थान्तरप्रसिद्धिश्च स्यात्। "श्रोतव्यः" इत्युक्त्वा तद्व्यतिरेकेण "मन्तव्यो निदिध्यासितव्यः" (बृ.उप २.४.५) इति यत्नान्तरविधानात् मनन-निदिध्यासनयोः च प्रसिद्धं श्रवण-ज्ञानादर्थान्तरत्वम्।

द्वितीय-पूर्वपक्ष

विद्यासव्यपेक्ष-कर्मभ्यः अपि न मोक्षः

एवं तर्हि विद्यासव्यपेक्षेभ्यः कर्मभ्यः स्यान्मोक्षः, विद्यासहितानां च कर्मणां भवेत् कार्यान्तर-आरम्भसामर्थ्यम्, यथा स्वतो मरणज्वरादि-कार्यारम्भ-समर्थानामपि विषदध्यादीनां मन्त्रशर्करादि-संयुक्तानां कार्यान्तर-आरम्भसामर्थ्यम्। एवं विद्यासहितैः कर्मभिः मोक्षः आरभ्यते इति चेत्।

समाधानम्

न। आरभ्यस्य अनित्यत्वादिति उक्तो दोषः।

आक्षेपः

वचनाद् आरभ्यः अपि नित्यः एवेति चेत्।

समाधानम्

न। ज्ञापकत्वाद् वचनस्य। वचनं नाम यथाभूतस्य अर्थस्य ज्ञापकम्, न अविद्यमानस्य कर्तृ। न हि वचनशतेनापि नित्यम् आरभ्यते। आरब्धं वा अविनाशि भवेत्।

तृतीयपूर्वपक्षनिरासः

विद्याकर्मणोः समप्राधान्येन समुच्चितयोरपि न मोक्षहेतुता

एतेन विद्याकर्मणोः संहतयोः मोक्षारम्भकत्वं प्रत्युक्तम्।

आक्षेपः

विद्याकर्मणी मोक्षप्रतिबन्धहेतुनिवर्त्तके इति चेत् ।

समाधानम्

न। कर्मणः फलान्तरदर्शनात्। उत्पत्तिसंस्कारविकाराप्तयो हि फलं कर्मणो दृश्यते। उत्पत्यादिफल-विपरीतश्च मोक्षः।

आक्षेपः

गतिश्रुतेः आप्यः इति चेत्। "सूर्यद्वारेण ते विरजाः प्रयान्ति" (मु.उप १.२.११) "तयोर्ध्वमायन् अमृतत्वमेति" (क.उप २.३.१६ छा.उप ८.६.६) इत्येवमादि-गतिश्रुतिभ्यः प्राप्यो मोक्षः इति चेत्।

समाधानम्

न। सर्वगतत्वात्, गन्तृभिश्च अनन्यत्वात्। सर्वगतं ब्रह्म। ब्रह्म-अव्यतिरिक्ताश्च सर्वे विज्ञानात्मनः। तेन नाप्यो मोक्षः। गन्तुः अन्यद् विभिन्नदेशं च भवति गन्तव्यम्। न हि येनैव अव्यतिरिक्तं यत् तत्तेन गम्यते।

तदनन्यत्वप्रसिद्धिश्च **"**तत्सृष्ट्वा तदेवानुप्राविशत्**"** (तै २.६.१) **"**क्षेत्रज्ञं चापि मां विद्धि**"** (भ.गी १३.०२) इत्येवमादि-श्रुति-स्मृतिशतेभ्यः ।

आक्षेप

गत्यैश्वर्यादिश्रुतिविरोध इति चेत्, अथापि स्यात् यद्यप्राप्यः मोक्षः, गतिश्रुतीनाम् **"**स एकधा**"** (छा.उप ७.२६.२)। **"**स यदि पितृलोककामः**"** (छा.उप ८.२.१) **"**स्त्रीभिर्वा यानैर्वा**"** (छा.उप ८.१२.३) इत्यादिश्रुतीनां च कोपः स्यात् इति चेत्।

समाधानम्

कार्यब्रह्मविषयत्वात् तासाम्। कार्ये हि ब्रह्मणि स्व्यादयः स्युः। न कारणे। **"**एकमेवाद्वितीयम्**"** (छा.उप ६.२.१), **"**यत्र नान्यत् पश्यति**"** (छा. ७.२४.१) **"**तत्केन कं पश्येत्**"** (बृ.उप २.४.१४, ४.५.१५) इत्यादिश्रुतिभ्यः।

ज्ञानकर्मसमुच्चय एव अनुपपन्नः

विरोधाच्च विद्याकर्मणोः समुच्चयानुपपत्तिः। प्रविलीनकर्त्रादि-कारकविशेष-तत्वविषया हि विद्या तद्विपरीत-कारकसाध्येन कर्मणा विरुध्यते। न ह्येकं वस्तु परमार्थतः कर्त्तृत्वादिविशेषवत् तच्छून्यं चेति उभयथा द्रष्टुं शक्यते। अवश्यं हि अन्यतरन्मिथ्या स्यात्। अन्यतरस्य च मिथ्यात्वप्रसङ्गे युक्तं यत्स्वाभाविक-अज्ञानविषयस्य द्वैतस्य मिथ्यात्वम्। **"**यत्र हि द्वैतमिव भवति**"** (बृ.उप २.०४.१४) **"**मृत्योः स मृत्युमाप्नोति**"** (का. उप २.१.११) **"**अथ यत्र अन्यत् पश्यति तदल्पम्**"** (छा.उप ७.२४.०१) **"**अन्योऽसावन्योऽहमस्मि इति न स वेद**"** (बृ.उप १.४.१०), **"**उदरमन्तरं कुरुते अथ तस्य भयं भवति**"** (तै.२.०७), इत्यादिश्रुतिशतेभ्यः। सत्यत्वं च एकत्वस्य - **"**एकधैवानुद्रष्टव्यम्**"** (बृ.उप ४.४.२०) **"**एकमेवाद्वितीयम्**"** (छा.उप ६.२.०१), **"**ब्रह्मैवेदं सर्वम्**"** **"**आत्मैवेदं सर्वम्**"** (छा.उप ७.२५.२), इत्यादिश्रुतिशतेभ्यः। न च संप्रदानादि-कारकभेद-अदर्शने कर्म उपपद्यते। अन्यत्वदर्शनापवादश्च विद्याविषये सहस्रः श्रूयते। अतः विरोधो विद्याकर्मणोः। अतश्च समुच्चयानुपपत्तिः। तत्र यदुक्तं संहताभ्यां विद्याकर्मभ्यां मोक्षः इति अनुपपन्नं तत्।

आक्षेपः

विहितत्वात् कर्मणां श्रुतिविरोधः इति चेत् - यदि उपमृद्य कर्त्रादिकारकविशेषम् आत्मैकत्व-विज्ञानं विधीयते सर्पादिभ्रान्तिविज्ञान-उपमर्दक-रज्ज्वादिविषयविज्ञानवत् तर्हि प्राप्तः कर्मविधिश्रुतीनां निर्विषयत्वाद् विरोधः। विहितानि च कर्माणि। स च विरोधो न युक्तः। प्रमाणत्वात् श्रुतीनाम् इति चेत्।

निरस्तकारकब्रह्मोपदेशे न श्रुतिविरोधः

न। पुरुषार्थ-(उपाय)-उपदेशपरत्वात् श्रुतीनाम्। विद्योपदेशपरा तावत् श्रुतिः संसारात् पुरुषः मोक्षयितव्यः इति संसारहेतोः अविद्यायाः विद्यया निवृत्तिः कर्त्तव्या इति विद्याप्रकाशकत्वेन प्रवृत्ता इति न विरोधः। एवमपि कर्त्रादिकारक-सद्भाव-प्रतिपादनपरं शास्त्रं विरुध्यते एव इति चेत्। न। यथाप्राप्तमेव कारकास्तित्वम् उपादाय उपात्तदुरितक्षयार्थं कर्माणि विदधत् शास्त्रं मुमुक्षूणां फलार्थिनां च फलसाधनं, न कारकास्तित्वे व्याप्रियते। उपचितदुरितप्रतिबन्धस्य हि विद्योत्पत्तिः नावकल्पते, तत्क्षये च विद्योत्पत्तिः स्यात्. ततश्च अविद्यानिवृत्तिः, ततः आत्यन्तिकः संसार-उपरमः।

कर्मणः काममूलत्वादपि विद्याकर्मणोः विरोधः

अपि च, अनात्मदर्शिनो ह्यनात्मविषयः कामः। कामयमानश्च करोति कर्माणि। ततः तत्फलोपभोगाय शरीरद्युपादानलक्षणः संसारः। तद्व्यतिरेकेण आत्मैकत्वदर्शिनः विषयाभावात् कामानुपपत्तिः। आत्मनि च अनन्यत्वात् कामानुपपत्तौ स्वात्मन्यवस्थानं मोक्ष इति अतोऽपि विद्याकर्मणोः विरोधः।

कर्मोपसर्जनपक्षस्य निरासः

विरोधादेव च विद्या न मोक्षं प्रति कर्माण्यपेक्षते।

स्वोत्पत्तौ तु अपेक्षते कर्माणि विद्या

स्वात्मलाभे तु पूर्वोपचितदुरितप्रतिबन्ध-अपनयनद्वारेण विद्यायाः हेतुत्वं प्रतिपद्यन्ते कर्माणि नित्यानि इति। अत एव अस्मिन् प्रकरणे उपन्यस्तानि कर्माणि इति अवोचाम (अनुवाक ११)। एवं च अविरोधः कर्मविधिश्रुतीनाम्। अतः केवलायाः एव विद्यायाः परं श्रेयः इति सिद्धम् ।

विद्यायाः गार्हस्थ्यकर्माणि एव अपेक्षितानि उत्पत्तौ इति न नियमः

एवं तर्हि आश्रमान्तरानुपपत्तिः कर्मनिमित्तत्वाद् विद्योत्पत्तेः। गार्हस्थ्ये च विहितानि कर्माणि इति ऐकाश्रम्यम् एव। अतश्च यावज्जीवादिश्रुतयः अनुकूलतराः स्युः। न। कर्मानेकत्वात्। न हि अग्निहोत्रदीन्येव कर्माणि। ब्रह्मचर्यं, तपः, सत्यवचनं, शमः, दमः, अहिंसा इत्येवमादीन्यपि कर्माणि इतराश्रमप्रसिद्धानि विद्योत्पत्तौ साधकतमानि असंकीर्णानि विद्यन्त, ध्यानधारणादिलक्षणानि च। वक्ष्यति च - **"**तपसा ब्रह्म विजिज्ञासस्व**"** इति (तै.३.२) ।

जन्मान्तरकृतकर्मभ्यश्च प्रागपि गार्हस्थ्याद् विद्योत्पत्तिसंभवात्। कर्मार्थत्वाच्च गार्हस्थ्यप्रतिपत्तेः। कर्मसाध्यायां च विद्यायां सत्यां गार्हस्थ्यप्रतिपत्तिः अनर्थिकैव। लोकार्थत्वाच्च पुत्रादीनाम्। पुत्रादि-साध्येभ्यश्च **"**अयं लोकः**"** **"**पितृलोकः**"** **"**देवलोकः**"** (बृ.उप १.५.१६) इत्येतेभ्यः व्यावृत्तकामस्य नित्यसिद्धात्मलोक-दर्शिनः (बृ.उप ४.४.२२) कर्मणि प्रयोजनमपश्यतः कथं प्रवृत्तिः उपपद्यते?

प्रतिपन्नगार्हस्थ्यस्यापि विद्योत्पत्तौ परिपाकाद् विरक्तस्य कर्मसु प्रयोजनमपश्यतः कर्मभ्यो निवृत्तिरेव स्यात् **"**प्रव्रजिष्यन् वा अरे अहमस्मात् स्थानाद् अस्मि**"** (बृ.उप ४.५.२) इत्येवमादि श्रुतिलिङ्गदर्शनात्।

कर्मणि श्रुतेः यत्नाधिक्ये कारणम्

कर्मप्रति श्रुतेः यत्नाधिक्यदर्शनाद् अयुक्तमिति चेत्। अग्निहोत्रादिकर्म प्रति श्रुतेः अधिको यत्नः,। महांश्च कर्मण्यायासः अनेकसाधनसाध्यत्वाद् अग्निहोत्रादीनाम्, तपोब्रह्मचर्यादीनां च इतराश्रमकर्मणां गार्हस्थ्येपि समानत्वाद्, अनन्यसाधनापेक्षत्वात् (पा.भेद - अल्पसाधनापेक्षत्वात्) च इतरेषां, न युक्तः तुल्यवद्विकल्प आश्रमिभिः तस्य इति चेत् ।

न। जन्मान्तरकृतानुग्रहात्। यदुक्तं कर्मणि श्रुतेः अधिको यत्नः इत्यादि, नासौ दोषः। यतो जन्मान्तरकृतमपि अग्निहोत्रादिलक्षणं कर्म ब्रह्मचर्यादिलक्षणं च अनुग्राहकं भवति विद्योत्पत्तिं प्रति। येन जन्मना एव विरक्ताः दृश्यन्ते केचित्। केचित्तु कर्मसु प्रवृत्ताः अविरक्ताः विद्याविद्वेषिणः। तस्माज्जन्मान्तरकृतसंस्कारेभ्यः विरक्तानाम् आश्रमान्तरप्रतिपत्तिरेव (पा.भेद - प्राप्तिरेव) इष्यते।

कर्मफलबाहुल्याच्च। पुत्र-स्वर्ग-ब्रह्मवर्चसादि-लक्षणस्य कर्मफलस्य असंख्येयत्वात् तत्प्रति च पुरुषाणां कामबाहुल्यात् तदर्थं श्रुतेः अधिको यत्नः कर्मसु उपपद्यते आशिषां बाहुल्यदर्शनात् - इदं मे स्याद् इदं मे स्यादिति ।

उपायत्वाच्च। उपायभूतानि हि कर्माणि विद्यां प्रति इत्यवोचाम। उपाये च अधिको यत्नः कर्त्तव्यः, न उपेये।

श्रवणादीनां साक्षाद् विद्यासाधनत्वम्

कर्मनिमित्तत्वाद् विद्यायाः, यत्नान्तरम् आनर्थक्यमिति चेत्। कर्मभ्यः एव पूर्वोपचित-दुरितप्रतिबन्धक्षयाद् विद्या उद्पद्यते चेत् कर्मभ्यः पृथग् उपनिषच्छ्रवणादियत्नः अनर्थकः इति चेत् ।

न । नियमाभावाद्। न हि प्रतिबन्धक्षयादेव विद्या उद्पद्यते, न तु ईश्वरप्रसादतपोध्यानादि-अनुष्ठानाद् इति नियमः अस्ति। अहिंसाब्रह्मचर्यादीनां च विद्यां प्रति उपकारकत्वात्, साक्षादेव च कारणत्वात् श्रवणमननिदिधयासनानाम्। अतः सिद्धानि आश्रमान्तराणि। सर्वेषां च अधिकारः विद्यायाम्। परं श्रेयः केवलायाः विद्यायाः एवेति सिद्धम् ।।